Complete toleration prevailed in matters of religion. Persons of various sects lived peacefully side by side. The two great religions of the time were Brahmanism and Buddhism and though opposed to each other in some of their cardinal doctrines they appear to have much love lost between them. The toleration found among the people was an echo of the freedom of worship that prevailed in the imperial family. Harsha's father was a devotee of the sun. Râjyavardhana was a declared Buddhist while Harsha calls himself Paramamâhesvara (s). We have, however reason to believe that the emperor inclined to Buddhism and Bâṇa actually tells us that Harsha had promised his sister ' to put on the red garments' along with her, after he had completed his work of conquest. The emperor was impartial in his charity and in his quinquennial assemblies distributed wealth to the religious of all denominations. Not only were Brahmanism and Buddhism living peacefully together, but the latter being in favour with the ruling family seems to be somewhat in the ascendant. Even learned Brâhmaṇas sometimes renounced their religion in favour of Buddhism.

The Purâṇas used to be read in public temples and

(s) Vide the Madhuban Copper–plate (Ep. Ind., IV. 67); Banskhera Copper–plate (Ep. Ind. IV. 208).

in the houses of the rich people exactly as they are now. This point is of special importance in view of the fact that an attempt was made by some Western scholars to assign to the Purâṇas a comparatiely later age. Besides references to the personages that played part therein the *Mâhâbhârata* is mentioned by name in the *Harshacharita* and the *Kâdambarî* more than a dozen times and the *Râmâyaṇa* at least half a dozen. When Bâṇa returned from Harsha's court the reader Sudrishti had treated him to a recital of the *Vâyupurâṇa*. When Pratâpa-vardhana died, the Paurâṇikas surrounded Harsha with a view to assuage his grief. The recital of the *Mahâbhârata* is also referred to in the *Kâdambarî*. Bâṇa in his works be-trays unmistakable acquaintance with the *Vishṇupurâṇa* which Wilson had assigned to the 11th century!

Idolatry was a course quite common in those days. In the *Kâdambarî* we get a beautiful description of the temple of the Mahâkâla of Ujjayini and of Shiva 'with four heads.' The Chandikâ finds a place in both of Bâṇa's works and Gaṇapati with his only tusk is also referred to. We know from the *Kâdambarî* that Brahmâ and Kârtikeya who do not receive worship now-a-days were objects of devotional praise in the time of Bâṇa.

The custom of burning oneself on or in expectation of the death of a loved person appears to be quite in vogue. Suicide in such a case was considered not only meritorious in this world but also in the other. Queen Yashovatî burnt herself when she knew for certain that the king was dying and before he actually expired. The young, learned phy-sician, Rasâyana, also entered fire to avoid telling Harsha that the king's disease was hopeless and receives high en-comium for the act at the hands of the prince. But it appears even in those early days people did not approve of the practice. Bâṇa has entered a strong protest against it in his *Kâdambarî*.

Even as now the father used to bring his daughter to his house for her first confinement. The education of the child-

ren of the king, not excluding the daughters, was well looked after. The birth of a daughter was deprecated and she was regarded as a sword hung over her parents' heads all their lives. Bashfulness was considered the natural ornament of ladies and liberty was regarded as unworthy of those born in good families. Women were helpless after the death of their husbands, especially if they had no sons. The education of a typical Brâhmaṇa included the study of the Vedas together with the subsidiary lores and the Shâstras. On occasions of joy people including men and women of noble families used to dance indiscriminately.

Errata

Page 1 l. 2 (com.) *for* दरस्मितसुल्ल *read* दरस्मितसमुल्ल
Page 1 l. 3 (com.) *for* वनतवक्रया *read* वनतवक्त्रया
Page 7 l. 3 *for* वसुघा *read* वसुधा
Page 10 l. 6 *for* सुसया *read* सुसाया
Page 23 l. 8 *for* महारत्रानां *read* महारत्नानां
Page 27 l. 1 *for* (१ पटलकानि *read* (? पटलकानि)
Page 30 l. 5 *for* भूषणरथै *read* भूषणरवै
Page 35 l. 3 *for* जायमामानै *read* जायमानै
Page 57 l. 1 *for* भूसृद्धिः *read* भूभृद्भिः
Page 58 l. 10 *for* दान्तशफरुक *read* दन्तशफरुक
Page 59 l. 4 *for* यौतुक *read* यौतक
Page 60 l. 3. *for* कृत्वा लोकं *read* कृत्वालोकं
Page 65 l. 10 *for* प्रकल्पितगुण *read* प्रकल्पितप्रगुण
Page 67 l. 15 *for* महामयूरी *read* महामाथूरी
Page 76 l. 17 *for* विधेमय *read* विधेयम
Page 82 l. 4 *for* ज्वालाभि *read* ज्वालाभिः
Page 84 l. 4 *for* लोचनवृत्तै *read* लोचनप्रवृत्तै
Page 90 l. 3 *for* प्पार्द्रं *read* ष्पार्दं and *for* लम्बामलालक *read* लम्बामलक
Page 112 l. 1 *for* ततो *read* तातो
Page 114 l. 17 *for* यदीय *read* यदिय
Page 115 l. 2 *for* गगिष्यामि *read* गमिष्यामि
Page 121 l. 8 *for* ददर्श दृष्ट्वा *read* ददर्श । दृष्ट्वा
Page 138 l. 15 *for* इवार्थे *read* इवार्यैं
Page ,, l. 20 *for* चद्रगुप्तं *read* स्कन्दगुप्तं

श्रीवेङ्कटेशो विजयते ।

हर्षचरितम् ।

चतुर्थ उच्छ्वासः ।

योगं स्वप्नेऽपि नेच्छन्ति कुर्वते न करग्रहम् ।
महान्तो नाममात्रेण भवन्ति पतयो भुवः ॥ १ ॥

श्रीवेङ्कटेशो विजयते ।

दरस्मितमुल्लसद्वदनपद्मया पद्मया
ह्रियाऽवनतवक्रया सुचिरमीक्षितः सस्पृहम् ।
विरिंचिशिववासवस्तुतपदांबुजः श्रीपति-
र्विमुक्तपरिसेवितो भवतु मे सदाऽभीष्टदः ॥ १ ॥
वेदान्तपन्नगगवीमुखशास्त्रपारं
यातं सदाचरणवीतवयस्तया च ।
वित्तं, प्रणम्य जनकं गुरुराघवेंद्रं
तस्याश्रवः किमपि धाष्टर्यमहं तनोमि ॥ २ ॥

अथ कविवरो भट्टबाणश्चरित्रनायकजन्मवृत्तान्तप्रस्तावमुपक्रममाण आदौ महतां भुवः पतित्वमितरवैलक्षण्येन वर्णयति ।

योगमिति । महान्तो नाममात्रेण नाम्नैव भुवः पतयो भवन्ति । नामैव महतां भुवःपतित्वे प्रयोजकं नत्वन्ये पराक्रमादयो गुणाः । योगं संबंधं युक्तिं वा स्वप्नेऽपि नेच्छन्ति । भूपतीनां युक्त्यपेक्षित्वमेतेषां तु नेत्यर्थः । करग्रहणं पाणिपीडनं बलिस्वीकारं वा न कुर्वते । पतित्वे हि पाणिपीडनमपेक्षितं नृपत्वे च बलिस्वीकारस्तदुभयमप्येते नाचरन्त्यतो वैलक्षण्यम् । अत्र प्रतिपाद्येन वस्तुना साधारण्यात्पत्युर्भूपतेश्च महतामुत्कर्षस्य द्योतनाच्छद्वशक्तिमूलानुरणरूपो व्यतिरेकालंकारः ॥ १ ॥

सकलमहीभृत्कम्पकृदुत्पद्यत एक एव नृपवंशे ।
विपुलेऽपि पृथुप्रतिमो दन्त इव गणाधिपस्य मुखे ॥ २ ॥

१ अथ तस्मात्पुष्पभूतेर्द्विजवरस्वेच्छागृहीतकोषो नाभिपद्म इव पुण्डरीकेक्षणात्, लक्ष्मीपुरःसरो रत्नसंचय इव रत्नाकरात्, गुरुबुधकविकलावत्तेजस्विभूनन्दनप्रायो ग्रहगण इवोदयस्थानात्, महाभार-

---

वर्ण्यं श्रीहर्षं सकलनृपवंशललामभूतं मनसिकृत्य तादृशस्य महतो जनेर्दुष्प्राप्यत्वं वर्णयति । **सकलेति** । विपुलेपि विशालेपि नृपवंशे पृथुप्रतिमः पृथुनामकराजसदृशः सकलानां महीभृतां नृपाणां कंपकृद् भीतिद एक एव विरल इति तात्पर्यार्थं उत्पद्यते प्रादुर्भवति । गणाधिपस्य गजाननस्य मुखे पृथुमहती प्रतिमा आकारो यस्य तादृश एको दन्त इव । यथा गजाननमुखस्थ एको दन्तः सर्वेषां भूधराणां भीतिदस्तद्वदयमप्यखिलानां नृपाणां कम्पकृत् । अनया चोपमयाऽद्यतनसदृश एव गणाधिपो देवतात्वेन तद्वा स्वीकृत आसीदित्ति गम्यते । अपि च कुलस्योन्नमक एक एव भवति वंश इति प्रसिद्धमेव । "एको गोत्रे प्रभवति पुमान्यः कुटुम्बं बिभर्ति" । गणाधिपो हि परिणतगजलीलामनुकुर्वन् पीडयामास निखिलान् भूभ्रानिति पौराणिकीं प्रसिद्धिमनुसृत्येयमुपमा । पृथुर्नाम सकलनृपश्रेष्ठो मथ्यमानाद्वेनशरीराज्जात आदिनृपो भुवः समीकरणकाले पर्वतान्कंपयामासेति विष्णुपुराणे । उपमालंकारः ॥ २ ॥

अथेति । अथेत्यादौ । 'अथ-कात्स्न्र्यारंभसमुच्चय' इति मेदिनी । राजवंशो नृपान्वयो निर्जगाम प्रादुर्बभूव । कस्मात् पुष्पभूतेस्तन्नामकान्नृपात् । कथंभूतात् पुंडरीके इव कमले इवेक्षणे नयने यस्य तस्मात् । द्विजवरैर्ब्राह्मणश्रेष्ठैः स्वेच्छया गृहीतः स्वीकृतः कोषोऽर्थसंचयो यस्य स नृपवंशः । कथमिव पुंडरीकेक्षणाद्विष्णोर्द्विजवरेण ब्रह्मणा स्वेच्छया गृहीतः कोषः कुड्मलो यस्य स नाभिपद्म इव । सर्ववेदप्रवर्तकत्वाद् द्विजश्रेष्ठत्वं ब्रह्मणः । 'कोषोऽस्त्री कुड्मले । जातिकोशेऽर्थसंघात' इति मेदिनी । उपमालंकारः । साधारणधर्मश्च द्विजवरस्वेच्छागृहीतकोषत्वम् । रत्नानां स्वजातिश्रेष्ठानामाकरात्खनेर्नृपात्पक्षे रत्नाकरात्सागरात् लक्ष्मीः पुरःसराग्रगामिनी यस्य स नृपान्वयो लक्ष्म्यालंकृत इत्यर्थः पक्षे लक्ष्मीः पुरःसरा प्रथममुत्पन्ना यस्य सः । आहिताग्न्यादित्वात्परानिपातः । रत्नानां

---

१ 'महीभार.'

वाहनयोग्यः सागर इव सगरप्रभावात्, दुर्जयबलसनाथो हरिवंश इव शूरान्निर्जगाम राजवंशः । यस्मादविनष्टधर्मधवलाः प्रजासर्गा इव कृतमुखात्, प्रतापाक्रान्तभुवनाः किरणा इव तेजोनिधेः, विग्र-

---

स्वजातिश्रेष्ठानां संचयः पक्षे रत्नसंचयश्चतुर्दश रत्नानीव । 'रत्नं स्वजातिश्रेष्ठेऽपि' इति मेदिनी । 'पुरःसर' इति रूपं पुरःपूर्वकात्सरतेः 'पुरोऽग्रतोऽग्रेषु सर्तेः' इत्यनेन टप्रत्यये निष्पन्नम् । 'संचय' इति संपूर्वकाच्चेः 'एरच्' इत्यनेनाच् । देवासुरैर्मथ्यमानात्सागराच्चतुर्दश रत्नानि प्रादुर्बभूवुरिति भागवते । उदयस्थानात्समुन्नतेः स्थानात्पुष्पभूतेः पक्षे पूर्वपर्वताद् । 'उदयस्तु पुमान्पूर्वपर्वते च समुन्नतौ' इति मेदिनी । गुरव उपदेष्टारः बुधा विद्वांसः कवयः काव्यनिर्मातारः कलावन्तो नृत्यादिकलाप्रवीणास्तेजस्विनः शूरा भूनन्दना राजानः प्राया बहुला यस्मिन् स नृपवंशः । पक्षे गुरुर्बृहस्पतिः बुधः सौम्यः कविः शुक्रः कलावांश्चन्द्रो तेजस्वी सूर्यः भूनन्दनः मंगलः प्राया बहुला यस्मिन् स ग्रहगण इव तारकासमूह इव । सगर इव प्रभावः सामर्थ्यं यस्य तस्मात्पुष्पभूतेः पक्षे सगरस्यापत्यानि पुमांसः सगराः तेषां प्रभावात्सामर्थ्यात् । सगरशब्दाद् 'जनपदशब्दात्क्षत्रियादञ्' अनेन सूत्रेणाञि तद्राजकत्वाद्बहुत्वे लुक् । अस्य जनपदवाचकत्वं कल्प्यमन्यथा सगरेण सागरस्यानिर्मितत्वादसंगतेयमुपमा स्याद् । कपिलापहृताश्वैः सगरपुत्रैरुत्खातः सागर इति महाभारते वनपर्वणि । महाभागो भुवः पालनमुद्यमार्थं गतागतं विदधतीनां नावां भारश्च तस्य वाहनस्य धारणस्य योग्यः । अनेन कविकाले समुद्रतो वाणिज्यमासीदिति ज्ञायते । शूराद्वीरात्पक्षे तन्नामकाद्यदुवंशपूर्वजात् । दुर्जयं जेतुमशक्यमजय्यं यद्बलं सामर्थ्यं तेन युक्तः पक्षे दुर्जयेन दुरभिभवेनार्थाद्भगवता श्रीकृष्णेन बलेन बलरामेण च सनाथो हरिवंशो यादववंश इव । **यस्मादिति** । यस्माद्राजानोऽजायन्तेत्यन्वयः । कृतमुखात्कुशलाद्यस्मात् । 'कृतमुखः कृती कुशल इत्यपि' इत्यमरः । अविनष्टो धर्मो येषां तादृशान् धवान् धूर्तान् लान्ति स्वीकुर्वन्ति ते धर्मनिरतधूर्तग्रहणे बद्धादरा इत्यर्थः । 'धवः पुमान्नरे धूर्ते' इति मेदिनी । अथवाऽविनष्टेन धर्मेण धवलाः शुभ्रा यशस्वन्त इति यावत् । कथमिव ' कृतमुखात्कृतयुगारंभादविनष्टेन पूर्णेन धर्मेण धवलाः प्रजासर्गा इव । धर्मो हि चतुष्पात् स च कृतयुगे परिपूर्ण आसीत्तदनुरोधेनाविनष्टेति विशेषणम् । अग्रे च प्रतियुगं तस्यैकैकः पादो नष्टः । धर्मस्य चतुष्पात्त्वं श्रीहर्षेण नलवर्णने प्रदर्शितम् । 'पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे' इति । तेजसां निधेर्यस्माद्राज्ञःपक्षे तेजोनिधेः

---

१ 'प्रभवात्'.

ह्व्याप्तदिङ्मुखा गिरय इव भूभृत्प्रभवात्, धरणिधारणक्षमा दि-
ग्गजा इव ब्रह्मकरात्, उदधीन्पातुमुद्यता जलधरा इव घनागमात्,
इच्छाफलदायिनः कल्पतरव इव नन्दनात्, सर्वभूताश्रया विश्वरूप-
प्रकारा इव श्रीधरादजायन्त राजानः ।

२ तेषु चैवमुत्पद्यमानेषु क्रमेणोदपादि हूणहरिणकेसरी सिन्धुरा- 5
जज्वरो गुर्जरप्रजागरो गान्धाराधिपगन्धद्विपकूटपाकलो लाटपाटवपा-
टच्चरो मालवलक्ष्मीलतापरशुः प्रतापशील इति प्रथितापरनामा प्र-

सूर्यात् । प्रतापेन तेजसा पराक्रमेणेत्यर्थ आक्रान्तं भुवनतलं यैस्ते राजानः
पक्षे प्रतापेन तापेनाक्रान्तं भुवनतलं यैस्ते किरणाः । 'प्रतापस्तापतेजसोः' इति
मेदिनी । भूभृतां राज्ञां भूधराणां च प्रभवाज्जन्ममूलाद् । विग्रहेण समरेण
देहेन च व्याप्तानि दिङ्मुखानि यैस्ते राजानो गिरयश्च । ब्रह्मकरात्परब्रह्मचिन्त-
कात्पक्षे प्रजापतेः । ब्रह्मकरोतीति ब्रह्मकर इति व्याख्यानमसंगतमणापत्तेः ।
धरण्याःपृथ्व्या धारणे वहने क्षमाः समर्था दिग्गजा इव । नृपपक्षेप्येवमेव ।
' सूर्यस्याण्डकपाले द्वे समानीय प्रजापतिः । हस्ताभ्यां परिगृह्याथ सप्त सामा-
न्यगायत । गायतो ब्रह्मणस्तस्मात्समुत्पेतुर्मतंगजाः ' इति पालकाप्यः । घनो
दृढ आगमः शास्त्रं यस्य तस्माद्यस्मात्पक्षे वर्षाकालात् । उदधीन् पातुं रक्षितुं
प्राशितुं च । वर्षाकाले हि मेघाः समुद्रोपरि लंबमाना जलपानायागता इति
तर्कयित्वेयमुपमा । नन्दयति संतोषयति सुहृदः स नन्दनस्तस्मात्पक्षे तन्नामका
त्स्वर्गोद्यानात् । नन्दनेत्यत्र ' नन्दि ग्रहिपचादिभ्य० ' इत्यनेनल्युः । इच्छायाः
फलं ददति ते कल्पतरव इव । 'सुप्यजातौ णिनिस्ताच्छील्य ' इत्यनेन णिनिः ।
श्रीधराद्राजलक्ष्म्या आधारात्पक्षे विष्णोः । सर्वेषां भूतानां प्राणिनामाश्रया अथवा
सर्वेषां भूतानां पंचमहाभूतानामाश्रया विश्वरूपप्रकारा इव । गीतायां हि विश्व-
रूपदर्शनवेलायामर्जुनेन सर्वभूतानि तत्र दृष्टानि तदनुरोधत इयमुपमा ।

तेष्विति । हूणा राजविशेषा एव हरिणा मृगास्तेषां केसरी तद्घातको
मृगराजः सिंधुराजस्य ज्वरः संतापकः गुर्जराणां तद्देशनृपाणां प्रजागरो निद्रा-
नाशः । गान्धाराणामधुना ' कंदाहार ' इति प्रसिद्धानां देशानामधिप एव
गंधद्विपो मत्तगजस्तस्य कूटपाकलः त्रिदोषजो ज्वरः । ' पित्तज्वरः पाकलोऽस्य
कूटपूर्वस्त्रिदोषज ' इति त्रिकाण्डशेषः । यद्यपि कूटपाकलशब्दो हस्तिज्वर-

---

१ ' प्रसवात् '. ' प्रभावात् '. २ ' द्विपपाकलः ', 'द्विपकूटहस्तिज्वरः
पाकलः '

भाकरवर्धनो नाम राजाधिराजः । यो राज्याङ्गसङ्गीन्यभिषिच्यमान एव मलानीव मुमोच धनानि । यः परकीयेणापि कातरवल्लभेन रणमुखे तृणेनेव धृतेनालज्जत जीवितेन । यः करधृतधौतासिप्रतिबिम्बितेनात्मनाप्यदूयत समितिषु सहायेन, रिपूणां पुरः प्रधनेषु धनुषापि नमता । यो मानी मानसेनाखिद्यत । यश्चान्तर्गतापरिमितरिपुशल्यशङ्कुकीलितामिव निश्चलामुवाह राजलक्ष्मीम् । यश्च सर्वासु दिक्षु समीकृततटावटविटपाटवीतरुतृणगुल्मवल्मीकगिरिगह्वरैर्दण्डयात्रापथैः पृथुभिर्भृत्योपयोगाय व्यभजतेव वसुधां बहुधा । यं चालब्धयुद्धदोहदमात्मीयोऽपि सकलरिपुसमुत्सारकः परकीय इव तताप प्रतापः । यस्य 5

वाची तथापि गन्धद्विपपदसंनिधानाज्ज्वरमात्रवाच्येव । 'विशिष्टवाचकानां पदानां सति पृथग् विशेषणत्वे विशेष्यमात्रपरत्वम्' इति न्यायात् । लाटानां पाटवस्य कौशलस्य पाटच्चरश्चोरः । पाटवशब्दः पटुशब्दाद् 'इगन्ताच्च लघुपूर्वाद्' इत्यनेन भावेऽणि निष्पन्नः । पाटच्चर इति पाटयन् नाशयंश्चोरयतीति पाटच्चर इति पृषोदरादित्वात्साधुः । मालवस्य मालवाधिपस्य लक्ष्मीरेव लता तस्याः परशुः कुठारः । प्रथितं प्रसिद्धमपरमन्यन्नाम यस्य सः । राज्यांगस्य राज्यशरीरस्य संगः संबन्धो विद्यते येषां तानि धनानि मलानीव मुमोच । स्नानेन मलनाशो भवति तद्वदनेनापि राज्याभिषेकवेलायां मलभूतानि धनान्युत्सृष्टानि । अनेन दानवेलायां धनेऽनासक्तिः सूच्यते । परकीयेण शत्रुसंबंधिना रणमुखे समराग्रभागे धृतेन कातरस्य भीरोर्वल्लभेन तृणेनेव जीवितेनालज्जत । रणे भीरुः शरणं गच्छंस्तृणं मुखे धत्ते । अस्य तु तृणस्वीकारेण सहैव तादृशं जीवितं लज्जाकरमाभात् । करे हस्ते धृते धौते शुभ्रेऽसौ खड्गे प्रतिबिंबितेनात्मना स्वप्रतिबिंबेनापि प्रधनेषु युद्धेषु सहायेन । समितिषु स्वप्रतिबिंबमपि सहायं नैच्छदित्यर्थः । मानी सगर्वो मानसेऽन्तःकरणे नाखिद्यत खिन्नो न बभूव । अथवा मानी यो मानसेन उच्चपदाकांक्षारूपमनोविकारेणाखिद्यत । यथा रावणः कर्तव्याभावं पश्यन्नखिद्यत तद्वदिति वा । तथा च प्रसन्नराघवे 'लंकेश्वरः खिद्यते' इति । अथ वा "समितिषु सहायेन" इत्यतः "अखिद्यत" इत्यंतमेकं वाक्यम् । यो मानी सगर्वो रिपूणां पुरो नमता सहायेन धनुषापि करणेन मानसेन अधिकरणे तृतीया मनस्यखिद्यत । अन्तर्गतान्यपरिमितानि असंख्येयानि रिपुशल्यानि शत्रुबाणा एव कीलकास्तैः कीलितामिव रुद्धामिव

१ 'बन्धनानि' २ 'अन्तर्गतामपरिमित'.

च वह्निमयो हृदयेषु, जलमयो लोचनपुटेषु, मारुतमयो निःश्वसितेषु, क्षमामयोऽङ्गेषु, आकाशमयः शून्यतायां,पञ्चमहाभूतमयो मूर्त इवाहृश्यत निहतप्रतिसामन्तान्तःपुरेषु प्रतापः। यस्य चासन्नेषु भृत्यरत्नेषु प्रतिबिम्बितेव तुल्यरूपा समलक्ष्यत लक्ष्मीः। तथा च यस्य प्रतापाग्निना भूतिः शौर्योष्मणा सिद्धिरसिधाराजलेन वंशवृद्धिः शस्त्रव्रणमुखैः 5 पुरुषकारोक्तिर्धनुर्गुणकिणेन करगृहीतिरभवत्। यश्च वैरमुपायनं विग्र-

---

राज्यलक्ष्मीम्। शत्रुबाणा अस्योपकारका आसन् येन चांचल्यचंचू राज्यलक्ष्मीस्तस्मिन् दृढं स्थितासीदिति भावः। 'संख्याकीलकयोःशंकुः' इति शाश्वतः 'खिळा' इति महाराष्ट्रभाषायाम्। कादंबर्यां तु राज्यलक्ष्म्याः शूद्रके चिरस्थितिरनेनेत्थं वर्णिता। 'अतिचिरकाललग्नमनेककुनृपतिसहस्रसंपर्ककलंकमिव क्षालयन्ती यस्य कृपाणधाराजले चिरमुवास राज्यलक्ष्मीः'। पुनश्च राजानं विशिनष्टि। **यश्चेति**। समीकृतानि समस्थलीकृतानि तटानि तीराणि आवटा गर्ता विटपाः शाखा अटवीतरवो वनवृक्षा तृणं गुल्मानि क्षुद्रवृक्षा वल्मीकानि मृत्कूटा गिरयःपर्वता गहनानि वनानि च येषु तैः। गमनविघ्नकारिणां विध्वंसनेन कृता मार्गा इति तात्पर्यम्। विभजनाय सर्वेषां पदार्थानां समीकरणमावश्यकम्। **यं चेति**। अलब्धोऽप्राप्तो युद्धस्य रणस्य दोहदोऽभिलाषो येन सः। दोहद इति दोहपूर्वकाद्ददातेः 'आतोऽनुपसर्गे कः' इत्यनेन के निष्पन्नम्। 'दोहदो गर्भलक्षणे। अभिलाषे तथा गर्भे' इति हैमः। सकालानां रिपूणां समुत्सारको नाशकः। 'शेषे' षष्ठी। अन्यथा तृजकाभ्यां कर्तरीति समासनिषेधः स्यात्। याजकादिगणे च समुत्सारकशब्दाभावात्। **यस्य चेति**। हृदयेषु वन्हिमयो वन्हिस्वरूपः संतापकत्वात्, लोचनपुटेषु नेत्रयुगेषु जलमयो रोदनाश्रुप्रवर्तकत्वात्, निःश्वसितेषु दुःखजेषु दीर्घेषु श्वासेषु मारुतमयः, अंगेषु अवयवेषु क्षमामयः पृथ्व्या उपरीतस्ततो लुण्ठनेन धूलिव्याप्तत्वात्प्रस्तरकठिन कायत्वाद्वा, शून्यतायामाकाशमयः अन्यकार्याभावाच्छून्यत्वम्, पंचमहाभूतमयः पृथ्व्यप्तेजोवाय्वाकाशमयः। सर्वत्रापि 'मयट्' 'तत्प्रकृतवचने मयट्' इत्यनेन प्रकृतवचनाभावेपि। अतएव यरोऽनुनासिकसूत्रे नागेशेनोक्तम्।'चिन्मयमिति। स्वार्थिकस्तत्प्रकृतवचन इति मयट्। तत्र तदिति वाक्यभेदेन क्वचित् प्राचुर्यरूपप्रकृतवचनाभावेऽपि मयट्'। अतएव 'तादात्म्यार्थे विकारार्थे प्राचुर्यार्थे मयट् तथा' इत्यभियुक्तोक्तिः संगच्छते। मूर्त इव मूर्तिमानिव। 'मूर्त स्याद्०। मूर्तिमत्यपि' इति मेदिनी। प्रतिसामन्तानां शत्रुपक्षीयाणां नृपाणामन्तःपुरेष्ववरोधेषु। **यस्य चेति**। आसन्नेषु समीपस्थेषु भृत्यर-

हमनुग्रहं समरागमं महोत्सवं शत्रुं निधिदर्शनमरिबाहुल्यमभ्युदयमा-
हवाह्वानं वरप्रदानमवस्कन्दपातं दिष्टवृद्धिं शस्त्रप्रहारपतनं वसुधा-
रारसममन्यत। यस्मिंश्च राजनि निरन्तरैर्यूपनिकरैरङ्कुरितमिव कृतयु-
गेन, दिङ्मुखविसर्पिभिरध्वरधूमैः पलायितमिव कलिना, ससुधैः सुरा-
लयैरवतीर्णमिव स्वर्गेण, सुरालयशिखरोद्धूयमानैर्धवलध्वजैः पल्लवि- 5

त्नेषु सेवकश्रेष्ठेषु प्रतिबिम्बितेव संजातप्रतिबिम्बेव तुल्यानि सदृशानि रूपाणि यस्याः सा लक्ष्मीः समलक्ष्यत। अत्रासन्नपदेन बिम्बग्रहणयोग्यत्वं रत्नपदेन योग्यानामेव सत्कारश्च व्यज्येते। **तथेति**। प्रतापः पराक्रम एवाग्निस्तेन भूतिः कल्याणं भस्म वा। शौर्योष्मणा सिद्धिर्योगनिष्पत्तिः। उष्मणा च पाकसिद्धिः 'सिद्धिः स्त्री योगनिष्पत्तिः' इति मेदिनी। असिधाराजलेन खड्गधारोदकेन वंशस्य कुलस्य वृद्धिरभ्युदयः। जलेन च वंशानां वेणूनां वृद्धिः। खड्गाग्रेण हि स्वान्वयस्य संपदनेन संपादितेति भावः। 'वृद्धिस्तुवर्जने। कालांतरे चाभ्युदये स्त्रियामुत्तमयोषिति' इति मेदिनी। शस्त्रव्रणानां शस्त्रक्षतानां मुखैरग्रभागैः पुरुषकारस्य पराक्रमस्योक्तिर्भाषितम्। पराक्रमकथने नान्यापेक्षा व्रणा एव तत्कथका इत्यर्थः। भाषितमपि मुखैर्भवति। धनुर्गुणस्य धनुष्यज्यायाः किणेन 'घट्टा' इतिमहाराष्ट्रभाषायां प्रथितेन व्रणजचिन्हेन करगृहीतिर्हस्तस्वीकारः। अनेन हि तस्य धनुर्विद्यातत्परत्वं लक्ष्यते। तदासक्तस्य हि हस्ते किणो भवति। पक्षे करगृहीतिर्दण्डग्रहणम्। **यश्चेति**। वैरं विरोधम्। 'वीर' शब्दाद्युवादित्वादण् कर्मार्थे। उपायनमुपहारम्। विग्रहं समरम्। समरस्य युद्धस्यागमं प्राप्तिम्। निधिदर्शनं द्रव्यसंग्रहदर्शनम्। अरीणां शत्रूणां बाहुल्यमाधिक्यमभ्युदयमुत्कर्षम्। आहवाय समरायाव्हानं वरप्रदानम्। अवस्कन्दपातमज्ञाताभिगमनं दिष्टस्य भाग्यस्य वृद्धिम्। शस्त्रप्रहारस्य पतनं वसुधाराया: सुवर्णप्रवाहस्य रसमन्यत। **यस्मिन्निति**। निरंतरैर्घनैर्यूपनिकरैर्यज्ञस्तंभैः करणैः कृतयुगेन सत्ययुगेनांकुरितमिव। अंकुराञ्जनयत्यंकरयति 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इत्यनेन णिचि 'नंपुसके भावे क्तः' इत्यनेन क्ते निष्पन्नोऽङ्कुरितशब्दः। यूपा भूमेर्निर्गताः कदल्यंकुरा इव सत्ययुगांकुरा इति कल्पनयेयमुक्तिः। अतो यूपस्य पल्लवरूपत्वाभावादसंगतमिदमिति कल्पना परास्ता। यथा कदल्यंकुरा भूमिमुद्भिद्य बहिरागच्छन्ति तद्वदिमे कृतयुगांकुरा इति भावः। दिशां हरितां मुखेषु विसर्पन्ति प्रसरन्ति तच्छीलैरध्वरधूमैर्यज्ञधूमैः करणैः कलिना कलियुगेन पलायितमिव। यथा पिशाचादयो मन्त्रपूतधूमसंपर्कभीत्या पलायन्ते तद्वदय-

तामिव धर्मेण, बहिरुपरचितविकटसभासत्रप्रपाप्राग्वंशमण्डपैः प्रसूतमिव ग्रामैः, काञ्चनमयसर्वोपकरणैर्विभवैर्विशीर्णमिव मेरुणा, द्विजदीयमानैरर्थकलशैः फलितामिव भाग्यसंपदा।

3 तस्य च जन्मान्तरेऽपि सती पार्वतीव शंकरस्य, गृहीतपरहृदया लक्ष्मीरिव लोकगुरोः, स्फुरत्तरलतारका रोहिणीव कलावतः, 5 सर्वजनजननी बुद्धिरिव प्रजापतेः, महाभूभृत्कुलोद्गता गङ्गेव वाहिनीनायकस्य, मानसानुवर्तनचतुरा हंसीव राजहंसस्य, सकललोका-

---

मपि यज्ञधूमभीत्या पलायितः। अथवा कृष्णवर्णा दिग्विसर्पिणो धूमा एव पलायमानानि कलिस्वरूपाणीति कल्पना। सुधयाऽमृतेन शुभ्रवर्णचूर्णेन 'चुना' इति प्रसिद्धेन वा सहितैः सुरालयैर्देवगृहैः स्वर्गेण स्वर्लोकेनावतीर्णमिवाध आगतमिव। 'सुधा स्त्री लेपने०। अमृते' इति मेदिनी। स्वर्गे ससुधानि सामृतानि देवगृहाण्यत्रापि शुभ्रचूर्णापरपर्यायसुधालिप्तान्यतः स्वर्गो महीमागतो न्विति कल्पना। सुरालयानां देवगृहाणां शिखरेषूर्ध्वभागेषूद्धूयमानैः कम्पमानैर्धवलैः शुभ्रैर्ध्वजैः पताकाभिर्धर्मेण पल्लवितामिव। पल्लवितेत्ययं शब्दोऽङ्कुरितवज्ज्ञातव्यः। बहिर्बहिर्भाग उपरचिताः कृता विकटा विशाला सभा धर्मशाला सत्रं सदादानं सदैवान्नदानं प्रपा पानीयशाला प्राग्वंशमंडपो हविःशालायाः पूर्वभागे यजमानादीनां निवासार्थं निर्मितो मण्डपस्तैः करणैर्ग्रामैः प्रसूतमिव। एतेषां बाहुल्याद्बहिर्भागेऽन्ये ग्रामा उत्पन्ना न्विति कल्पना। 'सत्रं यज्ञे सदादानाच्छादनारण्यकैतवे' इति मेदिनी। 'प्रपा पानीयशालिका' 'प्राग्वंशः प्राग्घविर्गेहाद्' इति चामरः। काञ्चनमयानि सुवर्णमयानि सर्वोपकरणानि येषां तैर्विभवैः संपद्भिः करणैर्मेरुणा विशीर्णमिव विदीर्णमिव। द्विजेभ्यो ब्राह्मणेभ्यो दीयमानैरर्थकलशैर्धनपूर्णघटैः फलितामिव। घटाकाराणि नारिकेलसदृशानि फलानि भाग्यसंपदः संजातानीति तात्पर्यार्थः।

तस्येति। जन्मान्तरेप्यन्यस्मिञ्जन्मन्यपि सतीव पार्वतीव। दक्षस्य प्रजापतेर्दुहिता सती पितृभवने यज्ञावलोकनायागता। तत्रावमानिताऽऽत्मानमग्निसाच्चकार पार्वतीरूपेणोदियाय शंकरं वव्रे चेति महाभागवते चतुर्थस्य पंचमेऽध्याये। पक्षे सती पतिव्रता। गृहीतमाकर्षितं परहृदयमन्यमानसं वत्सलतया यया सा। लक्ष्मीपक्षे गृहीतपरहृदयेति सुलभम्। लोकगुरोर्लोकाधिपस्य विष्णोश्च।

---

१ 'गृहीतहृदया'

र्चितचरणा त्रयीव धर्मस्य, दिवानिशममुक्तपार्श्वस्थितिररुन्धतीव महामुनेः, हंसमयीव गतिपु, परपुष्टमयीवालापेपु, चक्रवाकीमयीव पतिप्रेम्णि, प्रावृण्मयीव पयोधरोन्नतौ, मदिरामयीव विलासेपु, निधिमयीवार्थसंचयेपु, वसुधारामयीव प्रसादेपु, कमलमयीव कोपसंग्रहेपु, कुसुममयीव फलदानेपु, संध्यामयीव वन्द्यत्वे, चन्द्रमयीव निरुष्मत्वे, दर्पणमयीव प्रतिप्राणिग्रहणेपु, सामुद्रमयीव परचित्तज्ञानेपु, परमात्ममयीव व्याप्तिपु, स्मृतिमयीव पुण्यवृत्तिपु, मधुमयीव संभाषणेपु, अमृतमयीव तृप्यत्सु, वृष्टिमयीव भृत्येपु, निर्वृतिमयीव सखीपु, वेतसमयीव 5

स्फुरन्त्यौ तरले तारके कनीनिके यस्याः । पक्षे स्फुरन्ती तरला चंचला तारका नक्षत्रं यस्याः सा रोहिणीव । कलावतः कलानिपुणस्य पक्षे चन्द्रस्य । सर्वलोकजननी सर्वासां प्रजानां वात्सल्यान्माता । पक्षे जन्यतेऽनया जननी उत्पादनसाधनं करणे ल्युट् सर्वलोकानां जनन्युत्पादिका । वाहिनीनायकस्य सेनाध्यक्षस्य समुद्रस्य च । महाभूभृद् महानृपो हिमालयश्च तस्य कुल उद्भूतोत्पन्ना । मानसमन्तःकरणं तदाख्यं सरश्च तस्यानुवर्तनं अनुकूलाचरणे तत्र स्थितौ च चतुरा कुशला राजहंसस्य नृपश्रेष्ठस्य पक्षिणश्च । त्रयीव वेदत्रयीव । 'श्रुतिः स्त्री वेद आम्नायस्त्रयी' इत्यमरः । सकलैर्लोकैरर्चितौ पूजितौ चरणौ पादौ पक्षे चरणाःशाखा यस्याः सा । दिवानिशं रात्रिंदिवममुक्ता पार्श्वे समीपे स्थितिर्यया सा । महामुनेर्मननान्मुनिर्विचारवांस्तस्याथवा राजर्षेः पक्षे वशिष्ठस्य । आकाशे हि वशिष्ठमपरित्यजन्त्यरुन्धती तिष्ठति तदनुरोधत इदम् । हंसमयीव हंसीव । अत्राप्येव मयट् तादात्म्ये प्रमाणं तु पूर्वमेवोक्तम् । आलापेषु भाषणेषु । प्रावृण्मयीव वर्षाकालमिव पयोधरयोः स्तनयोः पयोधराणां मेघानां चोन्नतौ । मदिरामयीव मद्यमिव विलासेषु शृंगारजेषु विकारेषु । 'यानस्थानासनादीनां मुखनेत्रादिकर्मणाम् । विशेषस्तु विलासः स्यादिष्टसंदर्शनादिना' इति विश्वनाथः । मदिरा चाकस्मात्क्रोधादीन् विकाराञ्जनयतीति प्रसिद्धमेव । अर्थानां धनानां संचयेषु संग्रहेषु । वसुधारामयीव सुवर्णधारेव प्रसादेष्वनुग्रहेषु । 'प्रसादोऽनुग्रहे' इति मेदिनी । कोषाणामर्थसंचयानां कुड्मलानां वा । स्त्रीणां पुष्पकलिकासु स्वाभाविकी प्रीतिस्तेन युज्यत इदं वर्णनम् । कुसुममयीव पुष्पाणीव फलानां दानेषु । कुसुमेभ्यो यथा फलानि जायन्ते तद्वदस्याः सकाशाद्भृत्यानां सेवा-

१ 'चक्रवाकमयी'. २ प्रसाददानेषु'.

गुरुषु, गोत्रवृद्धिरिव विलासानाम्, प्रायश्चित्तशुद्धिरिव स्त्रीत्वस्य, आज्ञासिद्धिरिव मकरध्वजस्य, व्युत्थानबुद्धिरिव रूपस्य, दिष्टवृद्धिरिव रतेः, मनोरथसिद्धिरिव रामणीयकस्य, दैवसंपत्तिरिव लावण्यस्य, वंशोत्पत्तिरिवानुरागस्य, वरप्राप्तिरिव कान्तेः, सर्गसमाप्तिरिव सौन्दर्यस्य, आयतिरिव यौवनस्य, अनभ्रवृष्टिरिव वैदग्ध्यस्य, अयशःप्रमृष्टिरिव लक्ष्म्याः, यशःपुष्टिरिव चारित्रस्य, हृदयतुष्टिरिव धर्मस्य, सौभाग्यपरमाणुसृष्टिरिव प्रजापतेः, शमस्यापि शान्तिरिव, विनयस्यापि 5

फललाभः। वन्द्यत्वे नमस्कार्यत्वे। निरुष्मत्वे उष्मा गर्व औष्ण्यं च। दर्पणमयीव मुकुर इव प्राणिनि प्राणिनीति प्रतिप्राणि प्रतिप्राणिग्रहणं स्वीकारः प्रतिबिम्बोत्पादनं च। सामुद्रमयीव सामुद्रशास्त्रमिव। परेषां चित्तस्य मनसो ज्ञानेषु। सामुद्रविद्यातोऽन्यदीयस्वभावज्ञानं जायत इति प्रथितम्। 'वेत्ता स्त्रीपुंसयोश्चिन्हं सामुद्रिक उदाहृतः' इति हारावली। परमात्ममयीव ब्रह्मेव व्याप्तिषु। ब्रह्मसर्वव्यापीति वेदान्तराद्धान्तः। अस्या अपि कार्यार्थं सर्वत्र गमनेन सर्वत्र व्याप्तिः। तृष्यत्सु तृष्णापीडितेषु अमृतमयीव सुधेव। जलादिदानेन तेषां तृष्णाशमकत्वात्। वृष्टीमयीव वृष्टिरिव सेवकेषु सदैव धनवर्षणात्। निर्वृतिमयीव चित्तस्वास्थमिव सखीषु वयस्यासु। तन्मानसमोदजनकत्वात्। वेतसमयीव नम्रत्वाद् गुरुषु श्वश्र्वादिवृद्धेषु। विलासानां गोत्रस्य कुलस्य वृद्धिरिव। प्रायश्चित्तशुद्धिरिव पवित्रीकरणमिव स्त्रीत्वस्य स्त्रीजातेः। अनया निखिला स्त्रीजातिः पवित्रिता। आज्ञासिद्धिरिव। अमोघमस्त्रं नु मदनस्येति तात्पर्यार्थः। व्युत्थानबुद्धिरिवेति। व्युत्थानं समाधेश्चलनम्। स्वाधिक्यसंपादनाय समाधिमाश्रितस्य रूपस्य समाधेरवतरणवेलायां जायमानं ज्ञानमित्यर्थः। रतेर्मदनभार्याया दिष्टस्य भागधेयस्य वृद्धिरिव। मृतो मदनः कदाचिदनया साधनभूतयोज्जीवेतेति रतेर्भाग्यवृद्धिः। रामणीयकस्य रमणीयशब्दाद् 'योपधाद्गुरूपोत्तमाद्वुञ्' इत्यनेन भावे वुञ्। अनुरागस्य प्रेम्णो वंशोत्पत्तिरन्वयसंभूतिः। सर्गसमाप्तिरुत्पत्तेः समाप्तिः पराकाष्ठेत्यर्थः आयतिरुत्तरकाल इव यौवनस्य तारुण्यस्य। युवादित्वादण् भावे। अनभ्रवृष्टिः अभ्रेण सहिता वृष्टिरभ्रवृष्टिर्न तथाऽनभ्रवृष्टिः सा चाश्चर्यजनिका पुण्यवल्लभ्या च। वैदग्ध्येनेयं पुण्यतो लब्धाश्चर्यकारिणी। वैदग्ध्यं तस्यामतीवेति तात्पर्यम्। लक्ष्म्या अयशसः 'यः सुन्दरस्तद्वनिता

---

१ दिष्टि'. २ 'सौभाग्यस्य, उत्पत्तिभूमिरिव कान्तेः'. ३ 'शुद्धि'

विनीतिरिव, आभिजात्यस्याप्यभिजातिरिव, संयमस्यापि संयतिरिव, धैर्यस्यापि धृतिरिव, विभ्रमस्यापि विश्रान्तिरिव यशोवती नाम महादेवी प्राणानां प्रणयस्य विस्रम्भस्य धर्मस्य सुखस्य च भूमिरभूत् । यास्य वक्षसि नरकजितो लक्ष्मीरिव ललास ।

4 निसर्गत एव च स नृपतिरादित्यभक्तो बभूव । प्रतिदिनमुदये दिनकृतः स्नातः सितदुकूलधारी धवलकर्पटप्रावृतशिराः प्राङ्मुखः क्षितौ जानुभ्यां स्थित्वा कुङ्कुमपङ्कानुलिप्ते मण्डलके पवि- 5

कुरूपा । या सुन्दरी सा पतिरूपहीना । यत्रोभयं तत्र दरिद्रता च । विधेर्विचित्राणि विचेष्टितानि ' इत्यादिरूपेण कविभिरुक्ताया अपकीर्तेः प्रमृष्टिः शोधिका नाशिका । अनुरूपभर्तृगामिन्यपि लक्ष्मीयुतेत्यर्थः । चारित्र्यं पातिव्रत्यम् । सौभाग्यस्य परमाणूनां सूक्ष्मावयवानां सृष्टिरुत्पत्तिः । प्रथमतो ब्रह्मणा सौभाग्यमुत्पिपत्सुनेयमेव निर्मितेति भावः । ' जालसूर्यमरीचिस्थं यत्सूक्ष्मं दृश्यते रजः । तस्य त्रिंशत्तमो भागः परमाणुः स उच्यते ' । आभिजात्यं कुलीनत्वम् । विभ्रमस्य दयितागमने बाहुमूलादीनां व्यक्तीकरणरूपभावस्य विश्रान्तिस्त्वरा । विस्रम्भस्य विश्वासस्य । नरकान् कुंभीनसादीन् जयति सः । ' क्विप् च ' इत्यनेन क्विप् । पक्षे नरकासुरं जितवतो नारायणस्य । ललास शुशुभे आलिलिंग वा ।

निसर्गत इति । निसर्गत एव स्वभावत एव । दिनकृतः सूर्यस्योदये सिते शुभ्रे दुकूले क्षौमजे वसने धरति सः । धवलेन शुभ्रेण कर्पटेन शिरोवेष्टनवस्त्रेण प्रावृतं वेष्टितं शिरो येन सः । यद्यपि कर्पटशब्दः स्वामिमतेन द्रवद्रव्यं येन पूयेत तद्वाचको मुकुटमतेन मलिनवसनखण्डवाचकोऽन्येषां च मतेन करधृतवस्त्र (हातरुमाल) वाचकस्तथाप्यत्र शिरोवेष्टनवाचको ग्राह्यः । बाणकाले दुकूलेन शिरोवेष्टनपद्धतिः स्नानोत्तरमासीत् । तेनैव कादम्बर्यां स्नानोत्तरमित्थं वर्णितः शूद्रकः ' अतिधवलजलधरच्छेदशुचिना दुकूलपटपल्लवेन तुहिनगिरिरिव गगनसरित्स्रोतसा कृतशिरोवेष्टनः ' । कादम्बरीवर्णनेन हर्षचरितरचनाकाले न तादृशी प्रतिभा बाणस्यासीदिति सुव्यक्तम् । पद्मरागाणां माणिक्यानां पात्र्यां भाजने निहितेन स्थापितेन स्वहृदयेनेव स्वमानसेनेव यथा मनः सूर्यानुरक्तं तद्वदनुरक्तेन रक्तकमलषण्डेन रक्तकमलसमूहेनार्चां पूजां ददौ । अर्घ्यमिति पाठः समीचीनः । प्रत्यूषसि प्रभाते मध्यंदिने मध्यान्हे दिनान्ते सायंकाले । एतेन तदा त्रिः संध्यावंदनपद्धतिरासीदिति ज्ञायते । प्राध्वं सनम्रं प्रयतेन पवित्रेण मनसा । ' पवित्रः प्रयतः पूत ' इत्यमरः । जञ्जपूको भृशं जपासक्तः । जप-

त्रपद्मरागपात्रीनिहितेन स्वहृदयेनेव सूर्यानुरक्तेन रक्तकमलषण्डेनार्चां ददौ। अजपच्च जप्यं सुचरितः प्रत्युषसि मध्यंदिने दिनान्ते चापत्यहेतोः प्राध्वं प्रयतेन मनसा जञ्जपूको मंत्रमादित्यहृदयम्।

5 भक्तजनानुरोधविधेयानि तु भवन्ति देवतानां मनांसि। यतः। स राजा कदाचिद्ग्रीष्मसमये यदृच्छया सितकरकरासितसुधा- 5 धवलस्य हर्म्यस्य पृष्ठे सुष्वाप। पार्श्वे चास्य द्वितीयशयने देवी यशोवती शिश्ये। परिणतप्रायायां तु श्यामायाम्, आसन्नप्रभातवेलाविलुप्यमानलावण्ये लिलङ्घिषमाणे सीदत्तेजसि तारकेश्वरे, कराग्रस्पृष्टकुमुदिनीप्रमोदजन्मनि शशधरस्वेद इव गलत्यतिशीतलेऽवश्यायपयसि, मधुमदमत्तप्रसुप्तसीमन्तिनीनिःश्वासाहतेषु संक्रान्तमदेष्विव घूर्णमाने- 10

धातोर्यङि 'यजजपदशां यङः' इत्यनेनोक्तप्रत्ययः। जपधातोर्हि 'लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायाम्' इति सूत्रेण गर्हायामेव यङो विधानाज्जपासक्तिद्योतकः प्रयोगश्चिन्त्यः। भृशाद्यर्थे तस्माद्यङोऽनुत्पत्तेः। आदित्यहृदयमिति मंत्रनाम।

भक्तेति। अर्थान्तरन्यासः। ग्रीष्मसमय इत्यनेन बहिः स्वापकारणमूष्मातिशयरूपं व्यंजितम्। यदृच्छया स्वैरितया। 'यदृच्छा स्वैरिता' इत्यमरः। सितकरस्य चंद्रस्य करैः किरणैः सुधया चूर्णविशेषेण च धवलः शुभ्रः। स्वयं शुभ्रोपि चंद्रकिरणैर्विशेषतो धवल इत्यर्थः। पार्श्वे च समीपे द्वितीयशय्यायां पृथक् शय्यायाम्। पृथक् शय्या हि नारीणां स्वापे योग्या। 'नाश्नीयाद्भार्यया सार्धं न च सुप्यात्तया सह' इति वचनात्। श्यामायां रात्रौ। 'श्यामा स्याच्छारिवा निशा' इत्यमरः। आसन्नया समीपागतया प्रभातवेलया विलुप्यमानं नाशितं लावण्यं कान्तिर्यस्य तस्मिन्। लिलङ्घिषमाणे दूरं जिगमिषौ सीदन्नश्यत्तेजो यस्य तस्मिंस्तारकेश्वरे चन्द्रे सति। रात्र्यास्तुरीययामावसान इति तात्पर्यार्थः। कराग्रैः किरणाग्रैः स्पृष्टायाः कुमिदिन्याः प्रमोदस्यानंदस्य जन्म यस्मादिति चन्द्रविशेषणमेतत्। अथवा कराग्रस्पृष्टायाः कुमुदिन्याः प्रमोदाज्जन्म यस्य तस्मिन्नवश्यायपयसीत्यर्थः। परं चंद्रे गन्तुकामे कुमुदिन्याः प्रमोदवर्णनमसंगतमतः पूर्वोक्तार्थ एव युक्तः। शशधरस्य चंद्रमसः स्वेद इव घर्म इव अवश्यायपयसि नीहारोदके गलति सति। शिशिरस्वेद इति पाठो न मनोरमः। ग्रीष्मर्तौ स्वेदोत्पत्त्योष्माधिक्यस्यैवानुभवसिद्धत्वात्। मधुनो मद्यस्य मदेन मत्तानां प्रसु-

---

१ 'अर्घम्'

ष्वन्तःपुरप्रदीपेषु, राजनि च विमलनखप्रतिबिम्बिताभिः संवाह्य-
मानचरण इव तारकाभिः, विस्रब्धप्रसारितैर्दिगङ्गनानामिवार्पितैरङ्गैर्म-
धुसुगन्धिभिः स्वहस्तकमलतालवृन्तवातैरिव श्वसितैर्मुखश्रिया वीज्यमाने,
विमलकपोलस्थलस्थितेन सितकुसुमशेखरेणेव रतिकेलिकचग्रहलम्बितेन
प्रतिमाशशिबिम्बेन विराजिते स्वपति, देवी यशोवती सहसैव 5
'आर्यपुत्र, परित्रायस्व परित्रायस्व' इति भाषमाणा भूषणरवेण व्याहर-
न्तीव परिजनमुत्कम्पमानाङ्गयष्टिरुदतिष्ठत् ।

6 अथ तेन सर्वस्यामपि पृथिव्यामश्रुतपूर्वेण किमुत देवीमुखे
परित्रायस्वेति ध्वनिना दग्ध इव श्रवणयोरेकपद एव निद्रां तत्याज

मानां निद्रितानां सीमन्तिनीनां प्रमदानां निश्वासैराहतेषु ताडितेष्वत एव संक्रान्तः समागतो मदो येषां तेषु । मद्यमत्तकामिनीश्वाससंपर्कान्मदोऽपि दीपेष्वागत इति भावः । घूर्णमानेषु भ्रममाणेषु । प्रदीपा अपि मद्यमत्तचिन्हानि प्रकटयामासुरिति तात्पर्यार्थः । विमलेषु स्वच्छेषु नखेषु प्रतिबिम्बिताभिस्तारकाभिर्नक्षत्रैः संवाह्यमानौ चरणौ यस्य तस्मिन् । विस्रब्धं निर्भयं प्रसारितैर्विस्तारितैः दिगंगनानामिव दिग्भार्याभ्य इवार्पितैर्दत्तैरंगैरवयवैरुपलक्षिते । इत्थंभूतलक्षणे तृतीया । मुखश्रिया मुखकान्त्या कर्तृभूतया मधुना मद्येन सुरभिभिः सुगन्धिभिः श्वासितैः श्वासैः स्वस्यात्मनो हस्तकमलं हस्तस्थितमरविन्दमेव व्यजनं तस्य वातैरिव वीज्यमाने। विमले स्वच्छे कपोलस्थले गण्डस्थले स्थितेन प्रतिमाशशिनः प्रतिबिम्बशशिनो बिम्बेन । विमलपदं बिम्बग्रहणसामर्थ्यं द्योतयति।कथंभूतेन रतिकेलिः सुरतक्रीडा तस्यां कचग्रहणे लम्बितो गण्डस्योपर्यागतस्तेन कुसुमशेखरेणेव पुष्पगुच्छेनेव विराजन्ती शोभमाना । विराजित इति राज्ञो विशेषणं वा । स्वपन्तीत्यपपाठः । गणकार्यमनित्यमिति न्यायेन वा साधुः । सहसैवातर्कितमेव । परित्रायस्व रक्ष । भूषणरवेणालंकारशब्देन संभ्रमचलनादलंकारशब्दः । व्याहरन्तीवाव्हयन्तीव । उत्कम्पमाना वेपमाना अंगयष्टिः शरीरयष्टिर्यस्याः सा ।

अथ तेनेति । पूर्वं श्रुतः श्रुतपूर्वो न तथाऽश्रुतपूर्वस्तेन । 'सुप्सुपा' इत्यनेन समासः । दग्ध इव ज्वलित इव । एकपदे झटिति । गाढनिद्रः केनचिदंगारादिना दह्येत चेत्तूर्णमुत्तिष्ठति । कोपेन क्रोधेन कम्पमानेन वेपमानेन दक्षिणकरेणापसव्यहस्तेनाकृष्टेन कर्णोत्पलेनेव कर्णोपरिस्थापितेन कमलेनेव । एतेन तस्य खड्गनिष्कोषणे निरायासत्वं दर्शितम् । अच्छा स्वच्छा धारा निशि-

राजा । शिरोभागाच्च कोपकम्पमानदक्षिणकराकृष्टेन कर्णोत्पलेनेव निर्गच्छताच्छधारेण धौतासिना सीमन्तयन्निव निशाम्, अन्तरालव्यवधायकमाकाशमिवोत्तरीयांशुकं विक्षिपन्वामकरपल्लवेन, करविक्षेपवेगगलितेन हृदयेनेव भयनिमित्तान्वेषिणा भ्रमता दिक्षु कनकवलयेन विराजमानः, सत्वरावतारितवामचरणाक्रान्तिकम्पितप्रासादः, पुरःपतितेनासिधारागोचरगतेन शशिमयूखखण्डेनेव खण्डितेन हारेण राजमानः, लक्ष्मीचुम्बनलग्नताम्बूलरसरञ्जिताभ्यामिव निद्रया कोपेन चातिलोहिताभ्यां लोचनाभ्यां पाटलयन्पर्यन्तानाशानाम्, बद्धान्धकारया त्रिपताकया भ्रुकुट्या पुनरिव त्रियामां परिवर्तयन्, 'देवि, न भेतव्यं न भेतव्यम्' इत्यभिदधानो वेगेनोत्पपात । सर्वासु च दिक्षु विक्षिप्तचक्षुर्यदा नाद्राक्षीत्किंचिदपि तदा पप्रच्छ तां भयकारणम् ।

ताग्रभागो यस्य तेन । 'धारा० । खड्गादेर्निशिते मुखे' इति मेदिनी । सीमन्तयन् द्विधाकुर्वन् । खड्गचालनेन तत्तेजसा तमो द्विधाभूतमिवाभात् । अन्तरालेऽभ्यन्तरे व्यवधायकमपवारकमाकाशमिव । एतेन वस्त्रस्य सौक्ष्म्यं द्योतितम् । **वामेति** । दक्षिणहस्ते खड्गस्य सत्वाद्वामेन वस्त्रक्षेपणम् । करस्य विक्षेपस्य प्रेरणाया वेगाद् गलितेन पतितेन हृदयेनेव मानसेनेव भयस्य भीतेर्निमित्तानि कारणान्यन्विष्यति मार्गयति तेन दिक्षु आशासु भ्रमता कनकवलयेन सुवर्णकंकणेन विराजमानः शोभमानः । वर्तुलो भूमौ पदार्थः पतित इतस्ततो भ्रमतीति हि प्रत्यक्षम् । सत्वरं तूर्णमवतारितस्याधोनिवेशितस्य वामचरणस्य सव्यपादस्याक्रान्त्या कम्पितः प्रासादो राजगृहं येन सः । असिधारायाः खड्गाग्रभागस्य गोचरं वशं गतेन खण्डितेन त्रुटितेन हारेण मुक्ताहारेण शशिमयूखमण्डलेन चंद्रकिरणसमूहेनेव राजमानः शोभमानः । लक्ष्म्याश्चुम्बनं तया कृतं चुम्बनं तेन लग्नः संलग्नस्ताम्बूलरसस्तेन रञ्जिताभ्यामिव रक्ताभ्यामिव । चुम्बनस्थानेषु नेत्रस्य ग्रहणं प्रसिद्धमेव । वर्णितं चैतदाचार्यगोवर्धनैः । 'मा वम संवृणु विषमिदमिति सातङ्कं पितामहेनोक्तः । प्रातर्जयति सलज्जः कज्जलमलिनाधरः शंभुः' । अत्र च पार्वत्या नेत्रचुम्बनेनेशस्य कज्जलमलिनाधरत्वं वर्णितम् । तिस्रः पताका ध्वजा यस्यास्तया । भ्रुकुटेस्त्रिधा परिवर्तनेन त्रियामां रात्रिं पुनरिव परिवर्तयन् आनयन् ।

---

१ 'कर्णोत्पलादिव'. २ 'अन्वेषणाय'.

7 अथ गृहदेवतास्विव प्रधावितासु यामिकिनीषु, प्रबुद्धे च समीपशायिनि परिजने, शान्ते च हृदयोत्कम्पकारिणि साध्वसे सा समभाषत—'आर्यपुत्र, जानामि स्वप्ने भगवतः सवितुर्मण्डलान्निर्गत्य द्वौ कुमारकौ, तेजोमयौ, बालातपेनेव पूरयन्तौ दिग्भागान्, वैद्युतमिव जीवलोकं कुर्वाणौ, मुकुटिनौ, कुण्डलिनौ, अङ्गदिनौ, कवचिनौ, 5
गृहीतशस्त्रौ, इन्द्रगोपकरुचा रुधिरेण स्नातौ, उन्मुखेनोत्तमाङ्गघटमानाञ्जलिना जगता निखिलेन प्रणम्यमानौ, कन्ययैकया च चन्द्रमूर्त्येव सुषुम्णरश्मिनिर्गतयानुगम्यमानौ, क्षितितलमवतीर्णौ । तौ च मे विलपन्त्याः शस्त्रेणोदरं विदार्य प्रवेष्टुमारब्धौ । प्रतिबुद्धास्मि चार्यपुत्रं विक्रोशयन्ती वेपमानहृदया ' इति । 10

8 एतस्मिन्नेव च कालक्रमे राजलक्ष्म्याः प्रथमालाप : प्रथयन्निव स्वप्नफलमुपतोरणं रराण प्रभातशङ्खः । भाविनीं भूतिमिवाभिदधाना दध्वनुरमन्दं दुन्दुभयः । चक्राण कोणाहतानन्दादिव प्रत्यूष-

---

अथेति । यामिकिनीषु जागरिकासु । रात्रौ नृपप्रासादे जाग्रतो जनाः संरक्षणाय नियुक्ताः सन्ति । समीपं निकटमर्थादन्तःपुरस्य बहिर्द्वारे शेते तस्मिन् प्रबुद्धे जागरिते । हृदयस्य मनस उत्कम्पं वेपनं करोति तच्छीले साध्वसे भये शान्ते नष्टे सति । सवितुः सूर्यस्य मण्डलात्परिधेर्निर्गत्य बहिरागत्य । बालातपेन कोमलकिरणैर्दिग्भागान्दिशां प्रदेशान् पूरयन्तौ व्याप्नुवन्तौ वैद्युतमिव विद्युत्संबंधिनमिव । अंगदिनौ केयूरवन्तौ । इन्द्रगोपक इव ताम्रवर्णमृगकीटक इव रुक् कान्तिर्यस्य तेनोन्मुखेनोर्ध्वावलोकिना । सुषुम्णरश्मेरमृतमयकिरणान्निर्गतया बहिरागतया । विलपन्त्या मे विलपन्तीं मामनादृत्येत्यर्थः । 'षष्ठी चानादरे' इत्यनेनानादरे षष्ठी । विदार्य भित्त्वा ।

एतस्मिन्नेवेति । स्वप्नफलं प्रथयन्निव स्वप्नोऽवश्यं भावीति सूचयन्निव । उपतोरणं बहिर्द्वारोपरि । विभक्त्यर्थे उपेत्यनेनाव्ययीभावः । प्रातर्दृष्टः स्वप्नः सद्यः फलद इति धर्मशास्त्रमतश्च स्वप्नोऽयमवश्यं सफलो भवेदिति सूचयितुमिदं वर्णनम् । अमन्दमुच्चैः । कोणो वादनदण्डस्तेन आहतं ताडनं तस्यानन्दात् । प्रत्यूषनान्दी प्राभातिकी भेरी । प्रबोधमंगलपाठकाः प्रातर्नरपतिप्रबोधनार्थं गायन्तो बन्दिनः । वल्लभः प्रियो यस्तुरंगस्तस्य मन्दुरामंदिरं शाला । मन्दुराशब्द एव वाजिशालावाच्यपि तुरंगपदसान्निध्याच्छाला मात्रवाचकः । विशिष्ट-

नान्दी। जयजयेति प्रबोधमङ्गलपाठकानामुच्चैर्वाचोऽश्रूयन्त। पुरुषश्च वल्लभतुरङ्गमन्दुरामन्दिरे मन्दमन्दं सुप्तोत्थितः सप्तीनां कृतमधुरहेषारवाणां पुरश्च्योतत्तुषारसलिलशीकरं किरन्मरकतहरितं यवसं वक्त्रापरवक्त्रे पपाठ—

‘ निधिस्तरुविकारेण सन्मणिः स्फुरता धाम्ना। 5
शुभागमो निमित्तेन स्पष्टमाख्यायते लोके ॥ ३ ॥
अरुण इव पुरःसरो रविं पवन इवातिजवो जलागमम्।
शुभमशुभमथापि वा नृणां कथयति पूर्वनिदर्शनोदयः ’ ॥ ४ ॥

9 नरपतिस्तु तच्छ्रुत्वा प्रीयमाणेनान्तःकरणेन तामवादीत्—‘देवि, मुदोऽवसरे विषीदसि। समृद्धास्ते गुरुजनाशिषः। पूर्णा नो 10 मनोरथाः। परिगृहीतासि कुलदेवताभिः। प्रसन्नस्ते भगवानंशुमाली।

वाचकानां पदानां सति पृथग्विशेषणत्वे विशेष्यमात्रपरत्वमिति न्यायात्। सुप्तं निद्रा। ‘ नंपुसकेभावे क्तः ’ इत्यनेन क्तः। तस्मादुत्थितः। अश्ववादौ सुप्तः पश्चादुत्थितः। अस्मिन्पक्षेऽकर्मकत्वात्कर्तरि क्तः। सप्तीनां हयानाम्। च्योतत्तुषाराणां पतद्धिमानां सलिलैः शीकरमार्द्रं मरकतमिव गारुत्मतमिव हरितं हरिद्वर्णं यवसं तृणं किरन् क्षिपन्। वक्त्रापरवक्त्रे। वक्त्रं भाव्यर्थसूचकः छंदोविशेषः - अपरवक्त्रा तन्नामकं मात्रावृत्तम्। ‘वक्त्रमास्ये छंदसि च’ इति हेमचंद्रः। उभयोराख्यायिकायामत्यावश्यकत्वम्। तथाचाग्निपुराणे। ‘ उच्छ्वासैश्च परिच्छेदो यत्र सा चूर्णिकोत्तरा। वक्त्रं चापरवक्त्रं च यत्र साऽऽख्यायिका मता ’।

निधिरिति। निधिर्भूमिगतो धनसंचयस्तरुविकारेण वृक्षस्य विशिष्टावस्थानेन सन्मणिः समीचीनं रत्नं स्फुरता विकसता धाम्ना तेजसा शुभागमः शुभस्य प्राप्तिर्निमित्तेन शकुनेन लोके जने स्पष्टमाख्यायते कथ्यते। दीपकालंकारः ॥ ३ ॥

अरुण इति। पुरःसरोऽग्रयायी अरुणो रविमिवातिजवो वेगवान् पवनो वायुर्जलागमं वर्षाकालमिव पूर्वं प्राग् निदर्शनस्य दृष्टांतस्योदयः प्राप्तिर्नृणां शुभमशुभं वा कल्याणमकल्याणं वा कथयति। भाविनावर्थानर्थौ पूर्वमेव शकुनादिना ज्ञायेते इति तात्पर्यार्थः ॥ ४ ॥

नरपतिरिति। प्रीयमाणेन संतुष्टेन। स्वमनोरथसूचकवाक्यश्रवणात्तस्यानंदः। मुदोऽवसरे आनंदस्य समये विषीदसि खिद्यसे। अंशूनां किरणानां

---

१ ‘ अतिजडः ’

नचिरेणैवातिगुणवदपत्यत्रयलाभेनानन्दयिष्यति भवतीम्.' इति । अवतीर्य च यथाक्रियमाणाः क्रियाश्चकार । यशोवत्यपि तुतोष तेन पत्युर्भाषितेन ।

10 ततः समतिक्रान्ते कस्मिंश्चित्कालांशे देव्यां च यशोवत्यां देवो राज्यवर्धनः प्रथममेव संबभूव गर्भे । गर्भस्थितस्यैव च यस्य 5 यशसेव पाण्डुतामादत्त जननी । गुणगौरवक्लान्तेव गात्रमुद्वोढुं न शशाक । कान्तिविसरामृतरसतृप्तेवाहारं प्रति पराङ्मुखीबभूव । शनैः शनैरुपचीयमानगर्भभरालसा च गुरुभिर्वारितापि वन्दनाय कथमपि सखीभिर्हस्तावलम्बेनानीयत । विश्राम्यन्ती सालभञ्जिकेव समीपगतस्तम्भभित्तिष्वलक्ष्यत । कमललोभानिलीनैरालिभिरिव वृतावुद्धर्तुं नाश- 10 कच्चरणौ । मृणाललोभेन च चरणनखमयूखलग्नैर्भवनहंसैरिव संचार्यमाणा मन्दमन्दं बभ्राम । मणिभित्तिपातिनीषु प्रतिमास्वपि हस्तावल-

---

माला पंक्तिर्विद्यते यस्य स भगवान् सूर्यः । 'व्रीह्यादिभ्यश्च' इत्यनेन मत्वर्थीय इनिः । अवतीर्य चन्द्रशालाया इति शेषः ।

तत इति । कालांशे स्वल्पे काले । स्वप्नः सफल इति सूचयितुमिदम् । गर्भे स्थितस्य विद्यमानस्य यस्य राज्यवर्धनस्य । यशसा कीर्त्येव । यशसः पाण्डुत्ववर्णनं कविसंप्रदायानुरूपम् । अतएव विश्वनाथेनोक्तं कविसमये 'यशसि धवलता' इति । गुणानां गौरवेण जाड्येन क्लान्ता पीडितेव गात्रं शरीरमुद्वोढुं धारयितुम् । भारेण पीडितः स्वशरीरधारणेऽप्यसमर्थो भवति । कान्तीनां तेजसां विसरः समूह एवामृतरसस्तेन तृप्तेव । तृप्ताय च पानादि न रोचते । उक्तं च श्रीहर्षेण 'अपां हि तृप्ताय न वारिधारा स्वादुः सुगंधिः स्वदते तुषारा'। उपचीयमानस्य वर्धमानस्य गर्भस्य भरेण भारेणालसा मन्दा गुरुभिर्वृद्धजनैर्वारितापि निषिद्धापि । कथमपि कष्टेन महाराष्ट्रभाषायां 'कसें तरी' । एतेन तस्या वृद्धजनेष्वादरातिशयो व्यज्यते । विश्राम्यन्ती श्रान्ता विश्रमाय यत्र कुत्रापि तिष्ठन्ती सालभञ्जिकेव पुत्तलिकेव । **कमलेति** । गर्भपीडिता चरणावुद्धर्तुं नाशक्तपरं भ्रमरैः कमलभ्रान्त्या व्याप्तौ तावतोऽसमर्थेति कल्पितम् । मृणाललोभेन बिसलोभेन चरणनखानां मयूखेषु किरणेषु लग्नैः संसक्तैर्हंसैर्मरालैः संचार्यमाणा

---

१ 'धृतौ'.

स्वनलोभेन प्रसारयामास करकमलम्, किमुत सखीषु । माणिक्य-
स्तम्भदीधितीरप्यालम्बितुमाचकाङ्क्ष, किं पुनर्भवनलताः । समादे-
ष्टुमप्यसमर्थासीद्गृहकार्याणि कैव कथा कर्तुम् । आस्तां नूपुरभारखेदितं
चरणयुगलं मनसापि नोदसहत सौधमारोढुम् । अङ्गान्यपि नाशक्नो-
द्धारयितुं दूरे भूषणानि । चिन्तयित्वापि क्रीडापर्वताधिरोहणमुत्क- 5
म्पितस्तनी तस्तान । प्रत्युत्थानेषूभयजानुशिखरविनिहितकरकिसलयापि
गर्वादिव गर्भेणाधार्यत । दिवसं चाधोमुखी स्तनपृष्ठसंक्रान्तेनापत्यदर्श-
नौत्सुक्यादन्तःप्रविष्टेनेव मुखकमलेनैवं प्रथिमाणा ददर्श गर्भम् ।
उदरे तनयेन हृदये च भर्त्रा तिष्ठता द्विगुणितामिव लक्ष्मीमुवाह ।
सख्युत्सङ्गमुक्तशरीरा च शरीरपरिचारिकाणामङ्केषु सपत्नीनां तु 10

गमनाय प्रेर्यमाणा मन्दं मन्दं शनैः शनैर्बभ्राम । हंससदृशीं गतिमाचरन्ती मन्दं जगाम हंसलग्नत्वं कारणं कथितम् । मणिभित्तिषु पतन्ति तासु प्रतिमासु स्वप्रतिबिम्बेष्वपि । श्रान्तो यस्य कस्यापि सहायं ग्रहीतुमुत्कण्ठितो भवति तद्वदियमपि स्वप्रतिमाधारमपेक्षतेति तात्पर्यम् । माणिक्यानां पद्मरागाणां दीधितीरपि किरणान्यप्यालंबितुमाश्रयितुमाचकांक्ष इयेष । भवनलता गृहमध्ये स्थापिता लताः । नूपूरयोर्मंजीरयोर्भारेण खेदितं पीडितम् । पादावसमर्थाविल्यत्र नाश्चर्यमपि तु सौधारोहणकल्पनामपि नासहत । तस्तानं । दीर्घं श्वसितवती । **प्रत्युत्थानेष्विति** । उभयोर्जान्वोरूरुपर्वणोः शिखरयोरग्रयोर्निहितौ स्थापितौ करकिसलयौ यया सा । दिवसमित्यत्यन्तसंयोगे द्वितीया । स्तनयोः पृष्ठे संक्रान्तेन पतितेनापत्यदर्शनस्यौत्सुक्यादिच्छयाऽन्तः प्रविष्टेनेव । स्तनयोः पुष्ट्याधिक्यात्कञ्चुक्यामास्थितिस्तेन च तत्र प्रतिबिम्बं युज्यते । अन्यथा साऽस्वीकृत चोलिकेति तर्क्यं स्यात् । सखीनां सहचरीणामुत्संगेष्वंकेषु मुक्तं त्यक्तं शरीरं यया सा । सपत्नीनां समानपतीनां शिरःसूत्तमांगेषु । **अवतीर्ण इति** । सर्वेषामुर्वीभृतां नृपाणां पर्वतानां च पक्षपाताय नृपाणां सहायनाशाय पर्वतानां पतत्रोन्मूलनाय च । 'पक्षो० । बले सखिसहाययोः । चूलिरन्ध्रे पतत्रे च' इति मेदिनी । वज्रस्येन्द्रायुधस्य परमाणुभिः सूक्ष्मैरवयवैरिव । इन्द्रेणोत्पातिनां पर्वतानां पक्षाः स्ववज्रेण छिन्नास्तद्वदयमप्युर्वीभृतां पक्षपाताय वज्रमय इव निर्मित इति तात्पर्यम् । त्रिभुवनस्य त्रिलोक्या धारणे वहने समर्थं शेषस्य तन्नामकस्य सर्पराजस्य फणामण्डलस्य फणासमूहस्योपकरणैः साधनैरिव कल्पितम् । सकलानां भूभृतां राज्ञां पर्वतानां च कम्पं करोति तच्छीलमतएव दिग्गजानामवयवै-

शिरःसु पादौ चकार । अवतीर्णे च दशमे मासि सर्वोर्वीभृत्पक्षपा-
ताय वज्रपरमाणुभिरिव निर्मितम्, त्रिभुवनभारधारणसमर्थं शेषफणा-
मण्डलोपकरणैरिव कल्पितम्, सकलभूभृत्कम्पकारिणं दिग्गजावयवैरिव
विहितमसूत देवं राजवर्धनम् । यस्मिञ्जाते जातप्रमोदा नृत्यमय्य
इवाजायन्त प्रजाः । पूरितासंख्यशङ्खशब्दमुखरं प्रहतपटहशतपटुरवं 5
गम्भीरभेरीनिनादनिर्भरभरितभुवनं प्रमोदोन्मत्तमर्त्यलोकमनोहरं मास-
मेकं दिवसमिव महोत्सवमकरोन्नरपतिः ।

11 अथान्यस्मिन्नतिक्रान्ते कस्मिंश्चित्काले कन्दलिनि कुड्म-
लितकदम्बतरौ तोक्मतृणस्तम्बे स्तम्भिततामरसे विकसितचातकचे-
तसि मूकमानसौकसि नभसि देव्या देवक्या इव चक्रपाणिर्यशोवत्या 10
हृदये गर्भे च सममेव संबभूव हर्षः । शनैः शनैश्चास्याः सर्वप्रजा-
पुण्यैरिव परिगृहीता भूयोऽप्यापाण्डुतामङ्गयष्टिर्जगाम । गर्भारम्भेण
श्यामायमानचारुचूचुकचूलिकौ चक्रवर्तिनः पातुं मुद्रिताविव पयो-
धरकलशौ बभार । स्तन्यार्थमाननानिहिता दुग्धनदीव दीर्घस्निग्धधवला
माधुर्यमधत्त दृष्टिः । सकलमङ्गलगणाधिष्ठितगात्रगरिम्णेव गतिरमन्दा · 15

रिव विहितं कृतम् । दिग्गजाः स्वदन्तैः पर्वतान्कम्पयन्ति तदनुरोधेनेदम् ।
नृत्यमय्यः प्रचुरनृत्यवत्यः । 'तत्प्रकृतवचने मयट्' इत्यनेन प्राचुर्ये मयट् ।
पूरितेति । पूरितानां वायुपूर्णानामसंख्यानां शंखानां शब्दैर्ध्वनिभिर्मुखरम् ।
प्रहतानां ताडितानां पटहशतानां ढक्काशतानां पटुः सम्यग् रवो ध्वनिर्यस्मिंस्तम् ।
गंभीरेण दुदुंभीनां भेरीणां निनादेन शब्देन निर्भरमत्यंतं भरितं व्याप्तं भुवनं येन
तम् । प्रमोदेनानंदेनोन्मत्तेन मत्तेन मर्त्यलोकेन मनुजलोकेन मनोहरस्तम् ।
मासम् त्रिंशदहोरात्रम् । अत्यन्तसंयोगे द्वितीया । **एकं दिवसमिवेति** । उत्स-
वनिमग्नानामचेतितः कालो यात इति ज्ञायतेऽनेन ।

अथेति । कस्मिंश्चित्काले द्वित्रवर्षात्मक इत्यर्थः । कन्दलिनि नवांकुरवति
'कन्दलं त्रिषु कलापेऽप्युपरागे नवांकुर' इति मेदिनी । कुड्मलितः संजातकोरकः
कदंबतरुर्यस्मिंस्तस्मिन् । तोक्मा हरितास्तृणस्तम्बा यवससमूहा यस्मिन् ।
'तोक्मं स्याद्धरिते' इति हैमः । स्तम्भितानि रुद्धानि नष्टानीत्यर्थः तामरसानि
कमलानि यस्मिन् । पर्जन्याधिक्येन कमलध्वंसः । विकसितं प्रफुल्लं चातकचेत-
श्चातकमानसं यस्मिन् । एतादृशे नभसि श्रावणे मासि । मेघागमनेन चातकानंदः ।

यत। मन्दंमन्दं संचरन्त्या निर्मलकुट्टिमनिमग्नप्रतिबिम्बनिभेन गृहीतपादपल्लवा पूर्वसेवामिवारेभे पृथिव्यस्याः। दिवसमधिशयानायाः शयनीयमपाश्रयपत्रभङ्गपुत्रिकाप्रतिमा विमलकपोलोदरगता प्रसवसमयं प्रतिपालयन्ती लक्ष्मीरिवालक्ष्यत। क्षपासु सौधशिखराग्रगताया गर्भोन्माथमुक्तांशुके स्तनमण्डले संक्रान्तमुडुपतिमण्डलमुपरि गर्भस्यश्वेतातपत्रमिव केनापि धार्यमाणमदृश्यत। सुप्तया वासभवने चित्रभित्तिचामरग्राहिण्योऽपि चामराणि चालयांचक्रुः। स्वप्नेषु करविधृतकमलिनीपलाशपुटसलिलैश्चतुर्भिरपि दिक्करिभिरक्रियताभिषेकः। प्रतिबुध्यमानायाश्च चन्द्रशालिकासालभञ्जिकापरिजनो जयशब्दमसकृदजनयत्। परिजनाह्वानेष्वादिशेत्यशरीरा वाचो निश्चेरुः। क्रीडायामपि

मूका अशब्दा मानसौकसो हंसा यस्मिन्। हंसानां तदाऽत्रास्थित्या मूकत्वम्। तथा च विश्वनाथः 'जलधरसमये मानसं यान्ति हंसा' इति। देव्या देवक्याः कृष्णमातुः तस्या अपि भगवन्तं ध्यायन्त्या हृदये गर्भे च सममेव हरिः प्रादुरासीत्। भगवद्ध्याननिमग्ना सा गर्भवत्यासीदिति तात्पर्यार्थः। एतेनेयमुपमा न समीचीनेति परास्तम्। नभसीत्यस्योपमायां न संबन्धः। देवकीगर्भस्य श्रावणेऽसंभवादिति दिक्। प्रजापुण्यैरिव परिगृहीता स्वीकृता आपाण्डुतां पाण्डुरत्वम्। पुण्यस्य शुक्लत्ववर्णनं कविसमयानुरूपम्। तथाचोक्तम्। 'शुक्लत्वं कीर्तिपुण्यादौ कार्ष्ण्यं चार्कीर्त्यघादिषु'। श्यामायमानौ कृष्णवर्णौ चूलिके हस्तिनः कर्णमूले इव चूचुकौ स्तनाग्रौ यस्याः सा। चूचुकस्य चूलिकोपमा काठिन्यकार्ष्ण्यमूलिकेत्यवधेयम्। मुद्रितौ कृतमुद्रा इव। रक्षणार्थं मुद्रां विधाय किमपि स्थाप्यते तद्वदिदमपि। गर्भकाले च कुचाग्रयोः श्यामत्वं वर्णितं वाग्भटेन। 'अम्लेष्टता स्तनौ पीनौ श्वेतान्तौ कृष्णचूचुकौ' इति। 'कर्णमूलं तु चूलिका' इत्यमरः। चक्रवर्तिनो भाविनः पानायेत्यर्थः। स्तन्यार्थं दुग्धार्थं स्तने भवं स्तन्यं दिगादित्वाद्भवार्थे यत्। सकलमंगलगणेनाथौद्विक्पालसमूहेनाधिष्ठितानां गात्राणामवयवानां गरिम्णा गौरवेण गतिर्गमनममंदायत। लोहितादित्वात्क्यष्। नृपश्च देवतांशैर्भवति। तथा च मनुः 'अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः'। कालिदासोपि 'सुरेंद्रमात्राश्रितगर्भगौरवात्प्रयत्नमुक्तासनया' इति सुनंदां वर्णितवान्। मन्दं मन्दं शनैः शनैः संचरंत्या अस्या निर्मले हीरकादिरत्नमयेऽतएव स्वच्छे कुट्टिमे निबद्धायां भुवि निमग्नस्य पतितस्य प्रतिबिंबस्य निभेन मिषेण पूर्वसेवां प्रथमसेवामिव। 'कुट्टिमोऽस्त्री निबद्धा भूः' कादंबर्यां तु निर्मलमणिकुट्टिमे पतितं शूद्रकप्रतिबिंबं वसुंधरया प्रतिप्रेम्णेव धृतमिति वर्णितम्। दिवसम्

नासहताज्ञाभङ्गम् । अपि च चतुर्णामपि महार्णवानामेकीकृतेनाम्भसा स्नातुं वाञ्छा बभूव । वेलालतागृहोदरपुलिनपरिसरेषु पर्यटितुं हृदयमभिललाष । आत्ययिकेष्वपि कार्येषु सविभ्रमं भ्रूलता चचाल । संनिहितेष्वपि मणिदर्पणेषु मुखमुत्खाते खड्गपट्टे वीक्षितुं व्यसनमासीत् । उत्सारितवीणाः स्त्रीजनविरुद्धा धनुर्ध्वनयः श्रुतावसुखायन्त । पञ्जरकेसरिषु चक्षुररमत । गुरुप्रणामेष्वपि स्तम्भितमिव शिरः कथमपि ननाम । सख्यश्चास्याः प्रमोदविस्फारितैर्लोचनपुटैरासन्नप्रसवमहोत्सवधियेव धवलयन्त्यो भवनं विकचकुमुदकमलकुवलयपलाशवृष्टिमयं रक्षाबलिविधिमिवानवरतं विदधाना दिक्षु क्षणमपि न मुमुचुः पार्श्वम् । 5

अत्यंतसंयोगे द्वितीया । शयनं शय्यामधिशयानाया अधितिष्ठंत्याः । 'अधिशीङ्स्थासां कर्म' इत्यनेन द्वितीया । अपाश्रयः शय्यास्तरणं तस्य पत्रभंगपुत्रिका तदुपरि लिखिता पुत्रिका तस्याः प्रतिमा । विमले स्वच्छे कपोलोदरे गल्लमध्ये गता । विमलेत्यनेन बिंबग्रहणसामर्थ्यम् । प्रसवसमयं प्रसूतिकालं प्रतिपालयंती प्रत्यवेक्षमाणा लक्ष्मीरिव 'जीवन्ती' इति प्रसिद्धा प्रसूतिदेवतेव । क्षपासु रात्रिषु सौधशिखरं चंद्रशालां गताया गर्भस्य अर्भकस्योन्माथेन परिस्फुरणेन मुक्तं त्यक्तमंशुकं वसनं यस्य तस्मिन् । संक्रांतं प्रतिबिंबितमुडुपतिमंडलं चंद्रमंडलं गर्भस्योदरस्थितार्भकस्योपरि केनापि धार्यमाणं श्वेतं शुभ्रमातपत्रं छत्रमिव । 'गर्भो भ्रूणेऽर्भक' इति मेदिनी । अत्र सौधाग्रगमनं तु लघुना शिबिकादिना न तु स्वयमारोहणम् । गर्भिण्याः सौधाग्रगमनस्य धर्मशास्त्रे निषेधात् 'गर्भिणी कुंजराश्वादिशैलहर्म्यादिरोहणम् । व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत्' इति वचनात् । वासभवने शय्यागृहे । **स्वप्नेष्विति** । चतुर्भिरपि दिक्करिभिर्दिग्गजैः करे शुंडादंडे विधृतस्य कमलिन्याः पलाशस्य पत्रस्य पुटस्य पर्णपात्रस्य सलिलैरुदकैरभिषेको मंत्रपूतं जलसिंचनम् । सालभंजिकापरिजनः सौधे स्थापिता मूर्तयः । अशरीरा वाचः अमानुष्यो वाचः । **चतुर्णामिति** । चतुःसमुद्रोदकानि सम्राडभिषेकोपयुक्तानि तत्र वाञ्छा भाविनीं साम्राज्यसिद्धिं शशंस । वेलालता समुद्रतीरस्था लता तस्या गृहोदरस्य गृहमध्यस्य पुलिन परिसरेषु वालुकाप्रदेशेषु एतेनापत्यस्यासमुद्रक्षितीशत्वं सूचितम् । आत्ययिकेष्ववश्यकर्तव्येष्वपि । **संनिहितेष्विति** । मणिदर्पणेषु रत्नमुकुरेषु । उत्खाते विकोषे । एतेन गर्भस्य वीरत्वं ज्ञातम् । उत्सारिता निःसारिता वीणा यैस्ते स्त्रीजनविरुद्धा युवतिजनानुचिता धनुर्ध्वनयश्चापशब्दाः श्रुतौ कर्णेऽसुखायन्त

आत्मोचितस्थाननिषण्णाश्च महान्तो विविधौषधिधरा भिषजो भूधरा इव भुवो धृतिं चक्रुः। पयोनिधीनां हृदयानीव लक्ष्म्या सहागतानि ग्रीवासूत्रग्रन्थिषु प्रशस्तरत्नान्यबध्यन्त।

12 ततश्च प्राप्ते ज्येष्ठामूलीये मासि, बहुलासु, बहुलपक्षद्वादश्यां, व्यतीते प्रदोषसमये, समारुरुक्षति क्षपायौवने, सहसैवान्तःपुरे समुदपादि कोलाहलः स्त्रीजनस्य। निर्गत्य च ससंभ्रमं यशोवत्याः स्वयमेव हृदयनिर्विशेषा धात्र्याः सुता सुयात्रेति नाम्ना राज्ञः पादयोर्निपत्य 'देव, दिष्ट्या वर्धसे द्वितीयसुतजन्मना' इति व्याहरन्ती पूर्णपात्रं जहार। 5

मुखं व्यदधुः। लोहितादित्वात्क्यष्। सख्य इति। सख्योऽस्याः पार्श्वं न मुमुचुरित्यन्वयः। ता विशिनष्टि। प्रमोदेनानंदेन विस्फारितैर्विकसितैर्लोचनपुटैर्नयनपुटैः। अत्र पुटशब्दोऽलंकारार्थः। आसन्नस्य समीपागतस्य प्रसवमहोत्सवस्य धियेव बुध्येव। भवनं गृहं धवलयन्त्यः शुभ्रीकुर्वत्यः। महोत्सवेषु गृहशुभ्रीकरणं प्रसिद्धमेव अनवरतं सततं विकचानां विकसितानां कमलकुमुदकुवलयपलाशानां वृष्टिमयं वृष्टिप्रचुरं रक्षाबलिं रक्षणार्थं क्रियमाणां पूजामिव दिक्षु-सर्वत्र विदधानाः कुर्वाणाः। आत्मनः स्वस्योचितेषु योग्येषु स्थानेषु निषण्णा स्थिताः। विविधानामोषधीनां धरा धारका इत्युभयत्रापि समानम्। अथवा विविधा औषधयो यासु तथाभूता धरा भूमयो येषां ते। भिषजो वैद्याः। धृतिं धैर्यं धारणां च। प्रशस्तानि च तानि रत्नानि। पक्षे प्रशस्तानि रत्नानि येषु तथाभूतानि हृदयानि।

ततश्चेति। ज्येष्ठामूलीये ज्यैष्ठे 'ज्येष्ठामूलीयमिच्छन्ति मासमाषाढपूर्वजम्' इति हारावली। बहुलासु कृत्तिकासु। 'बहुलाः कृत्तिका' इत्यमरः। बहुलपक्षद्वादश्यां कृष्णपक्षद्वादश्यां प्रदोषसमये रजनीमुखे व्यतीतेऽतिक्रान्ते क्षपाया रात्रेर्यौवने प्रारंभादुत्तरे भागे समारुरुक्षत्यागते सति। स्त्रीजनस्य युवतिवर्गस्य कोलाहलः कलकल उदपादि समभूत्। लुङः प्रथमस्यैकवचनम्। चिण् ते पद' इत्यनेन चिण्। निर्गत्येति। यशोवत्या धात्र्या उपमातुः सुता हृदयान्निर्गतो विशेषो यस्यां सा सुयात्रेति नाम्ना स्वयमेव निर्गत्यात्मेच्छया बहिरागत्य। इति व्याहरन्ती इति निवेदयन्ती पूर्णपात्रं पूर्णानकम्। 'बक्षीस' इति महाराष्ट्रभाषायाम्। 'हर्षादुत्सवकाले यदलंकारांबरादिकम्। आकृष्य गृह्यते पूर्णपात्रं पूर्णानकं च तद्' इति हारावली।

13 अस्मिन्नेव च काले राज्ञः परमसंमतः, शतशः संवादितातीन्द्रियादेशो, दर्शितप्रभावः, संकलिती ज्योतिषि, सर्वासां ग्रहसंहितानां पारदृश्वा, सकलगणकमध्ये महितो हितश्च त्रिकालज्ञानभाग्भोजकस्तारको नाम गणकः समुपसृत्य विज्ञापितवान्—' देव, श्रूयताम्। मांधाता किलैवंविधे व्यतीपातादिसर्वदोषाभिषङ्गरहितेऽहनि सर्वेषूच्चस्थानस्थितेष्वेवं ग्रहेष्वीदृशि लग्ने भेजे जन्म । अर्वाक्ततोऽस्मिन्नन्तराले पुनरेवंविधे योगे चक्रवर्तिजनने नाजनि जगति कश्चिदपरः । सप्तानां चक्रवर्तिनामग्रणीश्चक्रवर्तिचिह्नानां महारत्नानां च भाजनं सप्तानां सागराणां पालयिता सप्ततन्तूनां सर्वेषां प्रवर्तयिता सप्तसप्तिसमः सुतोऽयं देवस्य जातः ' इति । 5 10

14 अत्रान्तरे स्वयमेवानाध्माता अपि तारमधुरं शङ्खा विरेसुः । अताडितोऽपि क्षुभितजलनिधिजलध्वनिधीरं जुगुञ्जाभिषेकदु

अस्मिन्निति । परमसंमतोऽत्यंतमान्यः संवादितः प्रत्यक्षीकृतोऽतीन्द्रियादेशो भविष्यकथनं यस्य सः । संकलितं गणनं विद्यते यस्य सः । ' अत इनिठनौ ' इत्यनेनेनिर्मत्वर्थीयः । ज्योतिषि ज्योतिःशास्त्रे पारदृश्वा पारंगतः । दृशेः क्वनिप् ' । महितः पूज्यो भोजकः सूर्याराधको गणकविशेषो भागवत इति प्रथितो वा । मांधाता सूर्यवंशस्थो युवनाश्वस्य पुत्रोंऽबरीषाख्यस्य नृपतेः पिता । यद्वृत्तांतो भागवते ९ मस्य षष्ठेऽध्याये । व्यतीपातो नाम चंद्रार्कयो राशिषट्क एकमार्गस्थितिस्तथा चोक्तं लाटाचार्येण ' गगने हि हिमकरार्कौ युगपत्स्यातां यदैकमार्गस्थौ । भगणार्धेऽर्कश्च यदा शशी स भवेद् व्यतीपातः' । व्यतीपातादिदोषाणामभिषंगेन संबंधेन रहिते वर्जिते । सर्वेषूच्चस्थानस्थितेषु ग्रहेषु । सर्वेषां ग्रहाणामेकदैवोच्चस्थानत्वमशक्यमिति ज्योतिर्विदोऽतोऽत्र शुभेषु ग्रहेष्वित्यर्थो ग्राह्यः । चक्रवर्तिनः सम्राजो जननमुत्पत्तिर्यस्मिंस्तादृशे योगे सुमुहूर्ते नाजनि । दीपजनेत्यनेन वैकल्पिकः कर्तरि चिण् । अग्रणीः श्रेष्ठः । ' भरतार्जुनमांधातृभगीरथयुधिष्ठिराः । सगरो नहुषश्चैव सप्तैते चक्रवर्तिनः' । चक्रवर्तिचिन्हानि कूर्मो जालहस्तित्वं पद्मादिजालचरणत्वमित्यादीनि । महारत्नानां रत्नश्रेष्ठनां भाजनं पात्रम् । ' मण्यश्वकरिचक्राणि वरा स्त्री परिनायकः । षडेतानि तु रत्नानि कीर्तितानि मनीषिभिः ' । परिनायकः सेनापतिः । सप्ततन्तूनां यज्ञानां प्रवर्तयिता प्रवर्तकः । सप्त सप्तयोऽश्वा यस्य स सूर्यस्तेन समस्तुल्यः ।

अत्रान्तर इति । अनाध्माता अपूरितास्तारमधुरमुच्चैर्मनोहरम् । क्षुभितस्य संचलितस्य जलनिधेः समुद्रस्य जलस्य ध्वनिरिव धीरं यथा स्यात्तथा जुगुंज

न्दुभिः । अनाहतान्यपि मङ्गलतूर्याणि रेणुः । सर्वभुवनाभयघो-
षणापटह इव दिगन्तरेषु बभ्राम तूर्यप्रतिशब्दः । विधुतकेसरसटाश्च
साटोपगृहीतहरितदूर्वापल्लवकवलप्रशस्तैर्मुखपुटैः समहेषन्त हृष्टा वा-
जिनः । सलीलमुत्क्षिप्तैर्हस्तपल्लवैर्नृत्यन्त इव श्रवणसुभगं जगर्जुर्गजाः ।
ववौ चाचिराच्चक्रायुधमुत्सृजन्त्या लक्ष्म्या निःश्वास इव सुरामोदसुर- 5
भिर्दिव्यानिलः । यज्वनां मन्दिरेषु प्रदक्षिणशिखाकलापकथितकल्या-
णागमाः प्रजज्वलुरनिन्धना वैतानवह्नयः । भुवस्तलात्तपनीयशृङ्ख-
लाबन्धबन्धुरकलशीकोशाः समुदगुर्महानिधयः । प्रहतमङ्गलतूर्य-
प्रतिशब्दनिभेन दिक्षु दिक्पालैरपि प्रमोदादक्रियतेव दिष्टवृद्धि-

---

दध्वान । मंगलतूर्याणि मंगलवादित्राणि । 'तुतारी' इति महाराष्ट्रभाषायाम् । सर्वस्य सकलस्य भुवनस्य जगतोऽभयस्य घोषणाया उच्चैर्घुष्टस्य पटहो ढक्केव । 'नौबत' इति भाषायाम् । तूर्याणां वाद्यविशेषाणां प्रतिशब्दः प्रतिध्वनिः । विधूताः कंपिताः केसरसटाः सटाग्राणि यैस्ते वाजिनो हयाः साटोपं सगर्वं गृहीतानां हरितानां हरिद्वर्णानां दूर्वाणां कवलैर्ग्रासैः प्रशस्तानि विस्तृतानि तैर्मुखपुटैः समहेषन्त समहेषन्त । उत्क्षिप्तैरूर्ध्वं धृतैर्हस्तपल्लवैः शुंडादंडैर्नृत्यन्त इव नर्तका इव गजा हस्तिनः श्रवणसुभगं श्रुतिमनोहरं जगर्जुः शब्दं चक्रुः । **ववा-विति** । चक्रायुधं नारायणमचिरात्तूर्णमुत्सृजंत्यास्त्यजंत्या लक्ष्म्या निश्वास इव । नूतनोत्पन्नं हर्षमाश्रयितुं हरिर्लक्ष्म्या त्यक्त इति तात्पर्यम् । सुराया मद्यस्यामोदेनातिनिर्हारिगंधेन सुरभिः सुगंधिर्दिव्यानिलः स्वर्गीयो वायुः । यज्वनां यज्ञकृतां मंदिरेषु गृहेषु प्रदक्षिणेन वर्तुलाकारेण शिखाकलापेन ज्वाला समूहेन कथितः सूचितः कल्याणानां मंगलानामागम उत्पत्तिर्यैस्ते वैतानवन्हयो यज्ञाग्नयोऽनिंधना इंधनरहिता एव । वैतानवन्हीनां प्रदक्षिणशिखावलयेन ज्वलनं मंगलसूचकमिति कविसंप्रदायस्तदुक्तं मुरारिणा 'अद्य प्रदक्षिणशिखावलयः कृशानुर्गृह्णाति मे जनपदेषु वषट्कृतानि' । **भुवस्तलादिति** । तपनीयशृंखला सुवर्णनिगडस्तस्य बंधेन बंधनेन बंधुरो मनोहरः कलशीकोशो घटावरणं येषां ते महानिधयो द्रव्यसंचया भुवस्तलाद्भूपृष्ठादुदगुर्बहिराजग्मुः । प्रहतानां ताडितानां मंगलतूर्याणां प्रतिशब्दस्य निभेन मिषेण दिष्टवृद्धिरानंदवर्धनम् । तत्क्षणे तस्मिन्नेव काले । ब्रह्मा मुखे येषां ते पक्षे ब्रह्म वेदो मुखे येषां । 'ब्रह्म तत्वतपोवेदे न द्वयोः पुंसि वेधसि' इति मेदिनी । पुरातन्यः प्राचीनाः । पुरा शब्दात् सायं चिरमित्यनेन ट्युः । प्रलंबेन लंबमानेन श्मश्रुजालेन मुखस्थ-

कलकलः । तत्क्षण एव च शुक्लवाससो ब्रह्ममुखाः कृतयुगप्रजापतय इव प्रजावृद्धये समुपतस्थिरे द्विजातयः । साक्षाद्धर्म इव शान्त्युदककलशहस्तस्तस्थौ गुरः पुरोधाः । पुरातन्यः स्थितय इवादृश्यन्तागता बान्धववृद्धाः । प्रलम्बश्मश्रुजालजटिलाननानि बहलमलपङ्ककलङ्ककालकायानि नश्यतः कलिकालस्य बान्धवकुलानीवाकुलान्यधावन्त 5 मुक्तानि बन्धनवृन्दानि । तत्कालापक्रान्तस्याधर्मस्य शिबिरश्रेणय इवालक्ष्यन्त लोकविलुण्ठिता विपणिवीथ्यः । विलसदुन्मुखवामनकवधिरवृन्दवेष्टिताः साक्षाज्जातमातृदेवता इव बहुबालकव्याकुला ननृतुर्वृद्धधात्र्यः । प्रावर्तत च विगतराजकुलस्थितिरधःकृतप्रतीहाराकृतिरपनीतवेत्रिवेत्रो निर्दोषान्तःपुरप्रवेशः समस्वामिपरिजनो निर्विशेषबालवृद्धः समान- 10

केशसमूहेन जटिलानि व्याप्तान्याननानि मुखानि येषां ते । बहलेन प्रभूतेन मलपंकस्य कलंकेन कालाः कृष्णवर्णाः काया येषां ते । एतेन तदानीं कारागृहिणां श्मश्रुच्छेदनं स्नानं च प्रतिबद्धमासीदिति गम्यते । आकुलान्युत्सुकानि गृहगमनत्वरयौत्सुक्यम् । बंधनवृंदानि बंधनं कारावासो विद्यते येषां ते बंधनास्तेषां वृंदानि समूहाः । अर्शादित्वादच् मत्वर्थीयः । तत्काले धर्मस्वरूपस्य हर्षस्योत्पत्तिकालेऽपक्रांतस्य पलायितस्याधर्मस्य शिबिरश्रेणयो निवासगृहपंक्तय इव रिक्ता इत्यर्थः । लोकैरानंदमग्नैर्जनैर्विलुंठिताश्चोरिता बलाद् गृहीता विपणिवीथ्यो वणिक्पथसमूहाः । एतेन तदानीं पुत्रोत्पत्त्याद्यभ्युदयकाले विपणेर्विलुंठनपद्धतिरासीदिति गम्यते । प्रायो नृपा वणिजां धनदातार इत्यपि कल्पनीयम् । विलसतां शोभमानानां वामनकानां खर्वाणां बधिराणां श्रोत्रविहीनानां वृंदैःसमूहैर्वेष्टिता वृद्धधात्र्यो जरत्य उपमातृका बहुभिरनेकैर्बालकैर्वत्सैर्व्याकुला जातमातृदेवता अपत्यरक्षकदेवता इव ननृतुः । प्रसूतिगृहे बहुबालपरिवृता देवी पाषाणखंडे तंडुलमयी रक्षार्थमधुनापि स्थाप्यते । प्रावर्ततेति । विगता नष्टा राजकुलस्य नृपगृहस्य स्थितिर्मर्यादा यस्मिन्सः । अधःकृता तिरस्कृतावमानितेत्यर्थः प्रतीहारस्य दौवारिकस्याकृतिर्यस्मिन्सः । निर्दोषोऽनिवारितोऽन्तःपुरप्रवेशो यस्मिन्सः । समौ स्वामिपरिजनौ सेव्यसेवकौ यस्मिन्सः । निर्गतो विशेषो येभ्यस्ते निर्विशेषास्तथा बालवृद्धा यस्मिन् सः । दुर्ज्ञेयो ज्ञातुमशक्यो मत्तामत्तयोःक्षीबाक्षीबयोः प्रतिभागो यस्मिन् सः ।तुल्यः समानः कुलयुवतीनां वेश्यानां च विलासो यस्मिन् सः । कुलस्त्रियोपि प्रमोदप्रमत्ता वेश्या इव

शिष्टाशिष्टजनो दुर्ज्ञेयमत्तामत्तप्रविभागस्तुल्यकुलयुवतिवेश्याविलासः प्रनृत्तसकलकटकलोकः पुत्रजन्मोत्सवो महान् ।

15 अपरेद्युरारभ्य सर्वाभ्यो दिग्भ्यः स्त्रीराज्यानीवावर्जितानि, असुरविवराणीवापावृतानि, नारायणावरोधानीव प्रचलितानि, अप्सरसामिव महीमवतीर्णानि कुलानि, परिजनेन पृथुकरण्डपरिगृहीताः स्नानीयचूर्णावकीर्णकुसुमाः सुमनःस्रजः, स्फटिकशिलाशकलशुक्लकर्पूरखण्डपूरिताः पात्रीः, कुङ्कुमाधिवासभाञ्जि भाजनानि च मणिमयानि, सहकारतैलतिम्यत्तनुखादिरकेसरजालजटिलानि चन्दनधवलपूगफलफालीदन्तुरदन्तशफरुकाणि, गुञ्जन्मधुकरकुलपीयमानपारिजा- 5

विलासान् प्रकटयामासुरित्यर्थः । प्रनृत्तो नृत्यासक्तः सकलः कटकलोकः सैनिकवर्गो यस्मिन्सः ।

अपरेद्युरिति । नृत्यन्ति सामन्तान्तःपुरसहस्राण्यदृश्यन्तेति संबंधः । कथंभूतानीत्याह । सर्वाभ्यो दिग्भ्यो निखिलाभ्य आशाभ्य आवर्जितान्यानीतानि स्त्रीराज्यानीव । अपावृतानि विमुक्तान्यसुरविवराणीव । पातालविवरान्नागकन्या न्वागता इमा इति कल्पना । नारायणस्य श्रीकृष्णस्यावरोधान्यन्तःपुराणि बहुसंख्याकत्वात् । परिजनेनेत्यस्य विश्राणनेत्यनेन संबंधः । किं विश्राणनेत्याह । पृथुषु महत्सु करंडेषु समुद्गेषु परिगृहीताः स्थापिताः स्नानीयचूर्णेनावकीर्णानि व्याप्तानि कुसुमानि यासां ताः सुमनःस्रजः पुष्पमालाः । स्फटिकस्य शिलाशकलैरिव शिलाखंडैरिव शुक्लैः शुभ्रैः कर्पूरखंडैः पूरिताः पात्रीर्भाजनानि । मणिमयानि रत्नमयानि विकारे मयड्वैतयोरित्यनेन मयट् । कुंकुमस्य काश्मीरजस्याधिवासं संस्कारं भजन्ति तानि भाजनानि पात्राणि । 'अधिवासो निवासे स्यात्संस्कारे धूपनादिभिः' इति मेदिनी । सहकारतैलेनाम्रतैलेन तिम्यतामार्द्राणां तनूनां सूक्ष्माणां खदिरकेसराणां खदिरसाराणां जालेन समूहेन जटिलानि व्याप्तानि । चन्दनमिव धवलानि शुभ्राणि पूगीफलानि फाल्यः कार्पासवस्त्राण्याच्छादनार्थं स्थापितानीत्यर्थस्ताभिर्दन्तुराणि नतोन्नतानि दन्तशफरुकाणि करिदन्तकृताः समुद्गकाः । 'फालः पुंसि महादेवे कालिंदीभेदनेपि च । क्लीबं सीरोपकरणे त्रिषु कार्पासवाससि' इति मेदिनी । गुंजता सशब्देन मधुकरकुलेन भ्रमरसमूहेन पीयमानः प्राश्यमानः पारिजातस्य सुगन्धिद्रव्यविशेषस्य परिमलो येषां तानि । पाटलानीषद्रक्तानि पटलकानि पिटकानि । 'टोंपली' इति

तपरिमलानि पाटलानि पोटलकानि (१ पटलकानि) च, सिन्दूरपात्राणि च, पिष्टातकपात्राणि च, बाललताल्म्बमानविटकवीटकांश्च ताम्बूलवृक्षान्बिभ्राणेनानुगम्यमानानि चरणनिकुट्टनरणितमणिनूपुरमुखरितदिङ्मुखानि नृत्यन्ति राजकुलमागच्छन्ति समन्तात्सामन्तान्तःपुरसहस्राण्यदृश्यन्त । 5

16 शनैः शनैर्व्यजृम्भत च क्वचिन्नृत्तानुचितचिरंतनशालीनकुलपुत्रकलोकलास्यप्रथितपार्थिवानुरागः, क्वचिदन्तःस्मितक्षितिपालोपेक्षितक्षीबक्षुद्रदासीसमाकृष्यमाणराजवल्लभः, क्वचिन्मत्तकटककुट्टनीकण्ठलग्नवृद्धार्यसामन्तनृत्तनिर्भरहसितनरपतिः, क्वचित्क्षितिपाक्षिसं-

---

महाराष्ट्रभाषायाम् । 'पटलं तिलके नेत्ररोगे छदिषि संचये । पिटके परिवारे च' इति हैमः । सिन्दूरपात्राणि रक्तचूर्णपात्राणि । पिष्टातकस्य कृष्णवर्णस्य सुगंधिद्रव्यस्य 'बुक्का' इति प्रसिद्धस्य पात्राणि । बाललतासु लंबमाना विटकवीटकाः पंचाशत्पर्णमयास्तांबूला येषां तान् तांबूलवृक्षान् । बिभ्राणेन धारयता परिजनेन सेवकेनानुगम्यमानान्यनुस्त्रियमाणानि । चरणैः यन्निकुट्टनं ताडनं तेन रणितैः शब्दं विदधद्भिर्नूपुरैर्मुखरितानि शब्दायितानि दिङ्मुखानि यैस्तानि । राजकुलं राजगृहम् ।

शनैरिति । उत्सवामोद उत्सवस्य हर्षो व्यजृंभतावर्धत । 'आमोदो गंधहर्षयोः' इति मेदिनी । क्वचिदेकत्र नृत्तस्य नर्तनस्यायोग्यश्चिरंतनः परंपरागतः शालीनोऽधृष्टः कुलपुत्रकाणां लोकः समूहस्तस्य लास्येन नृत्येन प्रथितः स्पष्टः पार्थिवस्य पृथ्व्या ईश्वरस्य प्रतापवर्धनस्यानुरागः प्रेमा यस्मिन्सः । अन्तः स्मितं हास्यं यस्य तेन क्षितिपालेन नृपेण उपेक्षितः अवज्ञां प्रापितः क्षीबया मत्तया क्षुद्रदास्या समाकृष्यमाणो राजवल्लभो राजप्रियजनो यस्मिन्सः । नृपस्मितप्रेरिता क्षुद्रदासी राजवल्लभं समाकृष्टवतीत्यर्थः । मत्तानां कटककुट्टिनीनां सेनावेश्यानां कंठेषु गलेषु लग्नानां समासक्तानां वृद्धानां जरठानामार्याणां श्रेष्ठानां सामन्तानां मंडलाधिपानां नृत्तेन निर्भरमतिशयितं हसितो नरपतिर्यस्मिन्सः । क्षितिपालेन नृपेणाक्षिसंज्ञया नेत्रसूचनया आदिष्ट आज्ञापितो दुष्टो दासेरको दास्याः पुत्रस्तेन गीतेन गानेन करणेन सूच्यमानः कथ्यमानः सचिवस्य चौर्यरतस्य गुप्तक्रीडाया अर्थात्परनारीगमनस्य प्रपंचो विस्तारो

---

१ 'पाटलकानि.' २ 'पालापेक्षित.'

शादिष्टदुष्टदासेरकगीतसूच्यमानसचिवचौर्यरतप्रपञ्चः, क्वचिन्मदोत्कट-
कुटहारिकापरिष्वज्यमानजरत्प्रव्रजितजानितजनहासः, क्वचिदन्योन्य-
निर्भरस्पर्धोध्दुरचेटकपेटकारब्धावाच्यवचनयुद्धः, क्वचिन्नृपावलाबला-
त्कारनर्त्यमाननृत्यानभिज्ञान्तःपुरपालभावितभुजिष्यः, सपर्वत इव
कुसुमराशिभिः, सधारागृह इव सीधुप्रपाभिः, सनन्दनवन इव पारि- 5
जातकामोदैः, सनीहार इव कर्पूररेणुभिः, साट्टहास इव पटहरवैः,
सामृतमथन इव कलकलैः, सावर्त इव रासकमण्डलैः, सरोमाञ्च इव
भूषणमणिकिरणैः, सपट्टबन्ध इव चन्दनललाटिकाभिः, सप्रसव इव
प्रतिशब्दकैः, सप्ररोह इव प्रसाददानैरुत्सवामोदः ।

यस्मिन्सः । उपरितनवर्णनेन तदानीं सचिवादयो न शुद्धाचाराः सेनायां च वेश्यास्थापनपद्धतिरासीदिति ज्ञायते । 'दासेरक' इति दासीशब्दादपत्येऽर्थे 'स्त्रीभ्योढक्' इत्यनेन ढकि 'क्षुद्राभ्यो वा' इत्यनेनारकि निष्पन्नम् । मदेनोत्कटया व्याप्तया कूटहारिकया कुंभदास्या परिष्वज्यमान आलिंग्यमानो जरन्वृद्धः प्रव्रजितः संन्यासी तेन जनित उत्पादितो जनहासो लोकहास्यं यस्मिन्सः । अन्योऽन्यस्य परस्परस्य निर्भरयाऽतिशयया स्पर्धया उद्धरा उल्लासिताश्चेटका गायकवेश्यादीनां परिचिता जनास्तेषां पेटकेन समूहेनारब्धं प्रारब्धम् अवाच्यवचनैर्गालिभिर्युद्धं वाक्कलहो यस्मिन्सः । 'पेटकः पुस्तकादीनां मंजूषायां कदंबक-इति मेदिनी । नृपावलाभिः नृपतिदासीभिः काभिश्चित् बलात्कारेण हठेन नर्त्यमाना नृत्यानाभिज्ञाः नृत्यापरिचिताः अन्तःपुरपालाः अन्तःपुररक्षकाः तैः भाविताः प्रीणिताः भुजिष्या दास्यो यस्मिन्सः । सीधुप्रपाभिर्मद्यपानीयशालाभिः सधारागृह इव धारागृहैर्यन्त्रगृहैः सहित इव । कर्पूररेणुभिः कर्पूरपरागै' सनीहार इव हिममय इव । शैत्यशुभ्रयुतत्वात्कर्पूरस्योभयधर्मत्वात् । पटहानामानकानां रवैः शब्दैः अट्टहासेनोच्चैर्हास्येन सहित इव । कलकलैः कोलाहलैरमृतः मथनेन सहित इव । उच्चैः शब्दवत्त्वात् । रासकं गोपानां वर्तुलाकारो नृत्तविशेषः । आवर्तैर्भ्रमिभिः सहित इव । भूषणमणीनामलंकाररत्नानां किरणैर्मयूखैः सरोमाञ्च इव रोमांचे रोमोद्गमैः सहित इव । दन्तुराकारत्वादिति भावः । चंदनस्य मलयजस्य ललाटिकाभिर्ललाटालंकारैः पट्टबंधेन शिरोवेष्टनेन सहित इव । चंदनेन शुभ्रत्वाल्ललाटस्य । 'कर्णललाटात्कनलंकारे' इत्यनेन कन् । प्रतिशब्दकैः प्रतिध्वनिभिः । प्रसाददानैरनुग्रहदानैः सप्ररोह इव सांकुर इव । अनुग्रहेण दत्ताः पदार्था उत्सवामोदस्यांकुरा इति कल्पना ।

17 स्कन्धावलम्बमानकेसरमालाः काम्बोजवाजिन इवास्कन्दन्तः, तरलतारका हरिणा इवोड्डीयमानाः, सगरसुता इव खनित्रैर्निर्दयैश्चरणाभिघातैर्दारयन्तो भुवम्, अनेकसहस्रसंख्याश्चिक्रीडुर्युवानः। कथमपि तालावचरचारणचरणक्षोभं चक्षमे क्षमा। क्षितिपालकुमारकाणां खेलतामन्योन्यास्फालैराभरणेषु मुक्ताफलानि फेलुः। सिन्दूररेणुना 5 पुनरुत्पन्नहिरण्यगर्भगर्भशोणितशोणाशमिव ब्रह्माण्डकपालमभवत्। पटवासपांशुपटलेन प्रकटितमन्दाकिनीसैकतसहस्रमिव शुशुभे नभस्तलम्। विप्रकीर्यमाणपिष्टातकपरागपिञ्जरितातपा भुवनक्षोभविशीर्णपितामहकमलकिञ्जल्करजोराजिरञ्जिता इव रेजुर्दिवसाः। संघट्टविघटितहारपतितमुक्ताफलपटलेषु चस्खाल लोकः। 10

स्कन्धेति। युवानश्चिक्रीडुरित्यन्वयः। तान्यूनो विशिनष्टि। स्कन्धेष्ववलंबमानाः केसरमाला बकुलस्रजः स्कंधस्थाः केशा वा येषां ते। 'केसरो नागकेसरे। तुरंगसिंहयोः स्कंधकेशेषु वकुलद्रुमे' इति हैमः। आस्कन्दन्त उड्डीयमानाः कांबोजवाजिनः कांबोजाख्यस्य हिमवदुत्तरस्य काश्मीरात्प्राचीनस्य देशस्याश्वा इव। 'आस्कंदितकमित्यपि। उत्प्लुत्योत्प्लुत्य गमनं कोपादेवाखिलैः पदैः' इति हैममाला। सगरपुत्राः खनित्रैरिव निर्दयैर्दयारहितैश्चरणाभिघातैः पादताडनैर्भुवं वसुधां दारयन्त इव खनन्त इव। अनेकसहस्रसंख्या असंख्याता इत्यर्थः। क्षमा पृथ्वी तालैरवचरन्ति भ्रमन्ति ते च ते चारणा बंदिनस्तेषां चरणक्षोभं चक्षमे विषेहे। आभरणेष्वलंकारेषु अन्योन्यास्फालनैः परस्पर संघर्षणैः। पुनरुत्पन्नः पुनर्जातो हिरण्यगर्भो ब्रह्मा तस्य गर्भस्य भ्रूणस्य शोणितै रक्तैः शोणास्ताम्रा आशा दिशा यस्य तत्। पटवासस्य पिष्टातस्य पांसून रजसां पटलेन समूहेन प्रकटितं व्यक्तत्वया दर्शितं मंदाकिन्याः स्वर्गंगाया सैकतसहस्रं पुलिनसहस्रं येन तदिव। विप्रकीर्यमाणस्य क्षिप्यमाणस्य पिष्टातकस्य सुगंधिद्रव्यविशेषस्य 'अर्गजा' इति भाषायां प्रसिद्धस्य परागैर्धूलिभिः पिंजरितः पीतवर्णीकृत आतपः प्रकाशो येषां ते दिवसा भुवनस्य जगतः क्षोभेन संचलनेन विशीर्णस्य विदीर्णस्य पितामहकमलस्य ब्रह्मकमलस्य किंजल्करजसां परागधूलीनां राजिभिः पंक्तिभी रंजिता इव। संघट्टेन विघटितेभ्यस्त्रुटितेभ्यो हारेभ्यो मुक्तामालाभ्यः पतितेषु मुक्ताफलपटलेषु मौक्तिकसमूहेषु।

---

१ 'तालावसर.'

१८ स्थानस्थानेषु च मन्दमन्दमास्फाल्यमानालिङ्ग्यकेन शिञ्जानमञ्जुवेणुना झणझणायमानझल्लरीकेण ताड्यमानतन्त्रीपटहिकेन वाद्यमानानुत्तालालाबुवीणेन कलकांस्यकोशीक्वणितकाहलेन समकालदीयमानानुत्तालतानकेनातोद्यवाद्येनानुगम्यमानाः, पदे पदे झणझणितभूषणरवैरपि सहृदयैरिवानुवर्तमानताललयाः, कोकिला इव 5 मदकलकाकलीकोमलालापिन्यो, विटानां कर्णामृतान्यश्लीलरासकपदानि गायन्त्यः, समुण्डमालिकाः, सकर्णपल्लवाः, सचन्दनतिलकाः, समुच्छ्रिताभिर्वलयावलीवाचालाभिर्बाहुलतिकाभिः सवितारमिवालिङ्गयन्त्यः, कुङ्कुमप्रमृष्टिरुचिरकायाः काश्मीरकिशोर्य इव वल्गन्त्यः, नितम्बबिम्बलम्बिविकटकुरण्टकशेखराः प्रदीप्ता इव रागाग्निना, 10

स्थानस्थानेष्विति । स्थानस्थानेष्वेवंविधेनातोद्यवाद्येनानुगम्यमानाः पण्यविलासिन्यः प्रानृत्यन्निति संबंधः । मंदं मंदं शनैः शनैरास्फाल्यमानास्ताड्यमाना आलिंग्या लघुमृदंगाः 'तवला' इति प्रसिद्धा यस्मिंस्तेन । शिंजाना मधुरं नदन्तो मंजवो मनोज्ञा वेणवो मुरल्यो यस्मिंस्तेन । झणझणायमाना झणझणेति शब्दं विदधत्यो झल्लर्यो 'झांज' इति भाषायां प्रसिद्धा यस्मिंस्तेन । ताड्यमानास्तंत्र्यो वीणाः पटहिका लघ्व्यो भेर्यो यस्मिंस्तेन । वाद्यमाना अनुत्ताला मधुरशब्दा अलाबुवीणा यस्मिंस्तेन । कलं मधुरं कांस्यकोश्यां कांस्यमये वाद्यपृष्ठभागे क्वणितः सशब्दः काहलः 'कर्णा' इति भाषायां प्रसिद्धो यस्मिंस्तेन । समकालं दीयमाना अनुत्ताला अनुत्कटा ताना यस्मिंस्तेन । 'उत्ताल उत्कट' इति मेदिनी । आतोद्यवाद्येन चतुर्विधवाद्येनानुगम्यमानाः । 'ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकंतु सुषिरं कांस्यतालादिकं घनम् । चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम्' इत्यमरः । **पदे पदे इति** । झणझणितानां तथा शब्दं विदधतां भूषणानामलंकाराणां रवैः शब्दैरपि सहृदयैर्गानाभिज्ञैरनुवर्तमानौ ताललयौ यासां ताः । मदेन कला मधुरा काकली कोमलध्वनिस्तया मधुरमालपन्ति गायन्ति ताः । विटानां स्वाश्रितानां नीचानां कर्णामृतानि कर्णयोः श्रोत्रयोरमृतसदृशान्यश्लीलान्यवाच्यानि रासकपदानि गोपनृत्यपदानि । समुण्डमालिका मुण्डे शिरसि पुष्पमालिकास्ताभिः सहिताः । 'मुंडा मुंडीरकायां स्यात्त्रियामस्त्री तु मूर्धनि' इति मेदिनी । समुच्छ्रिताभिरूर्ध्वं विधृताभिर्वलयानां कंकणानामवलीभिः पंक्तिभिर्वाचालाभिर्वाचाटाभिर्बाहुलतिकाभिर्हस्तैः । 'आलजाटजौ बहुभाषिणि' इत्यनेनालच् । लतिकाशब्दो बाहुकोमलतां

सिन्दूरच्छटाच्छुरितमुखमुद्राः शासनपट्टपङ्क्तय इवाप्रतिहतशासनस्य कंदर्पस्य, मुष्टिप्रकीर्यमाणकर्पूरपटवासपांसुला मनोरथसंचरणरथ्या इव यौवनस्य, उद्दामकुसुमदामताडिततरुणजनाः प्रतीहार्य इव तरुणमहोत्सवस्य, प्रचलत्पत्रकुण्डला लसन्त्यो लता इव मदनचन्दनद्रुमस्य, ललितपदहंसकरवमुखराः समुल्लसन्त्यो वीचय इव शृङ्गाररसस्य, 5 वाच्यावाच्यविवेकशून्या बालक्रीडा इव सौभाग्यस्य, घनपटहरवोत्कण्टकितगात्रयष्टयः केतक्य इव कुसुमधूलिमुद्गिरन्त्यः, कमलिन्य इव दिवसमुत्फुल्लाननाः, कुमुदिन्य इव रात्रावनुपजातनिद्राः, आविष्टा इव नरेन्द्रवृन्दपरिवृताः, प्रीतय इव हृदयमपहरन्त्यः, गीतय इव रागमुद्दीपयन्त्यः, पुष्टय इवानन्दमुत्पादयन्त्यः, मदमपि मदयन्त्य 10

व्यंजयति। कुंकुमेन प्रमृष्टिः परिमार्जनं विलेपनमिति यावत् तया रुचिरः सुंदरः कायः शरीरं यासां ताः। वल्गन्त्यो मनोहराः काश्मीरकिशोर्य इव। काश्मीरेषु बालिकाः कुंकुमस्थलीषु लुंठनात्सुंदरकाया दृश्यन्ते तद्वदिमा इति भावः। नितंबबिंबेषु लंबते ते तादृशा विकटा विशालाः कुरंटकशेखरा अम्लातपुष्पगुच्छा यासां ताः। रागाग्निनाऽनुरागवन्हिना प्रदीप्ता इव। अम्लातपुष्पाणां रक्तवर्णत्वात्। सिंदूरछटाभी रक्तवर्णचूर्णसमूहैश्छुरिता व्याप्ता मुखमुद्रा यासां ताः। अतएव। प्रतिहतमनिरोधं शासनमाज्ञा यस्य तस्य कंदर्पस्य मदनस्य शासनपत्रस्याज्ञापत्रस्य पंक्तय इव। मुद्रितमुखत्वमुभयोः साधारण्यमिति भावः। अंजलिभिर्हस्तसंपुटैः प्रकीर्यमाणेन क्षिप्यमाणेन कर्पूरपटवासेन कर्पूरमिश्रितेन सुगन्धिचूर्णेन पांसुला धूलिव्याप्ताः कर्पूरचूर्णपांसुयुक्ता इत्यर्थः यौवनस्य तारुण्यस्य मनोरथस्य स्पृहायाः संचरणस्य गमनस्य वीथ्यो मार्गा इव। मार्गा यथा वालुकाकणव्याप्तास्तद्वदिमाः कर्पूरकणव्याप्ता इत्यर्थः। उद्दामं सातिशयं कुसुमदामभिः पुष्पस्रग्भिस्ताडितास्तरुणजना याभिस्तास्तरुणमहोत्सवस्य तरुणस्य नूतनस्य यूनां वा महोत्सवस्य प्रतीहार्य इव। प्रतीहार्योऽपि स्वयष्टिभिर्जनांस्ताडयन्ति, प्रचलन्ति नृत्यवशाच्चंचलानि पत्राकाराणि कुंडलानि कर्णभूषणानि यासां ताः। पक्षे प्रचलन्ति पत्राण्येव कुंडलानि पल्लवरूपाणि कर्णभूषणानि यासां ताः। ललितेषु रमणीयेषु पदेषु चरणेषु ये हंसका नूपुरास्तेषां रवेण शब्देन मुखराः सशब्दाः। यद्वा ललितानि पदानि यासां ताश्च ता हंसकरवमुखराश्च। पक्षे ललितपदानां हंसकानां हंसानां रवेण मुखराः। सौभाग्यस्य सुभगताया वाच्यावाच्ययोर्विवेको विचारस्तेन शून्या बालक्रीडा इव। घनेन दृढेन पटहरवेण

इव, रागमपि रञ्जयन्त्य इव, आनन्दमपि आनन्दयन्त्य इव, नृत्यमपि नर्तयमाना इव, उत्सवमप्युत्सुकयन्त्य इव, कटाक्षितेषु पिबन्त्य इवापाङ्गशुक्तिभिः, तर्जनेषु संयमयन्त्य इव नखमयूखपाशैः, कोपाभिनयेषु ताडयन्त्य इव भ्रूलताविभागैः, प्रणयसंभाषणेषु वर्षन्त्य इव सर्वरसान्, चतुरचङ्क्रमणेषु विकिरन्त्य इव विकारान्, पण्यविलासिन्यः प्रानृत्यन्। 5

19 अन्यत्र वेत्रिवेत्रवित्रासितजनदत्तान्तरालाः, ध्रियमाणधवलातपत्रवना वनदेवता इव कल्पतरुतलविचारिण्यः, काश्चित्स्कन्धोभयपालीलम्बमानलम्बोत्तरीयलग्ना लीलादोलाधिरूढा इव प्रेङ्खन्त्यः, काश्चित्कनककेयूरकोटिपाट्यमानपट्टांशुकोत्तरङ्गास्तरङ्गिण्य 10

भेरीनिनादेन उत्कंटकिता समुद्गतरोमांचो गात्रयष्टयो यासां ताः। दिवसमत्यंतसंयोगे द्वितीया। उत्फुल्लं प्रफुल्लमाननं मुखं यासां ताः। कमलिनीनां कमलरूपाणि मुखानि दिवसं विकसितानि भवन्ति। कुमुदिन्य इव कैरविण्य इव रात्रावनुपजाता अनागता निद्रा यासां ताः। कैरविण्य आसूर्योदयमसंकुचिता एतासामपि क्रीडासक्ततया निशायां निद्राभाव इति भावः। आविष्टा इव पिशाचग्रस्ता इव। नरेंद्रवृंदेन भूपसमूहेन मांत्रिकसमूहेन वा परिवृता वेष्टिताः। मदमपि मदयंत्य इव। मदेनान्यो मत्तो भवति स तु इमा आश्रित्योन्मत्तः। रागोऽनुरागो हिंगुलादश्च। रागोऽन्यान् रंजयति। इमास्तु तमपि रंजयन्ति। चतुरेषु मनोहरेषु चंक्रमणेषु वक्रगमनेषु।

अन्यत्रेति प्रारब्धं समारब्धं नृत्यं नर्तनं याभिस्ता राजमहिष्यो विलेसुश्चिक्रीडुः। कथंभूता इत्याह। वेत्रिभिः कंचुकिभिः कर्तृभिर्वेत्रैर्हस्तयष्टिभिः करणैर्वित्रासिताः पीडिता जनास्तैर्दत्तोऽन्तरालोऽवकाशो यासां ताः। ध्रियमाणमुह्यमानं धवलानां शुभ्राणामातपत्राणां छत्राणां वनं समूहो यासां ताः। वनशब्दो लक्षणया समूहवाची। कल्पतरूणां देववृक्षाणां तलेषु विचरन्ति तच्छीला वनदेवता इव। शुभ्रपर्णत्वात्कल्पतरूणां छत्रसाम्यम्। स्कंधानामुभयपालीषु कोटिद्वयेषु लम्बमानानि लंबानि दीर्घाण्युत्तरीयाणि प्रावारकास्तेषु लग्नाः संसक्ताः। लीलाया: क्रीडायाः दोलायामधिरूढा इव। प्रेंखन्त्य इतस्ततो गच्छन्त्यः। कनकस्य सुवर्णस्य केयूराणामंगदानां कोटिभिरग्रभागैः पाट्यमानाः तरंगा इव पट्टांशुकानि पट्टांशुकतरंगाः तरंगसदृशानि चंचलानि

१ लम्बोत्तरीयलग्नहस्ता.

इव तरच्चक्रवाकसीमन्त्यमानस्रोतसः, काश्चिदुद्धूयमानधवलचामर-सटालग्नत्रिकण्टकवलितविकटकटाक्षाः सरस्य इव हंसाकृष्यमाणनीलोत्पलवनाः, काश्चिच्चलच्चरणच्युतालक्तकारुणस्वेदशीकरसिच्यमान-भवनहंसाः, संध्यारागरज्यमानेन्दुबिम्बा इव कौमुदीरजन्यः, काश्चित्कण्ठनिहितकाञ्चनकाञ्चीगुणाञ्चितकञ्चुकिविकाराकुञ्चितभ्रुवः, काम- 5
वागुरा इव प्रसारितबाहुपाशा राजमहिष्यः प्रारब्धनृत्या विलेसुः ।

20 सर्वतश्च नृत्यतः स्त्रैणस्य गलद्भिः पादालक्तकैररुणिता रागमयीव शुशोणे[1] क्षौणी । समुल्लसद्भिः स्तनमण्डलैर्मङ्गलकलशमय

श्रेष्ठवस्त्राणि 'शेला' इति भाषायां प्रसिद्धानि यासां ताः । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोग' इत्यनेन समासः । तरद्भिश्चक्रवाकैः सीमंत्यमानानि विभज्यमानानि स्रोतांसि यासां तास्तरंगिण्यो नद्य इव । कनकांगदानां चक्रवाकसाम्यं पाट्यमानवस्त्राणां द्विधा क्रियमाणप्रवाहसाम्यम् । उद्धूयमानासु वार्यमाणासु धवलासु शुभ्रासु चामरसटासु चामराग्रेषु लग्नेन संसक्तेन त्रिकंटकेन कर्णाभरणेन वलिता वक्रीकृता विकटा विशालाः कटाक्षा यासां ताः । 'त्रिकंटकस्तु त्र्यश्रः स्यात्त्रिभी रत्नैश्च भूषणम्' । हंसैराकृष्यमाणानि नीलोत्पलवनानि यासां ताः सरस्य इव । यथा सरसीषु हंसाः कमलान्याकर्षन्ति तद्वत्तत्सदृशीषु युवतिषु हंससदृशाश्चामरसटाः कमलसदृशानि नयनान्याकर्षंति । रत्नमयत्रिकंटकपदोपादानेन हंसचंचुर्व्यज्यते रक्तवर्णत्वादिति दिक् । चलद्भ्यश्चरणेभ्यश्च्युतैर्गलितैरलक्तकेनारुणैस्ताम्रैः स्वेदशीकरैर्घर्मबिन्दुभिः सिच्यमाना भवनहंसा याभिस्ताः । संध्यारागेण रज्यमानमिंदुबिंबं याभिस्ता रजन्यो रात्रय इव । चंद्रसदृशान् श्वेतान् गृहहंसान् संध्यारक्तिम्नेवारुणितघर्मबिंदुभिर्ज्यौत्स्न्य इवेमा रंजयन्तीत्यर्थः । कामवागुरा मदनजालानीव । प्रसारितबाहुपाशस्य वागुरासाम्यम् । कंठेषु निहितैः स्थापितैः कांचनकांचीगुणैः सुवर्णमेखलादामभिरंचितानां नम्राणां कंचुकिनां कंचुकानि चूलिका विद्यन्ते येषां तेषां स्तनानां विकारैराकुंचिताः संकुचिता भ्रुवो भ्रुकुट्यो यासां ताः । वस्त्रधारणवेलायां कांचीगुणस्य कंठे धारणं स्त्रीसंप्रदायः । यद्वा कंचुकिनां प्रतिहारिणामित्यर्थो ग्राह्यः ।

सर्वतश्चेति । स्त्रैणस्य स्त्रीसमूहस्य । 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनाद्' इत्यनेन नञ् । अरुणिता 'तदस्य संजातं तारकादिभ्य इतच्' इत्यनेनेतच् । रागमयीव प्रेममयीव प्राचुर्यार्थे मयट् प्रमाणादिकं तु पूर्वमेवोक्तम् । क्षोणी

---

१ शुशुभे.

इव बभूव महोत्सवः। भुजलताविक्षेपैर्मृणालवलयमय इव रराज जीवलोकः। समुल्लसद्भिर्विलासस्मितैस्तडिन्मय इवाक्रियत कालः। चञ्चलानां चक्षुषामंशुभिः कृष्णशारमया इवासन्वासराः। समुल्लसद्भिः शिरीषकुसुमस्तबककर्णपूरैः शुकपिच्छमय इव हरितच्छायोऽभूदातपः। विस्रंसमानैर्धम्मिल्लतमालपल्लवैः कज्जलमयमिवालक्ष्यतान्तरिक्षम्। उत्क्षिप्तैर्हस्तकिशलयैः कमलिनीमय्य इव बभासिरे सृष्टयः। माणिक्येन्द्रायुधानामर्चिषा चाषपत्रमया इव चकाशिरे रविमरीचयः। रणतामाभरणगणानां प्रतिशब्दकैः किङ्किणीमय्य इव शिशिञ्जिरे दिशः। जरत्योऽप्युन्मादिन्य इव रमण्यो रेणुः। वर्षीयांसोऽपि ग्रहगृहीता इव नापत्रेपिरे। विद्वांसोऽपि मत्ता इवात्मानं विसस्मरुः। निनर्तिषया मुनीनामपि मनांसि विपुस्फुलुः। सर्वस्वं च ददौ नरपतिः। दिशि दिशि कुबेरकोषा इवालुप्यन्त लोकेन द्रविणराशयः।

21 एवं च वृत्ते तस्मिन्महोत्सवे शनैः शनैः पुनरप्यतिक्रामति काले, देवे चोत्तमाङ्गनिहितरक्षासर्षपे समुन्मिषत्प्रतापाग्निस्फुलिङ्ग इव, गोरोचनापिञ्जरितवपुषि समभिव्यज्यमानसहजक्षात्रतेजसीव, हाटकबद्धविकटव्याघ्रनखपङ्क्तिमण्डितग्रीवके हृदयोद्भिद्यमा-

---

पृथ्वी शुशोण रक्तवर्णा बभूव। विलासस्मितैर्लीलाहास्यैः कालः समयः कृष्णवर्णश्च। 'कालो मृत्यौ महाकाले समये यमकृष्णयोः' इति मेदिनी। तडिन्मय इव विद्युन्मय इव। हास्यस्य शुभ्रत्वं कविसमयानुरूपमतः शुभ्रतडिन्मयत्वमुत्सवकालस्य वर्णितमनुचितमिवावभाति। सितायास्तडितो दुर्भिक्षत्वसूचकत्वात्। 'दुर्भिक्षाय सि ा भवेद्' इति महाभाष्यवचनात्। विस्रंसमानैर्गलद्भिर्नृत्यावेशादिति भावः। धम्मिलस्य संयतकेशानाम्। माणिक्येन्द्रायुधानां शरीरे धृतरत्नोद्भूतेंद्रधनुषाम् अर्चिषा प्रभया। किंकिणीमय्यः क्षुद्रघंटाप्रचुराः। शिशिंजिरे मधुरं शद्बमकुर्वन्। निनर्तिषया नृत्येच्छया। नृत्यतेः सनि 'अप्रत्ययाद्' इत्यनेनाकारः।

एवमिति। यशोवती राज्यश्रियं नारायणमूर्तिर्वसुधामिव गर्भेण आधत्तेति संबंधः। देवे चेत्यादीनां हर्ष इत्यनेन संबंधः। उत्तमांगे मूर्धनि निहिता रक्षायै सर्षपा 'मोहरी' इति भाषायां प्रसिद्धा यस्य तस्मिन्। अधुनापि शैत्यादिवातविकारपरिहरणाय सर्षपोपयोगः क्रियते। समुन्मिषतः प्रज्वलिष्यतः प्रतापाग्नेः शौर्यवन्हेर्विस्फुलिंग इव। सर्षपस्य विस्फुलिंगसाम्यम्।

नदर्पाङ्कुर इव, प्रथमाव्यक्तजल्पितेन सत्यस्य शनैरोंकारमिव कुर्वाणे, मुग्धस्मितैः कुसुमैरिव मधुकरकुलानि बन्धुहृदयान्याकर्षति, जननी-पयोधरकलशपयःशीकरसेकादिव जायमानैर्विलासहासिताङ्कुरैर्दशन-कैरलंक्रियमाणमुखकमलके, चारित्र इवान्तःपुरस्त्रीकदम्बकेन पाल्य-माने, मन्त्र इव सचिवमण्डलेन रक्ष्यमाणे, वृत्त इव कुलपुत्रकलो- 5 केनामुच्यमाने, यशसीवात्मवंशेन संवर्ध्यमाने, मृगपतिपोत इव रक्षि-पुरुषशस्त्रपञ्जरमध्यगते, धात्रीकराङ्गुलिलग्ने पञ्चषाणि पदानि प्रयच्छति हर्षे, षष्ठं वर्षमवतरति च राज्यवर्धने देवी यशोवती गर्भेणाधत्त नारायणमूर्तिरिव वसुधां देवीं राज्यश्रियम् ।

22 पूर्णेषु च प्रसवदिवसेषु दीर्घरक्तनालनेत्रामुत्पलिनीमिव 10 सरसी, हंसमधुरस्वरां शरदमिव प्रावृट्, कुसुमसुकुमारावयवां वनरा-जिमिव मधुश्रीः, महाकनकावदातां वसुधारामिव द्यौः, प्रभावर्षिणीं रत्नजातिमिव वेला, सकलजननयनानन्दकारिणीं चन्द्रलेखामिव

गोरोचनया गोपित्तेन पिंजरितं पिशंगीकृतं वपुः शरीरं यस्य तस्मिन् गोरोचनायाः क्षात्रतेजःसाम्यम् । पीतवर्णत्वात् । हाटके सुवर्णे बद्धानां खचितानां विकटानां वक्राणां व्याघ्रनखानां पंक्त्या राज्या मंडिता भूषिता ग्रीवा कंधरा यस्य तस्मिन् । व्याघ्रनखानां वक्रत्वाद्दर्पांकुरसाम्यं युक्तमेव । मुग्धैः सुंदरैः स्मितैर्हास्यैः कुसुमैर्मधुकरकुलानीव भ्रमरसमूहा इव बंधुहृदयानि आप्तमनांस्याकर्षति । जनन्याः कलशाविव पयोधरौ स्तनौ तयोः पयसो दुग्धस्य शीकरैः कणैः सेकादिव सिंचनादिव । उदकसेचनादंकुरोत्पत्तिः दंतानां शुभ्रत्वाद्धसितांकुरत्वसाम्यवर्णनं युक्तमेव । चारित्रे पातिव्रत्य इव । मृगप-तिपोत इव सिंहशिशाविव रक्षिपुरुषाणां शस्त्राण्येव पंजरस्तस्य मध्यं गते । धात्र्युपमाता । 'धात्री जनन्यामलकी वसुमत्युपमातृषु' इति मेदिनी ।

पूर्णेष्विति । देवी दुहितरं प्रसूतवतीति संबन्धः । नालानि नाड्यो नेत्रे च नालनेत्रं प्राण्यंगत्वादेकवद्भावः । दीर्घं महद् रक्तं ताम्रं नालनेत्रं यस्याः सा दुहिता ताम् । पक्षे दीर्घाणि रक्तानि नालानि पद्मदंडा नेत्राणि मूलानि यस्यास्तामुत्पलिनीं कमलिनीम् । 'नेत्रं मंथगुणे वस्त्रभेदे मूले द्रुमस्य च' इति मेदिनी । हंस इव हंसैर्वा मधुरः स्वरो यस्यास्ताम् । कुसुमानीव कुसुमान्येव वा गात्राणि यस्यास्तां वनराजिं वनपंक्तिम् । महाकनकं तिलसुवर्णमिति शंकरः तदिवावदाता शुभ्रा । पक्षे महाकनकेनावदाता वसुधारा धनवृष्टिः । भाग्याधि-

प्रतिपत्, सहस्रनेत्रदर्शनयोग्यां जयन्तीमिव शची, सर्वभूभृदभ्यर्थितां गौरीमिव मेना, प्रसूतवती दुहितरम्। यया द्वयोः सुतयोरुपरि स्तनयोरिवैकावलीलतया नितरामराजत।

23 अस्मिन्नेव तु काले देव्या यशोवत्या भ्राता सुतमष्टवर्षदेशीयमुद्धूयमानकुटिलकाकपक्षकशिखण्डं खण्डपरशुहुंकाराग्निधूमलेखानुबद्धमूर्धानं मकरध्वजमिव पुनर्जातम्, एकेनेन्द्रनीलकुण्डलांशुश्यामलितेन शरीरार्धेनेतरेण च त्रिकण्टकमुक्ताफलालोकधवलितेन संपृक्तावतारामिव हरिहरयोर्दर्शयन्तम्, पीनप्रकोष्ठप्रतिष्ठितपुष्पलोहवलयं परशुराममिव क्षत्रक्षपणक्षीणपरशुपाशचिह्नितं बालतां गतम्, कण्ठसूत्रग्रथितभङ्गुरप्रवालाङ्कुरं हिरण्यकशिपुमिवोरःकाठिन्यखण्डितनर- 5 10

क्यसूचनाय दिवः सुवर्णवृष्टिः पततीति हि प्रसिद्धिः। वेला समुद्रविकृतिः। 'भरती' इति महाराष्ट्रभाषायाम्। 'वेला काले च सीमायामब्धेः कूलविकारयोः' इति मेदिनी। सहस्रनेत्राणां दर्शनस्य योग्या। असंख्यैर्नेत्रैर्दर्शनीयेत्यर्थः। अथवा पुरुहूतेनाप्यवलोकनीया तस्यापि मोहकारिणीत्यर्थः। शची इंद्राणी। भूभृद्भी राजभिः पर्वतैश्च। गौरीमिव पार्वतीमिव। एकावलीलता एकयष्टिका मौक्तिकमाला। 'एकावल्येकयष्टिका' इत्यमरः।

अस्मिन्निति। देव्या यशोवत्या भ्राता स्वतनयं भंडिनामानं कुमारयोरनुचरमर्पितवानिति संबंधः। अष्टवर्षदेशीयम् ईषन्न्यूनान्यष्टवर्षाणि यस्य तम्। 'ईषदसमाप्तौ कल्पब्देश्यदेशीयर' इत्यनेन देशीयर्। उद्धूयमानः कंपमानः काकपक्षकः शिखा एव शिखंडो बर्हो यस्य तम्। 'शिखण्डो बर्हचूडयोः' इति मेदिनी। खण्डपरशोः शिवस्य हुंकाराग्नेर्धूमलेखया धूमराज्याऽनुबद्धोऽनुगतो मूर्धा मस्तकं यस्य तं पुनर्जातं पुनरुद्भूतं मकरध्वजमिव मदनमिव। कुमारस्य मदनसाम्यं शिखाया धूमलेखासाम्यम्। इंद्रनीलकुंडलस्यांशुभिः किरणैः श्यामलितेन कृष्णीभूतेन। त्रिकंटकस्य कर्णभूषणस्य मुक्ताफलानामालोकेन कान्त्या धवलितं शुभ्रीकृतं तेन। संपृक्तावतारमेकीभूतावतारम्। एतेन तदा हरिहरयोरेकावतारकल्पनाऽऽसीदिति गम्यते। पीने पुष्टे प्रकोष्ठे कूर्परादधःप्रदेशे प्रतिष्ठितं पुष्पलोहस्य मणिविशेषस्य वलयं कटकं यस्य तम्। 'प्रकोष्ठः कूर्परादधः' इति शाश्वतः। क्षत्रस्य क्षत्रियजातेः क्षपणेन नाशेन क्षीणस्य परशोरायुधविशेषस्य पाशो धारणरज्जुस्तेन चिन्हितो युक्तस्तम्। पुष्पलोहवलयं परशुधारणपाशेनोत्प्रेक्षितम्। कण्ठसूत्रे ग्रथितो भंगुरो वक्रः

ष्वपि शूलायमानोत्तमाङ्गौ, जलधरधृतेनापि धनुषा दोदूयमानहृदयौ, आलेख्यक्षितिपतिभिरप्यप्रणमद्भिः संतप्यमानचरणौ, परिमितमण्डलसंतुष्टं तेजः सवितुरप्यबहुमन्यमानौ, भूभृदपहृतलक्ष्मीकं सागरमप्युपहसन्तौ, बलवन्तमकृतविग्रहं मारुतमपि निन्दन्तौ, हिमवतोऽपि चमरीबालव्यजनवीजितेन दह्यमानौ, जलधीनामपि शङ्खैः खिद्यमानौ 5 चतुःसमुद्राधिपतिमपरं प्रचेतसमप्यसहमानौ, अनपहृतच्छत्रानपि विच्छायानवनिपालान्कुर्वाणौ, साधुष्वप्यसेवितप्रसन्नौ मुखेन मधु क्षरन्तौ, दुष्टराजवंशानूष्मणा दूरस्थितानपि म्लानिमानयन्तौ, अनुदिवसं शस्त्राभ्यासश्यामिकाकलङ्कितमशेषराजकप्रतापाग्निनिर्वापणमलिनमिव करतलमुद्वहन्तौ, योग्याकालेषु धीरैर्धनुर्ध्वनिभिरभ्यर्णोपभोगा- 10

नाविव । समुद्रमर्यादितायां भुवि महामानवत्वेनातिष्ठन्ताविवेति तात्पर्यार्थः । शिरोरुहाणां केशानामपि भंगेन छेदनेन । कर्तनादाविति भावः । चूडामणौ शिरोभूषणे संक्रान्तेनापि पतितेनापि आतपत्रेण छत्रेण लज्जमानौ । चूडामणिषु प्रतिबिंबितमपि द्वितीयमातपत्रमसहमानावित्यर्थः । षण्मुखेपि कार्तिकेयेपि । असुखायमानौ दुःखायमानौ श्रवणौ कर्णौ ययोस्तौ । कमपि स्वामिशद्बभाजमस्वीकुर्वन्तावित्यर्थः । संध्यायां संध्योपासने । अंजलिघटनेष्वपि नमस्कारेष्वपि । भवभूतिनाप्युत्तररामे कुश इत्थमेव वर्णितः । 'संप्रति करणीयो राजन्येऽपि प्रश्रयः' । दोदूयमानमतिशयेन पीड्यमानं हृदयं ययोस्तौ । दुनोतेर्यङन्ताद्गृशार्थाच्छानचि रूपमिदम् । आलेख्यनृपतिभिश्चित्रस्थराजभिरप्रणमद्भिरकृतनमस्कारैः संतप्यमानौ कुप्यन्तौ चरणौ पादौ ययोस्तौ परिमितेन परिगणितेनाल्पेनेत्यर्थः मंडलेन विषयेण बिंबेन च संतुष्टं सवितुः सूर्यस्यापि तेजोऽबहुमन्यमानौ । भूभृता मंदरेणापहृता लक्ष्मीर्यस्य तं सागरमपि समुद्रमपि । 'नद्यृतश्च' इत्यनेन समासान्तः कः । भूभृच्छद्बः श्लिष्टो राजवाचकः । अकृतो विग्रहः समरः कायश्च येन तम् । मारुतस्य शरीराभावाद्रूपरहितस्पर्शवत्त्वरूपतल्लक्षणादशरीरत्वस्य प्रतीतेः । अनपहृतमगृहीतमातपत्रं छत्रं येषां तानपि विच्छायान्मलिनान् । पराजयेनेति भावः । गृहीतातपत्रा अपि विच्छाया इति विरोधः । साधुष्वपि सदाचारेष्वप्यसेवितेन सेवया विना प्रसन्नौ मुखेन मधु क्षरन्तौ मधुरं भाषमाणौ । साधुषूत्सवकालेष्वप्यसेविता प्रसन्ना मद्यं याभ्यां तथाभूतावपि मुखेन मधु क्षरन्ताविति विरोधः । अथवा साधुषु सतामुपरि असेवितप्रसन्नावपि अपीतमद्यावपि मुखेन मधु क्षरन्ताविति विरोधो ज्ञेयः ।

शिलाकठिनकायबन्धौ हिमवद्विन्ध्याविवाचलौ, महावृषाविव कृत-
युगयोग्यौ, अरुणगरुडाविव हरिवाहनविभक्तशरीरौ, इन्द्रोपेन्द्राविव
नागेन्द्रगतौ, कर्णार्जुनाविव कुण्डलकिरीटधरौ, पूर्वापरदिग्भागाविव
सर्वतेजस्विनामुदयास्तमयसंपादनसमर्थौ, अमान्ताविवातिमानेनासन्न-
वेलार्गलनिरोधसंकटे कुकुटीरके, तेजः पराङ्मुखीं छायामपि जुगुप्स- 5
मानौ, स्वात्मप्रतिबिम्बेनापि पादनखलग्नेन लज्जमानौ, शिरोरुहाणा-
मपि भङ्गेन दुःखमवतिष्ठमानौ, चूडामणिसंक्रान्तेनापि द्वितीयेनातप-
त्रेणापत्रपमाणौ, भगवति षण्मुखेऽपि स्वामिशब्देनासुखायमानश्र-
वणौ, दर्पणदृष्टेनापि प्रतिपुरुषेण दूयमाननयनौ, संध्याञ्जलिघटने-

---

ज्योत्स्नेव चंद्रिकेव यशः कीर्तिः प्रतापः पराक्रमश्च ताभ्यामाक्रान्तं भुवनतलं याभ्यां तौ। अतएवाभिरामौ सुंदरौ दुर्निरीक्ष्यौ दुरवलोकनीयौ। यशसा सुंदरौ प्रतापेन दुर्निरीक्ष्यावित्यर्थः। पक्षे स्फुरज्जोत्स्नैव यशः प्रताप आतपश्च ताभ्यामाक्रान्तं भुवनतलं याभ्यां तौ। चन्द्रमसो ज्योत्स्नयाभिरामत्वं सूर्यस्यातपेन दुर्निरीक्षत्वं च। समभिव्यक्ते तेजस्तैक्ष्ण्यं प्रकाशश्च बलं सामर्थ्यं च ययोस्तौ। अग्निमारुताविव वन्हिसमीरणाविवैकीभूतौ परस्परानुवर्तिनौ मिलितौ च। शिलेव शिलाभिर्वा कठिनः कायबंधो देहबंधो ययोस्तौ। अचलौ दृढौ पर्वतौ वा। हिमवान् हिमालयो विंध्याचलो विंध्याद्रिस्ताविव। महावृषाविव महान्तौ बलीवर्दाविव कृतयुगस्य सत्ययुगस्य योग्यौ पक्षे कृता युगस्य धुरो योग्याऽध्ययनं याभ्यां तौ। 'योग्यःप्रवीणयोगार्होपायशक्तेषु वाच्यवत्। क्लीबं वृध्यौषधी पुष्ये ना कृयभ्यासार्कयोषितोः' इति मेदिनी। अथवा वृषपक्षे कृते परिकल्पिते युगे धुरि योग्यावुचितावित्यर्थः। हरिवाहनेनाश्वारोहणेन विभक्तं सुबद्धं सुपरिमाणं शरीरं ययोस्तौ। पक्षे हरिश्च हरिश्च हरी कृष्णदिनकरौ तयोर्वाहने याने विभक्तं योजितं शरीरं देहो ययोस्तौ। 'हरिर्वातार्कचंद्रेंद्रयमोपेंद्रमरीचिषु। सिंहाश्वकपिभेकाहिशुकलोकांतरेषु च' इति विश्वः। नागेन्द्र इव गजराज इव गतं गमनं ययोस्तौ। पक्षे नागेन्द्र ऐरावतः शेषराजश्च तौ गतौ प्राप्तौ। कर्णाय कुंडले सूर्येण दत्ते। अर्जुनस्य शिरसि किरीटो वृत्रघ्ना बद्धः। यथोक्तं महाभारते 'पुरा शक्रेण मे बद्धं युध्यतो दानवर्षभैः। किरीटं मूर्ध्नि सूर्याभं तेनाहुर्मां किरीटिनम्'। सर्वतेजस्विनां वीराणामादित्यादीनां चोदयोऽभ्युदय उद्गमनं चास्तो नाशस्तिरोभवनं च तत्र समर्थौ। अतिमानेनात्यंताभिमानेन महाप्रमाणतया चासन्नायाः समीपस्थाया वेलायाः समुद्रमर्यादाया अर्गलरूपाया निरोधेन प्रतिबंधेन संकटे गहने। कुरेव पृथ्व्येव कुटीरकं जरद्गृहं तस्मिन् अमान्ताविवावर्तमा

ष्वपि शूलायमानोत्तमाङ्गौ, जलधरभृतेनापि धनुषा दोदूयमानहृदयौ,
आलेख्यक्षितिपतिभिरप्यप्रणमद्भिः संतप्यमानचरणौ, परिमितमण्ड-
लसंतुष्टं तेजः सवितुरप्यबहुमन्यमानौ, भूभृदपहृतलक्ष्मीकं सागरम-
प्युपहसन्तौ, बलवन्तमकृतविग्रहं मारुतमपि निन्दन्तौ, हिमवतोऽपि
चमरीबालव्यजनवीजितेन दह्यमानौ, जलधीनामपि शङ्खैः खिद्यमानौ 5
चतुःसमुद्राधिपतिमपरं प्रचेतसमप्यसहमानौ, अनपहृतच्छत्रानपि
विच्छायानवनिपालान्कुर्वाणौ, साधुष्वप्यसेवितप्रसन्नौ मुखेन मधु
क्षरन्तौ, दुष्टराजवंशानूष्मणा दूरस्थितानपि म्लानिमानयन्तौ, अनु-
दिवसं शस्त्राभ्यासश्यामिकाकलङ्कितमशेषराजकप्रतापाग्निनिर्वपणमलि-
नमिव करतलमुद्वहन्तौ, योग्याकालेषु धीरैर्धनुर्ध्वनिभिरभ्यर्णोपभोगा- 10

नाविव । समुद्रमर्यादितायां भुवि महामानवत्वेनातिष्ठन्ताविवेति तात्पर्यार्थः । शिरोरुहाणां केशानामपि भंगेन छेदनेन । कर्तनादाविति भावः । चूडामणौ शि-रोभूषणे संक्रान्तेनापि पतितेनापि आतपत्रेण छत्रेण लज्जमानौ । चूडामणिषु प्रतिबिंबितमपि द्वितीयमातपत्रमसहमानावित्यर्थः । षण्मुखेपि कार्तिकेयेपि । असुखायमानौ दुःखायमानौ श्रवणौ कर्णौ ययोस्तौ । कमपि स्वामिशब्दभाजम-स्वीकुर्वन्तावित्यर्थः । संध्यायां संध्योपासने । अंजलिघटनेष्वपि नमस्कारेष्वपि । भवभूतिनाप्युत्तररामे कुश इत्थमेव वर्णितः । 'संप्रति करणीयो राजन्येऽपि प्रश्रयः' । दोदूयमानमतिशयेन पीड्यमानं हृदयं ययोस्तौ । दुनोतेर्यङन्ता-द्भृशार्थाच्छानचि रूपमिदम् । आलेख्यनृपतिभिश्चित्रस्थराजभिरप्रणमद्भिरकृत-नमस्कारैः संतप्यमानौ कुप्यन्तौ चरणौ पादौ ययोस्तौ परिमितेन परिगणिते-नाल्पेनेत्यर्थः मंडलेन विषयेण बिंबेन च संतुष्टं सवितुः सूर्यस्यापि तेजोऽबहु-मन्यमानौ । भूभृता मंदरेणापहृता लक्ष्मीर्यस्य तं सागरमपि समुद्रमपि । 'नद्यृ-तश्च' इत्यनेन समासान्तः कः । भूभृच्छब्दः श्लिष्टो राजवाचकः । अकृतो विग्र-हः समरः कायश्च येन तम् । मारुतस्य शरीराभावाद्रूपरहितस्पर्शवत्त्वरूपतल्ल-क्षणादशरीरत्वस्य प्रतीतेः । अनपहृतमगृहीतमातपत्रं छत्रं येषां तानपि विच्छायान्मलिनान् । पराजयेनेति भावः । गृहीतातपत्रा अपि विच्छाया इति विरोधः । साधुष्वपि सदाचारेष्वप्यसेवितेन सेवया विना प्रसन्नौ मुखेन मधु क्षरन्तौ मधुरं भाषमाणौ । साधुषूत्सवकालेष्वप्यसेविता प्रसन्ना मद्यं याभ्यां तथाभूतावपि मुखेन मधु क्षरन्ताविति विरोधः । अथवा साधुषु सतामुपरि असेवितप्रसन्नावपि अपीतमद्यावपि मुखेन मधु क्षरन्ताविति विरोधो ज्ञेयः ।

द्दिग्वधूभिरिवालपन्तौ, राज्यवर्धन इति हर्ष इति सर्वस्यामेव पृथि-
व्यामाविर्भूतशब्दप्रादुर्भावौ, स्वल्पीयसैव कालेन द्वीपान्तरेष्वपि प्रका-
शतां जग्मतुः ।

26 एकदा च तावाहूय भुक्तवानभ्यन्तरगतः पिता सस्नेहम-
वादीत्—'वत्सौ, प्रथमं राज्याङ्गं दुर्लभाः सद्भृत्याः । प्रायेण पर- 5
माणव इव समवायेष्वनुगुणभूय द्रव्यं कुर्वन्ति पार्थिवं क्षुद्राः ।
क्रीडारसेन नर्तयन्तो मयूरतां नयन्ति बालिशाः । दर्पणमिवानुप्रविश्या-
त्मीयां प्रकृतिं संक्रामयन्ति पल्लविकाः । स्वप्ना इव मिथ्यादर्शनैरस-
द्बुद्धिं जनयन्ति विप्रलम्भकाः । गीतनृत्यहसितैरुन्मत्ततामावहन्त्युपे-
क्षिता विकारा इव वातिकाः । चातका इव तृष्णावन्तो न शक्यन्ते 10
ग्रहीतुमकुलीनाः । मानसे मीनमिव स्फुरन्तमेवाभिप्रायं गृह्णन्ति जा-
लिकाः । यमपट्टिका इवाम्बरे चित्रमालिखन्त्युद्गीतकाः । शल्यं
हृदये निक्षिपन्त्यतिमार्गणाः । यतः सर्वैर्दोषाभिषङ्गैरसंगतौ बहुधो-

---

'गंधत्तमा प्रसन्नेरा' इति सुरापर्यायेऽमरः । **दुष्टेति** । ऊष्मणा दाहशक्त्या । तया समीपस्थो म्लानो भवति न तु दूरस्थ इति विरोधः । शस्त्राणामभ्यासस्य श्यामलिकया किणेन 'घट्टा' इति महाराष्ट्रभाषायां प्रथितेन कलंकितं मलिनम् अशेषस्य सकलस्य राजकस्य राजसमूहस्य प्रतापाग्नेः शौर्याग्नेर्निर्वपणेन शमनेन मलिनमिव । वन्हेः शमनेन शांतांगारेण हस्तो मलिनो भवति । योग्याया अध्ययनस्य कालेषु । धीरैर्गंभीरैर्धनुर्ध्वनिभिर्धनुःशब्दैः अभ्यर्णोपभोगात्समीपागतो य उपभोगः सेवारूपस्तस्मात् । आविर्भूतः शब्दप्रादुर्भावो नामप्रसिद्धिर्ययोस्तौ ।

एकदेति । प्रायेण क्षुद्रा नीचा समवायेषु समूहेषु अर्थान्मांत्रिसभाया-मनुगुणीभूय प्रविश्य पार्थिवं नृपं द्रव्यं स्वकरक्रीडनकं कुर्वन्ति । तन्मंत्रेषु स्वप्रवेशं कृत्वा नृपाद्धनं हरन्तीत्यर्थः । कथमिव । यथा परमाणवः सूक्ष्मा अवयवाः समवायेषु तादृशसंबंधेष्वनुगुणीभूय घटकीभूय पार्थिवं पृथ्वीसंबंधि द्रव्यं कुर्वन्ति तद्वत् । समवायस्यैकत्वेपि द्रव्यबाहुल्यादत्र बहुत्वस्वीकारः । बालिशा धूर्ताः कुमाराश्च । क्रीडारसेन नर्तयन्तो मयूरतां हास्यलम् । कुमाराश्च क्रीडायां मयूरान्नर्तयन्ति । पल्लविका विटाः किसलयानि च । अनुप्रविश्य चित्तं रंजयित्वा आक्रम्य च । आत्मीयां प्रकृतिं स्वीयं दौरात्म्यं शरीरं च । विप्रलंभकाः प्रतारका असच्छास्त्रनिर्मातारो वा । मिथ्यादर्शनैरलीकवस्तुप्रकटनैरसदागमैश्च ।

पधाभिः परीक्षितौ शुची विनीतौ विक्रान्तावभिरूपौ मालवराजपुत्रौ भ्रातरौ भुजाविव मे शरीरादव्यतिरिक्तौ कुमारगुप्तमाधवगुप्तावस्माभिर्भवतोरनुचरत्वार्थमिमौ निर्दिष्टौ, अनयोरुपरि भवद्भ्यामपि नान्यपरिजनसमवृत्तिभ्यां भवितव्यम्' इत्युक्त्वा तयोराह्वानाय प्रतीहारमादिदेश । 5

27 नचिराद्द्वारदेशनिहितलोचनौ राज्यवर्धनहर्षौ प्रतीहारेण सह प्रविशन्तम्, अग्रतो ज्येष्ठमष्टादशवर्षवयसं नात्युच्चं नातिखर्वमतिगुरुभिः पदन्यासैरनेकनरपतिसंचरणचलां निश्चलीकुर्वाणमिवोर्वीम्, अनवरताभ्यस्तलङ्घनघनोपचयकठिनमांसमेदुरादूरुद्वयान्निष्पतन्तेवानुल्बणजानुग्रन्थिप्रसूतेन तनुतरजङ्घाकाण्डयुगलेन भासमानम्, 10

असद्बुद्धिमशोभनां धियम् 'असेदेवेदमग्र आसीद्' इति बुद्धिं वा । वातिका धूर्ता वातजा विकारा वा । तृष्णावन्तोऽकुलीना ग्रहीतुं न शक्यन्ते तेषां तृष्णायाः कदापि शमनासंभवात् । चातका अपि कौ पृथ्व्यां लीना न भवन्ति खेचरत्वात्तेषाम् । जालिका मायाविनः कैवर्ताश्च । मानसेऽन्तःकरणे सरोविशेषे च । स्फुरत्तमुत्पद्यमानमेवाभिप्रायं स्फुरन्तं चलन्तं मीनं मत्स्यमिव । यमपट्टो धर्मराजप्रतिकृतियुतः पट्टो विद्यते येषां ते । 'अत इनिठनौ' इत्यनेन ठन् मत्वर्थीयः । उद्गीतका उच्चैर्गीतं गानं येषां ते । अंबर आकाशे चित्रमालिखन्त्यसंभाव्यानर्थानारभंते । वस्त्रे च चित्रकर्माचरन्ति । अतिमार्गणा अत्यन्तं याचका दृढाः शराश्च । 'मार्गणं याचनेऽन्वेषे मार्गणस्तु शरेऽर्थिनि' इति हमः । शल्यं विषादं शंकुं च । सर्वैर्दोषाभिषंगैर्दोषसंपर्कैः । उपधाभिर्भृत्यपरीक्षणोपायैः । 'उपधा धर्माद्यैर्यत्परीक्षणम्' इत्यमरः । अन्यपरिजनसमा इतरसेवकतुल्या वृत्तिर्वर्तनं तया ।

न चिरादिति । राज्यवर्धनहर्षौ प्रतिहारेण सह प्रविशंतमग्रतो ज्येष्ठं कुमारगुप्तं पृष्ठतश्च तस्य कनीयांसं माधवगुप्तं ददृशतुरिति संबंधः । कथमित्याह । अष्टादश वर्षाणि वयो यस्य तं नातिखर्वं नातिवामनं पादन्यासैश्चरणसंक्रमणैरनेकेषां नरपतीनां संचरणेन गमनेन चलामुर्वीं पृथ्वीं निश्चलीकुर्वाणं स्थिरीकुर्वाणमिव । अनवरतं सततमभ्यस्तेन कृतेन लंघनेनोड्डानेन गमनेन वा घनो दृढ उपचयो वृद्धिर्यस्य तस्मादूरुद्वयादंकद्वयाद् । अनुल्बणाया अनुद्धताया जानुग्रंथेः प्रसूतेन जातेन । तनुतरेण सूक्ष्मेण जंघाकांडद्वयेन प्रसृतायुगलेन 'पोटरी' इति महाराष्ट्रभाषायां प्रसिद्धेन भासमानं शोभमानम् । उल्लिखिताभ्यां तनूभूताभ्यां पार्श्वाभ्यां कक्षाधोभागाभ्यां प्रकाशितः प्रकटितः

उल्लिखितपार्श्वप्रकाशितकाशिम्ना मन्दरमिव सुरासुररभसभ्रामितवासुकि-
कषणक्षीणेन मध्येन लक्ष्यमाणम्, अतिविस्तीर्णेनोरसा स्वामिसंभा-
वनानामपरिमितानामवकाशमिव प्रयच्छन्तम्, प्रलम्बमानस्य भुज-
युगलस्य निभृतललितैर्विक्षेपैरतिदुस्तरं तरन्तमिव यौवनोदधिम्, वाम
करकटकमाणिक्यमरीचिमञ्जरीजालिन्या समुद्भिद्यमानप्रतापानलशि- 5
खापल्लवयेव चापकिणलेखयाङ्कितपीवरप्रकोष्ठम्, आलोहिनीमुच्चांस-
तटावलम्बिनीमस्त्रग्रहणव्रतविधृतां रौरवीमिव त्वचं कर्णाभरणमणेः
प्रभां बिभ्राणम्, उत्कोटिकेयूरपत्रभङ्गपुत्रिकाप्रतिबिम्बगर्भकपोलं मुखं
चन्द्रमसमिव हृदयस्थितरोहिणीकमुद्वहन्तम्, अचपलस्तिमिततारके-
णाधोमुखेन चक्षुषा शिक्षयन्तमिव लक्ष्मीलाभोत्तानितमुखानि पङ्कज- 10
वनानि विनयम्, स्वाम्यनुरागमिवाभ्लातकमुत्तंसीकृतं शिरसा धार-
यन्तम्, निर्दयाकर्षणभङ्गभीततया सकलकार्मुकार्पितामिव नम्रतां प्रका-
शयन्तम्, शैशव एव निर्जितैरिन्द्रियैररिभिरिव संयतैः शोभमानम्,
प्रणयिनीमिव विश्वासभूमिं कुलपुत्रतामनुवर्तमानम्, तेजस्विनमपि
शीलेनाह्लादकेन सवितारमिव शशिनान्तर्गतेन विराजमानम्, अत्र- 15

कशिमा कृशता यस्य तेन मध्येन कटिना । सुरासुरै रभसेन वेगेन भ्रमितो वासुकिः शेषराजस्तेन कषणं घर्षणं तेन क्षीणेन मध्येनोपलक्ष्यमाणं मंदारमिव मंदारपर्वतमिव। अवकाशं स्थलमिव प्रयच्छन्तं ददानम्। निभृतललितैर्गंभीरमनोहरैः । वामकरस्य सव्यहस्तस्य माणिक्यकटकस्य माणिक्यवलयस्य मरीचिमंजरीणां किरणानां जालं समूहो विद्यते यस्यास्तया चापकिणलेखया चापव्रणचिन्हराज्या समुद्भिद्यमानस्योद्गच्छतः प्रतापानलस्य शिखापल्लवया शिखापल्लवेनेव । अत्र पल्लवशब्दस्य स्त्रीत्वं चिन्त्यम् । नेदं चापकिण लेखाविशेषणं बहुव्रीहिस्वीकारेण यथाकथंचिल्लापन इवशब्दास्वारस्यं चेति दिक्। अस्त्रग्रहणं शस्त्रस्वीकारस्तस्य व्रते विधृतां शस्त्राध्ययनकालेऽङ्गीकृताम् । रौरवीं मृगसंबंधिनीम् । 'तस्येदम्' इत्यनेनाणि टिड्ढाणञित्यनेन ङीप् । उत्कोटिकस्योर्ध्वाग्रभागस्य केयूरस्यांगदस्य पत्रभंगपुत्रिका रचनाविशेष उल्लिखिता शालभंजिका तस्याः प्रतिबिंबं गर्भे मध्ये यस्य तादृशः कपोलो यस्य तन्मुखं हृदयस्थिता रोहिणी यस्य तादृशं चंद्रमसमिवोद्वहता । चक्षुषा जातावेकवचनम् । लक्ष्म्याः

---

१ 'निर्दयया कङ्कणभङ्गभीतसकलकार्मुकार्पितामिव.'

लानामपि कायकार्कश्येन गन्धनमिवाचरन्तम्, दर्शनक्रीतमानन्द-
हस्ते विक्रीणानमिव जनं सौभाग्येन, कुमारगुप्तम्, पृष्ठतस्तस्य कनी-
यांसमतिप्रांशुतया गौरतया च मनःशिलाशैलमिव संचरन्तम्, अनु-
ल्बणमालतीकुसुमशेखरनिभेन निर्जिगमिषता गुरुणा शिरसि चुम्बि-
तमिव यशसा, परस्परविरुद्धयोर्विनययौवनयोश्चिरात्प्रथमसंगमचिह्न- 5
मिव भ्रूसंगतकेन कथयन्तम्, अतिधीरतया हृदयनिहितां स्वामिभ-
क्तिमिव निश्चलां दृष्टिं धारयन्तम्, अच्छाच्छचन्दनरसानुलेपशीतलं
संनिहितहारोपधानं वक्षःस्थलमनन्तसामन्तसंक्रान्तिश्रान्तायाः श्रियो
विशालं शशिमणिशिलापट्टशयनमिव बिभ्राणम्, चक्षुः कुरङ्गकैर्घोणा-
वंशं वराहैः स्कन्धपीठं महिषैः प्रकोष्ठबन्धं व्याघ्रैः पराक्रमं केसरि- 10

श्रियो लाभेनोत्तानितान्युपरि कृतानि मुखानि यैस्तानि । अम्लातकं ताम्रकुरं-टकपुष्पम् । अतएव तस्यानुरागसादृश्यम् । उत्तंसीकृतं शेखरतां नीतम् । निर्दयं दृढं यदाकर्षणं तेन भंगो नाशस्तस्य भीततया भीत्या सकलैः कार्मुकैर्धनुर्भिरर्पितां दत्तामिव । 'निर्दयया कंकणभंगभीतसकलकार्मुकार्पिताम्' इति पाठे निर्दयया दयाराहित्येन कंकणस्य वर्तुलस्य यो भंगस्तेन भीतैः सकलकार्मुकैरर्पितामित्यर्थो ग्राह्यः । कंकणस्यांगुलीयकमित्यर्थो नात्र मनोरमः । कायकार्कश्येन देहदार्ढ्येनाचलानां पर्वतानां गन्धनं मर्दनमिव । मर्दनमिति पाठस्तु साधीयान् । दर्शनेनावलोकनेन क्रीतमावर्जितं जनं सौभाग्येन तद्रूपमूल्येनानंदहस्ते आनंदरूपक्रेतुर्हस्ते विक्रीणानमिव । अवलोकनेनैव वश्यतां नीतमतएव क्रीतं जनमानंदभाजं विदधात्यत आनंदहस्ते विक्रीणीत इत्युक्तम् । विक्रीणान इति रूपं विपूर्वकात्क्रीणातेः 'परिव्यवेभ्यः क्रियः' इत्यनेनात्मनेपदे शानचि निष्पन्नम् । तस्य कुमारगुप्तस्य । उन्नतत्वाद्गौरवर्णत्वाच्च मनःशिलाशैलसाम्यम् । गौरतयेतीत्थंभूतलक्षणे तृतीया । अनुल्बणस्याव्यक्तस्य मालतीकुसुमशेखरस्य निभेन मिषेण निर्जिगमिषता बहिरागंतुमिच्छुना गुरुणा महता यशसा शिरसि चुंबितमिव । यशसः शुभ्रत्वाच्छेखरसाम्यम् । शेखरे चानुल्बणविशेषणेन तस्य विनीतत्वं व्यज्यते । अविनीतो हि व्यक्ततया जनावलोकनायालंकारादीन् धारयतीति प्रसिद्धमेव । भ्रूसंगतकेन भ्रुवोरंतराले धृतैः केशैः । एतेन तदानीं भ्रुकुट्योरन्तरालवर्तिनां केशानामच्छेदनरीतिर्मान्यजनेष्वासीदिति ज्ञायते । अच्छाच्छस्यातिस्वच्छस्य चंदनरसस्यानुलेपनेन शीतलं हिमं संनहितं स्थापितं हार एव मौक्तिकमालेवोपधानमुपबर्हो यस्य तत् । अनंतेष्वसंख्येषु सामन्तेषु प्रतिभूपेषु

भिर्गमनं मतङ्गजैर्मृगयाक्षपितशेषैर्भीतैरुत्कोचमिव दत्तं दर्शयन्तं माध-वगुप्तं ददृशतुः ।

28 प्रविश्य च दूरादेव चतुर्भिरङ्गैरुत्तमाङ्गेन च गां स्पृशन्तौ नमश्चक्रतुः । स्निग्धनरेन्द्रदृष्टिनिर्दिष्टामुचितां भूमिं भेजाते । मुहूर्तं च स्थित्वा भूपतिरादिदेश तौ—'अद्यप्रभृति भवद्भ्यां कुमारावनुव- 5
र्तनीयौ' इति । 'यथाज्ञापयति देवः' इति मेदिनीदोलायमानमौ-लिभ्यामुत्थाय राज्यवर्धनहर्षौ प्रणेमतुः । तौ च पितरम् । ततश्चा-रभ्य क्षणमपि निमेषोन्मेषाविव चक्षुर्गोचरादनपयान्तावुच्छ्वासनिःश्वा-साविव नक्तंदिवमभिमुखस्थितौ भुजाविव सततपार्श्ववर्तिनौ कुमार-योस्तौ बभूवतुः । 10

29 अथ राज्यश्रीरपि नृत्यगीतादिषु विदग्धासु सखीषु सक-लासु कलासु च प्रतिदिवसमुपचीयमानपरिचया शनैः शनैरवर्धत । परिमितैरेव दिवसैर्यौवनमारुरोह । निपेतुरेकस्यां तस्यां शरा इव लक्ष्यभुवि भूभुजां सर्वेषां दृष्टयः । दूतप्रेषणादिभिश्च तां ययाचिरे राजानः । 15

30 कदाचित्तु राजान्तःपुरप्रासादस्थितो बाह्यकक्ष्यावस्थितेन पुरुषेण स्वप्रस्तावागतां गीयमानामार्यामशृणोत्—

संक्रान्त्या संक्रमणेन श्रान्तायाः खिन्नायाः श्रियो राजलक्ष्म्या विशालं महत् शशिमणिशिलापट्टमेव चंद्रकान्तशिलाखंडमेव शयनम् । घोणा नासिकैव वंशो वेणु-रुन्नतत्वात् । उत्कोचमिव गुप्तोपहारमिव 'लांच' इति माहाराष्ट्रभाषायाम् ।

प्रविश्येति । चतुर्भिरंगैर्जानुभ्यां हस्ताभ्यांच । गां पृथ्वीम् । स्निग्धेन प्रेमवता नरेंद्रेण नृपेण दृष्ट्या निर्दिष्टां दर्शितामुचितां सेवकयोग्याम् । मेदिन्यां पृथ्व्यां दोलायमानाभ्यां लंबमानाभ्यां मौलिभ्यां मस्तकाभ्याम् । निमेषोन्मेषाविव संकोचविकासाविव ।

अथेति । नृत्यं नर्तनं गीतं गानं चादि प्रमुखं यासां तासु विदग्धासु पंडितासु सखीषु मनोहरासु सकलासु कलासु च । उपचीयमानो वर्धमानः परि-चयो यस्याः सा ।

कदाचिदिति । बाह्य कक्ष्यायां प्रासादस्य बहिःप्रकोष्ठे ।

'उद्वेगमहावर्ते पातयति पयोधरोन्नमनकाले।
सरिदिव तटमनुवर्षं विवर्धमाना सुता पितरम्' ॥ ५ ॥

31 तां च श्रुत्वा पार्श्वस्थितां महादेवीमुत्सारितपरिजनो जगाद— 'देवि, तरुणीभूता वत्सा राज्यश्रीः। एतदीया गुणवत्तेव क्षणमपि हृदयान्नापयाति मे चिन्ता। यौवनारम्भ एव च कन्यकानामिन्धनीभवन्ति पितरः संतापानलस्य। हृदयमन्धकारयति मे दिवसमिव पयोधरोन्नतिरस्याः। केनापि कृता धर्म्या नाभिमता मे स्थितिरियं यदङ्कसंभूतान्यङ्कलालितान्यपरित्याज्यान्यपत्यकान्यकाण्ड एवागत्यासंस्तुतैर्नीयन्ते। एतानि तानि खल्वङ्कनस्थानानि संसारस्य। सेयं सर्वाभिभाविनी शोकाग्नेर्दाहशक्तिर्यदपत्यत्वे समाने जातायां दुहितरि दूयन्ते सन्तः। एतदर्थं जन्मकाल एव कन्यकाभ्यः प्रयच्छन्ति सलिलमश्रुभिः साधवः। एतद्भयादकृतदारपरिग्रहाः परिहृतगृहवसतयः शून्यान्यरण्यान्यधिशेरते मुनयः। को हि नाम सहते विरहमपत्यानाम्। यथा यथा समापतन्ति दूता वराणां वराकी लज्जमानेव चिन्ता तथा तथा नितरां प्रविशति मे हृदयम्। किं क्रियते। तथापि गृहगतैरनुगन्तव्या एव लोकवृत्तयः। प्रायेण च सत्स्वप्य-

---

उद्वेगेति। अनुवर्षं प्रतिहायनं प्रतिवर्षाकालं च। वर्धमाना सुता कन्या पयोधरयोः स्तनयोः पयोधराणां मेघानां चोन्नमनस्योद्गमनस्य काले तारुण्ये वर्षाकाले च। पितरं जनकमुद्वेगस्य मानसपीडाया महत्यावर्ते आवर्तने। पक्षे उद्वेग इव महावर्ते महत्यंभसां भ्रमे पातयति। कथमिव सरिन्नदी तटं तीरमिव। 'आवर्तश्चिंतने वारिभ्रमे चावर्तने पुमान्' इति मेदिनी।

तां चेति। उत्सारिता दूरीकृताः परिजना येन सः। पार्श्वे समीपे स्थिताम्। तरुणीभूता यौवनमापन्ना। **एतदीयेति**। हृदयादनपगमनमेव गुणवत्तायाश्चिन्तायाश्च साम्यम्। पयोधरयोः स्तनयोर्मेघानां चोन्नतिः। धर्म्या धर्मेण प्राप्या। नौवयोधर्मेत्यादिना धर्मशब्दात्प्राप्त्यार्थे यत्। इयं स्थितिराचारो नाभिमता न मान्या। अकांड एवातर्कितमेव। असंस्तुतैरपरिचितैः। अंकनस्थानानि चिन्हस्थानानि। **शून्यान्यरण्यानीति**। 'अधिशीङ्स्थासां कर्म' इत्यनेन कर्मत्वम्। वराकी दीना। गृहगतैर्गृहस्थैः। अभिजनं कुलम् धरणीधराणां नृपाणां पर्वतानां च। सकलेन भुवनेन जगता नमस्कृतो वन्दितः। ग्रहपतिरिव सूर्य

न्येषु वरगुणेष्वभिजनमेवानुरुध्यन्ते धीमन्तः। धरणीधराणां च मूर्ध्नि स्थितो माहेश्वरः पादन्यास इव सकलभुवननमस्कृतो मौखरीवंशः। तत्रापि तिलकभूतस्यावन्तिवर्मणः सूनुरग्रजो ग्रहवर्मा नाम ग्रहपति- रिव गां गतः पितुरन्यूनो गुणैरेनां प्रार्थयते। यदि भवत्या अपि मतिरनुमन्यते ततस्तस्मै दातुमिच्छामि' इत्युक्तवति भर्तरि दुहि- 5 तृस्नेहकातरतरहृदया साश्रुलोचना महादेवी प्रत्युवाच—'आर्यपुत्र, संवर्धनमात्रोपयोगिन्यो धात्रीनिर्विशेषा भवन्ति खलु मातरः कन्य- कानाम्। दाने तु प्रमाणमासां पितरः। केवलं कृपाकृतविशेषः सुदू- रेण तनयस्नेहादतिरिच्यते दुहितृस्नेहः। यथा यावज्जीवमावयोरार्तिता प्रतिपद्यते तथार्यपुत्र एव जानाति' इति।[1] 10

32 राजा तु जातनिश्चयो दुहितृदानं प्रति समाहूय सुता- वपि विदितार्थावकार्षीत्। शोभने च दिवसे ग्रहवर्मणा कन्यां प्रार्थ- यितुं प्रेषितस्य पूर्वागतस्यैव प्रधानदूतपुरुषस्य करे सर्वराजकुलसमक्षं दुहितृदानजलमपातयत्। जातमुदि कृतार्थे गते च तस्मिन्नासन्नेषु च विवाहदिवसेषूद्दामदीयमानताम्बूलपटवासकुसुमप्रसाधितसर्वलोकम्, 15 सकलदेशादिश्यमानशिल्पिसार्थागमनम्, अवनिपालपुरुषगृहीतसमग्र-

---

इव। दुहितृस्नेहेन कन्याप्रेम्णा कातरं भीरु हृदयं यस्याः सा। धात्रीनिर्विशेषा धात्र्या निर्गतो विशेषो यस्याः सा। उपमातृसदृश इत्यर्थः। 'धात्री जनन्या- मलकी वसुमत्युपमातृषु' इति मेदिनी। आर्तिता मनःपीडात्वम्।

राजेति। जातमुदीति। एवं राजकुलमासीदिति संबंधः। कथमिव। उद्दामं सातिशयं दीयमानैस्तांबूलैः पटवासैः सुगंधिचूर्णैः कुसुमैः पुष्पैश्च प्रसा- धिता अलंकृताः सर्वलोका यस्मिन्। सकलदेशेष्वादिश्यमानमाज्ञाप्यमानं शिल्पिसार्थानां कारुसमूहानामागमनं यस्मिंस्तत्। 'तक्षा च तंतुवायश्च नापितो रजकस्तथा। पंचमश्चर्मकारश्च कारवः शिल्पिनो मताः।' अवनिपालपुरुषै राजसेवकैर्गृहीतःस्वीकृतः समग्रैः सकलैर्ग्रामीणैर्ग्राम्यैर्जनैरानीयमान उपकरण- संभारः साधनसमूहो यस्मिंस्तत्। 'ग्रामाद्यखञौ' इत्यनेन खञ् ग्रामशब्दात्। राज्ञां नृपाणां दौवारिकैर्द्वाररक्षकैरुपनीयमानान्यनेकानि नृपाणामुपायनान्युपहारा

---

१ 'यथा नेयं यावज्जीवमावयोरार्तितां प्रतिपद्यते'

ग्रामीणानीयमानोपकरणसंभारम्, राजदौवारिकोपनीयमानानेकनृपोपायनम्, उपनिमन्त्रितागतबन्धुवर्गसंवर्गणव्यग्रराजवल्लभम्, लब्धमधुमदप्रचण्डचर्मकारकरपुटोल्लालितकोणपट्टविघट्टनरणन्मङ्गलपटहम्, पिष्टपञ्चाङ्गुलमण्ड्यमानोलूखलमुसलशिलाद्युपकरणम्, अशेषाशामुखाविर्भूतचारणपरम्परापूर्यमाणप्रकोष्ठप्रतिष्ठाप्यमानेन्द्राणीदैवतम्, सितकुसुमविलेपनवसनसत्कृतैः सूत्रधारैरादीयमानविवाहवेदीसूत्रपातम्, उत्कूर्चककरैश्च सुधाकर्परस्कन्धैरधिरोहिणीसमारूढैर्धवैर्धवलीक्रियमाणप्रासादप्रतोलीप्राकारशिखरम्, क्षुण्णक्षाल्यमानकुसुम्भकसंभाराम्भःप्लवरज्यमानजनपादपल्लवम्, निरूप्यमाणयौतकयोग्यमातङ्गतुरङ्गतरङ्गिताङ्गनम्, गणनाभियुक्तगणकगणगृह्यमाणलग्नगुणम्, गन्धोदकवाहिमकरमुखप्रणालीपूर्यमाणक्रीडावापीसमूहम्, हेमकारचक्रप्रक्रान्त-

---

यस्मिंस्तत् । द्वारशब्दाद् 'रक्षति' इत्यनेन ठकि 'द्वारादीनां च' इत्यनेनैजागमे सिद्धं दौवारिक इति रूपम् । उपनिमंत्रितस्याहूतस्यागतस्य बंधुवर्गस्याप्तसमूहस्य संवर्गणे स्वागते व्यग्रा राजवल्लभा यस्मिन् । लब्धस्याधिगतस्य मधुनो मद्यस्य मदेन प्रचंडा भयंकराश्चर्मकाराः पादूकृतस्तैः करपुटैरुल्लालिताः कंपिताः कृतसंस्कारा वा कोणा भेरीदंडास्तैर्यत्पट्टु विघट्टनं ताडनं तेन रणन्तः शब्दं विदधतो भेरीपटहा भेरीसमूहा यस्मिंस्तत् । पिष्टस्य सुधाचूर्णस्य पंचागुलं पिष्टपंचांगुलम् । सुधालिप्तानामंगुलीनां पंचकमित्यर्थः । 'तत्पुरुषस्यांगुलेः संख्याव्ययादेः' इत्यनेनाच् समासांतः । तेन मंड्यमानम् उलूखलमुसलशिलादि उपकरणं साधनं यस्मिंस्तत् । अद्य यावद् उलूखलादिचित्रीकरणपद्धतिर्विवाहे वर्तते । अशेषाशामुखेभ्योऽखिलाभ्यो दिग्भ्य आविर्भूतया आगतया चारणानां बंदिनां परंपरया पूर्यमाणे व्याप्ते प्रकोष्ठेऽलिन्दे प्रतिष्ठाप्यमानम् इंद्राणीदैवतं यस्मिन् । विवाहे शच्याः पूजनमावश्यकम् । सितैः शुभ्रैः कुसुमैः पुष्पैर्विलेपनैरंगरागैर्वसनैर्वस्त्रैश्च सत्कृतैर्भूषितैः सूत्रधारैः स्थपतिभिरादीयमानो रच्यमानो विवाहवेद्याः सूत्रस्य परिमाणरज्वाः पातो रचनारंभः यस्मिन् । उन्मुखा ऊर्ध्वमुखाः कूर्चकाः 'कुंचला' इति भाषायां प्रसिद्धाः करेषु येषां तैः सुधायाः कर्पराः कपालाः स्कंधेषु येषां तैः । 'स्यात्कर्परः कपालोऽस्त्री' इत्यमरः । अधिरोहिणीं निश्रेणीं 'शिडी' इति भाषायां प्रसिद्धामधिरूढैर्धवैः पुरुषैर्धवलीक्रियमाणानि प्रासादस्य राजगृहस्य प्रतोलीप्राकारस्य मार्गवप्रस्य शिखराणि यस्मिंस्तत् । क्षुण्णश्चूर्णीकृतः क्षाल्यमानः स्वच्छीक्रियमाणः कुसुंभसंभारः काश्मीरजसमूहस्तस्यांभः-

हाटकघटनटाङ्कारवाचालितालिन्दकम्, उत्थापिताभिनवभित्तिपात्यमानवहलवालुकाकण्ठकालेपाकुलालेपकलोकम्, चतुरचित्रकरचक्रवाललिख्यमानमङ्गल्यालेख्यम्, लेप्यकारकदम्बकक्रियमाणमृण्मयमीनकूर्ममकरनारिकेलकदलीपूगवृक्षकम्, क्षितिपालैश्च स्वयमाबद्धकक्ष्यैः स्वाम्यर्पितकर्मशोभासंपादनाकुलैः सिन्दूरकुट्टिमभूमीश्च मसृणयद्भिर्विनिहितसरसातर्पणहस्तान्विन्यस्तालक्तकपाटलांश्च चूताशोकपल्लवलाञ्छितशिखरानुद्वाहवितर्दिकास्तम्भानुत्तम्भयद्भिः प्रारब्धविविधव्यापारम्, आसूर्योदयाच्च प्रविष्टाभिः सतीभिः सुभगाभिः सुरूपाभिः सुवेशाभिरविधवाभिः सिन्दूररजोराजिराजितललाटाभिर्वधूवरगोत्रग्रहणगर्भाणि श्रुतिसुभगानि मङ्गलानि गायन्तीभिर्बहुविधवर्णकादिग्धाङ्गुलीभिर्ग्रीवासूत्राणि च चित्रयन्तीभिश्चित्रपत्रलतालेख्यकुशलाभिः कलशांश्च धवलिताञ्शीतलशाराजिरश्रेणीश्च मण्डयन्तीभिरभिन्नपुटक-

---

ल्लवेनोदकपूरेण रज्यमाना रक्तीक्रियमाणा जनानां पादपल्लवा यस्मिन्। निरूप्यमाणा दृश्यमाना यौतकयोग्या दुहितृदानकाले जामात्रे दातुं योग्या मातंगा हस्तिनस्तुरंगा अश्वाश्च तैस्तरंगितमंगनं यस्य तत्। गणनायां संख्यानेऽभियुक्तेन नियुक्तेन गणकगणेन मौहूर्तिकसमूहेन गृह्यमाणा लग्नस्य मेषादेर्गुणा यस्मिन्। गंधोदकं सुगंधिवारि वहन्ति ताभिर्मकरस्य मुखं यासां ताभिः प्रणालीभिर्जलनिःसरणमार्गैः पूर्यमाणः क्रीडावापीसमूहः क्रीडार्थे निर्मितानां कूपानां समूहो यस्मिन्। हेमकारचक्रेण सुवर्णकारसमूहेन प्रक्रांतं प्रारब्धं हाटकघटनं सौवर्णालंकारनिर्माणं तस्य टांकारेण शब्देन वाचलितोऽलिंदः प्रकोष्ठो यस्मिन्। उत्थापिताः समुच्छ्रिताः या अभिनवा नूतनाः भित्तयः तासु पात्यमानः बहुलाः वालुकानां कंठकानां कणाः यस्मिन् एतादृशो य आलेपः लोके 'चुन्याचा गिलावा' इति प्रसिद्धः तस्मिन् आकुलाः व्यग्राः आलेपकलोकाः 'गवंडि' इति प्रसिद्धा कारवः यस्मिन्। चतुराणां चित्रकाराणां चक्रवालेन समूहेन लिख्यमानानि मांगल्यानि मंगलसंबंधीन्यालेख्यानि चित्राणि यस्मिन्। लेप्यकारकदंबेनालेपकवर्गेण क्रियमाणा मृण्मया मीना मत्स्याः कूर्मा नारिकेलकदलीपूगवृक्षा यस्मिन्। क्षितिपालैरित्यस्य प्रारब्धविविधव्यापारमित्यनेन संबंधः। तान् क्षितिपालान्विशिनष्टि। आबद्धकक्ष्यैर्बद्धपरिकरैः। स्वामिनाऽर्पितस्य नृपेणाज्ञापितस्य कर्मणः शोभायाः संपादन आकुलैर्व्याकुलैः सिंदूरकुट्टिमभूमीः सिन्दूरप्रस्तरभुवो मसृणयद्भिः श्लक्ष्णीकुर्वद्भिः। कुट्टिमशब्दो यद्यपि निबद्धभूवाचकस्तथापि भूमिरूपविशे-

पांसतूलपल्लवांश्च वैवाहिककङ्कणोर्णासूत्रसंनाहांश्च रञ्जयन्तीभिर्बलाश-
नाघृतघनीकृतकुङ्कुमकल्कमिश्रितांश्चाङ्गरागांल्लावण्यविशेषकृन्ति च मु-
खालेपनानि कल्पयन्तीभिः कक्कोलमिश्राः सजातीफलाः स्फुरत्स्फीत-
स्फाटिककर्पूरशकलखचितान्तराला लवङ्गमाला रचयन्तीभिः समन्ता-
त्सामन्तसीमन्तिनीभिर्व्याप्तम्, बहुविधभक्तिनिर्माणनिपुणपुराणपौर- 5
पुरंध्रिबध्यमानैर्बद्धैश्चाचारचतुरान्तःपुरजरतीजनितपूजाराजमानरजक-
रज्यमानै रक्तैश्चोभयपटान्तलग्नपरिजनप्रेङ्खोलितैश्छायासु शोष्यमाणैः
शुष्कैश्च कुटिलक्रमरूपक्रियमाणपल्लवपरभागैरपरैरारब्धकुङ्कुमपङ्कस्था-
सकच्छुरणैरपरैरुद्भुजभुजिष्यभज्यमानभङ्गुरोत्तरीयैः क्षौमैश्च बादरैश्च

घ्योपादानादिह निबद्धमात्रवाचको ग्रन्थो विशिष्टवाचकानामिति न्याया-
दिति दिक्। विनिहिताः स्थापिताः सरसस्यार्द्रस्यातर्पणस्य चूर्णविशे-
षस्य हस्ता येषु तान्। उद्वाहस्य विवाहस्य वेद्याः स्तंभान् उत्तंभयद्भिरूर्ध्वांकुर्वाद्भिः।
'उदःस्थास्तंभोः पूर्वस्य' इत्यनेन पूर्वसवर्णः। प्रविष्टाभिरित्यादीनां तृतीया-
न्तानां व्याप्तमित्यनेनान्वयः। सिंदूररजोराजिभिः काश्मीरजधूलिसमूहै राजितं शो-
भितं ललाटं यासां ताभिः। अथ यावाद्विवाहादिमंगलेषु 'मळवट' इति प्रसिद्धं लेपमुत्त-
मांगेषु नार्यो विदधति। बहुविधाभिर्वर्णकाभिर्विलेपनैर्दंधाभिरुपालिप्ताभिरं-
गुलीभिः करणैः। ग्रीवासूत्राणि विवाहे बध्यमानानि मंगलसूत्राणि चित्रय-
न्तीभिः। 'वर्णकःचारणे स्त्री तु चंदने च विलेपन' इति मेदिनी। शाराजिरं
शारवमिति संकेतः। शालाजिरश्रेणीरितीश्वरचंद्रपाठः। तदा शालाया अजिर-
श्रेणीरंगनपंक्तीरित्यर्थः। शालाजिराणि शरावांश्चेति जीवानंदपाठः। शरावान्मृ-
त्पात्राणीत्यर्थः। अभिन्नपुटो वंशादिमयश्चतुष्कोणः पाटलाकृतिर्जालकैः क्रियते।
तच्छिद्रांतरपूरणाय कार्पासतूलपल्लवा रज्यन्त इति संकेतः। वैवाहिकस्य
विवाहसंबंधिनः कंकणस्योर्णासूत्राणां मेषलोमसूत्राणां संनाहान् रचनाः। बला-
शना पुष्पाद्योषधिविशेषस्तत्पक्वं घृतं रक्षार्थं क्रियते। तेन घृतेन घनीकृतः
कुंकुमकल्कस्तेन मिश्रितान्। स्फुरद्भिः प्रकाशमानैः स्फीतैर्बृहद्भिः स्फाटिककर्पूरस्य
कर्पूरविशेषस्य शकलैः खंडैः खचितमंतरालं यासां ताः। सर्वतो वासोभिर्वसनैः
संछादितमिति संबंधः। कथंभूतैरित्याह। बहुविधानां भक्तीनां रचनानां निर्माणे
निपुणाभिः कुशलाभिः पुराणाभिः पुरातनीभिः पौरपुरंध्रीभिर्नागरिकप्रमदा-

दुकूलैश्च लालातन्तुजैश्चांशुकैश्च नेत्रैश्च निर्मोकनिभैरकठोररम्भागर्भ-कोमलैर्निःश्वासहार्यैः स्पर्शानुमेयैर्वासोभिः सर्वतः स्फुरद्भिरिन्द्रायुधस-हस्रैरिव संछादितम्, उज्ज्वलनिचोलकावगुण्ठ्यमानोपधानैः हंसतू-लशयनीयैस्तारामुक्ताफलोपचीयमानैश्च कञ्चुकैरनेकोपयोगपाट्यमा-नैश्चापरिमितैः पट्टपटीसहस्रैरभिनवरागकोमलदुकूलराजमानैश्च पटवि-तानैः स्तवरकनिवहनिरन्तरच्छाद्यमानसमस्तपटलैश्च मण्डपैरुच्चित्र-नेत्रपटवेष्ट्यमानैश्च स्तम्भैरुज्ज्वलं रमणीयं चौत्सुक्यदं च मङ्गल्यं चासीद्राजकुलम्।

भिर्वध्यमानैः। आचारे चतुराभिरन्तःपुरजरतीभिर्वृद्धाभिर्जनितया पूजया राज-मानैः शोभमानैं रजकैर्निर्णजकैः रज्यमानैः। उभयपटांते पटान्तद्वये लग्नैः परिजनैः प्रेंखोलितैश्चालितैः। कुटिलः क्रमो येषां तैः रूपैः क्रियमाणः पल्लवानां परभागः शोभा येषां तैः। आरब्धं कुंकुमपंकस्य स्थासकानां रचनाविशेषाणां छुरणं लेपनं येषु तैः। उद्भुजैरूर्ध्वहस्तैर्भुजिष्यैर्विटैर्भज्यमानानि मुष्टिदानेन समीक्रियमाणानि भंगुराणि वक्राण्युत्तरीयाणि येषु तैः। क्षौमैः क्षुमाविकारैः। 'तागाचें कापड' इति भाषायाम्। बादरैःकार्पासैः। लालातंतुजैः कौशेयैः। नेत्रैर्वस्त्रविशेषैः। निर्मोकनिभैः सर्पकंचुकसदृशैः। अकठोरः कोमलो रंभायाः कदल्या गर्भ इव मध्य इव कोमलानि तैर्मृदुभिः। निश्वासेन हार्यैर्हरणीयैरतिसूक्ष्मैरि-त्यर्थः उज्वलैः स्वच्छैर्निचोलिकैरवगुंठ्यमानानि वेष्टयमानान्युपधानान्युपबर्हाणि येषां तैः हंसतूलशयनीयैर्हंसपक्षशय्याभिः। 'उज्वलनिचोलकावगुंठ्यमान हंसकुलैः शयनीयैः' इति पाठे स्वच्छप्रच्छदपटेन आच्छाद्यमानानि हंसकुलानि शयनीयलिखिताः हंसप्रतिमाः येषु तैरित्यर्थः अथवा उज्ज्वलैर्निचोल कैरवगुंठ्यमानानि पराजितानि हंसकुलानि यैस्तैः। शुभ्रत्वाद्धंसा यैः पराजिता इत्यर्थः। ताराकारैर्मुक्ताफलैरुपचीयमानैः शोभमानैः कंचुकैश्चोलैः। स्तवरक-निवह उपरि स्थाप्यमानवस्त्रसमूहस्तेन निरंतरं दृढं छाद्यमानानि समस्तपटलानि सकलपरिच्छदा 'छप्पर' इति भाषायां प्रसिद्धानि गृहाच्छादनानि यैस्तैर्म-ण्डपैः। उच्चित्रैरुपरिस्थितचित्रैर्नेत्रपटैः पटविशेषैर्वेष्टमानैः स्तंभैरुज्ज्वलं प्रकाशमानं राजकुलं राजप्रासादः। 'नेत्रं मंथगुणे वस्त्रभेदे मूले द्रुमस्य च' इति मेदिनी।

---

१ 'मानहंसकुलैश्च शयनीयैः'

33 देवी तु यशोवती विवाहोत्सवपर्याकुलहृदया हृदयेन भर्तरि, कुतूहलेन जामातरि, स्नेहेन दुहितरि, उपचारेण निमन्त्रितस्त्रीषु, आदेशेन परिजने, शरीरेण संचरणे, चक्षुषा कृताकृतप्रत्यवेक्षणेषु, आनन्देन महोत्सवे, एकापि बहुधा विभक्तेवाभवत् । भूपतिरप्युपर्युपरि विसर्जितोष्ट्रवामीजनितजामातृजोषः सत्यप्याज्ञासंपादनदक्षे मुखेक्षणपरे परिजने समं पुत्राभ्यां दुहितृस्नेहविक्लवः सर्वं स्वयमकरोत् ।

34 एवं च तस्मिन्नविधवामय इव भवति राजकुले, मङ्गलमय इव जायमाने जीवलोके, चारणमयेष्विव लक्ष्यमाणेषु दिङ्मुखेषु, पटहमय इव कृतेऽन्तरिक्षे, भूषणमय इव भ्रमति परिजने, बान्धवमय इव दृश्यमाने सर्गे, निर्वृतिमय इवोपलक्ष्यमाणे काले, लक्ष्मीमय इव विजृम्भमाणे महोत्सवे, निधान इव सुखस्य, फल इव जन्मनः, परिणाम इव पुण्यस्य, यौवन इव विभूतेः, यौवराज्य इव प्रीतेः, सिद्धिकाल इव मनोरथस्य वर्तमाने, गण्यमान इव जनाङ्गुलीभिः, आलोक्यमान इव मार्गध्वजैः, प्रत्युद्गम्यमान इव मङ्गल्यवाद्यप्रतिशब्दकैः, आहूयमान इव मौहूर्तिकैः, आकृष्यमाण इव मनोरथैः, परिष्वज्यमान इव वधूसखीहृदयैराजगाम विवाहदिवसः । प्रातरेव प्रतीहारैः समुत्सारितनिखिलानिबद्धलोकं विविक्तमक्रियत राजकुलम् ।

देवीति । विवाहोत्सवेन पर्याकुलं व्याकुलं हृदयं यस्याः सा । बहुधाऽनेकप्रकारेण । 'संख्याया विधार्थे धा' इत्यनेन धा । 'बहुगणवतुडति संख्या' इत्यनेन संख्यात्वं च । उपर्युपरि वारंवारं विसर्जिताभिः प्रेषिताभिरुष्ट्रवामीभिः क्रमेलकवडवाभिर्जनित उत्पादितो जामातुर्जोष आनंदो येन सः ।

एवं चेति । अविधवामयेऽविधवाप्रचुरे । प्राचुर्ये मयट् । निर्वृतिमय इवानंदमय इव । सुखस्य निधान इवेत्यादीनां वर्तमान इत्यनेनान्वयः । समुत्सारिता निःसारिता अनिबद्धलोका अनिमंत्रिता जना यस्मात्तत् ।

35 अथ प्रतीहारः प्रविश्य नृपसमीपम् ' देव, जामातुरन्तिकात्ताम्बूलदायकः पारिजातकनामा संप्राप्तः ' इत्यभिधाय स्वाकारं युवानमदर्शयत् । राजा तु तं दूरादेव जामातृबहुमानाद्दर्शितादरः ' बालक, कच्चित्कुशली ग्रहवर्मा इति पप्रच्छ । असौ तु समाकर्णितनराधिपध्वनिर्धावमानः कतिचित्पदान्युपसृत्य प्रसार्य च बाहू सेवाचतुरश्चिरं वसुंधरायां निधाय मूर्धानमुत्थाय ' देव, कुशली यथाज्ञापयस्यर्चयति च देवं नमस्कारेण ' इति व्यज्ञापयत् । आगतजामातृनिवेदनागतं च तं ज्ञात्वा कृतसत्कारं राजा ' यामिन्याः प्रथमे यामे विवाहकालात्ययकृतो यथा न भवति दोषः ' इति संदिश्य प्रतीपं प्राहिणोत् ।

36 अथ सकलकमलवनलक्ष्मीं वधूमुख इव संचार्य समवसिते वासरे, विवाहदिवसश्रियः पादपल्लव इव रज्यमाने सवितरि, वधूवरानुरागलघूकृतप्रेमलज्जितेष्विव विघटमानेषु चक्रवाकमिथुनेषु, सौभाग्यध्वज इव रक्तांशुकसुकुमारवपुषि नभसि स्फुरति संध्यारागे, कपोतकण्ठकर्बुरे वरयात्रागमनरजसीव कलुषयति दिङ्मुखानि तिमिरे,

अथेति । यथा न भवति दोष इत्युक्त्वैव विरमणं नृपस्य विनयाधिक्यं व्यंजयति । अन्यथा तथा कार्यमित्युक्तौ जामाताज्ञापितः स्याद् । प्रतीपं प्राहिणोत्पुनरपि जामातुः सन्निधौ प्रेषयामास ।

अथेति । कमलानि सायं संकुचन्ति तेषां श्रीर्वधूमुखे निवेश्य वासरो गतो न्विति कल्पना । वधूवरयोरनुरागेण प्रेम्णा लघूकृतं तिरस्कृतं यत्प्रेम तेन लज्जितेष्विव । सायं चक्रवाकमिथुनानि वियुज्यन्ते वधूवरप्रेमाधिक्येन जायमाना लज्जा कारणत्वेन प्रदर्शिता । कपोतस्य पारावतस्य कण्ठ इव कर्बुरे चित्रवर्णे तमसि वरयात्रागमनस्य रजसीव धूलाविव दिङ्मुखानि कलुषयति दिशां मंडलानि मलिनीकुर्वति । अत्र तमसः कर्बुरत्वं संध्यारागसंबंधेन । लग्नस्य मुहूर्तस्य विवाहस्य च संपादने सज्ज इव बद्धपरिकर इव ज्योतिर्गणे नक्षत्रसमूह उज्जिहान उद्गच्छति । वर्धमाना धवला छाया कान्तिर्यस्य पक्षे वर्धमान इव शराव इव छाया यस्य तेन च मंगलकलशसाम्यम् । स च मृण्मयघटः सुधालिप्तः शुभ्रो भवति । वध्वा वदनस्य मुखस्य लावण्येन कान्त्या परिपीतं प्राशितं तमोऽधकारो यस्य तादृशि प्रदोषे रजनीमुखे । वृथोदितं व्यर्थमुद्गतम् । उद्गमनकार्यस्य तमो-

लग्नसंपादनसज्ज इवोज्जिहाने ज्योतिर्गणे, विवाहमङ्गलकलश इवोद-
यशिखरिणा समुत्क्षिप्यमाणे वर्धमानधवलच्छाये ताराधिपमण्डले, वधू-
वदनलावण्यज्योत्स्नापरिपीततमसि प्रदोषे, वृथोदितमुपहसन्निव रज-
निकरमुत्तानितमुखेषु कुमुदवनेष्वाजगाम मुहुर्मुहुरुल्लासितस्फारस्फुरि-
तारुणचामरैर्मनोरथैरिवोत्थितरागाग्रपल्लवैः पुरो धावमानैः पादातैरु- 5
त्कर्णकटकहयप्रतिहेषितदीयमानस्वागतैरिव वाजिनां वृन्दैश्चापूरितदि-
ग्भागः, चलकर्णचामराणां चामीकरमयसर्वोपकरणानां वर्णकलम्बिनां
बलिनां घण्टाटाङ्कारिणां करिणां घटाभिः घटयन्निव पुनरिन्दूदयवि-
लीनमन्धकारं, नक्षत्रमालामण्डितमुखीं करिणीं निशाकर इव पौरंदरीं
दिशमारूढः, प्रकटितविविधविहगाविरुतैस्तालावचरचारणैः पुरःसरै- 10
र्बालो वसन्त इवोपवनैः क्रियमाणकोलाहलो, गन्धतैलावसेकसुगन्धि-
ना दीपिकाचक्रवालस्यालोकेन कुङ्कुमपटवासधूलिपटलेनेव पिञ्जरीकु-
र्वन्सकलं लोकम्, उत्फुल्लमल्लिकामुण्डमालामध्याध्यासितकुसुमशेखरेण
शिरसा हसन्निव सपरिवेशक्षपाकरं कौमुदीप्रदोषम्, आत्मरूपनिर्जितमक-
रकेतुकरापहृतेन कार्मुकेणेव कौसुमेन दाम्ना विरचितवैकक्ष्यकविलासः, 15

नाशनस्य वधूमुखेनैव संपादितत्वात् । उल्लासितैरुपरि धृतैः स्फारं विशालं महदित्यर्थः स्फुरितं कम्पनं येषां तै रक्तैश्चामरैरुपलक्षितो ग्रहवर्मा आजगामेति संबंधः । कम्पितानां ताम्रचामराणां मनोरथस्य नूतनपत्रसाम्यम् । उत्कर्णानामूर्ध्वकर्णानां कटकहयानां सेनाश्वानां प्रतिहेषितेन प्रतिशब्देन दीयमानं स्वागतं येषां तैर्वाजिनामश्वानां वृंदैः समूहैः।आपूरितो दिग्भागो यस्य सः।चलन्ति कर्णचामराणि कर्णे भूषणार्थं स्थापितानि चामराणि येषां चामीकरमयं सुवर्णमयं सर्वोपकरणं सकलसाहित्यमलंकारा वा येषाम् । वर्णकैराच्छादनवसनैर्लंबन्ते भूमिं स्पृशन्ति ते वर्णकलम्बिन इति यथाकथंचिल्लापनीयम् । घंटानां टांकारो विद्यते येषां तैः । घटयान्निवोत्पादयन्निव । नक्षत्रमालया भूषणविशेषेण ' बिंदी ' इति महाराष्ट्रभाषायां प्रसिद्धेन मंडितं भूषितं मुखं यस्यास्ताम् पक्षे नक्षत्राणां तारकाणां मालया पंक्त्या मंडितं मुखं यस्याः । पौरंदरीं पूर्वां दिशाम् । प्रकटितानि विविधानि विहगानां विरुतानि शब्दा यैस्तैस्तालावचरै स्तालेष्ववचरन्ति नृत्यन्ति तैर्बन्दिभिः । यथा विहगविरुतिभिरुपवनैर्बालो वसन्तो वसन्तारंभः कोलाहलं जनयति तद्वद्वसंतसदृशोयं पक्षिशब्दं विदधद्भिर्ब-न्दिभिरुत्पादितकोलाहल इत्यर्थः । गन्धयुतस्यसुगंधिनस्तैलस्यावसेकेन सिंचनेन

कुसुमसौरभगर्वभ्रान्तभ्रमरकुलकलप्रलापसुभगः पारिजात इव जातः श्रिया सह पुनरवतारितो मेदिनीं, नववधूवदनावलोकनकुतूहलेनेव कृष्यमाणहृदयः पतन्निव मुखेन प्रत्यासन्नलग्नो ग्रहवर्मा ।

37 राजा तु तमुपद्वारमागतं चरणाभ्यामेव राजचक्रानुगम्यमानः समुतः प्रत्युज्जगाम । अवतीर्णं च तं कृतनमस्कारं मन्मथमिव माधवः प्रसारितभुजो गाढमालिलिङ्ग । यथाक्रमं परिष्वक्तराज्यवर्धनहर्षं च हस्ते गृहीत्वाभ्यन्तरं निन्ये । स्वानिर्विशेषासनदानादिना चैनमुपचारेणोपचचार । 5

38 न चिराच्च गम्भीरनामा नृपतेः प्रणयी विद्वान्द्विजन्मा ग्रहवर्माणमुवाच—'तात, त्वां प्राप्य चिरात्खलु राज्यश्रिया घटितौ तेजोमयौ सकलजगद्गीयमानबुधकर्णानन्दकारिगुणगणौ सोमसूर्यवंशाविव पुष्पभूतिमुखरवंशौ । प्रथममेव कौस्तुभमणिरिव गुणैः स्थितोऽसि हृदये देवस्य । इदानीं तु शशीव शिरसा परमेश्वरेणासि वोढव्यो जातः' इति । 10

सुगंधिना सुरभिणा । चक्रवालं समूहः । कुंकुमपटवासः 'अगंजा' इति भाषायां प्रसिद्धः । उत्फुल्लानां विकासितानां मल्लिकानां पुष्पविशेषाणां मुंडमालाया भालस्रजो मध्यं मध्यभागमध्यासितोऽधिष्ठितः कुसुमशेखरो यस्य तेन शिरसा सपरिवेशः समंडलश्चंद्रो यस्मिंस्तं कौमुदीप्रदोषं चंद्रिकायुतं प्रदोषकालं हसन्निव । मालायाः परिवेशसाम्यं चंद्रस्य च शेखरसाम्यम् । विरचितो वैकक्ष्यकस्य तिर्यगुरसि क्षिप्तस्योपवीतादेर्विलासः शोभा येन सः । 'वैकक्ष्यकं तु तत् । यत्तिर्यगुरसि क्षिप्तम्' इत्यमरः । कुसुमानां सौरभस्य सुगंधस्य गर्वेण भ्रांतानां मूढानां भ्रमराणां कुलस्य कलप्रलापेन मधुरध्वनिना सुभगो मनोहरः । श्रिया सह जातो लक्ष्म्या सममुत्पन्नः पारिजातस्तत्संज्ञकवृक्षः श्रिया राज्यश्रिया राज्यलक्ष्म्या पुनर्मेदिनीं पृथ्वीमवतारित आनीतः ।

तातेति । सकलजगता गीयमानो बुधानां विदुषां कर्णयोः श्रोत्रयोर्बुधश्चंद्रपुत्रः कर्णः सूर्यात्मजस्तयोर्वा आनंदकारी गुणगणो ययोस्तौ । हृदये मनसि वक्षसि च । देवस्य नृपतेर्विष्णोर्वा । परमेश्वरेण नृपेण हरेण च । एतेन जामातुः पूजनीयत्वं व्यज्यते ।

39 एवं वदत्येव तस्मिन्नृपमुपसृत्य मौहूर्तिकाः 'देव, समासीदति लग्नवेला। व्रजतु जामाता कौतुकगृहम्' इत्यूचुः । अथ नरेन्द्रेण 'उत्तिष्ठ गच्छ' इति गदितो ग्रहवर्मा प्रविश्यान्तःपुरं जामातृदर्शनकुतूहलिनीनां स्त्रीणां पतितानि लोचनसहस्राणि विकचनीलकुवलयवनानीव लङ्घयन्नाससाद कौतुकगृहद्वारम् । निवारितपरिजनश्च प्रविवेश । 5

40 अथ तत्र कतिपयाप्तप्रियसखीस्वजनप्रमदाप्रायपरिवाराम्, अरुणांशुकावगुण्ठितमुखीं प्रभातसंध्यामिव स्वप्रभया निष्प्रभान्प्रदीपकान्कुर्वाणाम्, अतिसौकुमार्यशङ्कितेनेव यौवनेन नातिनिर्भरमुपगूढाम्, साध्वसनिरुध्यमानहृदयदेशदुःखमुक्तैर्निभृतायतैः श्वसितैरपयान्तं कुमारभावमिवानुशोचन्तीम्, अत्युत्कम्पिनीं पतनभियेव त्रपया निष्पन्दं धार्यमाणाम्, हस्तं तामरसप्रतिपक्षमासन्नग्रहणं शशिनमिव रोहिणीं भयवेपमानमानसामवलोकयन्तीम्, चन्दनधवलतनुलताज्योत्स्नादानसंचितलावण्यात्कुमुदिनीगर्भादिव प्रसृताम्, कुसुमामोदनिर्हारिणीं वसन्तहृदयादिव निर्गताम्, निःश्वासपरिमलाकृष्टमधुकरकुलां 10 15

एवमिति । लंघयन्नाक्रममाणः । कौतुकगृहद्वारमुत्सवगृहस्य विवाहोत्सवगृहस्य द्वारम् । 'कौतुकं त्वभिलाषे स्यादुत्सव' इति मेदिनी ।

अथेति । तत्र वधूमपश्यदिति संबंधः । अरुणांशुकेन लोहितवस्त्रेणावगुंठितमाच्छादितं मुखं यस्यास्ताम् । प्रभातसंध्या चारुणस्यानूरोरल्पैरंशुभिरंशुकैरवगुंठितमुखी भवति । अंशुशब्दाद् 'अल्पे' इत्यनेन कः । नातिनिर्भरं नातिदृढमुपगूढामालिंगिताम् । अप्राप्तपूर्णयौवनां वयःसंधौ वर्तमानामित्यर्थः।साध्वसेन भयेन कंपेन वा निरुध्यमानेन हृदयदेशेन दुःखान्मुक्तैर्निभृतैर्गुप्तैरायतैर्दीर्घैः । अपयान्तं नश्यन्तं कुमारभावं बाल्यम् । तामरसप्रतिपक्षं कमलसदृशमासन्नं प्राप्तं ग्रहणं स्वीकारो यस्य तं हस्तं करमवलोकयन्तीम् । भयेन वेपमानं मानसं मनो यस्यास्ताम् । आसन्नग्रहणं प्राप्तोपरागं शशिनं चंद्रमसमवलोकयन्तीं रोहिणीं चंद्रभार्यामिव । भर्तुर्ग्रहणं दृष्ट्वा रोहिणी वेपते । विवाहे च कुमार्यो भर्तृभीत्या लज्जाधिक्येन वा वेपन्त इति हि प्रत्यक्षम् । वर्णितं चैतत् 'कृतान्तो वा कान्तः समजनि न भेदः प्रथमतः' । चंदनेन धवला शुभ्रा तनुलता यस्यास्ताम् । ज्योत्स्नायाश्चंद्रिकाया आदानेन ग्रहणेन संचितं वर्द्धितं लावण्यं कान्तिर्यस्य

मलयमारुतादिवोत्पन्नाम्, कृतकंदर्पानुसरणां रतिमिव पुनर्जाताम्, प्रभालावण्यमदसौरभमाधुर्यैः कौस्तुभशशिमदिरापारिजातामृतप्रभवैः सर्वरत्नगुणैरपराभिव सुरासुररुषा रत्नाकरेण कल्पितां श्रियं, स्निग्धेन बालिकालोकेन सितसिन्धुवारकुसुममञ्जरीभिरिव मुक्तादीधितिभिः कल्पितकर्णावतंसाम्, कर्णाभरणमरकतप्रभाहरितशाद्वलेन कपोलस्थलीतलेन विनोदयन्तीमिव हारिणीं लोचनच्छायाम्, अधोमुखं वरकौतुकालोकनाकुलं मुहुर्मुहुः कृतमुखोन्नमनप्रयत्नं सखीजनं हृदयं च निर्भर्त्सयन्तीं वधूमपश्यत्। 5

41 प्रविशन्तमेव तं हृदयचौरं बध्वा समर्पितं जग्राह कंदर्पः। परिहासस्मेरमुखीभिश्च नारीभिः कौतुकगृहे यद्यत्कार्यते जामाता तत्तत्सर्वमतिपेशलं चकार। कृतपरिणयानुरूपवेशपरिग्रहां गृहीत्वा करे वधूं निर्जगाम। जगाम च नवसुधाधवलां निमन्त्रितागतैस्तुषारशै- 10

तस्मात्कुमुदिनीगर्भात्। 'कार्यं निदानाद्धि गुणानधीते' इति न्यायेन शुभ्रा तनुलता कमलिन्याः संजाता न्वित्युत्प्रेक्षा। कृतकंदर्पानुसरणामुद्भूतमदनविकाराम्। पक्षे मदनमनुयान्तीम्। प्रभादीनां कौस्तुभादिभिर्यथासंख्येनान्वयः। सर्वरत्नगुणैः कौस्तुभादीनां प्रभादिभिर्गुणैः। इत्थं भूतलक्षणे तृतीया। उपलक्षितां सुरासुररुषा देवासुरयोरुपरि कोपेन लक्ष्मीहरणजेनेत्यर्थः रत्नाकरेण सागरेण कल्पितां श्रियं लक्ष्मीमिव। स्निग्धेन वत्सलेन बालिकाजनेन कन्यकाजनेन। सिताभिः सिंदुवारस्य निर्गुंड्याः कुसुममंजरीभिः। हारिणीं मनोहरां हरिणसंबंधिनीं च। कौतुकालोकन आकुलमुत्सुकं हृदयं सखीजनं च। निर्भर्त्सयन्तीं तर्जयमानामिव। अत्र शतृप्रत्ययश्चिन्त्यः। भर्त्सधातोराकुस्मीयत्वाद्। अथवा हेतुमण्यंतं हेतोराविवक्षयेति बोध्यम्।

प्रविशन्तमिति। हृदयचोरं हृदयहारकम्। कंदर्पो जग्राह। यथा कंचित्स्तेनं कोपि राजपुरुषादेर्हस्ते ददाति तद्वदिमं बध्वार्पितं कंदर्पो जग्राहेत्यर्थः। अतिपेशलमतिमनोहरम्। कृतः परिणयस्य विवाहस्यानुरूपो योग्यो वेशपरिग्रहो नेपथ्यस्वीकारो यया ताम्। वेदीं जगामेति संबंधः। वेदीं विशिनष्टि। नवया नूतनया सुधया धवलाम्। भूभृद्भी राजभिः पर्वतैश्च। तुषारशैलस्य हिमालयस्योपत्यकां समीपस्थभूमिम्। 'उपाधिभ्यां त्यकन्नासन्नारूढयोः' इत्यनेन त्यकन्। 'उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका' इत्यमरः। शुभ्रवर्णत्वं भूभृद्वेष्टितत्वं च तत्साम्यम्। सेकेन सुकुमाराः कोमला यवांकुरास्तैर्दंतुरैरुच्चनीचैः

लोपत्यकामिव त्र्यम्बकाम्बिकाविवाहाहृतैर्भूभृद्भिः परिवृताम्, सेकसु-
कुमारयवाङ्कुरदन्तुरैः पञ्चास्यैः कलशैः कोमलवर्णिकाविचित्रैरमित्र-
मुखैश्च मङ्गल्यफलहस्ताभिरञ्जलिकारिकाभिरुद्भासितपर्यन्ताम्, उपा-
ध्यायोपधीयमानेन्धनधूमायमानाग्निसंधुक्षणाक्षणिकोपद्रष्टृद्विजाम्, उप-
कृशानुनिहितानुपहतहरितकुशाम्, संनिहितदृषदजिनाज्यस्रुक्समित्पू- 5
लीनिवहाम्, नूतनसूर्पार्पितश्यामलशमीपलाशमिश्रलाजहासिनीं वे-
दीम्। आरुरोह च तां दिवमिव सज्योत्स्नः शशी। समुत्ससर्प च
वेल्लितारुणशिखापल्लवस्य शिखिनः कुसुमायुध इव रतिद्वितीयो
रक्ताशोकस्य समीपम्। हुते च हुतभुजि दक्षिणावर्तप्रवृत्ताभिर्वधूवद-
नविलोकनकुतूहलिनीभिरिव ज्वालाभिरेव सह प्रदक्षिणं बभ्राम। पा- 10
त्यमाने च लाजाञ्जलौ नखमयूखधवलिततनुरदृष्टपूर्ववधूवररूपविस्मय-
स्मेर इवादृश्यत विभावसुः।

पंचास्यैः विस्तृतमुखैः 'पचि' विस्तारवचन इत्यस्य रूपं पंचेति। कोमलया वर्णिकया शुभ्ररंगेण विचित्रैरमित्रमुखैः शत्रुवदनैश्च शत्रुमुखाकाराणि पात्राण्यासन्नित्यर्थः। मंगल्यफलं हस्ते यासां ताभिः। अंजलिकारिकाभिर्मृण्मयप्रतिमाभिः उद्भासितः शोभितः पर्यन्तो यस्यास्ताम्। उपाध्यायेन गुरुणोपधीय-मानैः स्थाप्यमानैरिंधनैः समिद्भिर्धूमायमानस्याग्नेः संधुक्षणे प्रज्वलनेऽक्षणिका व्यग्रा उपद्रष्टारः साक्षिणश्छात्रा वा द्विजा ब्राह्मणा यस्यां ताम्। उपकृशानु वन्हेः समीपे निहिताः स्थापिता अनुपहता अनुपयुक्ता प्रत्यग्रा इत्यर्थः हरितकुशा हरिद्वर्णा दर्भा यस्यास्ताम्। दृशदश्मा अजिनं मृगचर्म आज्यं घृतं स्रुक् पात्र-विशेषः समित्पूली एकत्र बद्धाःसमिधः। पूली 'पेंडी' इति भाषायाम्। नूतनसूर्पे नवे प्रस्फोटनेऽर्पिताभिः श्यामलैः कृष्णैः शमीपलाशैः शमीपर्णैर्मिश्रिता भिर्लाजाभिर्हसति ताम्। लाजानां शुभ्रत्वाद्ध स्यसाम्यम्। वेल्लिताश्चलिता अरुणाः ताम्राः शिखापल्लवा ज्वालाग्राणि यस्य तस्य शिखिनो वन्हेः। पक्षे वेल्लिता अरुणाः शिखापल्लवा अग्रपर्णानि यस्य तस्य रक्ताशोकस्य शिखिनो वृक्षस्य। 'शिखी वन्हौ बलीवर्दे शरे केतुग्रहे द्रुम' इति मेदिनी। दक्षिणा-वर्तेनापसव्यवर्तुलेन प्रवृत्ताभिः। नखमयूखैर्नखकिरणैर्धवलिता तनुर्यस्य सः। अदृष्टपूर्वेणानवलोकितपूर्वेण वधूवरयो रूपेण जातो यो विस्मयः तेनाश्चर्येण स्मेर-श्चकित इव। विभावसुर्वन्हिः।

42 अत्रान्तरे स्वच्छकपोलोदरसंक्रान्तमनलप्रतिबिम्बमिव नि-
र्वापयन्ती स्थूलमुक्ताफलविमलबाष्पबिन्दुसंदोहदर्शितदुर्दिना निर्वदन-
विकारं रुरोद वधूः । उदश्रुविलोचनानां च बान्धववधूनामुदपादि
महानाक्रन्दः । परिसमापितवैवाहिकक्रियाकलापस्तु जामाता वध्वा
समं प्रणनाम श्वशुरौ । प्रविवेश च द्वारपक्षलिखितरतिप्रीतिदैवतं 5
प्रणयिभिरिव प्रथमप्रविष्टैरलिकुलैः कृतकोलाहलम्, अलिकुलपक्षप-
वनप्रेङ्खोलितैः कर्णोत्पलप्रहारभयप्रकम्पितैरिव मङ्गलप्रदीपैः प्रकाशि-
तम्, एकदेशलिखितस्तबकितरक्ताशोकतरुतलभाजाधिज्यचापेन ति-
र्यक्कूणितनेत्रत्रिभागेण शरमृजूकुर्वता कामदेवेनाधिष्ठितम्, एकपार्श्व-
न्यस्तेन काञ्चनाचामनकेनेतरपार्श्ववर्तिन्या च दान्तशफरुकधारिण्या 10
कनकपुत्रिकया साक्षाल्लक्ष्म्येवोद्दण्डपुण्डरीकहस्तया सनाथेन सोपधा-
नेन स्वातीर्णेन शयनेन शोभमानम्, शयनशिरोभागस्थितेन च
कृतकुमुदशोभेन कुसुमायुधसाहायकायागतेन शशिनेव निद्राकलशेन
राजतेन विराजमानं वासगृहम् ।

43 तत्र च ह्रीताया नववधूकायाः पराङ्मुखप्रसुप्ताया मणि- 15
भित्तिदर्पणेषु मुखप्रतिबिम्बानि प्रथमालापाकर्णनकौतुकागतगृहदेवता-

---

अत्रान्तर इति । स्वच्छकपोलोदरे स्वच्छे कपोलमध्ये संक्रान्तं पति-
तमनलस्याग्नेः प्रतिबिंबम् । स्वच्छेत्यनेन बिंबग्रहणयोग्यत्वम् । निर्वापयन्ती शम-
यन्ती । स्थूलमुक्ताफलानीव विमलाः स्वच्छा बाष्पबिन्दवस्तेषां संदोहेन समूहेन
दर्शितं दुर्दिनं यया सा । निर्गता विकारा यस्मात्तादृशं वदनं यस्मिन्यथा तथा ।
वदनविकारदर्शनाभावस्तु भर्तृसांनिध्यात् । **प्रविवेशेति** । जामाता वासगृहं प्रवि-
वेशेति संबंधः । द्वारपक्षे द्वारपार्श्वे लिखितं रतेर्मदनभार्यायाः प्रीतिदैवतमर्था-
न्मदनो यस्मिन् । एकदेशे लिखितस्य स्तबकितस्य गुच्छयुतस्य रक्ताशोकस्य
तलं भजति तेन ज्यामधिगतं चापं यस्य तेन । 'अत्यादयः क्रान्ताद्यर्थे द्विती-
यया' इत्यनेन समासः । कूणितः संकुचितो नेत्रत्रिभागो नेत्रापांगो यस्य तेन ।
एतेन लक्ष्यबद्धदृष्टित्वं दर्शितम् । कांचनाचामनकेन सौवर्णष्ठीवनपात्रेण
'पिकदाणी' इति महाराष्ट्रभाषायां प्रथितेन । दन्तशफरुकं हस्तिदंतमयीं पेटिकां
धारयति तया ।

तत्रेति । प्रथमालापस्य प्रथमभाषितस्याकर्णनस्य श्रवणस्य कौतु-
कादागतानां गृहदेवतानामाननानीव मुखानीव । अधुनापि गर्भाधानसंस्कारवे-

ननानीव मणिगवाक्षकेषु वीक्षमाणः क्षणदां निन्ये। स्थित्वा च श्वशुरकुले शीलेनामृतमिव श्वश्रूहृदये वर्षन्नभिनवाभिनवोपचारैरपुनरुक्तान्यानन्दमयानि दश दिनानि स्थित्वा दत्त्वा राजदौवारिकमिव राजकुले रणरणकं यौतुकनिवेदितानीव शम्बलान्यादाय हृदयानि सर्वलोकस्य कथं कथमपि विसर्जितो नृपेण वध्वा सह स्वदेशम- 5 गमदिति।

इति श्रीबाणभट्टकृतौ हर्षचरिते चक्रवर्तिजन्मवर्णनं नाम
चतुर्थ उच्छ्वासः।

लायां वधूवरालापकुतूहलिन्यः प्रमदा निगुह्यात्मानं तिष्ठन्तीति प्रथितमेव। अपुनरुक्तानि नवानि। रणरणकं मनस्तापम्। यौतके कन्यादानकाले दीयमानधने निवेदितानीव समर्पितानीव सर्वलोकस्य हृदयानि मानसानि। कथं कथमपि कष्टेन। अगमत् लृदित्वादङ्।

॥ इति श्रीबाणभट्टकृतहर्षचरितव्याख्ययां बालबोधिन्यां चतुर्थ उच्छ्वासः॥

पञ्चम उच्छ्वासः ।

नियतिर्विधाय पुंसां प्रथमं सुखमुपरि दारुणं दुःखम् ।
कृत्वा लोकं तरला तडिदिव वज्रं निपातयति ॥ १ ॥
पातयति महापुरुषान्समममेव बहूननादरेणैव ।
परिवर्तमान एकः कालः शैलानिवानन्तः ॥ २ ॥

1 अथ कदाचिद्राजा राज्यवर्धनं कवचहरमाहूय हूणान्हन्तुं हरिणानिव हरिर्हरिणेशकिशोरमपरिमितबलानुयातं चिरंतनैरमात्यैरनुरक्तैश्च महासामन्तैः कृत्वा साभिसरमुत्तरापथं प्राहिणोत् ।

2 प्रयान्तं च तं देवो हर्षः कतिचित्प्रयाणकानि तुरङ्गैरनुवव्राज । प्रविष्टे च कैलासप्रभाभासिनीं ककुभं भ्रातरि वर्तमानो नवे वयसि विक्रमरसानुरोधिनि केसरिशरभशार्दूलवराहबहुलेषु तुषारशैलोपकण्ठेषूत्कण्ठमानवनदेवताकटाक्षांशुशारितशरीरकान्तिः क्रीडन्मृ- 10

श्रीवेंकटेशो विजयते ।

अध्यापितः शास्त्रमहं प्रयत्नात्
संलाल्य तैस्तैर्विविधैरुपायैः ॥
पुत्रीकृतो येन गुणार्णवं तं
पितृव्यधीरेन्द्रमहं नमामि ॥ १ ॥

अनुभूतपुत्रजन्मकन्याविवाहादिसुखस्य राज्ञो विपत्तिं सूचयितुमाह । **नियतिरिति** । नियतिर्दैवं पुंसां प्राणिनां प्रथमं सुखं विधाय कृत्वोपर्यनंतरं दारुणं कठोरं दुःखं निपातयति समुत्पादयति । कथमिव । तरला विद्युदालोकं प्रकाशं कृत्वा अनंतरं यथा वज्रं निपातयति तद्वत् । तरलेति नियतेरपि विशेषणम् । उपमालंकारः ॥ १ ॥

नृपमरणं सूचयितुं कालसामर्थ्यं वर्णयति । **पातयतीति** । एकः परिवर्तमानोऽनंतः पर्यंतरहितः कालः बहून् महापुरुषान् श्रेष्ठान् नरान् अनादरेणैव पातयति । कथमिव । परिवर्तमानोऽनंतः शेषः शैलानिव पर्वतानिव । शेषः

गयां मृगलोचनः कतिपयान्यहानि बहिरेव व्यलम्बत । चकार चा-कर्णान्ताकृष्टकार्मुकनिर्गतभासुरभल्लवर्षी स्वल्पीयोभिरेव दिवसैर्निःश्वा-पदान्यरण्यानि ।

३ एकदा तु वासतेय्यास्तुरीये यामे प्रत्युषस्येव स्वप्ने चतु-

स्वांगपरिवर्तनेन गिरीन् यथा पातयति तद्वत् परिवर्तमानो विपरीतः कालो महापुरुषान् पातयतीत्यर्थः । उपमालंकारः ॥ २ ॥

अथेति । राजा प्रतापवर्धनः । कवचहरं कवचधारणयोग्यवयस्कं राज्यवर्धनमाहुय । 'वयसि च' इत्यनेन कवचपूर्वकाद्धरतेरच् । हूणान् तत्संज्ञ-कान् नृपान् हंतुं हरिः सिंहो हरिणान् मृगान् हंतुं हरिणेशस्य मृगराजस्य स्वस्ये-ति यावत् किशोरं वत्समिव । गजादीनां हनने मृगराजः स्वयं गच्छति हरिण-सदृशान् क्षुद्रान् हंतुं किशोरकं प्रेषयति तद्वत् क्षुद्रान् हूणान् हंतुं नृपो राज्यवर्धनं प्राहिणोदित्युपमातात्पर्यम् । अनुरक्तैर्भक्तिमद्भिरमात्यैर्मन्त्रिभिर्महासामंतैः सामं-तश्रेष्ठैः साभिसरं ससहायं कृत्वा । उत्तरापथमौत्तराहं देशं प्राहिणोत् प्रेषयामास ।

प्रयान्तमिति । प्रयाणकानि विश्रान्तिस्थानानि अनुवव्राज अनुजगाम । कैलासप्रभाभासिनीं कैलासाद्रेः प्रभया शोभमानां ककुभं दिशमुत्तरामिति-यावत् । विक्रमरसं पराक्रमरसमनुरुणद्धि अनुसरति तादृशे नवे वयसि तारुण्ये वर्तमानः । एतेन मृगयाकुतूहलित्वं व्यज्यते । केसरिणः सिंहाः शरभाः सिंह-वैरिणः काश्मीरेषु प्रसिद्धाः शार्दूला व्याघ्रा वराहाः सूकरास्तैर्बहुलेषु व्याप्तेषु अथवा इमे बहुलाः प्रभूता येषु । अस्मिन् पक्षे विशेषणस्य परनिपातो यथाकथंचिदंगीकरणीयः । तुषारशैलस्य हिमाद्रेरुपकंठेष्वंतिकेषु । उत्कंठ-मानानामौत्सुक्ययुतानां वनदेवतानां कटाक्षांशुभिर्नेत्रापांगकिरणैः शारिता चित्रिता शरीरकांतिर्देहलावण्यं यस्य सः । मृगलोचनो हरिणाक्षो मृगयां क्रीडन् मृगयायां रममाणः । अत्र कर्मत्वं चिंत्यं क्रीडार्थानामकर्मकत्वात् । 'शयन-क्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः' इति वचनात् । अथवा मृगयाया भावत्वाद् 'अकर्मकधातुभिर्योगे देशः कालो भावो गंतव्योध्वा च कर्मसंज्ञक इति वाच्यम्' इत्यनेन कर्मत्वम् । आकर्णान्तमाकृष्टात्कार्मुकाद्धनुषो निर्गतान् भासुरान् प्रखरान् भल्लान् बाणविशेषान् वर्षति सः । स्वल्पीयोभिः । ईयसुना स्वल्पत्वाधिक्यं व्यंजितम् । निःसारितानि नष्टीकृतानि श्वापदानि पशवो येषु तानि ।

एकदेति । वासतेय्याः वसतौ साध्व्या रात्रेः । वसति शब्दात् तत्र साधुरित्यस्मिन्नर्थे "पथ्यतिथिवसतिस्वपतेर्ढञ्" इत्यनेन ढञ् । तुरीये चतुर्थे ।

लज्वालापुञ्जपिञ्जरीकृतसकलककुभा दुर्निवारेण दवहुतभुजा दह्यमानं केसरिणमद्राक्षीत्। तस्मिन्नेव च दावदहने समुत्सृज्य शावकानुत्प्लुत्य चात्मानं पातयन्तीं सिंहीमपश्यत्। आसीच्चास्य चेतसि—'लोके हि लोहेभ्यः कठिनतराः खलु स्नेहमया बन्धनपाशाः, यदाकृष्टास्तिर्यञ्चो- ऽप्येवमाचरन्ति' इति। प्रबुद्धस्य चास्य मुहुर्मुहुर्दक्षिणेतरमक्षि 5 पस्पन्दे। गात्रेषु चाकस्मादेव वेपथुर्विप्रपथे। निर्निमित्तमेवान्तर्बन्ध- नस्थानाच्चचालेव हृदयम्। अकारणादेव चाजायत गरीयसी दुःखासिका। किमिदमिति च समुत्पन्नविविधविकल्पाविमथितमतिर- पगतधृतिश्चिन्तावनमितवदनः स्तिमिततारकेण चक्षुषा समुद्विग्नमा- नस्थलकमलिनीवनामिव चकार चकोरेक्षणः क्षणं क्षौणीम्। अहि 10 च तस्मिञ्छून्येनैव च चेतसा चिक्रीड मृगयाम्। आरोहति च हरि- तहये मध्यमह्नो भवनमागत्योभयतो मन्दमन्दं संवाह्यमानतनुतालवृन्तः क्षितितलवितताममतिशिशिरमलयजरसलवलुलितवपुषमिन्दुधवलोपधा- नधारिणीं वेत्रपट्टिकामधिशयानः साशङ्क एव तस्थौ।

'चतुरः छयतावाद्याक्षरलोपश्च' इत्यनेन छः। चटुलानां चंचलानां ज्वालानां पुञ्जेन समूहेन पिंजरीकृताः पिशंगीकृताः सकला ककुभो दिशो येन तेन। दवहुतभुजा वनाग्निना। एतेन भावी राजनाशः सूचितः। **तस्मिन्निति**। शाव- कान् बालान् उत्सृज्य त्यक्त्वा। अनेन च राज्ञ्या नृपनाशात्प्रागेव वन्हिपातः सूचितः। दक्षिणेतरं वामम्। अपशकुनोऽयम्। दुःखासिकेव दुःखेन स्थितिरिव। धात्वर्थनिर्देशे ण्वुल्। अथवा दुःखमसिकेवासिपुत्रिकेव तीक्ष्णं दुःखमित्यर्थः। समुत्पन्नैः संजातैर्विविधैरनेकैर्विकल्पैर्विमथिता विलोडिता मतिर्बुद्धिर्यस्य सः। चिंतया आधिनाऽवनमितं वदनं येन सः। चकोर इवेक्षणे यस्य सः। स्तिमितं निश्चलं तारकं कनीनिका यस्य तेन। चक्षुषा एकवचनं जात्यभिप्रायेण न तु तत्र 'निवातपद्मस्तिमितेन चक्षुषा' इतिवत्कश्चिद्धेतुः। शून्येनैव चेतसा चिंता- व्याप्तत्वान्मृगयायां विमनस्कता। हरितहये हरिता हरिद्वर्णा हया अश्वा यस्य तस्मिन् सूर्ये। संवाह्यमानं भ्राम्यत् तनु लघु तालवृन्तं व्यजनं यस्य सः। क्षितितले भूपृष्ठे वितताम् आस्तीर्णाम् अतिशिशिरेण अतिशीतेन मलयजस्य चंद- नस्य रसस्य लवेन लेशेन लुलितं व्याप्तं वपुर्यस्यास्ताम्। वेत्रपटिकां 'चटई' इति भाषायां प्रसिद्धाम्। अधिशयानः स्वपन्। 'अधिशीङ्' इत्यनेन कर्मत्वम्।

4 अथ दूरादेव लेखगर्भया नीलीरागमेचकरुचा चीरचीरिकया रचितमुण्डमालकम्, श्रमातपाभ्यामारोप्यमाणकायकालिमानम् अन्तर्गतेन शोकशिखिनाङ्गारतामिव नीयमानम्, अतित्वरागमनद्रुततरपदोद्धूयमानधूलिराजिव्याजेन राजवार्ताश्रवणकुतूहलिन्या मेदिन्येवानुगम्यमानम्, अभिमुखपवनप्रेङ्खत्प्रविततोत्तरीयपटप्रान्तवीज्यमानोभयपार्श्वमतित्वरया कृतपक्षमिवाशु परापतन्तम्, प्रेर्यमाणमिव पृष्ठतः स्वाम्यादेशेन, कृष्यमाणमिव पुरस्तादायतैः श्रमश्वासमोक्षैः, स्विन्नललाटतटघटमानप्रतिबिम्बकेन कार्यकौतुकादपह्रियमाणलेखमिव भास्वता, संभ्रमभ्रष्टैरिवेन्द्रियैः शून्यीकृतशरीरम्, लेखार्पितप्रयोजनगौरवादिव समेऽपि वर्त्मनि शून्यहृदयतया स्खलन्तम्, कालमेघशकलमिव पतिष्यतो दुर्वार्तावज्रस्य, धूमपल्लवमिव ज्वलिष्यतः शोकज्वलनस्य, बीजमिव फलिष्यतो दुष्कृतशालेरनिमित्तभूतदीर्घाध्वगं कुरङ्गकनामानमायान्तमद्राक्षीत् ।

5

10

अथेति । दूरादेवापतन्तं कुरंगकनामानमध्वगमद्राक्षीदितिसंबंधः । लेखो गर्भे मध्ये यस्यास्तया नीलीरागेणौषधिविशेषरंगेण मेचका श्यामा रुक् कान्तिर्यस्यास्तया । चीरचीरिकया वस्त्रपट्टिकया रचिता मुंडस्य मूर्ध्नो माला येन तम् । लेखगर्भेण नीलेन वसनेन मस्तकं परिणद्धमासीदिति तात्पर्यार्थः । अधुनापि जानपदा लेखावनयैव रीत्या नयन्ति । आरोप्यमाणो रच्यमाणः कायस्य देहस्य कालिमा यस्य तम् । अंगारतामिव निर्वापितवन्हिकाष्ठतामिव । तस्यापि कृष्णवर्णत्वात् । अतित्वरया अतिजवेनागमनाद्द्रुततराभ्यां पदाभ्यामुद्धूयमानाया धूलिराजे रजःपंक्तेर्व्याजेन मिषेण राज्ञो वार्ताया वृत्तान्तस्य श्रवणे कुतूहलं विद्यते यस्याः तया । अभिमुखपवनेन संमुखवायुना प्रेंखभ्यां कंपमानाभ्यां प्रविततभ्यां विशालाभ्यां पटांताभ्यामुत्तरीयप्रान्ताभ्यां वीज्यमानो उभयपार्श्वौ यस्य सः । पटप्रांतयोः पक्षसाम्यम् । स्विद्यति घर्मयुक्ते ललाटपट्टे घटमानं प्रविष्टं प्रतिबिंबं यस्य तेन भास्वता सूर्येण । अपह्रियमाण आकृष्यमाणो लेखो यस्य तम् । **लेखेति** । शून्यहृदयतया जायमाने स्खलने लेखार्पितप्रयोजनस्य गौरवं कारणत्वेन प्रदर्शितम् । पतिष्यत आगमिष्यतो दुर्वार्तैव वज्रं तस्य । कालस्य कृष्णस्य मेघस्य शकलं खण्डमिव । अनिमित्तभूतः अपशकुनसूचको दीर्घाध्वगो दीर्घमार्गगामी । नीलवस्त्रादिपरिधानं चानिमित्तसूचकमिति तात्पर्यम् ।

5 दृष्ट्वा च पूर्वानिमित्तपरम्पराविर्भावितभीतिरभिद्यत हृदयेन। कुरङ्गकस्तु कृतप्रणामः समुपसृत्य प्रथममाननलग्नं विषादमुपनिन्ये, पश्चाल्लेखम्। तं च देवो हर्षः स्वयमेवादायावाचयत्। लेखार्थेनैव च समं गृहीत्वा हृदयेन संतापमचग्रहरूपोऽभ्यधात्––'कुरङ्गक, किं मान्द्यं तातस्य' इति। स चक्षुषा बाष्पजलबिन्दुभिर्मुखेन च खञ्जाक्षरैः क्षरद्भिर्युगपदाचचक्षे––'देव, दाहज्वरो महान्' इति। तच्चाकर्ण्य सहसा सहस्रधेवास्य हृदयं पफाल। कृताचमनश्च जनयितुरायुष्कामोऽपरिमितमणिकनकरजतजातमात्मपरिबर्हमशेषं ब्राह्मणसादकरोत्। अभुक्त एवोच्चचाल। 'दापय वाजिनः पर्याणम्' इति च पुरःस्थितं शिरःकृपाणं बिभ्राणं बभाण युवानम्। वेपमानहृदयश्च ससंभ्रमप्रधावितपरिवर्धकोपनीतमारुह्य तुरङ्गमेकाक्येव प्रावर्तत।

6 अकाण्डप्रयाणसंज्ञाशङ्खक्षुभितं तु संभ्रमात्सज्जीभूतमुद्भूतमुखरखुररवभरितसकलभुवनविवरमागत्यागत्य सर्वाभ्यो दिग्भ्यो धावमानमश्वीयमढौकत। प्रस्थितस्य चास्य प्रदक्षिणेतरं प्रयान्तो विनाशमुपस्थितं राजसिंहस्य हरिणाः प्रकटयांबभूवुः। अशिशिररश्मिमण्डलाभिमुखश्च हृदयमवदारयन्निव दावशुष्के दारुणि दारुणं रराण वायसः।

दृष्ट्वेति। पूर्वानिमित्तानां स्वप्नाद्यशुभसूचकानां परंपराभिराविर्भाविता प्रकटीकृता भीतिर्यस्य सः। अवग्रहरूपः पीडितस्वरूपः खञ्जाक्षरैरव्यक्तवर्णैः। सहस्रधा सहस्रप्रकारेण। 'संख्याया विधार्थे धा'। आत्मपरिबर्हं स्वपरिच्छेदम्। 'परिबर्हो राजयोगद्रव्यपरिच्छेद' इति मेदिनी। ब्राह्मणसाद् ब्राह्मणाधीनम्। 'तदधीनवचने' इत्यनेन सातिप्रत्ययः। शिरःकृपाणं शयनवेलायां शिरोभागे स्थाप्यमानमसिम्। परिवर्धकः अश्वपालः।

अकाण्डेति। अकाण्डप्रयाणमाकस्मिकगमनं तस्य संज्ञायाः शंखैः गमनसूचकैः शंखैः क्षुभितम्। उद्भूतेन उत्पन्नेन मुखराणां खुराणां शफानां रवेण शब्देन भरितं व्याप्तं सकलं भुवनविवरं भूविवरं येन तत्। अश्वीयम् अश्वानां समूहः। "केशाश्वाभ्यां यच्छावन्यतरस्याम्" इत्यनेन छः। अढौकतागच्छत्। प्रदक्षिणेतरं वामं प्रयांतो गच्छंतो राजसिंहस्य मृगाधिपस्य नृपराजस्य वा। स्वैरं चरंतो हरिणाः सिंहस्य विनाशं सूचयन्ति। सिंहसत्वे तेषां स्वैरसंचरणाभावात्।

कज्जलमय इव बहुदिवसमुपचितबहलमलपटलमलिनिततनुरभिमुख-
माजगाम शिखिपिच्छलाञ्छनो नग्नाटकः। दुर्निमित्तैरनभिनन्द्यमानग-
मनश्च नितरामशङ्कत । हृदयेन पितृस्नेहाहितम्रदिम्ना च तत्तदुपेक्ष-
माणस्तुरङ्गमस्कन्धबद्धलक्ष्यं चक्षुरविचलं दधानो दुःसमवसितहसित-
संकथस्तूष्णींभूतेन भूपाललोकेनानुगम्यमानो बहुयोजनसंपिण्डितम- 5
ध्वानमेकेनैवाह्ना समलङ्घयत् ।

7 उपलब्धनरेन्द्रमान्द्यवार्ताविषण्ण इव नष्टतेजस्यधोमुखीभ-
वति भगवति भानुमति भण्डिप्रमुखेन प्रणयिना राजपुत्रलोकेन बहु-
शो विज्ञाप्यमानोऽपि नाहारमकरोत् । पुरःप्रवृत्तप्रतीहारगृह्यमाणग्रामी
णपरम्पराप्रकटितप्रगुणवर्त्मा च वहन्नेव निन्ये निशाम् । 10

8 अन्यस्मिन्नहनि मध्यंदिने विगतजयशब्दम्, अस्तमिततूर्य-
नादम्, उपसंहृतगीतम्, उत्सारितोत्सवम्, अप्रगीतचारणम्, अप्र-
सारितापणपण्यम्, स्थानस्थानेषु पवनबलकुटिलाभिः कोटिहोमधूमले-
खाभिरुल्लसन्तीभिर्यममहिषविषाणकोटिभिरिवोल्लिख्यमानम्, कृतान्त-
पाशवागुराभिरिव वेष्ट्यमानम्, उपरि कालमहिषालंकारकालायसकि- 15

अशिशिररश्मिः सूर्यः । दावेन वनाग्निना शुष्के । उपचितो वर्द्धितो बहलमलो मलाधिक्यं तस्य पटलेन समूहेन मलिनिता कृष्णीकृता तनुः शरीरं यस्य सः शिखिनो मयूरस्य पिच्छं बर्हो लांछनं चिन्हं यस्य स नग्नाटको नग्नक्षपणकः । पितृस्नेहेन जनकप्रेम्णा आहितः स्थापितो म्रदिमा यस्य तेन । तत्तदनिमित्तादि। तुरंगमस्याश्वस्य स्कंधे बद्धं लक्ष्यं येन तच्चक्षुर्नेत्रमविचलं निश्चलं दधानः । दुःखेन समवसिता निवृत्ता हसितसंकथा हास्यकथा यस्य सः । बहुभिर्योजनैः क्रोशचतुष्टयैः संपिंडितं संकलितं । समलंघदत्यक्राम्यत् ।

उपलब्धेति । उपलब्धयाधिगतया नरेंद्रस्य नृपतेर्मान्द्यस्य रोगस्य वार्तया विषण्णे दुःखित इव । दुःखापन्नस्य तेजो न्यूनीभवतीति प्रथितम् । पुरःप्रवृत्तैः पुरःप्रस्थितैः प्रतिहारिभिर्गृह्यमाणानां ग्रामीणानां ग्रामभवानां जनानां परं-परया प्रकटितं प्रदर्शितं प्रगुणं स्पष्टं वर्त्म यस्य सः । वहन् अविश्रांतं गच्छन् ।

अन्यस्मिन्निति । स्कंधावारं सैन्यनिवेशं समाससाद प्रापेति वाक्यम् । कीदृशं स्कंधावारं तदाह । अप्रसारितान्यस्थापितान्यापणेषु पण्यवीथिकासु पण्यानि विक्रेयवस्तूनि यस्मिंस्तम् । पवनबलेन वायुवेगेन कुटिलाभिर्वक्राभिः

ङ्किणीभिरिव कटु क्वणन्तीभिर्दिवसं वायसमण्डलीभिर्भ्रमन्तीभिरावे-
द्यमानप्रत्यासन्नाशुभम्, क्वचित्प्रतिशायितस्निग्धबान्धवाराध्यमानाहि-
र्बुध्नम्, क्वचिद्दीपिकादह्यमानकुलपुत्रकप्रसाद्यमानमातृमण्डलम्, क्व-
चिन्मुण्डोपहाराहरणोद्यतद्रविडप्रार्थ्यमानामर्दकम्, क्वचिदान्ध्रोद्ध्रिय-
माणबाहुवप्रोपयाच्यमानचण्डिकम्, अन्यत्र शिरोविधृतविलीयमानगु- 5
ग्गुलुविकलनवसेवकानुनीयमानमहाकालम्, अपरत्र निशितशस्त्रीनि-
कृत्तात्ममांसहोमप्रसक्तासवर्गम्, अपरत्र प्रकाशनरपतिकुमारकक्रिय-
माणमहामांसविक्रयप्रक्रमम्, उपहतमिव श्मशानपांशुभिः, अमङ्गलैरिव
परिगृहीतम्, यातुधानैरिव विध्वस्तम्, कलिकालेनेव कवलितम्,
पापपटलैरिव संछादितम्, अधर्मविक्षेपैरिव लुण्ठितम्, अनित्यताधि- 10
कारैरिवाक्रान्तम्, नियतिविलासैरिवात्मीकृतम्, शून्यमिव सुप्त-
मिव मुषितमिव विलक्षितमिव छलितमिव मूर्छितमिव स्कन्धावारं
समाससाद।

कोटिहोमानां कोटिसंख्याकाहुतीनां धूमलेखाभिर्धूमराजिभिः। कृतांतस्य पाशा एव वागुरा जालकानि ताभिरिव। कालमहिषस्य यमवाहनस्यालंकारैः काला-यसस्य कृष्णलोहस्य "पोलाद" इति भाषायां प्रथितस्य किंकिणीभिर्घंटि-काभिरिव दिवसं कटु कठोरं क्वणंतीभिर्नदंतीभिर्वायसमंडलीभिः काकपंक्तिभिः आवेद्यमानं कथ्यमानं प्रत्यासन्नमदूरवर्त्यशुभममंगलं यस्य तम्। प्रतिशायितैरुपो-षितैःस्निग्धैर्वत्सलैर्बांधवैराराध्यमानः पूज्यमानोऽहिर्बुध्नो महेशो यस्मिन्। दीपिकाभिर्दह्यमानैर्ज्वल्यमानैः कुलपुत्रकैः कुलीनैः प्रसाद्यमानं संतोष्यमाणं मातृमंडलं ब्राह्मीत्यादि देवतामंडलं यस्मिन्। नृपारोग्यार्थं कुलपुत्राः स्वशरीरदाहेन देवताः प्रसादयामासुरिति तात्पर्यम्। मुंडोपहारस्य मस्तकोपायनस्याहरणे दाने उद्यतैः सज्जैर्द्रविडैः प्रार्थ्यमान आमर्दको वेतालो यस्मिन्। आंध्रैरुद्ध्रिय-माणैरुपरि धृतैर्बाहुवप्रैः प्राकरसदृशैः बाहुभिरुपयाच्यमाना चंडिका यस्मिन्। शिरोविधृतेन मस्तके धृतेन विलीयमानेन गुग्गुलुना विकलैः पीडितैः नवसेवकै-र्युवभिः परिजनैरननीयमानो महाकालो रुद्रो यस्मिन्। निशितशस्त्रीभिस्ती-क्ष्णछुरिकाभिः निकृत्तस्य छिन्नस्यात्ममांसस्य होमे हवने प्रसक्त आप्तवर्गो यस्मिन्। प्रकाशं व्यक्तं नरपतिकुमारकैः सामन्तनृपातिपुत्रैः क्रियमाणो महा-मांसस्य नरमांसस्यार्थात्स्वशरीरमांसस्य विक्रयस्य प्रक्रम उपक्रमो यस्मिन्। उपहतमिव मृतमिव। यथा शवं श्मशानपांसुभिर्व्याप्तं तद्वदयमपिपांसुव्याप्त-सदृशः कृष्णवर्ण इति तात्पर्यार्थः।

9 प्रविशन्नेव च विपणिवर्त्मनि कुतूहलाकुलबहलबालकपरि-
वृतमूर्ध्वयष्टिविष्कम्भवितते वामहस्तवर्तिनि भीषणमहिषाधिरूढप्रेत-
नाथसनाथे चित्रवति पटे परलोकव्यतिकरमितरकरकलितेन शर-
काण्डेन कथयन्तं यमपट्टिकं ददर्श । तेनैव च गीयमानं श्लोकम-
शृणोत्—   5

'मातापितृसहस्राणि पुत्रदारशतानि च ।

युगे युगे व्यतीतानि कस्य ते कस्य वा भवान् ॥३॥' इति
तेन चाधिकतरमवदीर्यमाणहृदयः क्रमेण राजद्वारं प्रतिषिद्धसकल-
लोकप्रवेशं ययौ । तुरगादवतीर्णश्चाभ्यन्तरान्निष्क्रामन्तमप्रसन्नमुखरागं
मुक्तमिवेन्द्रियैः सुषेणनामानं वैद्यकुमारमद्राक्षीत् । कृतनमस्कारं चा-   10
प्राक्षीत्—'सुषेण, अस्ति तातस्य विशेषो न वा' इति । सोऽब्र-
वीत्—'नास्तीदानीं यदि भवेत्कुमारं दृष्ट्वा' इति । मन्दं मन्दं
द्वारपालैः प्रणम्यमानश्च दीयमानसर्वस्वम्, पूज्यमानकुलदेवतम्,
प्रारब्धामृतचरुपचनक्रियम्, क्रियमाणषडाहुतिहोमम्, हूयमानपृषदा-
ज्यलवलिप्तप्रचलद्दूर्वापल्लवम्, पठ्यमानमहामयूरीप्रवर्त्यमानग्रहशा-   15
न्तिनिर्वर्त्यमानभूतरक्षाबलिविधानम्, प्रयतविप्रप्रस्तुतसंहिताजपं, ज-
प्यमानरुद्रैकादशीशब्दायमानशिवगृहम्, अतिशुचिशैवसंपाद्यमानवि-

प्रविशन्निति । यमपट्टिकं ददर्शेति संबंधः । यमपट्टेन जीवति ।
"वेतनादिभ्यो जीवति" इत्यनेन ठक् । वेतनादित्वं चास्य कल्प्यम् । कुतू-
हलेन कौतुकेनाकुलैर्बहलैर्बालकैः परिवृतम् । ऊर्ध्वयष्टेः विष्कंभे आधारे
विततं प्रसृतं तस्मिन् । भीषणेन भयंकरेण महिषारूढेन प्रेतनाथेन यमेन सनाथे
परलोकस्य व्यतिकरं वृत्तान्तम् । शरकाण्डेन तृणविशेषाग्रैरिति यावत्
कथयंतम् । व्यतीतान्यतिक्रांतानि । इंद्रियैर्वियुक्तस्य मुखरागोऽप्रसन्नो भवति ।
मंदं मंदं राजकुलं विवेशेति संबंधः । प्रारब्धा अमृतचरोः होमार्थं पच्यमानस्यौ-
दनस्य पचनक्रिया पाको यस्मिंस्तत् । क्रियमाणः षडाहुतिहोमः '-प्रजापतये
स्वाहा' इत्यादीनां षण्णामाहुतीनां होमो यस्मिन् । हूयमानस्य पृषदाज्यस्य
एकीकृतयोर्दधिघृतयोर्लवैः कणैर्लिप्ताः प्रचलाः चंचला दूर्वाः पल्लवा यस्मिन् ।
'पृषातकं सदध्याज्ये पृषदाज्यं तदुच्यते' इति वचनात् । पठ्यमानया महा-
मयूर्या बौद्धविद्यया शैवमंत्रेण वा प्रवर्त्यमाना क्रियमाणा ग्रहशांतिस्तया निर्वर्त्य-

रूपाक्षक्षीरकलशसहस्रस्नपनम्, अजिरोपविष्टैश्चानासादितस्वामिदर्श-
नदूयमानमानसैरभ्यन्तरानिष्पतितनिकटवर्तिपरिजननिवेद्यमानवार्तैर्वा-
र्तीभूतस्नानभोजनशयनैरुज्झितात्मसंस्कारमलिनवेशैर्लिखितैरिव निश्च-
लैर्नरपतिभिर्नीयमाननक्तंदिवं, दुःखदीनवदनेन च प्रघणेषु बद्धम-
ण्डलेनोपांशुव्याहृतैः केनचिच्चिकित्सकदोषानुद्भावयता, केनचिदसा- 5
ध्यव्याधिलक्षणपदानि पठता, केनचिद्दुःस्वप्नानावेदयता, केनचित्पि-
शाचवार्तां विवृण्वता, केनचित्कार्तान्तिकादेशान्प्रकाशयता, केनचि-
दुपलिङ्गानि गायता, अन्येनानित्यतां भावयता, संसारं चापवदता,
कलिकालविलसितानि च निन्दता, दैवं चोपालभमानेनापरेण
धर्माय कुप्यता, राजकुलदेवताश्चाधिक्षिपता, अपरेण क्लिष्टकुलपुत्रक- 10
भाग्यानि गर्हयता, बाह्यपरिजनेन कथ्यमानकष्टपार्थिवावस्थं राजकुलं
विवेश।

मानं संपाद्यमानं भूतरक्षाबलेर्विधानं यस्मिन्। प्रयतैस्तत्परैर्विप्रैः प्रस्तुत आरब्ध संहिताजपो यस्मिन्। जप्यमानया रुद्रस्यैकादश्या '–नमस्ते रुद्र–' इत्यादिनमक संज्ञकयजुःसंहिताभागस्यैकादशसंख्याकावृत्या। अनेन तदा रुद्रैकादशीप्रचार आसीदिति ज्ञायते। शब्दायमानं शिवगृहं यस्मिन्। अत्यंतं शुचिभिः पवित्रैः शैवैः शिवभक्तैः संपाद्यमानं विरूपाक्षस्य शंकरस्य क्षीरकलशसहस्रेण दुग्धघट-सहस्रेण स्नपनं स्नानं यस्मिन्। अजिरेऽङ्गणे उपविष्टैः स्थितैः। अनासादिते-नालब्धेन स्वामिदर्शनेन दूयमानं पीडितं मानसं येषां तैः। अभ्यंतरान्निष्पत-द्भिरागच्छद्भिर्निकटवर्तिभिः समीपस्थैः परिजनैर्निवेद्यमाना कथ्यमाना वार्ता नरपतिशरीरस्थितिवृत्तांतो येषां तैः। वार्तीभूतानि कथामात्रावशिष्टानि स्नानं भोजनं शयनं च येषां तैः। दुःखदीनवदनेनेत्यादीनां तृतीयांतानां बाह्यपरि-जनेनेत्यनेनान्वयः। प्रघणेषु बहिर्द्वारैकदेशेषु 'देवडी' इति महाराष्ट्रभाषायाम्। उपांशु अप्रकटं व्याहृतैर्भाषणैः करणैः। चिकित्सकदोषान् वैद्यदोषान्। कार्ता-तिकस्य दैवज्ञस्यादेशान्। उपलिंगान्युत्पातान्। अपवदता निंदता। क्लिष्टानां पीडितानां कुलपुत्रकाणां राजाश्रितानां भाग्यानि गर्हयता निंदता बाह्यपरिजनेन बहिःस्थितसेवकजनेन कथ्यमाना कष्टा पार्थिवस्यावस्था स्थितिर्यस्मिन्।

10 अविरलबाष्पपयःपरिप्लुतलोचनेन पितृपरिजनेन वीक्ष्यमाणो विविधौषधिद्रव्यद्रवगन्धगर्भमुत्क्वथतां क्वाथानां सर्पिषां तैलानां च पच्यमानानां गन्धमाजिघ्रन्नवाप तृतीयं कक्ष्यान्तरम्।

11 तत्र चातिनिःशब्दे गृहावग्रहणीग्राहिबहुवेत्रिणि, त्रिगुणतिरस्करिणीतिरोहितसुवीथीपथे, पिहितपक्षद्वारके, परिहृतकवाटरटिते, घटितगवाक्षरक्षितमरुति, दूयमानपरिचारके, चरणताडनस्वनत्सोपानप्रकुपितप्रतीहारे, निभृतसंज्ञानिर्दिश्यमानसकलकर्मणि, नातिनिकटोपविष्टकञ्चुकिनि, कोणस्थिताह्वानचकिताचमनवाहिनि, चन्द्रशालिकालीनमूकमौललोके, महाधिविधुरबान्धवाङ्गनावर्गगृहीतप्रच्छन्नप्रग्रीवके, संजवनपुञ्जितोद्विग्नपरिजने, प्रविष्टकतिपयप्रणयिनि, गम्भीरज्वरा- 5 10

अविरलेति। अविरलेन घनेन बाष्पपयसा नेत्रोदकेन परिप्लुते व्याप्ते नयने यस्य। विविधानामोषधिद्रव्याणां द्रवस्य रसस्य गंधो गर्भे यस्य तम्।

तत्रेति। तत्र चैवंविधे धवलगृहे स्थितं पितरमद्राक्षीदितिदूरेणान्वयः। गृहावग्रहणीर्देहलीद्वारारंभदेशान् गृण्हंति ते बहवो वेत्रिणो वेत्रधारका यस्मिन्। त्रिगुणाभिस्तिरस्करिणीभिर्जवनिकाभिस्तिरोहित आच्छादितः सुवीथ्या धवलगृहस्याभ्यंतरीकृताया 'गल्ली' इति प्रसिद्धायाः पंथा यस्मिंस्तस्मिन्। 'ऋक्पूरब्धूःपथामानक्षे' इत्यनेन समासांतोऽकारः। पिहितानि घटितानि पक्षद्वाराणि यस्मिन्। 'प्रच्छन्नमंतद्वारं स्यात् पक्षद्वारं तु पक्षकम्' इत्यमरः। परिहृतं रुद्धं कवाटानां द्वाराणां रटितं शब्दो यस्मिन्। घटितैः पिहितैर्गवाक्षै रक्षितः स्थापितो मरुद्वायुर्यस्मिन्। एतेन तदापि प्रचुरो वायू रुग्णगृहेऽवारित आसीदिति ज्ञायते। चरणताडनैः स्वनंति शब्दं विदधति सोपानानि आरोहणानि। 'आरोहणं स्यात्सोपानम्' इत्यमरः। तैः प्रकुपिताः क्रुद्धाः प्रतीहारा यस्मिन्। निभृतसंज्ञाभिर्गुप्तहस्तादिनिर्देशैः निर्दिश्यमानानि दर्श्यमानानि सकलकर्माणि यस्मिन्। नातिनिकटं नातिसमीपमुपविष्टः कंचुकी कवची नृपशरीररक्षको यस्मिन्। कोणेऽस्त्रे स्थित आह्वानेन चकित आचमनवाही आचमनोदकधारी यस्मिन्। चंद्रशालिकायां प्रासादोपरिभूम्यां लीनः स्थितो मूकः स्तब्धो मौललोकः परंपरागतमंत्रिवर्गो यस्मिन्। महाधिना महत्या मनोव्यथया विधुरेण पीडितेन बांधवांगनावर्गेण बांधवयुवतिसमूहेन गृहीताः प्रच्छन्ना गुप्ताः प्रग्रीवा वातायनानि यस्मिन्। संजवने चतुःशाले पुंजिता एकीभूता उद्विग्ना म्लानाः परिजना यस्मिन्। 'संजवनं त्विदम्। चतुःशालम्' इत्यमरः। गंभीरज्वरस्य महाज्वरस्यारंभेण भीता

रम्भभीतभिषजि, दुर्मनायमानमन्त्रिणि, मन्दायमानपुरोधसि, सीदत्सु-
हृदि, विद्राणविपश्चिति, संतप्तासामन्ते, विचित्तचामरग्राहिणि, दुःख-
क्षामशिरोरक्षिणि, क्षीयमाणप्रसादवित्तमनोरथसंपदि, स्वामिभक्तिपरित्य-
क्ताहारहीयमानबलविकलवल्लभभूभृति, क्षितितलपतितसकलरजनीजा-
गरूकराजपुत्रकुमारके, कुलक्रमागतकुलपुत्रनिवहोह्यमानशुचि, शो-　　5
कसंकुचितकञ्चुकिनि, निरानन्दबन्दिनि, निःश्वसन्निराशासन्नसेवके,
निःसृतताम्बूलधूसराधरवारयोषिति, विलक्षवैद्योपदिश्यमानपथ्याहरणा-
वहितपौरोगवे, अनुजीविपीयमानोच्चषकधारावारिविनोद्यमानास्यशोष-
रुजि, राजाभिलाषभोज्यमानबहुभुजि, भेषजसामग्रीसंपादनव्यग्रसमग्र-
व्यवहारिणि, मुहुर्मुहुराहूयमानतोयकर्मान्तिकानुमितघोरातुरतृषि, तुषा-　　10
रपरिकरितकरकाशिशिरीक्रियमाणोदश्विति, श्वेतार्द्रकर्पटार्पितकर्पूरपरा-

---

भिषजो वैद्या यस्मिन् । विद्राणाः दुःखिनो विपश्चितो विद्वांसो यस्मिन् । विचित्ता विमनस्काः चामरग्राहिणो यस्मिन् । क्षीयमाणा प्रसादेन वित्तानां प्रसिद्धानां मनोरथसंपद् यस्मिन् । स्वामिभक्त्या परित्यक्तेनाहारेण हीयमानं न्यूनीभवद्बलं येषां तादृशा विकलाः पीडिताः वल्लभाः स्निग्धा भूभृतो राजानो यस्मिन् । क्षितितले भूपृष्ठे पतिताः सकलरजन्यां निखिलायां रात्रौ जागरूका राजपुत्रकुमारका यस्मिन् । कुलक्रमागतेन परंपराप्राप्तेन कुलपुत्रनिवहेन राजपुत्रसमूहेन उह्यमाना शुक् शोको यस्मिन् । शोकेन संकुचिता विशीर्णाः कंचुकिनो यस्मिन् । निश्वसंतो निराशा आसन्नसेवकाः समीपभृत्या यस्मिन् । निःसृतेन परित्यक्तेन तांबूलेन धूसरा मलिना अधरा यासां तादृशो वारयोषितो वेश्या यस्मिन् । विलक्षैर्लज्जितैर्वैद्यैरुपदिश्यमानः शिक्ष्यमाणः पथ्याहरणे पथ्यनिष्पादनेऽवहितो दक्षः पौरोगवो महानसाध्यक्षो यस्मिन् । अनुजीविभिः सेवकैः पीयमानेन उच्चकाणामूर्ध्वं धृतानां चषकाणां पानपात्राणां धारावारिणा विनोद्यमाना दूरीक्रियमाणा अर्थान्नृपस्य आस्यशोषस्य मुखशोषस्य रुक् यस्मिन् । यद्वा तृषार्तनृपविनोदनार्थं सेवकैः पात्राण्युपरि धृत्वा धारापातेन जलं पीतमित्यर्थः । राजाभिलाषेण नृपेच्छया भोज्यमाना बहुभुजोऽत्याहारिणो यस्मिन् । भेषजसामग्रीसंपादनेऽगदसाधनसज्जीकरणे व्यग्राः समग्रा व्यवहारिण आपणिकाःयस्मिन् । आहूयमानेन तोयकर्मांतिकेनोदकनियुक्तेनानुमिता घोरा आतुरस्य रोगिणस्तृड् यस्मिन् । तुषारेण हिमेन परिकरितेन वेष्टितेन करकेण पात्रविशेषेण शिशिरीक्रियमाणमुदश्वित्त-

गशीतलीकृतशलाके, अनाश्यानपङ्कलिप्यमाननवभाण्डगतगण्डूषग्रहणमस्तुनि, तिम्यत्कोमलकमलिनीपलाशप्रावृतमृदुमृणालके, सनालनीलोत्पलपूलीसनाथसलिलपानभाजनभुवि, धारानिपातनिर्वाप्यमाणक्वथिताम्भसि, पटुपाटलशर्करामोदमुचि, मञ्चकाश्रितसिकतिलकर्करीविश्रान्तातुरचक्षुषि, सरलशैवलवलयितगलद्गोलयन्त्रके, गल्वर्कशालाजिरोल्लासितलाजसक्तुनि, मसारपात्रीपरिगृहीतकर्कशर्करे, शिशिरौषधरसचूर्णावकीर्णस्फटिकशुक्तिशङ्खसंचये, संचितप्रचुरप्राचीनामलकमातुलुङ्गद्राक्षादाडिमादिफले, प्रतिग्राहितविप्रविप्रकीर्यमाणशान्त्युदकविप्रुषि, प्रेष्योपेष्यमाणललाटलेपोपदिग्धदृषदि धवलगृहे स्थितम्, परलोकवि- 5

कविशेषो यस्मिन् । 'तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम्' इत्यमरः । श्वेते शुभ्रे आर्द्रे कर्पटे वस्त्रेऽर्पितैः कर्पूरपरागैः शिशिरीक्रियमाणाः शलाका नेत्रांजनवर्तिका यस्मिन् । अनाश्यानेन नवेन अशुष्केण पंकेन लिप्यमाने नवे भांडे भाजने गतं गंडूषग्रहणस्य मुखपूरणग्रहणस्य मस्तु वस्त्रनिस्रुतं दधिजलं यस्मिन् । तिम्यद्भिरार्द्रैः कोमलैः सुकुमारैः कमलिन्याः पलाशैः पर्णैः प्रावृता वेष्टिता मृदवः कोमला मृणाला यस्मिन् । नालेन सहितानां नीलोत्पलानां पूलीभिः समूहैः सनाथा युक्ता सलिलपानस्योदकप्राशनस्य भाजनानां पात्राणां भूर्यस्मिन् । धारानिपातेन पात्रात्पात्रे धारापातविधानेन निर्वाप्यमाणं शिशिरीक्रियमाणं क्वथितं निष्पक्वमंभ उदकं यस्मिन् । पाटलशर्करा शर्कराविशेषस्तस्या आमोदं सुवासं मुञ्चति तस्मिन् । मंचकमाधारविशेषमाश्रिता यां सिकतिलकर्कर्यां वालुकापात्रविशेषे " झारी " इतिप्रसिद्धे विश्रांतं लग्नमातुरस्य रोगिणः चक्षुर्यस्मिन् 'कर्कर्यालुर्गलंतिका' इत्यमरः । सरलशैवलैर्वलयितं वेष्टितं गलत्क्षरद्गोलयंत्रकं बहुच्छिद्रं जलभांडं यस्मिन् । गल्वर्कशालायाः काचमंदिरस्याजिरेऽङ्गणे उल्लासिता विस्तारिता लाजाः सक्तवस्तंडुलाश्च यस्मिन् । मसारपात्र्यां नीलमणिपात्रे परिगृहीता कर्कशर्करा शुभ्रशर्करा यस्मिन् । शिशिरैरौषधरसैश्चूर्णैश्चावकीर्णो व्याप्तः स्फटिकशुक्तिशंखानां संचयः समूहो यस्मिन् । संचितानि संगृहीतानि प्रचुराणि बहूनि प्राचीनानि पुरातनानि आमलकमातुलुंगद्राक्षदाडिमादीनि फलानि यस्मिन् । प्रतिग्राहितैर्दक्षिणांग्राहितैर्विप्रैर्विप्रकीर्यमाणा क्षिप्यमाणाः शांत्युदकस्य विप्रुषो बिंदवो यस्मिन् । प्रेष्याभिर्दासीभिः पेष्यमाणेन चूर्ण्यमानेन ललाटलेपेनोपदिग्धा लिप्ता दृषदुपलायस्मिंस्तादृशि धवलगृहे स्थितम् । ज्वरज्व

---

१ 'नाश्यान'. २ 'विश्रान्तान्तरं'. ३ 'पातमसार'.

जयाय नीराज्यमानमिव ज्वरज्वलनेन, अनवरतपरिवर्तनैस्तरङ्गिणि श-
यनीये शेषमिव विषोष्मणा क्षीरोदन्वति विचेष्टमानम्, मुक्ताफलवा-
लुकाधूलिधवलितं जलधिमिव क्षयकाले शुष्यन्तम्, कालेन कैलास-
मिव दशाननेनोद्ध्रियमाणम्, अविरतचन्दनचर्चापराणां परिचारका-
णामत्युष्णावयवस्पर्शभस्मीभूतोदरैरिव धवलैः करैः स्पृश्यमानं लोका- 5
न्तरप्रस्थितम्, स्थास्नुना स्वयशसैव चन्दनानुलेपनच्छलेनापृच्छ्य-
मानम्, अविच्छिन्नदीयमानकमलकुमुदेन्दीवरदलं कालकटाक्षपत-
नशवलमिव शरीरमुद्वहन्तम्, निबिडदुकूलपट्टनिपीडितकेशान्तकथ्य-
मानकष्टवेदनानुबन्धं मूर्धानं धारयन्तम्, दुर्धरवेदनोन्नमन्नीलशिराजाल-
ककरालेन च कालाङ्गुलिलिख्यमानलेखाख्यातमरणावधिदिवससंख्या- 10

लेन ज्वराग्निना नीराज्यमानमिव कृतनीराजनमिव। विजयप्रस्थितस्य अद्यापि नीराजनं क्रियते। अनवरतपरिवर्तनैः सततविलुंठनैः। तरंगिणि विषमे वलिमति शयनीये शय्यायाम्। शेषस्तु विषपीडितोऽयं तु ज्वरपीडितः। मुक्ताफलानां मौक्तिकानां वालुकानां कणानां धूल्या धवलितं शुभ्रं। पक्षे मुक्ताफलैर्वालुकाकणैश्च धवलितम्। कालेन यमेन कर्त्रा दशाननेन व्याधिना करणेन उद्ध्रियमाणं उन्नीयमानम्। कालेन कृष्णवर्णेन दशाननेन रावणेन कैलासमिव। अत्युष्णावयवैर्ज्वरेण संतप्तैरवयवैर्भस्मीभूतमुदरं येषां तैरिव धवलैः शुभ्रैः। यशसः शुभ्रत्वाच्चंदनसाम्यम्। आपृच्छमानमामंत्र्यमाणम्। अविच्छिन्नं सततं दीयमानानि कमलकुमुदेंदीवराणां दलानि पर्णानि यस्मै तदत एव कालकटाक्षाणां यमकटाक्षाणां पतनेन शवलं चित्रं शरीरमुद्वहंतं धारयन्तम्। श्वेतनीलकमलादिधारणेन शरीरस्य संजातं शवलत्वं कालकटाक्षपतनतयोत्प्रेक्षितम्। निबिडं दृढं दुकूलपट्टेन निपीडितो बद्धः केशांतस्तेन कथ्यमानः कष्टवेदनायाः कृच्छ्रवेदनाया अनुबंधः सांतत्यं यस्य तादृशं मूर्धानं मस्तकं धारयंतम्। दुर्धरयाऽसह्यया वेदनया पीडयोन्नमता प्रकटयता नीलानां शिराणां धमनीनां जालकेन समूहेन करालं भयानकं तेन। कालांगुलिभिर्यमकराग्रैर्लिख्यमानेन लेखेनाख्यातं कथितं मरणावधिदिवसानां मरणकालमर्यादादिवसानां संख्यानं गणनं यस्य तेनेव ललाटफलकेन ललाटपट्टेन भयमुपजनयंतं भीतिं कुर्वाणम्। आसन्नस्य यमस्य दर्शनेनोद्वेगात्त्रासादिव किंचित् अंतःप्रविष्टे अंतर्गते तारके कनीनिके यस्य तम्। शुष्यतां दशनानां दंतानां पंक्तेः प्रसृतानां निर्गतानां धूसराणां मलिनानां दीधितीनां किरणानां तरंगा विद्यंते यस्यास्ताम्। उष्णां निश्वासपरंपरां मृगतृष्णिकामिव

नेनेव ललाटफलकेन भयमुपजनयन्तम्, आसन्नयमदर्शनोद्वेगादिव च किंचिदन्तःप्रविष्टतारकम्, शुष्यद्दशनपङ्क्तिप्रसृतधूसरदीधितितरङ्गिणीं मृगतृष्णिकामिवोष्णां निश्वासपरम्परामुद्वहन्तम्, अत्युष्णनिश्वासदग्ध-येव श्यामायमानया रसनया निवेद्यमानदारुणसंनिपातारम्भम्, उरःस्थ-लस्थापितमणिमौक्तिकहारचन्दनचन्द्रकान्तम् कृतान्तदूतदर्शनयोग्यमि- 5
वात्मानं कुर्वाणम्, अङ्गभङ्गवलनोत्क्षिप्तभुजयुगलम्, पर्यस्तहस्तनख-मयूखैर्धारागृहमिव तापशान्तये रचयन्तम्, नेदिष्ठसलिलमणिकुट्टिमा-दर्शोदरेषु निपतद्भिः प्रतिबिम्बैरपि संतापातिशयमिव कथयन्तम्, स्पृशन्तीं प्रणयिनीमिव विश्वासभूमिं मूर्छां बहु मन्यमानम्, अन्त-काह्वानाक्षरैरिव सभयाभिषग्दष्टैररिष्टैराविष्टम्, महाप्रस्थानकाले स्वसं- 10
तापसंतानमाप्तहृदयेषु संचारयन्तम्, अरतिपरिगृहीतमीर्ष्ययेव छायया मुच्यमानम्, उद्योगमिवोपद्रवाणाम्, सर्वास्त्रमोक्षमिव क्षामताशाः, हस्तीकृतं विहस्ततया, विषयीकृतं वैषम्येण, क्षेत्रीकृतं क्षयेण, गोच-रीकृतं ग्लान्या, दष्टं दुःखासिकया, आत्मीकृतमस्वास्थ्येन, विधेयी-कृतं व्याधिना, क्रोडीकृतं कालेन, लक्ष्यीकृतं दक्षिणाशया, पीतमिव 15
पीडाभिः, जग्धमिव जागरेण, निगीर्णमिव वैवर्ण्येन, ग्रासीकृतं गात्र-भङ्गेन, ह्रियमाणमिव विपद्भिः, वण्ट्यमानमिव वेदनाभिः, लुण्ट्य-मानमिव दुःखैः, आदित्सितं दैवेन, निरूपितं नियत्या, घ्रातमनित्य-त्वेन, अभिभूयमानमभावेन, परिकलितं परासुतया, दत्तावकाशं क्लेशस्य, निवासं वैमनस्यस्य, समीपे कालस्य, अन्तिकेऽन्त्योच्छ्वासस्य, 20
मुखे महाप्रयासस्य, द्वारि दीर्घनिद्रायाः, जिह्वाग्रे जीवितेशस्य वर्त-

---

मृगतृष्णिका दीधितितरंगैरेव जायते सा चोष्णा भवतीति तत्साम्यम् । श्यामायमाना 'लोहितादिडाज्भ्यः क्यष्' इत्यनेन क्यषि शानच् । सन्निपाते जिव्हा श्यामा निसर्गत एव भवत्युष्णश्वासदग्धत्वं तत्र कारणत्वेन परिकल्पितम् । तथा च माधवीये संनि-पातलक्षणे 'परिदग्धा खरस्पर्शा जिव्हा' इति । कृतांतदूतस्य दर्शनयोग्यमवलोकन-योग्यमिवात्मानं कुर्वाणम् । महतां दर्शनागालंकृत्य यथा गम्यते तद्वदनेन मणि-मौक्तिकादयो वक्षसि यमदूतावलोकनार्थमिव निहिता इति तात्पर्यम् । नेदिष्ठा-नामंतिकतमानां सलिलमुदकं मणिकुट्टिमं मणिमयी भूरादर्शा दर्पणाश्च तेषामुद-रेषु मध्येषु । अंतिकशब्दादिष्ठनि 'अंतिकबाढयोर्नेदसाधौ' इत्यनेन नेदा-

मानम्, विरलं वाचि, चलितं चेतसि, विह्वलं वपुषि, क्षीणमायुषि, प्रचुरं प्रलापे, संततं श्वसिते, जितं जृम्भिकाभिः, पराधीनमाधिभिः, अनुबद्धमनुबन्धिकाभिः, पार्श्वोपविष्टयानवरतरोदनोच्छूननयनया गृहीतचामरिकयापि निश्वसितैरेव वीजयन्त्या विविधौषधिधूलिधूसरितशरीरया मुहुर्मुहुः 'आर्यपुत्र, स्वपिषि' इति व्याहरन्त्या देव्या यशोवत्या शिरसि वक्षसि च स्पृश्यमानं पितरमद्राक्षीत्। 5

12 दृष्ट्वा च प्रथमदुःखसंपातमथ्यमानमतिराशङ्कित इव भागधेयेभ्यः समभवत्। अन्तकपुरवर्तिनमेव च पितरममन्यत। निराकृत इव चान्तःकरणेन क्षणमासीत्। अवधूतश्च धैर्येण, क्षेत्रीकृतः क्षोभेण, रिक्तीकृतो रत्या, विषयीकृतो विषादेन, पावकमयमिव हृदयमुद्वहन्, विषमविषदूषितानीव मुह्यन्तीन्द्रियाणि बिभ्राणः, तमसा रसातलमपि विशेषयन्, शून्यत्वेनाकाशमप्यतिशयानो नाविन्दत कर्तव्यम्। पस्पर्श च हृदयेन भियमुत्तमाङ्गेन च गाम्। 10

13 अवनिपतिस्तु दूरादेव दृष्ट्वातिदयितं तनयं तदवस्थोऽपि निर्भरस्नेहावर्जितः प्रधावमानो मनसा प्रसार्य भुजौ 'एह्येहि' इत्याकृष्टशरीरार्धेन शयनादुदगात्। ससंभ्रममुपसृतं चैनं विनयावनम्रमुन्नमय्य बलादुरसि निवेश्य, विशन्निव प्रेम्णा निशाकरमण्डलमध्यम्, 15

देशः। अरिष्टैर्दुर्लक्षणैराविष्टं व्याप्तम्। महाप्रस्थानं मरणम्। स्वसंतापसंतानं स्वपीडापरंपराम्। विह्वलतया व्याकुलतया। विधेयीकृतं परिजनीकृतम्। दक्षिणाशया दक्षिणदिशा लक्ष्यीकृतमाघ्रातमिव। वंश्यमानं भागीक्रियमाणम्। जिह्वाग्रे रसनाग्रे जीवितेशस्य यमस्यानुबंधिकाभिर्गात्रसंधिपीडाभिरनुबद्धं व्याप्तम्। अनवरतरोदनेन सततरुदितेनोच्छूने नयने नेत्रे यस्यास्तयेति यशोवत्या विशेषणम्।

दृष्ट्वेति। प्रथमेन दुःखसंतापेन मथ्यमाना विलोड्यमाना मतिर्बुद्धिर्यस्य। भागधेयेभ्यो दैवेभ्यः। अंतकपुरे यमनगर्यां वर्तते तथाभूतमेव। निराकृतो रहितः। अवधूतः त्यक्तः। क्षेत्रीकृतः पात्रीकृतः। पावकमयं वन्हिप्रचुरं प्राचुर्ये मयट्। विषमेण घोरेण विषेण दूषितानीव कलुषितानीव। विशेषयन्। रसातलादप्यधिकं तमो बिभ्राणः इत्यर्थः। अतिशयानोऽतिक्रामन्।

अवनिपतिरिति। सा पूर्ववर्णिता अवस्था स्थितिर्यस्य स तदवस्थः। हरिचंदनस्य कल्पवृक्षस्य रसस्य प्रस्रवणे प्रवाहे। पक्ष्माग्रे ग्रथितमेकीभूतमजस्र-

मज्जन्निवामृतमये महासरसि, स्नान्निव महति हरिचन्दनरसप्रस्रवणे, अभिषिच्यमान इव तुषाराद्रिद्रवेण, पीडयन्नङ्गैरङ्गानि, कपोलेन कपोलमवघट्टयन्, निमीलयन्पक्ष्माग्रग्रथिताजस्रास्रविस्राविणी विलोचने विस्मृतज्वरसंज्वरः सुचिरमालिलिङ्ग कथं कथमपि चिराद्विमुक्तमुपसृत्य कृतनमस्कारं प्रणतजननीकमुपागतमासीनं च शयनान्तिके पिबन्निव विगतानिमेषनिश्चलेन चक्षुषा व्यलोकयत्। पस्पर्श च पुनः पुनर्वेपथुमता पाणितलेन क्षयक्षामकण्ठश्च कृच्छ्रादिवावादीत्––'वत्स, कृशोऽसि' इति। भण्डिस्त्वकथयत्––'देव, तृतीयमहः कृताहारस्यास्याद्य' इति।

१४ तच्छ्रुत्वा बाष्पवेगगृह्यमाणाक्षरं कथं कथमप्यायतं निश्वस्योवाच––'वत्स, जानामि त्वां पितृप्रियमतिमृदुहृदयम्। ईदृशेषु विधुरयति धीमतोऽपि धियमतिदुर्धरो बान्धवस्नेहः सर्वप्रमाथी। अतो नार्हस्यात्मानं शुचे दातुम्। उद्दामदाहज्वरदग्धोऽपि दह्ये खल्वहमधिकतरमनेनायुष्मदाधिना। निशितमिव शस्त्रं तक्ष्णोति मां त्वदीयस्तानिमा। सुखं च राज्यं च वंशश्च प्राणाश्च त्वयि मे स्थिताः। यथा मम तथा सर्वासां प्रजानाम्। त्वद्विधानां पीडाः पीडयन्ति सकलमेव भुवनतलम्। न ह्यल्पपुण्यभाजां वंशमलंकुर्वन्ति भवादृशाः। फलमस्यनेकजन्मान्तरोपार्जितस्याकलुषस्य कर्मणः। करतलगतमिव कथयन्ति चतुर्णामप्यर्णवानामाधिपत्यं ते लक्षणानि। त्वज्जन्मनैव कृतार्थोऽस्मि। निरभिलाषोऽस्मि जीवितव्ये। भिषगनुरोधः पाययति मामौषधम्। अपि च सर्वप्रजापुण्यैः सकलभुवनतलपरिपालनार्थमुत्पत्स्यमानानां भवादृशां जन्मग्रहणोपायः पितरौ। प्रजाभिस्तु बन्धुम-

---

मनवरतमस्रं बाष्पांभः तद्विस्रावयतो तादृशी विलोचने नयने। कथं कथमपि कष्टेन। विगतैर्निमेषैः संकोचैर्निश्चलेन। वेपथुमता कंपमता। **तृतीयेति**। दिनत्रये नानेन किमपि भुक्तमित्यर्थः।

तदिति। बाष्पवेगेन गृह्यमाणानि स्खलंत्यक्षराणि वर्णा यस्मिन् यथा स्यात्तथोवाच। सर्वप्रमाथी सर्वान् प्रमथ्नाति पीडयति सोऽतिदुर्धरोऽसह्यो बांधवस्नेह ईदृशेषु संकटेषु इति विशेष्यमध्याहार्यम्। अथवा कैलासपाठानुसारेण विधुरेषु संकटेषु इति ग्राह्यम्। धीमतोऽपि धियं बुद्धिं विधुरयति पीडयति तत्करोतीति णिच्। उद्दामो दाहो यस्य तादृशेन ज्वरेण दग्धोऽपि। आयुष्मतो भवत आधिना

न्तो राजानः न ज्ञातिभिः । तदुत्तिष्ठ । कुरु पुनरेव सर्वाः क्रियाः । कृताहारे च त्वय्यहमपि स्वयमुपयोक्ष्ये पथ्यम्' इत्येवमभिहितस्य चास्य धक्ष्यन्निव हृदयमतितरां शोकानलः संदुधुक्षे । क्षणमात्रं च स्थित्वा पित्रा पुनराहारार्थमादिश्यमानो धवलगृहादवततार । चकार च चेतसि– 'अकाण्डे खल्वयं समुपस्थितो महाप्रलयो व्यभ्र इव वज्रपातः । सामान्योऽपि तावच्छोकः, सोच्छ्वासं मरणम्, अनुपदिष्टौषधो महाव्याधिः, अभस्मीकरणोऽग्निप्रवेशः, अनुपरतस्यैव नरकवासः, निर्ज्योतिरङ्गारवर्षमशकलीकरणं क्रकचदारणमव्रणो वज्रसूचीपातः । किमुत विशेषाश्रितः । किमत्र करवाणि' इति ।

15 राजपुरुषेणाधिष्ठितश्च गत्वा स्वधाम धूममयानिव कृताश्रुपातान्, अग्निमयानिव जनितहृदयदाहान्, विषमयानिव दत्तमूर्छावेगान्, महापातकमयानिवोत्पादितघृणान्, क्षारमयानिवानीतवेदनान्, कतिचित्कवलानगृह्णात् । आचमंश्च चामरग्राहिणमादिदेश—'विज्ञायागच्छ कथमास्ते तातः' इति । गत्वा च प्रतिनिवृत्य च 'देव, तथैव' इति विज्ञापितस्तेनागृहीतताम्बूल एवोत्ताम्यता मनसास्ताभिलाषिणि सवितरि सर्वानाहूयोपह्वरे वैद्यान् किमस्मिन्नेवंविधे विधेमयधुनेति विषण्णहृदयः पप्रच्छ । ते तु व्यज्ञापयन्–'देव, धैर्यमवलम्बस्व । कतिपयैरेव वासरैः पुनः स्वां प्रकृतिमापन्नं स्वस्थं श्रोष्यसि पितरम्' इति ।

मनोव्यथया । तनिमा कृशता । अपुण्यभाजां स्वल्पसुकृतवताम् । अनेकैर्जन्मान्तरैरुपार्जितस्य संपादितस्याकलुषस्य पवित्रस्य । संदुधुक्षे संदिदीपे । व्यभ्रे अभ्ररहिते सामान्योऽपि साधारणोऽपि । क्रकचेन करपत्रेण दारणं भेदनम् ।

राजपुरुषेणेति । स्वधाम गत्वा कतिचित्कवलान् ग्रासानगृण्हादिति संबंधः । तान् ग्रासान् विशिनष्टि । धूममयान् धूमस्वरूपान् तादात्म्ये मयट् । कृतोऽश्रुपातो यैस्तान् । धूमेन ह्यश्रुपातो जायते । विषं मूर्च्छां जनयति तद्वत्कवलैरप्यस्य मूर्च्छा संजातेति विषमयान् । एवमग्रेप्यूह्यम् । उत्ताम्यता पीड्यमानेन । उपह्वर एकांते वैद्यानाहूय । स्वां प्रकृतिममन्दत्वमव्यक्तरूपत्वं च । स्वस्थं व्याधिविनिर्मुक्तं स्वर्गस्थं च । एवं पितृमरणकथने धैर्यधारणोपदेशः "मरणं प्रकृतिः शरीरिणाम्" इति न्यायेन "जातस्य हि ध्रुवो मृत्युः" इति न्यायेन वा ज्ञेयः ।

16 तेषां तु भिषजां मध्ये पौनर्वसवो युवाष्टादशवर्षदेशीय-
स्तस्मिन्नेव राजकुले कुलक्रमागतो गतः पारमष्टाङ्गस्यायुर्वेदस्य भूभुजा
सुतनिर्विशेषं लालितः प्रकृत्यैवातिपटीयस्या प्रज्ञया यथावद्विज्ञाता
व्याधिस्वरूपाणां रसायनो नाम वैद्यकुमारकः सास्रस्तूष्णीमधोमु-
खोऽभूत् । पृष्टश्च राजसूनुना—'सखे रसायन, कथय तथ्यं यद्य- 5
साध्विव पश्यसि ' इति । सोऽब्रवीत्—'देव, श्वः प्रभाते यथावस्थि-
तमावेदयितास्मि ' इति ।

17 अत्रैव चान्तरे भवनकमलिनीपालः कोकमाश्वासयन्नपर-
वक्रमुच्चैरपठत्—

' विहग कुरु दृढं मनः स्वयं त्यज शुचमास्स्व विवेकवर्त्मनि । 10
सह कमलसरोजिनीश्रिया श्रयति सुमेरुशिरो विरोचनः ॥ ४ ॥ '

तच्चाकर्ण्य वाङ्निमित्तज्ञः पितरि सुतरां जीविताशां शिथिलीचकार ।
गतेषु च भिक्षुषु क्षतधृतिः क्षपामुखे क्षितिपालसमीपमेव पुनरारुरो-
ह । तत्र च—'दाहो महान् । आहर हारान्हरिणि, मणिदर्पणान्मे
देहि देहि वैदेहि, हिमलवैर्लिम्प ललाटं लीलावति, घनसारक्षोदधू- 15
लीर्निधेहि धवलाक्षि, निक्षिप चक्षुषि चन्द्रकान्तं कान्तिमति, कपोले
कलय कुवलयं कलावति, चन्दनचर्चां रचय चारुमते, पाटय पट-
मारुतं पाटलिके, मन्दय दाहमिन्दुमति, अरविन्दैर्जनय जलार्द्रया मुदं
मदिरावति, समुपनय मृणालानि मालति, तरलय तालवृन्तमावन्ति-
के, मूर्धानं धावमानं बधान बन्धुमति, कंधरां धारय धारणिके, उ- 20

तेषामिति । पौनर्वसवः पुनर्वसोरपत्यम् । अथवा पुनर्वसुना प्रोक्तं वैद्यशास्त्रमधीते सः । अष्टावंगानि यस्य तस्य । ' कायबालग्रहोर्ध्वांगशल्यदंष्ट्र-जरावृषान् । अष्टावंगानि तस्याहुश्चिकित्सा तेषु संश्रिता ' । आयुर्वेदस्य वैद्यशास्त्रस्य । यथावस्थितं नृपस्य सत्यां स्थितिमित्यर्थः ।

अत्रैवेति । कोकं चक्रवाकम् । अपरवक्त्रं तत्संज्ञकवृत्तम् । विहग पक्षिन् मनो दृढं कुरु मानसं स्थिरं कुरु । उपस्थितवियोगभीत्या मा भैषीरित्यर्थः । शुचं शोकं त्यज । विवेकवर्त्मनि विवेकमार्गे आस्स्व तिष्ठ । कमलसरोजिन्याः श्रिया शोभया सह विरोचनः सूर्यः सुमेरुशिरः सुमेरोः शिखरं श्रयति । अनया चोपश्रुत्या पितुर्वियोगो मातुर्गमनं च सूचितम् । तत्र चेत्यादौ तत्र

रसि सशीकरं करं कुरु कुरङ्गवति, संवाहय बाहू बलाहके, पीडय पादौ पद्मावति, गृहाण गाढमङ्गमनङ्गसेने, का वेला विलासवति नैति निद्रा, कथाः कथय कुमुद्वति ' इत्येवंप्रायान्पितुरालापाननवरतमाकर्णयन्दूयमानहृदयो दुःखदीर्घां जाग्रदेव निशामनैषीत् ।

18 उषसि चावतीर्य राजद्वारदेशोपसर्पिणा परिवर्धकेनोपस्थापितेऽपि तुरङ्गे चरणाभ्यामेवाजगाम स्वमन्दिरम् । तत्र च त्वरमाणो भ्रातुरागमनार्थमुपर्युपरि क्षिप्रपातिनो दीर्घाध्वगान्प्रजविनश्चोष्ट्रपालान्प्राहिणोत् । प्रक्षालितवदनश्च परिजनोपनीतमपि प्रतिकर्म नाग्रहीत् । अग्रतः स्थितानां राजपुत्रयूनां विमनसां 'रसायनो रसायनः ' इति जल्पितमव्यक्तमश्रौषीत् । पर्यपृच्छच्च तान्––'भद्राः, किं रसायनः' इति । पृष्टाश्च ते सर्वे सममेव तूष्णीम्बभूवुः भूयोभूयश्चानुबध्यमाना दुःखेन कथंकथमप्याचचक्षिरे––'देव, पावकं प्रविष्टः' इति । तच्च श्रुत्वा प्लुष्ट इवान्तस्तापेन सद्यो विवर्णतामगात् । उत्पाट्यमानमिव च न शशाक शोकान्धं धारयितुं हृदयम् । आसीच्चास्य चेतसि कामं स्वयं न भवति न तु श्रावयत्यप्रियं वचनमरातिकरमितर इवाभिजातो जनः । कृच्छ्रे च यथानेनानुष्ठितमुज्ज्वलीकृतमधिकतरं ज्वलनप्रवेशेन कल्याणप्रकृति कार्तस्वरमिव कौलपुत्रमस्येति । पुनश्चाचिन्तयत्––'समुचितमेवाथवा स्नेहस्येदम् । किमस्य तातो न तातः, किंवाम्बा न जननी, वयं न भ्रातरः । अन्यस्मिन्नपि तावत्स्वामिनि दुर्लभीभवति भवन्त्यासवो म्रियमाणा ह्रीहेतवो

क्षितिपालसमीपे पितुरालापानाकर्णयन् निशामनैषीदिति संबंधः । घनसारस्य कर्पूरस्य क्षोदस्य चूर्णस्य धूलीरजांसि कणान् । पटमारुतं वस्त्रवातं पाटय पटुं कुरु । धावमानं कंपमानं मूर्धानं मस्तकं बधान । कंधरां ग्रीवाम् । संवाहय मर्दय । दूयमानं पीड्यमानं हृदयं यस्य सः । दुःखेन दीर्घां महतीं निशां रात्रिम् ।

. **उषसीति**।अवतीर्य पितुर्निकेतनादिति शेषः । परिवर्धकेनाश्वपालेनोपस्थापितेपि आनीतेपि।उपर्युपरि पुनः पुनः क्षिप्रं तूर्णं पतंति गच्छंति तान् । दीर्घाध्वं गच्छन्ति तान्।प्रतिकर्म अलंकारादि प्रसाधनम् । अव्यक्तमस्फुटं जल्पितं भाषणम् ।प्लुष्ट इव दग्ध इव । विवर्णतां कृष्णत्वम् ।दग्धो हि श्यामो भवति । **आसीदिति** । अभिजातः कुलीनो जनः स्वयं न भवति प्राणत्यागं करोति नत्वितर इवारतिकरं दुःखकारि वचनं श्रावयति कथयति । कृच्छ्रे सति संकटकाले सति यथानेनानु-

लोके किमुतामृतमयेऽनुजीविनां निर्व्याजबान्धवेऽवन्ध्यप्रसादे सुगृहीतनाम्नि ताते । संप्रति सांप्रतमाचरितमनेनात्मानं दहता । किं वास्याकल्पमवस्थितस्य स्थेयसो यशोमयस्य दह्यते । पतितः स केवलं दहने । दग्धास्तु वयम् । धन्यः खल्वसावग्रणीः पुण्यभाजाम् । अपुण्यभाक्त्विदमेव राजकुलं कुलपुत्रेण यत्तादृशा वियुक्तम् । अपि च ममापि कः खल्वेतेषां प्राणानां कार्यातिभारः कृतशेषो वा, का वा व्यापृतता, येन नाद्यापि निष्ठुराः प्राणाः प्रतिष्ठन्ते । को वान्तरायो हृदयस्य येन सहस्रधा न दलतीति' । दुःखार्तश्च न जगाम राजसद्म । समुत्ससर्ज च सर्वकार्याणि । शयनीये निपत्य उत्तरीयवाससा सोत्तमाङ्गमात्मानमवगुण्ठ्यातिष्ठत् । 5 10

19 इत्थंभूते च देवे हर्षे राजनि च तदवस्थे सर्वस्य लोकस्य कपोलेषु कीलिता इव कराः, लोचनेषु लेप्यमय्य इवाश्रुस्रुतयः, नासाग्रेषु ग्रथिता इव दृष्टयः, कर्णपृत्कीर्णा इव रुदितध्वनयः, जिह्वासु सहजानीव हा कष्टानि,लपनेषु पल्लवितानीव श्वसितानि, अधरेषु लिखितानीव परिदेवितपदानि, हृदयेषु निधानीकृतानीव दुःखान्यभवन् । उष्णाश्रुदाहभीतेव नाभजत नेत्रोदराणि निद्रा । निःश्वासवातविधुता इव व्यलीयन्त हासाः । निरवशेषदग्धेव च संतापेन न प्रावर्तत वाणी । कथास्वपि नाश्रूयन्त परिहासाः । क्वागमन्निति 15

स्थितमाचरितं तेन कल्याणप्रकृति सुभगस्वभावं स्वस्य कौलपुत्रं कुलपुत्रत्वं ज्वलनप्रवेशेनाधिकतरमुज्ज्वलीकृतम् । कार्तस्वरमिव सुवर्णमिव । ज्वलनप्रवेशेनच सुवर्णमुज्ज्वलं भवति स्वामिनि दुर्लभीभवति सति स्वामिनि लोकांतरं प्रतिष्ठमाने सति । ह्रीहेतवो लज्जाकराः । अवन्ध्यः सफलः प्रसादो यस्य तस्मिन् । सुगृहीतनाम्नि प्रातःस्मरणीये । ' स सुगृहीतनामा स्याद्यः प्रातः स्मर्यते बुधैः ' । सांप्रतमाचरितं युक्तं कृतम् । आकल्पं कल्पावसानपर्यंतम् । स्थेयसः शाश्वतस्य । व्यापृतता व्यग्रता । अंतरायो विघ्नः । सोत्तमांगं सशिरस्कमात्मानमवगुण्ठ्याच्छाद्य ।

इत्थंभूत इति । कीलिता इव संजातकीलका इव । जनाः कपोलेषु करं निधाय स्थिता इत्यर्थः । अधुनापि दुःखिनस्तथा तिष्ठंति । अश्रुस्रुतयो बाष्पप्रवाहाः । हा कष्टानि हा कष्टमित्यादयः शब्दाः । परिदेवितपदानि शोकपदानि । निद्रा नेत्रोदराणि नयनमध्यान् उष्णाश्रुदाहभीत्येवोष्णबाष्पज्वलनभीतेव नाभजत ।

नाज्ञायन्त गीतगोष्ठ्यः । जन्मान्तरातीतानीव नास्मर्यन्त लास्यानि । स्वप्नेऽपि नागृह्यन्त प्रसाधनानि । वार्तापि नालभ्यतोपभोगानाम् । नामापि नाकीर्त्यताहारस्य । खपुष्पप्रतिमान्यासन्नापानमण्डलानि । लोकान्तरामिवानीयन्त बन्दिवाचः । युगान्तर इवावर्तन्त निर्वृतयः । पुनरिवादह्यत शोकाग्निना मकरकेतुः । दिवापि नामुच्यन्त शयनानि । 5
शनैः शनैश्च महापुरुषविनिपातपिशुनाः समं समन्तात्समुदभवन्भुवने भूयांसो भूपतेरभावाय भयमुत्पादयन्तो भूतानां महोत्पाताः ।

20 तथा हि दोलायमानसकलकुलाचलचक्रवाला पत्या सार्धं गन्तुकामेव प्रथममचलद्धरित्री । धन्वन्तरेरिवान्तरे तस्मिन्स्मरन्तः परस्परास्फालनवाचालवीचयो विजुघूर्णिरेऽर्णवाः । भूभृदभावभीतानां 10
विततशिखीकलापविकटकुटिलाः केशपाशा इवोर्ध्वीबभूवुर्धूमकेतवः

दुःखेन निद्रानाश उष्णाश्रुदाहजा भीतिः कारणत्वेनोत्प्रेक्षिता । निश्वासवातेन विधूता दूरपातिता इव हासा हास्यानि व्यलीयंत अशाम्यन् । संतापेन दुःखेन निरवशेषं निःशेषं दग्धेव । खपुष्पप्रतिमान्याकाशकुसुमसदृशानि महापुरुषस्य विनिपातस्य नाशस्य पिशुनाः सूचकाः । भूपतेरभावाय नृपतेरभावार्थं तादर्थ्ये चतुर्थी । अथवा अभावं संपादयितुमिति तुमर्थाच्चभाववचनादित्यनेन चतुर्थी । भूतानां प्राणिनां भयं भीतिमुत्पादयंतो जनयंतः ।

तथाहीति । दोलायमानं कंपमानं सकलानां कुलाचलानां कुलपर्वतानां चक्रवालं समूहो यस्याः सा । 'महेंद्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः । विंध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः'। पत्या सार्धं नृपेण सह गंतुकामेव गंतुं काम इच्छा यस्याः । तुमुनो मकारस्य कामशब्दे परे लोपः । धरित्री पृथ्वी प्रथममादावचलदकंपत । भुवः कंपनं नृपानर्थद्योतकम् । तस्मिन्नन्तरे तदानीमथवा 'तस्मिन्नातुरे'[1] इति पाठे तस्मिन्रोगिणि धन्वन्तरेरिव स्मरंतः अन्यं धन्वंतरिं निष्पाद्यमानमिच्छंतः । 'अधीगर्थदयेशां कर्मणि' इत्यनेन षष्ठी । राज्ञो रोगदूरीकरणाय अन्यं धन्वंतरिमुत्पादयितुमिव समुद्राः क्षुब्धा इति तात्पर्यार्थः । परस्परयोरन्योन्ययोरास्फालनेन ताडनेन वाचाला वाचाटा वीचयो लहर्यो येषां ते अर्णवाः समुद्रा विजुघूर्णिरे भ्रेमुः । 'आलजाटजौ बहुभाषिणि' इत्यनेन वाक्शब्दादालच् । धूमकेतव उत्पादसूचका ग्रहविशेषा भूभृतो नृपस्याभावेन नाशेन भीतानां ककुभां दिशां विततः प्रसारितः शिखिनो मयूरस्य कलाप इव बर्ह इव विकटा विशाला कुटिलाश्च । इदं विशेषणं धूमकेतूनप्यन्वेति । केशपाशा इव केशसमूहा इव ऊर्ध्वीबभूवुः । 'पाशः केश-

---

१ 'आतुरे.'

ककुभाम्। धूमकेतुकरालितदिङ्मुखं दिक्पालारब्धायुष्कामहोमधूमधूम्र-
मिवाभवद्भुवनम्। भ्रष्टभासि तप्तकालायसकुम्भबभ्रुणि भानुमण्डले
भयंकरकबन्धकायव्याजेन कोऽपि पार्थिवप्राणितार्थी पुरुषोपहारमिवो-
पजहार। ज्वलितपरिवेशमण्डलाभोगभास्वरो जिघृक्षाजृम्भमाणस्वर्भा-
नुभयादुपरचिताग्निप्राकार इव प्रत्यदृश्यत श्वेतभानुः। अवनिपति- 5
प्रतापप्रसाधिताः प्रथमतरकृतपावकप्रवेशा इवादह्यन्तानुरक्ता दिशः।
स्रुतशोणितशीकरासारारुणिततनुरनुमरणाय प्रावृतपाटलांशुकपटेवादृ-
श्यत वसुधावधूः। नराधिपविनाशसंभ्रमभीतैर्लोकपालैरिव कालायस-
कवाटपुटैरकालकालमेघपटलैररुध्यन्त दिग्द्वाराणि। प्रेतपतिप्रयाण-

---

दिपूर्वः स्यात्तत्संघे' इति मेदिनी। दिग्भिस्तदाकारयुवतिभिः स्वप्राणनाथ-नाशभीत्या केशपाशा मुक्ता न्विति कल्पना। धूमकेतुभिः करालितानि भीषणीकृतानि व्याप्तानि दिङ्मुखानि यस्य तद्भुवनं जगद् दिक्पालैर्दिशांपतिभिरारब्धस्यायुष्कामहोमस्य धूमेन धूम्रं मलिनमिवाभवत्। भ्रष्टभासि निस्तेजसि तप्तस्य कालायसस्य लोहविशेषस्य कुंभ इव घट इव बभ्रुणि कपिशे। कालायसमित्यत्र 'अनोश्मायः सरसां जातिसंज्ञयोः' इत्यनेन जातौ टच्। भानुमंडले सूर्यमंडले कोपि पार्थिवस्य नृपस्य प्राणितस्य जीवितस्यार्थी याचकः भयंकरस्य कबंधस्य शिरोरहितस्य देहस्य व्याजेन मिषेण पुरुषोपहारं नरबलिमिवोपजहारार्पयामास। भानुमंडले तदानीं दृश्यमानः अशुभसूचकः कबंधः केनापि पार्थिवजीवितापेक्षयार्पितो नरबलिरिति कल्पना। ज्वलितस्य परिवेशस्य परिधेर्मंडलस्य वर्तुलस्याभोगेन विस्तरेण भास्वरो दीप्तिमान् श्वेतभानुश्चंद्रः जिघृक्षया ग्रहणेच्छया जृंभमाणस्य विकसितमुखस्य स्वर्भानो राहोर्भयादुपरचितोऽग्निप्राकारोऽग्निवप्र इव। अवनिपतेर्नृपस्य प्रतापेन तेजसा प्रसाधिता आवर्जिता भूषिताश्चात एवानुरक्तास्ताम्रा प्रेमयुताश्च दिशः। नारीणां पराक्रमिषु प्रेमातिशय इति हि प्रसिद्धम्। प्रथमतरं कृतः पावकप्रवेशो याभिस्तथेवादह्यंत। दिशो देहुर्भर्तृप्रेम्णा ताभिरग्निप्रवेशः कृत इति तर्कः। स्रुतैर्गलितैः शोणितस्य रुधिरस्य शीकराणां कणानामासारैः समूहैररुणिता ताम्रा तनुः शरीरं यस्याः सा वसुधावधूः भूवधूरनुमरणाय भर्त्रा सह परलोकगमनाय प्रावृतो वेष्टितो भृत इत्यर्थः। पाटलस्ताम्रः अंशुकपट उत्तरीयं यया सेव। रक्तवृष्ट्या भूस्ताम्रा तया भर्त्रा सह गमनाय रक्तवस्त्रं धृतमित्युत्प्रेक्षा। अकाले अयोग्यवेलायां कालानां कृष्णानां मेघानां पटलैः समूहैः नराधिपस्य नृपस्य विनाशस्य संभ्रमेण साध्वसेन भीतै-

प्रहताः पटवः पटहा इवारटन्तो हृदयस्फोटनाः पस्फायिरे निर्घातानां घोरा निर्घोषाः। निकटीभवद्यममहिषखुरपुटोद्भूता इव द्युमणिधाम धूसरीचक्रुः क्रमेलककचकपिलाः पांशुवृष्टयः। विसरविराविणीनामुन्मुखीनां शिखिनो ज्वालाभि प्रतीच्छन्त्य इव पतन्तीरुल्का नभसो ववाशिरे शिवानां राजयः। राजधामनि धूमायमानकबरीविभागविभावितविकाराः प्रकीर्णकेशपाशप्रकाशितशोका इव प्राकाशन्त प्रतिमाः कुलदेवतानाम्। उपसिंहासनमाकुलं कालरात्रिविधूयमानवृजिनवेणीबन्धविभ्रमं बिभ्राणं बभ्राम भ्रामरं पटलम्। अटतामन्तःपुरस्योपरि क्षणमपि न शशाम व्याक्रोशी वायसानाम्। श्वेतातपत्रमण्डलमध्याज्जीवितमिव राज्यस्य सरसपिशितपिण्डलोहितं चञ्चच्चञ्चुरुच्चै- 5

र्लोकपालैः कर्तृभिः कालायसस्य कवाटपुटैः कपाटपुटैः दिग्द्वाराण्यबध्यंत। निर्घातानां प्रचंडवातानां घोरा भयानका हृदयस्फोटना हृदयविदारका निर्घोषाः शब्दाः प्रेतपतेर्यमस्य प्रयाणे गमने प्रहतास्ताडिता पटवः समीचीना आरटंतः शब्दंकुर्वंतः पटहा इव भेर्य इव पस्फायिरे बवृधिरे। क्रमेलकस्योष्ट्रस्य कचाः केशा इव कपिला धूसराः पांशुवृष्टयो धूलिवृष्टयो निकटीभवतः समीपमागतस्य यमस्य महिषस्य खुरपुटैरुद्भूता इव द्युमणेः सूर्यस्य धाम तेजः धूसरीचक्रुः मलिनयामासुः। विसरविराविणीनां समूहेनारटंतीनामुन्मुखीनामूर्ध्वं पश्यंतीनां शिवानां क्रोष्ट्रीणां राजयः शिखिनो वन्हेर्ज्वालाभिः करणैः नभस आकाशात् पतंतीरुल्का वन्हिरूपाणि नक्षत्राणि प्रतीच्छंत्य इव स्वागतेनाभिनंदंत्य इव ववाशिरे शब्दं विदधुः। तदा नभसो दहनरूपाणि नक्षत्राणि पेतुस्तेषां शिवाभिर्वन्हेर्ज्वालाभिः स्वागतं विहितम्। शिवानां मुखेभ्यो निर्गच्छंत्यो ज्वाला उल्कानां स्वागतार्थं ताभिः प्रक्षिप्ता इति कल्पना। राजधामनि राजगृहे धूमायमानेन धूम इवाचरता। 'कर्तुः क्यङ् सलोपश्च' इत्यनेन क्यङ्। कबरीविभागेन केशानां विभागेन विभाविता प्रकाशिता विकारा याभिस्ताः कुलदेवतानां प्रतिमा मूर्तयः प्रकीर्णेनेतस्ततः क्षिप्तेन केशपाशेन प्रकाशितः शोको याभिस्ता इव। उपसिंहासनं सिंहासनोपरि कालरात्र्या विधूयमानस्य कंपमानस्य वृजिनस्य कुटिलस्य वेणीबंधस्य विभ्रमं शोभां बिभ्राणं धारयद्भ्रामरं भ्रमरसंबंधि पटलं समूहो बभ्राम। 'वृजिनं कल्मषे क्लीबं केशे ना कुटिले त्रिषु' इति मेदिनी। वायसानां काकानां व्याक्रोशी सततमारटनं

---

१ 'ज्वालाः'.

रुच्चखान खण्डं माणिक्यस्य कुञ्जरद्रुधः । हर्षोऽपि महोत्पातदूयमानश्च कथमपि निनाय निशाम् ।

21 अन्यस्मिन्नहनि समीपमस्य राजकुलाद्द्रुतगतिवशविशीर्यमाणालंकारझांकारिणी विजयघोषणेव विषादस्याकुलचरणचलत्तुलाकोटिक्वणितवाचालिताभिरुद्ग्रीवाभिः किं किमिति पृच्छ्यमानेव दूरादेव भवनहंसीभिः, स्खलितविशालश्रोणीशिञ्जानरशनानुराविणीभिश्च बाष्पान्धा समुपदिश्यमानमार्गेव गृहसारसीभिः, अदृष्टकवाटपट्टसंघट्टस्फुटितललाटपट्टरुधिरपटलेन पटान्तेनेव रक्तांशुकस्य मुखमाच्छाद्य प्ररुदती, संतापबलविलीनकनकवलयरसधारामिव वेत्रलतामुत्सृजन्तीं, मुखमरुत्तरङ्गितामुत्तरीयांशुकपटीं स्फुरन्तीं फणिनीव निर्मोकमञ्जरीमाकर्षन्ती, नम्रांसस्रंसितानिलविलोलेन नीलतमेन तमालचीरचीवरेणेव शोकोचितेन धम्मिल्लरचनारहितेन शिरोरुहसंचयेन चञ्चता

न शशाम । सरस्यार्द्रस्य पिशितस्य मांसस्य खंडमिव लोहितं ताम्रं माणिक्यस्य खंडम् : उच्चखानोज्जग्राह ।

अन्यस्मिन्निति । अस्य समीपं राजकुलाद् यशोवत्याः प्रतीहार्यां जगामेति संबंधः । तां विशिनष्टि । द्रुतगत्या तूर्णगमनेन विशीर्यमाणैस्त्रुट्यमानैरलंकारैर्झांकारिणी झांकारशब्दं कुर्वती । विषादस्य खेदस्य विजयघोषणा जयस्योद्घुष्टम् । आकुलैश्चरणैश्चलंत्योस्तुलाकोट्योर्नूपुरयोः क्वणितेन शब्देन वाचालिताभिः । श्रुतनूपुरविरावा भवनहंस्यस्तामन्वागच्छन् । तासु च प्रश्नकर्तृत्वस्यारोपः । स्खलितैः स्खलनैः श्रोण्यां कटौ शिंजानां सशब्दां रसनां कांचीमनुराविणीभिः कांचीनादमनु शब्दं कुर्वाणाभिः । सारसीशब्दानुसारेण बाष्पांधा सा गच्छत् । अदृष्टस्यानवलोकितस्य कवाटपट्टस्य संघट्टेन ताडनेन स्फुटितस्य ललाटपट्टस्य भालस्य रुधिरपटलेन रक्तसमूहेन रक्तांशुकस्य रक्तवस्त्रस्य पटांतेन चरमभागेनेव । अत्र पटशब्दोऽनर्थकः । संतापबलेन सम्यक्तापस्य दुःखस्योष्णस्य च बलेन सामर्थ्येन विलीयमानस्य द्रवीभूतस्य कनकवलयस्य सुवर्णकटकस्य रसस्य धारां प्रवाहमिव कनकवेत्रलतां हस्तस्थितां सुवर्णमयीं यष्टिमुत्सृजंती त्यजंती । निर्मोकमंजरीं कंचुकमंजरीं '.समौ निर्मोककंचुकौ ' इत्यमरः । नम्रयोर्गलितयोरंसयोः स्कंधयो स्रंसते गलति तेन अनिलेन वायुना विलोलेन चंचलेन धम्मिल्लरचना केशसंयमनं तेन रहितेन वर्जितेन चंचता कंपमानेन शिरोरुहाणां

प्रावृतकुचा, कुचताडनपीडया समुच्छूनाताम्रश्यामतलं मुहुर्मुहुरत्यु-
ष्णाश्रुप्रमार्जनप्रदग्धमिव करकिशलयं धुनाना, चक्षुर्निर्झरे शीर्यति
स्नपयन्तीव शोकाग्निप्रवेशाय स्वकपोलतलप्रतिबिम्बितमासन्नलोकं,
लोललोचनवृत्तैस्तरलैस्तारकांशुभिः श्यामायमानमात्मदुःखेन दिवस-
मपि दहन्तीव 'क्व कुमारः, क्व कुमारः' इति पुरुषं पृच्छन्ती, 5
वेलेति नाम्ना यशोवत्याः प्रतीहार्याजगाम । विषण्णलोकलोचन-
प्रत्युद्गता चोपसृत्य कुट्टिमन्यस्तहस्तयुगला गलन्तीभिः सिञ्चन्तीव
शुष्यन्तं दशनदीधितिधाराभिराधूसरमधरमधोमुखी विज्ञापितवती—
'देव, परित्रायस्व परित्रायस्व । जीवत्येव भर्तरि किमप्यध्यवसितं देव्या'
इति । 10

22 ततस्तदपरमाकर्ण्य च्युत इव सत्त्वेन, द्रुत इव दुःखेन,
आचान्त इव चिन्तया, तुलित इव तापेन, अङ्गीकृत इवातङ्केनाप्र-
तिपत्तिरासीत् । आसीच्चास्य चेतसि प्रतिपन्नसंज्ञस्य 'बहुशोऽपि
हृदये दुःखाभिषङ्गो निपतन्नश्मनीव लोहप्रहारः कठिने हुतभुजमुत्था-
पयति न तु भस्मसात्करोति मे निरनुक्रोशस्य कायम्' इति । उ- 15
त्थाय च त्वरमाणोऽन्तःपुरमगात् । तत्र च भर्तुमुद्यतानां राजमहि-

---

केशानां संचयेन समूहेन । शोकोचितेन दुःखयोग्येन नीलतमेनातिकृष्णेन तमालस्य तमालवृक्षस्य चीरचीवरेण वल्कलकर्पटेनेव प्रावृतौ वेष्टितौ कुचौ यस्याः सा । एतेन तदा शोककाले नीलवस्त्रपरिधानपरिपाट्यासीदिति गम्यते । समुच्छूनं सशोथमाताम्रश्यामं किंचित्ताम्रं कृष्णं च तलं यस्य तादृशं करकिसलयं करपल्लवमत्युष्णानामश्रूणां प्रमार्जनेन दूरीकरणेन प्रदग्धमिव ज्वलितमिव धुनाना । शीर्यति गलति चक्षुर्निर्झरे नेत्रप्रवाहे । आसन्नलोकं समीपस्थं जनं । लोलाभ्यां चंचलाभ्यां लोचनाभ्यां प्रवृत्तैस्तरलैर्विलोलैस्तारकांशुभिः कनीनिकाकिरणैः श्यामायमानं श्याममिवाचरंतं दिवसमात्मदुःखेन दहंतीव । दग्धो हि श्यामो भवतीत्युक्तं पूर्वमेव । विषण्णानां खिन्नानां लोकानां लोचनैः प्रत्युद्गता कृतस्वागता । कुट्टिमे भूमौ न्यस्तं हस्तयुगलं यया सा । गलंतीभिर्दशनदीधितिधाराभिराधूसरमीषन्मलिनमधरं सिंचंतीव ।

तत इति । सत्वेन बलेन । वार्ताश्रवणकाले एव गलितशक्तिरासीत् । आचांतः पीतः । आतंकेन शंकया । 'आतंको रोगसंतापशंकासु' इति मेदिनी । न प्रतिपत्तिर्निश्चयो यस्य स किंकर्तव्यतामूढ आसीत् । कठिने हृदये निपत-

पीणामश्रृणोद्दूरादेव 'तात चूत, चिन्तयात्मानं प्रवसति ते जननी । वत्स जातीगुच्छ, गच्छाम्यापृच्छस्व माम् । मया विनाद्यानाथा भवसि भगिनि भवनदाडिमलते । रक्ताशोक, मर्पणीयाः पादप्रहाराः कर्णपूरपल्लवभङ्गापराधाश्च । पुत्रक अन्तःपुरबालबकुलक वारुणीगण्डूषग्रहणदुर्ललित, दृष्टोऽसि । वत्से प्रियङ्गुलतिके, गाढमालिङ्ग मां 5 दुर्लभा भवामि ते । भद्र भवनद्वारसहकारक, दातव्यो निवापतोयाञ्जलिरपत्यमसि । भ्रातः पञ्जरशुक, यथा न विस्मरसि माम्, किं व्याहरसि दूरीभूतास्मि ते । शारिके, स्वप्ने नः समागमः पुनर्भूयात् । मातः, मार्गव्यं कस्य समर्पयामि गृहमयूरकम् । अम्ब, सुतवल्लालनीयमिदं हंसमिथुनं, मन्दपुण्यया मया न संभावितोऽस्य चक्रवाकयु- 10 गलस्य विवाहोत्सवः । मातृवत्सले, निवर्तस्व गृहहरिणिके । समुपनय सौविदल्ल, वल्लभवल्लकीं परिष्वजे तावदेनाम् । चन्द्रसेने, सुदृष्टः क्रियतामयं जनः । विन्दुमति, इयं तेऽन्त्या वन्दना । चेटि, मुञ्च चरणौ आर्ये कात्यायनिके, किं रोदिषि नीतास्मि दैवेन । तात कञ्चुकिन्, किं मामलक्षणां प्रदक्षिणीकरोषि । धात्रेयि, धारयात्मानं किं पादयोः 15 पतसि । भगिनि, गृहाण मामपश्चिमां कण्ठे । कष्टं न दृष्टा प्रियसखी मलयवती । कुरङ्गवति, अयमामन्त्रणाञ्जलिः । सानुमति, अयमन्त्यः प्रणामः । कुवलयवति, एष तेऽवसानपरिष्वङ्गः । सख्यः, क्षन्तव्याः प्रणयकलहाः' इत्येवंप्रायानालापान् ।

न्दुःखाभिषंगः अश्मनि लोहप्रहार इव हुतभुजमुत्पादयति निरनुक्रोशस्य निर्दयस्य मे कायं तु न भस्मसात्करोतीत्यन्वयः । तत्र च राजमहिषीणामेवंप्रायानालापानश्रृणोदिति संबंधः । मर्षणीयाः सोढव्याः । अंतःपुरस्य बालबकुलकः तत्संबुद्धौ । वारुण्या मद्यस्य गंडूषग्रहणेन दुर्ललितस्तत्संबुद्धौ । "पादाघातादशोको विकसति बकुलो योषितामास्यमद्यैः" इति कविसंप्रदायेषु विश्वनाथः । निवापतोयांजलिस्तर्पणोदकांजलिः । हे सौविदल्ल कंचुकिन् वल्लभां वल्लकीं वीणां परिष्वजे आलिंगामि ।

23 दह्यमानश्रवणश्च तैः प्रविशन्नेव निर्यान्तीं दत्तसर्वस्वाप-
तेयां गृहीतमरणप्रसाधनाम्, जानकीमिव जातवेदसं पत्युः पुरः प्रवे-
क्ष्यन्तीम्, प्रत्यग्रस्नानार्द्रदेहतया श्रियमिव भगवतीं सद्यः समु-
द्रादुत्थिताम्, कुसुम्भबभ्रुणी वाससी दिवमिव तेजसी सांध्ये
दधानाम्, ताम्बूलदिग्धरागान्धकाराधरप्रभापटलं पाटलं[1] पट्टांशु- 5
कमिवाविधवामरणचिह्नमङ्गलमुद्वहन्तीम्,[2] रक्तकण्ठसूत्रेण कुचा-
न्तरावलम्बिना स्फुटितहृदयविगलितरुधिरधाराशङ्कां कुर्वतीम्,
तिर्यक्कुटिलकुण्डलकोटिकण्टकाकृष्टतन्तुना हारेण वलितेन सितां-
शुकपाशेनेव कण्ठमुत्पीडयन्तीम्, सरसकुङ्कुमाङ्गरागतया कवलिता-
मिव दिधक्षता चितार्चिष्मता, चितानलार्चनाकुसुमैरिव धवल- 10
धवलैरश्रुबिन्दुभिरंशुकोत्सङ्गमापूरयन्तीम्, गृहदेवतामन्त्रणबलिमिव
वलयैर्विगलद्भिः पदे पदे विकिरन्तीम्, आप्रपदीनां कण्ठे गुणकुसुम-

---

दह्यमानेति । तैरालापैर्भाषणैः दह्यमाने पीड्यमाने श्रवणे कर्णौ यस्य ।
मातरं ददर्शेति संबंधः । कथंभूतामित्याह । तैरालापैः । दत्तं सर्वं स्वापतेयं धनं
यया ताम् । 'पथ्यातिथिवसतिस्वपतेर्ढञ्' इत्यनेन ढञ् । गृहीतानि स्वीकृ-
तानि मरणस्य प्रसाधनानि अलंकारा यया ताम् । पत्युः पुरः प्रागग्रे च । प्रत्य-
ग्रेण नवेन स्नानेनार्द्रो देहः शरीरं तस्य भावस्तया । श्रियोऽपि देहः समुद्रा-
दुद्गततयार्द्र आसीदतस्तस्या उपमा । कुसुंभेन बभ्रुणी कपिशे वाससी वसने
दधानां सांध्यं संध्याकालोद्भवं तेजो दधानां दिवमाकाशमिव । तांबूलेन दिग्ध
उपचितो रागांधकारो रागगाढत्वं यस्य तस्याधरस्य प्रभायाः कान्त्याः पटलं
समूहम् । पाटलं ताम्रमविधवाया विद्यमानभर्तृकाया मरणचिन्हं पट्टांशुकं पट्टवस्त्र-
मिवोद्वहन्तीं धारयंतीम् । तांबूलभक्षणेन ताम्रस्याधरस्य प्रभारूपं ताम्रं वस्त्रं
धारयंतीमित्यर्थः । स्फुटिताद् भर्तुरनिष्टशंकया द्विधाभूताद् हृदयाद्गलितस्य
रुधिरस्य धाराणां शंकां संशयम् । वक्षसि धृतस्य रक्तदोरकस्य रुधिर-
धारासाम्यम् । तिर्यक्कुटिलेन वक्रेण कुंडलस्य कर्णभूषणस्य कोटिकंटकेन कंट-
काकारकोटिनाग्रभागेनाकृष्टाः तंतवो यस्य तेन वलितेन परावृतेन हारेण सितेन
शुभ्रेणांशुकस्य वस्त्रस्य पाशेनेव कंठं ग्रीवामुत्पीडयंतीं बध्नन्तीम् । प्राणनाशार्थं
गले बद्धस्य वस्त्रपाशस्य सादृश्यं कुंडलाग्रेण वलिते ग्रीवास्पृशि हारे आगतम् ।

---

1 'पटलपाटलम्'. 2 'पट्टांशुकमिव विधवा'. 'पट्टकंचुकमिवाविधवा'.

मालां यमदोलामिवारूढाम्, अन्तर्गुञ्जन्मधुकरमुखरेणामन्त्र्यमाणलो-
चनोत्पलामिव कर्णोत्पलेन, प्रदक्षिणीक्रियमाणामिव मणिनूपुरबन्धु-
भिर्बद्धमण्डलं भ्रमद्भिर्भवनहंसैः, संनिहितप्राणसमं मरणाय चित्तमिव
चित्रफलकमविचलं धारयन्तीम्, अर्चाबद्धोद्धूयमानधवलपुष्पदामकां
पतिव्रतापताकामिव पतिप्रासयष्टिमिष्टामुपगूहमानाम्, बन्धोरिव निज- 5
चारित्रधवलस्य नृपातपत्रस्य पुरो नेत्रोदकमुत्सृजन्तीम्, पत्युः पाद-
पतनसमुद्गमदभ्यधिकबाष्पाम्भःप्रवाहप्रतिरुद्धदृशः कथमपि प्रतिपन्ना-
देशान्सचिवान्संदिशन्तीम्, अनुनयनिवर्तितविधुरवृद्धबन्धुवर्गवर्धमान-
ध्वनिभिर्गृहाक्रन्दैराकृष्यमाणश्रवणाम्, भर्तृभावितनिभैः पञ्जर-
सिंहबृंहितैर्ह्रियमाणहृदयाम्, धात्र्या भर्तृभक्त्या च निजया 10
प्रसाधिताम्, जरत्या मूर्च्छया च संस्तुतया धार्यमाणाम्, सख्या पीडया

दिधक्षता दहनेच्छुना चितार्चिष्मता चितावन्हिना कवलितामिव ग्रस्तामिव ।
सरसकुंकुमांगरागस्य वन्हिज्वालासाम्यम् । तत्र च सरसेति विशेषणेन वन्हि-
प्रवेशकाले एवांगरागधारणं ताम्राधिक्यत्वं च व्यज्यते । धवलधवलैरतिशुभ्रैर-
श्रुबिंदुभिर्बाष्पकणैश्चितानलस्य अर्चायाः पूजनस्य कुसुमैरिव । अश्रूणां पुष्प-
साम्यम् । आप्रपदीनां पादाग्रपर्यंतं लंबमानां कंठे स्थितामितिशेषः गुणकुसुम-
मालां गुणयुक्तां ग्रथितामित्यर्थः कुसुममालां पुष्पस्रजम् । उभयतो लंबमानायाः
पुष्पस्रजः यमस्य रज्जुदोलासाम्यम् । अंतर्मध्ये गुंजद्भिर्मधुकरैर्मुखरेण सशब्देन
कर्णोत्पलेन कर्णोपरि स्थापितेन कमलेनामंत्र्यमाणे आपृच्छयमाणे लोचनोत्पले
यस्याः । बद्धं मंडलं यास्मिन्यथा तथा भ्रमद्भिः । **संनिहितेति** । संनिहितः प्राण-
समः प्राणसदृशो भर्ता यस्मिन् तादृशं चित्तमिव चित्रफलकं राजप्रतिकृतिम् ।
यथा चित्ते नृपस्तद्वच्चित्रफलके । तादृशं फलकं धारयंतीत्यर्थः । अर्चायां पूजायां
बद्धमुद्धूयमानं धवलानां शुभ्राणां पुष्पाणां दाम माला यस्यास्ताम् । कप्रत्ययः
समासांतः । पतिव्रतापताकां पातिव्रत्यध्वजमिव । पतिप्रासयष्टिं भर्तुः कुंतलदं-
डमुपगूहमानामालिंगंतीम् । **बंधोरिवेति** । बंधुरपि भगिन्याश्चारित्र्येण धवलः
कीर्तिमान् भवति । अतएव बंधुसदृशस्य धवलस्यातपत्रस्य पुरोऽनया
नेत्रोदकं विसृष्टम् । पत्युः पादपतनेन समुद्गमता बहिरागच्छताऽभ्यधिकेन
बाष्पांभःप्रवाहेन नेत्रोदकपूरेण प्रतिरुद्धा दृक् येषां ते तान् । यदा सा स्वभ-

---

१ ' क्रियमाणमिव '

च व्यसनसंगतया समालिङ्गिताम्, परिजनेन संतापेन च गृहीतसर्वा-
वयवेन परीताम्, कुलपुत्रैरुच्छ्वसितैश्च महत्तरैरधिष्ठिताम्, कञ्चुकिभिर्दुः-
खैश्चातिवृद्धैरनुगताम्, भूपालवल्लभान्कौलेयकानपि सास्रमालोकय-
न्तीम्, सपत्नीनामपि पादयोः पतन्तीम्, चित्रपुत्रिका अप्यामन्त्रायमा-
णाम्, गृहपतत्रिणामप्यञ्जलिं पुरस्तादुपरचयन्तीम्, पशूनप्यापृच्छ- 5
मानाम्, भवनपादपानपि परिष्वजमानां मातरं ददर्श ।

24 दूरादेव च बाष्पायमाणदृष्टिरभ्यधात्—'अम्ब त्वमपि
मां मन्दपुण्यं त्यजसि । प्रसीद । निवर्तस्व' इत्यभिदधान एव च
सस्नेहमिव नूपुरमणिमरीचिभिश्चुम्ब्यमानचूडश्चरणयोर्न्यपतत् । देवी तु
यशोवती तथा तिष्ठति पादनिहितशिरसि विमनसि कनीयसि प्रेयसि 10
तनये गुरुणा गिरिणेवोद्वेगवेगेनावष्टभ्यमाना, मूर्च्छान्धतमसं रसा-
तलमिव प्रविशन्ती, बाष्पप्रवाहेनेव चिरनिरोधसंपिण्डितेन स्नेहसंभा-
रेण निर्भराविर्भूतेनाभिभूयमाना, कृतयत्नापि निवारयितुं न शशाक
बाष्पोत्पतनम् । उत्कटकुचोत्कम्पप्रकटितासह्यशोकाकूता च गद्गदि-

---

तृवंदनमाचरितवती तदाऽधिकं रुदितमिति तात्पर्यम् । अथवा पत्युः सचिवान्
इत्यन्वयः । अस्याः पादयोः पतनवेलायां ते सचिवा अधिकं दुःखभाजोऽभव-
न्निति स्वीकार्यम् । अनुनयेन सांत्वनेन निवर्तितस्य विधुरस्य दुःखिनो वृद्ध-
बांधववर्गस्य वर्धमाना ध्वनयो येषु तैर्गृहाक्रंदैर्गृहाक्रोशैः । धात्र्योपमात्रा निजया
स्वीयया भक्त्या च प्रसाधितामलंकृतां शोभमानां च । संस्तुतया परिचितया
जरत्या वृद्धया मूर्च्छया च । व्यसनसंगतत्वं सख्यां पीडायां च समानम् ।
परिजनेन सेवकेन संतापेन दुःखेन च गृहीता वेष्टिता आत्मसात्कृताश्च सर्वेऽव-
यवा येन तेन परीतां वेष्टितां व्याप्तां च । परिजनेन वेष्टिता दुःखेन व्याप्तेत्यर्थः ।
परिजनेनेत्यत्र त्वं समूहे । कौलेयकान् शुनः । 'कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु'
इत्यनेन ढकञ् ।

दूरादेवेति । बाष्पायमाणा बाष्पमुद्वमंती दृष्टिर्यस्य सः । 'बाष्पो-
ष्मभ्यामुद्वमने' इत्यनेन क्यङ् । नूपुरमणिमरीचिभिर्मंजीररत्नकिरणैश्चुं-
ब्यमाना चूडा शिखा यस्य सः । देवी तु कृतप्रयत्नापि बाष्पोत्पतनं वारयितुं न
शशाकेत्यन्वयः । निर्भराविर्भूतेनात्यंतं प्रकटीभूतेन । प्राकृतप्रमदेव मुक्त-
कंठमतिचिरं प्रारोदीदित्यन्वयः । तामेव विशिनष्टि । उत्कटेन महता कुचोत्कं-
पेन स्तनस्फुरणेन प्रकटितोऽसह्यः शोको दुःखं तेनाभि भूता पराजिता ।

कागृह्यमाणगलविकला निःसामान्यमन्युतरलीक्रियमाणाधरोद्देशा पुन-रुक्तस्फुरणनिविडितनासापुटा निमील्य नयने, नयनाम्भःसेकप्लवेन प्लावयन्ती विमलौ कपोलौ, संछाद्य करनखमयूखमालाखचिततनुना तन्वन्तरनिर्गच्छदच्छास्रस्रोतसेवांशुकपटान्तेन किंचिदुत्तानितं वदने-न्दुं, दूयमानमानसा स्मरन्ती प्रसुतस्तनी प्रसवदिवसादारभ्य सकल- 5
मङ्कशायिनः शैशवमस्य ज्ञातिगृहगतहृदया ' अम्ब, तात, न पश्यतं पापां परलोकप्रस्थितां मामेवमतिदुःखिताम् ' इति मुहुर्मुहुराक्रन्दन्ती पितरौ, 'हा वत्स, विश्रान्तभागधेयया न दृष्टोऽसि' इति प्रेष्ठं ज्येष्ठं तनयमसंनिहितं क्रोशन्ती, ' अनाथा जाता ' इति श्वशुरकुलवर्तिनीं दुहितरमनुशोचन्ती, ' निष्करुण, किमपराद्धं तवामुना जनेन' इति 10
दैवमुपालभमाना, ' नास्ति मत्समा सीमन्तिनी दुःखभागिनी' इति निन्दन्ती बहुविधमात्मानम्, ' मुषितास्मि नृशंस, त्वया' इत्यकाण्डे कृतान्तं गर्हमाणा, मुक्तकण्ठमतिचिरं प्राकृतप्रमदेव प्रारोदीत् ।

25 प्रशान्ते च मन्युवेगे सस्नेहमुत्थापयामास सुतम् । हस्तेन चास्य प्ररुदितस्य पक्ष्मपालीपुञ्जमाननखकिरणनिवहां द्रुतामिवाधिकतरं 15
क्षरन्तीं दृष्टिमुन्ममार्ज । स्वयमपि कठोररागपरिपीयमानेन धवलिम्ना

गद्गदिकयाऽस्पष्टभाषणेन गृह्यमाणो गलः कंठस्तेन विकला पीडिता किमपि स्पष्टमभिधातुमसमर्थेति तात्पर्यार्थः । निःसामान्येनातिशयेन मन्युना शोकेन तरलीक्रियमाणश्चंचलीक्रियमाणोऽधरोद्देशो यस्याः सा । पुनरुक्तं पुनःपुनर्यत् स्फुरणं तेन निविडितं संलग्नं नासापुटं यस्याः । करनखानां मयूखानां किरणानां मालया खचिता तनुर्यस्य तेन तनुभ्यः सूक्ष्मेभ्योऽन्तरेभ्यो निर्गच्छता बहिरागच्छता अच्छेन स्वच्छेन अस्राणां बाष्पाणां स्रोतसा प्रवाहेणेव अंशुकपटांतेन सूक्ष्मवस्त्रेण वदनेंदुं मुखचंद्रमाच्छाद्य । अंकशायिनोऽस्य प्रसवदिवसादारभ्य सकलं स्मरंती । ज्ञातिषु बांधवेषु गतं हृदयं यस्याः सा ।

प्रशांत इति । मन्युवेगे शोकप्रसरे प्रशांतेऽल्पीभूते । पक्ष्मणां नेत्र-लोम्नां पाल्यां पंक्तौ पुंज्यमान एकीभूतो नखकिरणानां निवहः समूहो यस्या-स्ताम् । **स्वयमपीति** । कठोरेण रागेण रक्तिम्ना परिपीयमानमुदरं यस्य तेन धवलिम्ना शौक्ल्येन मुच्यमानं त्यज्यमानमुदरं मध्यो ययोस्ते । कथञ्चिदुत्युष्णै-

मुच्यमानोदरे क्वथदस्रश्रयत्पर्यन्ते शुक्रशीकरतारकितपक्ष्मणी सूक्ष्मतराश्रु-
बिन्दुपरिपाटीपतनानुबन्धविधुरे लोचने पुनः पुनरापूर्यमाणे प्रमृज्य बा-
ष्पार्द्रगण्डगृहीतां च श्रवणशिखरमारोप्य शोकलम्बामलकलतामधःस्र-
स्तविलोलवालिकाव्याकुलितां च समुत्सार्य तिरश्चीं चिकुरसटामश्रुप्रवाह-
पूरितमार्द्रं च किंचिच्च्युतमुत्क्षिप्य हस्तेन स्तनोत्तरीयं तरङ्गितमिव मग्नां-　　5
शुकपटान्ततनुताम्रलेखालाञ्छितलावण्यकुब्जिकावर्जितराजतराजहंसा-
स्यसमुद्गीर्णेन पयसा प्रक्षाल्य मुखकमलं कलमूककरविधृते वासः शकले
शुचिनि समुन्मृज्य पाणी सुतवदनविनिहितानिभृतनयनयुगला चिरं स्थि-
त्वा पुनः पुनरायतं निश्वस्यावादीत्—'वत्स, नासि न प्रियो निर्गुणो वा
परित्यागार्हो वा। स्तन्येनैव सह त्वया पीतं मे हृदयम्। अस्मिंश्च　　10
समये प्रभूतप्रभुप्रसादान्तरिता त्वां न पश्यति दृष्टिः। अपि च पुत्रक,
पुरुषान्तरविलोकनव्यसनिनी राज्योपकरणमकरुणा वा नास्मि लक्ष्मीः
क्षमा वा। कुलकलत्रमस्मि चारित्रधना धर्मधवले कुले जाता।
किं विस्मृतोऽसि मां समरशतशौण्डस्य पुरुषप्रकाण्डस्य केशरिण इव
केशरिणीं गृहिणीम्। वीरजा वीरजाया वीरजननी च मादृशी परा-　　15

स्रैः श्रयंतौ सशोथौ पर्यंतौ प्रांतभागौ ययोस्ते । शुक्रैःशीकरैस्तारकितानि पक्ष्माणि ययोस्ते । सूक्ष्मतराणामश्रुबिंदूनां परिपाट्याः क्रमस्य पतनस्यानुबंधेन संबंधेन विधुरे पीडिते । बाष्पेणार्द्रौ गंडौ गल्लः तेन गृहीतां धृतां शोकेन दुःखेन लंबां स्वस्थानाच्च्युतामलकलतां केशसमूहं श्रवणशिखरमारोप्य कर्णे संस्थाप्य । स्रस्तया गलितया विलोलया चंचलया बालिकया कर्णाभरणविशेषेण व्याकुलितां पीडिताम् । तिरश्चीं तिर्यक् स्थिताम् । तरंगितमिव संजाततरंगमिव मग्नांशुकपटांतस्य तनुभिः सूक्ष्माभिस्ताम्रलेखाभिर्लांच्छितं लावण्यं यस्य तन्मुखकमलं कुब्जिकया दास्या आवर्जितेनानीतेन राजतेन रौप्यमयेन राजहंसास्यभृंगारकेण पात्रविशेषेणोद्गीर्णेन पयसोदकेन प्रक्षाल्य। स्ववस्त्रेणमुखमादौ प्रच्छादितं तदा पटांतलेखायाः प्रतिबिंबानि मुख आगतानि तैस्तरंगितमिव सूक्ष्मवलीभिर्युक्तमिव मुखं दास्यानीतेन पयसा प्रक्षालितमिति तात्पर्यार्थः। कलमूकेन कंचुकिना करे धृते वासः-शकले पट्टखंडे । सुतवदने पुत्रमुखे विनिहितं स्थापितं निभृतं नयनयुगलं यया सा। स्तन्येन दुग्धेन भवार्थं दिगादित्वाद्यत् । प्रभूतैः प्रभुप्रसादैरनेकैर्भर्तृप्रसादै-

---

१ 'शीकरतारतारकित'. २ 'लोक'

क्रमक्रीता कथमन्यथा कुर्यात् । एवंविधेन पित्रा ते भरतभगीरथना-
भागनिभेन नरेन्द्रवृन्दारकेण गृहीतः पाणिः।आसेवितः सेवासंभ्रान्तान-
न्तसामन्तसीमान्तिनीसमावर्जितजाम्बूनदघटाभिषेकः शिरसा । लब्धो
मनोरथदुर्लभो महादेवीपट्टबन्धसत्कारलाभो ललाटेन । आपीतौ युष्म-
द्विधैः पुत्रैरमित्रकलत्रबन्दीवृन्दविधूयमानचामरमरुच्चलच्चीनांशुक- 5
धरौ पयोधरौ । सपत्नीनां शिरःसु निहितं नमन्निखिलकटककुटुम्बिनी-
किरीटमाणिक्यमालार्चितं चरणयुगलकम् । एवं कृतार्थसर्वावयवा
किमपरमपेक्षे क्षीणपुण्या । मर्तुमविधवैव वाञ्छामि । न च शक्नोमि
दग्धस्य भर्तुरार्यपुत्रविरहिता रतिरिव निरर्थकान्प्रलापान्कर्तुम् । पि-
तुश्च ते पादधूलिरिव प्रथमं गगनगमनमावेदयन्ती बहुमता भवि- 10
ष्यामि शूरानुरागिणीनां सुराङ्गनानाम् । प्रत्यग्रहृदयदारुणदुःखदग्धा-
याश्च मे किं धक्ष्यति धूमध्वजः । मरणाच्च मे जीवितमेवास्मिन्समये
साहसम् । अतिशीतलः पतिशोकानलादक्षयस्नेहेन्धनादस्मादनलः ।
कैलासकल्पे प्रवसति जीवेश्वरे जरत्तृणकणिकालघीयसि जीविते लोभ
इति क घटते । अपि च जीवन्तीमपि मां नरपतिमरणावधीरणम- 15
हापातकिनीं न स्प्रक्ष्यन्ति पुत्र, पुत्रराज्यसुखानि । दुःखदग्धानां च

रंतरिताऽच्छादिता । भरत ऋषभदेवपुत्रो यस्य नाम्नाऽयं देशः प्रसिद्धः । भगी-
रथः सगरस्य प्रपौत्रो भागीरथ्या आनेता । नाभागो वैवस्वतमनोर्नवमः पुत्रोऽव-
रीषस्य पिता तैः निभेन सदृशेन । सेवार्थां संभ्रांताभिस्त्वरायुक्ताभिरनंताभिर-
संख्याभिः सामंतानां सीमंतिनीभिः प्रमदाभिरावर्जितानां संपादितानां जांबून-
दघटानां सुवर्णघटानामभिषेकः स्नानम् । अमित्राणां शत्रूणां कलत्राणां भार्याणां
बंदीवृंदेन कारास्थानां समूहेन विधूयमानानां चामराणां मरुद्भिर्वातैश्चलतश्चीनां-
शुकस्य धरौ । नमंतानां निखिलानां कटककुटुंबिनीनां सेनास्त्रीणां किरीटमाणि-
क्यानां मुकुटमाणिक्यानां मालाभिरर्चितं पूजितम् । अक्षयोऽविनाशी स्नेहः
प्रेम एवेंधनं यस्य तस्मात् । कैलासकल्पे कैलासादीषन्न्यूने कैलाससदृशदृढशरीर
इत्यर्थः । 'ईषदसमाप्तौ कल्पब्देश्यदेशीयर' इत्यनेन कल्पप् । जरतो जीर्णस्य
तृणस्य कणिकेव लघीयोऽल्पीयस्तस्मिन् । नरपतेर्मरणस्यावधीरणमुपेक्षणं तदेव
महापातकं विद्यते यस्यास्ताम् । दुःखेन दग्धानां जनानां भूतिरैश्वर्यं अमंगला ।
तेषामैश्वर्यस्य प्रयोजनं नैवेत्यर्थः । विश्वस्तानां सन्निहितवैधव्यानां सुवासिनीना-

भूतिरमङ्गला चाप्रशस्ता च निरुपयोगा च भवति। वत्स, विश्वस्तानां यशसा स्थातुमिच्छामि लोके न वपुषा । तदहमेव त्वां तावत्तात, प्रसादयामि न पुनर्मनोरथप्रातिकूल्येन कदर्थनीयास्मि' इत्युक्त्वा पादयोरपतत्।

26 स तु ससंभ्रममपनीय चरणयुगलमवनमिततनुरुभयकरविधृतवपुषमवनिगतशिरसमुदनमयन्मातरम् । दुर्निवारतां च शुचः समवधार्य कुलयोषिदुचितां च तामेव श्रेयसीं मन्यमानः क्रियां कृतनिश्चयां च तां ज्ञात्वा तूष्णीमधोमुखोऽभवत्। 5

27 अभिनन्दति हि स्नेहकातरापि कुलीनता देशकालानुरूपम्। देव्यपि यशोवती परिष्वज्य समाघ्राय च शिरसि निर्गत्य चरणाभ्यामेव चान्तःपुरात्पौराक्रन्दनिर्भराभिरुपरुध्यमानेव दिग्भिः सरस्वतीतीरं ययौ। तत्र च स्त्रीस्वभावकातरैर्दृष्टिपातैः प्रविकसितरक्तपङ्कजपुञ्जैरिवार्चयित्वा भगवन्तं भानुमन्तमिव मूर्तिरैन्दवी चित्रभानुं प्राविशत्। इतरोऽपि मातृमरणविह्वलो बन्धुवर्गपरिवृतः पितुः पार्श्वं प्रायात्। अपश्यच्च स्वल्पावशेषप्राणवृत्तिं परिवर्तमानतारकं तारकराजमिवास्तमभिलषन्तं जनयितारम्। असह्यशोकोद्रेकाभिद्रुतश्च त्याजितः स्नेहेन 10 15

मिति यावत् । सन्निहितमरणस्य भर्तुर्मरणात्पूर्वमेव मरणं श्रेयस्करमिति भावः। यशसैव कीर्त्यैव न तु शरीरेण। स्थास्नुना यशसेति पाठः समीचीनः। मनोरथस्यापेक्षितस्य प्रातिकूल्येन विपरीताचरणेन न कदर्थनीया। "कोः कत्तत्पुरुषेऽचि' अनेन कदादेशः।

स त्विति। अपनीय दूरीकृत्य। उभाभ्यां कराभ्यां विधृतं वपुर्यस्यास्तामवनौ भूम्यां गतं शिरो यस्यास्तां नमस्कारं विदधतीं मातरमुदनमयदुदस्थापयत्।

अभिनंदतीति। उपरुध्यमानेव प्रतिबध्यमानेव। ऐंदवी मूर्तिः चंद्रबिंबं भानुमंतमिव सा चित्रभानुमग्निं प्राविशत्। इतरोऽपि राजपुत्रोपि। स्वल्पावशेषा किंचिदवशिष्टा प्राणवृत्तिर्जीवितवृत्तिर्यस्य तं जनयितारं पितरम्। असह्येन शोकोद्रेकेण दुःखातिरेकेणाभिद्रुतः पीडितः। सकलानां दुर्मदानां

---

१ 'स्थास्नुना'.

धैर्यम्। आश्लिष्यास्य सकलदुर्मदमहीपालमौलिमालालालितौ पादपद्मावन्तस्तापान्मुखचन्द्रमिव द्रवीभवन्तं दशनज्योत्स्नाजालमिव जलतामापद्यमानं लोचनलावण्यमिव विलीयमानं मुखसुधारसमिव स्यन्दमानम् अच्छाच्छमश्रुस्रोतसां संतानं महामेघमयविलोचन इव वर्षन्नितरवद्विमुक्तारावश्चिरं रुरोद। 5

28 राजा तु तमुपरुध्यमानदृष्टिरविरतरुदितशब्दाश्रितश्रवणः प्रत्यभिज्ञाय शनैः शनैरवादीत्—'पुत्र, नार्हस्येवं भवितुम्। भवद्विधा न ह्यमहासत्त्वाः। महासत्त्वता हि प्रथममवलम्बनं लोकस्य पश्चाद्राजबीजिता। सत्त्ववतां चाग्रणीः सर्वातिशयाश्रितः क्व भवान्, क्व वैक्लव्यम्। 'कुलप्रदीपोऽसि' इति दिवसकरसदृशतेजसस्ते लघूकरणमिव। 'पुरुषसिंहोसि' इति शौर्यपटुप्रज्ञोपबृंहितपराक्रमस्य निन्देव। 10 'क्षितिरियं तव' इति लक्षणाख्यातचक्रवर्तिपदस्य पुनरुक्तमिव। 'गृह्यतां श्रीः' इति स्वयमेव श्रिया गृहीतस्य विपरीतमिव। 'अध्यास्यतामयं लोकः' इत्युभलोकविजिगीषोरपुष्कलमिव। 'स्वीक्रियतां कोषः' इति शशिकरनिकरनिर्मलयशःसंचयैकाभिनिवेशिनो निरुपयोगमिव। 'आत्मीक्रियतां राजकम्' इति गुणगणात्मीकृतजगतो गतार्थमिव। 'उह्यतां राज्यभारः' इति भुवनत्रयभारोचितस्यानुचितनियोग इव। 'प्रजाः परिरक्ष्यन्ताम्' इति दीर्घदोर्दण्डार्गलित-

---

महीपालानां मौलिमालया मस्तकपरंपरया लालितौ पादपद्मौ आश्लिष्योपगुह्य। अच्छाच्छमतिस्वच्छमश्रुस्रोतसां नेत्रोदकप्रवाहाणां संतानं परंपरां वर्षन्। इतरवत्साधारणजन इव। विमुक्त आराव आक्रंदनं येन सः।

राजेति। उपरुध्यमाना उपरोधवती दृष्टिर्ज्ञानं यस्य। ज्ञानस्याल्पीभवनादेव रुदितशब्देन पुत्रज्ञानवर्णनं युज्यते। अथवा दृष्टिर्दर्शनमित्यर्थः। दृष्टेर्न्यूनत्वाच्छब्देन पुत्रप्रत्यभिज्ञा। अविरतेन सततेन रुदितशब्देनाश्रिते श्रवणे श्रोत्रे यस्य सः। अमहासत्वा न महत् सत्वं बलं येषां ते। राजबीजिता राजबीजं विद्यते येषां तेषां भावो राजान्वयित्वम्। 'राजान्वयित्वं राजबीजे राजवंश्यः' इत्यमरः। सर्वानतिशयानाश्रितः। वैक्लव्यं दीनता। शौर्येण पट्व्या प्रज्ञया बुध्या चोपबृंहितो वर्धितः पराक्रमो येन तस्य। लक्षणैश्चिन्हैराख्यातं कथितं चक्रवर्तिपदं साम्राज्यपदं यस्य तस्य। शशिनश्चंद्रस्य कराणां किरणानां निकर

दिङ्मुखस्यानुवाद इव । 'परिजनः परिपाल्यताम्' इति लोक-
पालोपमस्यानुपङ्क्तिकमिव । 'शस्त्राभ्यासः कार्यः' इति धनुर्गु-
णकिणकलङ्ककालीकृतप्रकोष्ठस्य किमादिश्यते । 'निग्राह्यतां चापल-
म्' इति नूतनतरवयसि निगृहीतेन्द्रियस्य निरवकाशेव मे वाणी ।
'निरवशेषतां शत्रवो नेयाः' इति सहजस्य तेजस एवेयं चिन्ता ।' 5
इत्येवं वदन्नेवापुनरुन्मीलनाय निमिमील राजसिंहो लोचने ।

29 अस्मिन्नेवान्तरे पूषाप्यायुषेव तेजसा व्ययुज्यत । ततश्च
लज्जमान इव नरपतिजीवितापहरणजनितादात्मजापराधादधोमुखः
समभवत् । भूपालाभावशोकशिखिनेवान्तस्ताप्यमानस्ताम्रतां प्रपेदे ।
मन्दं मन्दमप्रियप्रश्नार्थमिव स्थितिमनुवर्तमानो लौकिकीमवातरद्दिवः । 10
दित्सुरिव जनेशाय जलाञ्जलिमपरजलनिधिसमीपमुपससर्प । सद्योद-
त्तजलाञ्जलिर्दुःखदहनदग्धामिव करसहस्रमालोहितमधत्त ।

30 एवं च महानराधिपनिधननिर्धीयमानविपुलवैराग्य इव
शान्तवपुषि विशति गिरिगुहागह्वरं गभस्तिमालिनि, संमुपोह्यमान-

इव समूह इव निर्मलं विमलं यशः कीर्तिस्तस्य संचये एकाभिनिवेशिनो दृढाभि-
निवेशस्य दीर्घेण महता दोर्दंडेन बाहुदंडेनार्गलितं प्रतिरुद्धं दिङ्मुखं येन तस्य ।
अनुषंगिकं प्रस्तावागतम् । धनुर्गुणस्य धनुर्ज्यायाः किणानां व्रणचिन्हानां कलंकै-
श्चिन्हैः कालीकृतः श्यामीकृतः प्रकोष्ठो यस्य तस्य । अपुनरुन्मीलनाय पुनरप्रबो-
धनाय लोचने नयने निमिमील संचुकोच गतासुरभवदित्यर्थः ।

अस्मिन्निति । पूषापि सूर्योऽपि । आत्मजस्य यमस्यापराधात् । आत्मा
पराधेति पाठःसंकेताऽननुगुणोऽयोग्यश्च । सूर्यस्य नृपप्राणहारकत्वाभावात् ।
अतएव संकेते 'पूष्ण आत्मजो यम' इत्युक्तम् । सायं ताम्रोऽस्तं गच्छन् सूर्यो
भूपालनाशदुःखवन्हिनेव ताम्रतामापद्यत । मंदं मंदं शनैः शनैः अप्रियप्रश्नार्थमिव
मृतबांधवस्य दुःखदूरीकरणार्थमिव लौकिकीं स्थितिं लोकाचारं दिवः स्वर्गाद-
वातरत् । लोके हि बांधवा मृतबांधवं सांत्वयितुं दूरत आगच्छन्ति । आलो-
हितं ईषत्ताम्रम् ।

एवमिति । एवं चेत्यादौ अस्मिन्सति नरेंद्रो हुताशनसंक्रियया यशःशे-
षतामनीयतेति संबंधः । महानराधिपस्य महाराजस्य निधनेन मरणेन निधी-
यमानं समुत्पाद्यमानं विपुलं महद्वैराग्यं यस्य तस्मिन् । गभस्तीनां किरणानां

महाजनाश्रुदुर्दिनार्द्रीकृत इव निर्वात्यातपे, रोदनताम्रसकललोक-
लोचनरुचेव लोहितायति जगति, उष्णायमानानेकनरनिश्वाससंताप-
प्लुष्ट इव च नीलायमाने दिवसे, नृपानुगमनप्रचलितयेव लक्ष्म्या मु-
च्यमानासु कमलिनीषु, पतिशुचेव परिवृतच्छायायां श्यामायमानायां
भुवि, कुलपुत्रेष्विव परित्यक्तकलत्रेषु कृतकरुणप्रलापेषु वनान्तानाश्र- 5
यत्सु दुःखितेषु चक्रवाकेषु, छत्रभङ्गभीतेष्विव निगूढकोशेषु कुशे-
शयेषु, स्फुटितदिग्वधूहृदयरुधिरप्लव इव गलिते रक्तातपे, क्रमेण च
लोकान्तरमुपगतवत्यनुरागशेषे जाते तेजसामधीशे, गगनतलवितन्य-
मानबहलरागपटलायां प्रेतपताकायामिव प्रवृत्तायां संध्यायां, शवशि-
बिकालंकारकृष्णचामरमालास्विव स्फुरन्तीषु दर्शनप्रतिकूलासु तिमि- 10
रलेखासु, असितागुरुकाष्ठायां केनापि चितायामिव रचितायां

माला विद्यते यस्य तस्मिन्सूर्ये । व्रीह्यादित्वादिनिः । अथवा गभस्तीन् मालते धारयति तस्मिन्सूर्ये । गिरिगुहागव्हरं गिरिकंदरमध्यं विशति यतिव्रतमिव प्रपन्न इति तात्पर्यार्थः । समुपोह्यमानेन वर्धमानेन महाजनानामश्रूणां दुर्दिनेनार्द्रीकृत इव क्लिन्नीकृत इवातपे उद्योते निर्वाति शाम्यति सति । रोदनेन ताम्राणां सकललोकानां लोचनानां रुचा कांत्येव जगति भुवने लोहितायति लोहितमिवाचरति । उष्णायमानानामनेकेषां नराणां निश्वासानां संतापेन प्लुष्ट इव दग्ध इव नीलायमाने कृष्णवर्णायमाने । लक्ष्म्या राजलक्ष्म्या शोभया च। परिवृत्ता निवृत्ता छाया कान्तिर्यस्यास्तस्याम् भुवि पृथ्व्यां श्यामायमानायां कृष्णीभूतायां श्यामारात्रिर्नायिका च सेव आचरति तस्यामित्यपि। सायं चक्रवाकाः स्वकलत्राणि परित्यज्य तिष्ठंति राजशोकेन ते कुलपुत्रका इव वनांतान् गता इति कल्पितम् । वनांतानरण्यानि तोयानि च । चक्रवाका उदकमाश्रयंति । ‘वनं नपुंसकं नीरे निवासालयकानने’ इति मेदिनी। छत्रभंगेन राजदंडभंगेन पत्राणां छत्राकारताया भंगेन भीतेषु अतएव निगूढो गुप्तः कोशो धनसंचयः कर्णिका च एषां तेषु । राजनाशे स्वधनमिव रक्षितवत्सु कमलेष्विति कोशपदश्लिष्टत्वेन व्यज्यते । स्फुटितानां दिग्वधूनां हृदयानां रुधिरस्य रक्तस्य प्लव इव पूर इव । तेजसामधिपे सूर्ये नृपे च । गगनतले आकाशमार्गे वितन्यमानं प्रसार्यमाणं बहलं रागपटलं रंगसमूहो यया तस्याम्। प्रेतपताकायां प्रेताग्रे वर्तमाने ध्वज इव। शवशिबिकायाः प्रेतवाहनस्यालंकाराणां भूषणानां कृष्णचामराणां मालास्विव पंक्तिष्विव । दर्शनस्यावलोकनस्य प्रतिकूलासु कृष्णचामरमाला अपि शवदर्शने-

रजन्यां, दन्तामलपत्नप्रसाधितकर्णिकासु केसरमालाकल्पितमुण्डमालिकास्वनुमर्तुमिवोद्यतासु प्रहसितमुखीषु कुमुदलक्ष्मीषु, अवतरत्त्रिदशविमानकिङ्किणीक्वणित इव श्रूयमाणे शाखिशिखरकुलायलीयमानशकुनिकुलकूजिते, नाकपथप्रस्थितपार्थिवप्रत्युद्गतपुरुहूतातपत्र इव पूर्वस्यां दिशि दृश्यमाने चन्द्रमसि, नरेन्द्रः स्वयं समर्पितस्कन्धैर्गृहीत्वा शवशिबिकां शिबिसमः सामन्तैः पौरैश्च पुरोहितपुरःसरैः सरितं सरस्वतीं नीत्वा नरपतिसमुचितायां चितायां हुताशनसत्क्रियया यशःशेषतामनीयत। 5

31 देवोऽपि हर्षः पुञ्जीभूतेन सकलेनेव जीवलोकेन लोकेन राजकुलसंबद्धेनाशेषेण शोकमूकेन परिवृतोऽन्तर्वर्तिनापि शोकानलतसेन स्नेहद्रवेण बहिरिव सिच्यमानो निर्व्यवधानायां धरण्यामुपविष्ट एव तां निशीथिनीं भीमरथीभीमामखिलां सराजको जजागार। अजनि चास्य चेतसि ताते दूरीभूते संप्रत्येतावान्खलु जीवलोकः, लोकस्य भग्नाः पन्थानः, मनोरथानां खिलीभूतानि भूतिस्थानानि, स्थगितान्यानन्दस्य द्वाराणि, सुप्ता सत्यवादिता, लुप्ता लोकयात्रा, 10 15

ऽतरायं कुर्वन्ति। असितगुरुः कृष्णचंदनः इव काला कृष्णवर्णा काष्ठा दिशा यस्यां तस्यां रजन्याम्। पक्षे कृष्णचंदनस्य कालानि कृष्णानि काष्ठानि दारूणि यस्यां तस्यां चितायाम्। दंतस्य हस्तिदंतस्य अमलैः पत्रैः प्रसाधितान्यलंकृतानि कर्णभूषणानि याभिस्तासु। पक्षे दंत इवामलानि पर्णानि तैः प्रसाधिता अलंकृताः कर्णिका मध्यप्रदेशा याभिस्तासु केसरमाला वकुलस्रजः परागपरंपराश्च ताभिः परिकल्पिता मुंडमाला शिरोभूषणं 'जाळी' इति प्रसिद्धं याभिस्तासु। अनवरतं सततं त्रिदशविमानानां देवयानानां किंकिणीनां क्षुद्रघंटानां क्वणिते शब्दे इव शाखिनां वृक्षाणां शिखरेष्वग्रभागेषु कुलायेषु नीडेषु निलीयमानानां शकुनीनां पक्षिणां कुलस्य समूहस्य कूजिते शब्दे। नाकपथं स्वर्गमार्गं प्रस्थितं पार्थिवं प्रत्युद्गतं सभाजयितुमागतं पुरुहूतस्येंद्रस्य आतपत्र इव छत्त इव। शिबिसमः शिबिर्नाम ययातेर्नप्ता तत्सदृशः। हुताशनसत्क्रियया अग्निसंस्कारेण।

देव इति। पुंजीभूतेन मिलितेन। निशीथिनीं रात्रिं भीमरथीं सप्तसप्तत्या वर्षैस्तावद्भिर्मासैर्दिनैश्च तावद्भिर्गतैरेका रात्रिः भीमरथी यामतिक्रांतो वर्षशतं जीवति तामिव। कालरात्रिमिवेति वा। नरकनदीमिवेति

विलीना वाहुशालिता, प्रलीना प्रियालापिता, प्रोषिताः पुरुषकारवि-
हारविकाराः, समाप्ता समरशौण्डता, ध्वस्ता परगुणप्रीतिः, विश्रान्ता
विश्वासभूमयः, अपदान्यपदानानि, निरुपयोगानि शास्त्राणि, निरव-
लम्बना विक्रमैकरसता, कथावशेषा विशेषज्ञता, ददातु जनो जला-
ञ्जलिमौर्जित्याय, प्रतिपद्यतां प्रव्रज्यां प्रजापालता, वध्नातु वैधव्यवेणीं 5
वरमनुष्यता, समाश्रयतु राजश्रीराश्रमपदम्, परिधत्तां धवले वाससी
वसुमती, वहतु वल्कले विलासिता, तपस्यतु तपोवनेषु तेजस्विता,
प्रावृणोतु चीवरे वीरता, क्व गम्यतां पुनस्तस्य कृते कृतज्ञतया, क्व
पुनः प्राप्स्यति तादृशान्महापुरुषनिर्माणपरमाणून्परमेष्ठी, शून्याः सं-
वृत्ता दश दिशो गुणानाम्, जगज्जातमन्धकारं धर्मस्य, निष्फलम- 10
धुना जन्म शस्त्रोपजीविनाम्। तातेन विना कुतस्त्या दिवसमसमसमर-
रससमारब्धकलहकथाकण्टकितसुभटकपोलभित्तयो वीरगोष्ठ्यः। अपि
नाम स्वप्ने अपि दृश्येत दीर्घरक्तनयनं पुनस्तन्मुखसरोजम्, जन्मा-
न्तरेऽपि पुनः परिष्वज्येत तल्लोहस्तम्भाभ्यधिकगरिमगर्भं भुजयुगलम्।
लोकान्तरेऽपि पुत्रेत्यालपतः श्रूयेत सा सुधारसमुद्गिरन्ती मथ्यमानक्षी- 15
रसागरोद्गारगम्भीरा भारतीति। एतानि चान्यानि च चिन्तयत एवा-
स्य कथमपि सा क्षयमियाय यामिनी।

32 ततः शुचेव मुक्तकण्ठमारटत्सु कृकवाकुकुलेषु, गृहगिरि-
तरुशिखरेभ्यः पातयत्स्वात्मानं मन्दिरमयूरेषु, परित्यक्तनिवासेषु च

संकेतः। एतावान् एतत्परिमाण एव जीवलोकः संसारः जीवलो-
कस्य समाप्तिकाल एवागत इति तात्पर्यं 'यत्तदेतेभ्यः परिमाणे वतुप्'
इत्यनेन वतुप्। खिलीभूतानि शून्यानि। स्थगितान्याच्छादितानि। वाहुशालिता
वीरत्वम्। अपदानानि शुद्धाचरणानि। न पदं स्थानं येषां तथा जातानि।
और्जित्याय वलित्वाय। कुतस्त्याः 'अव्ययात्त्यप्' इत्यनेन त्यप्। दिवसमत्यंत-
संयोगे द्वितीया। असमेन सर्वोत्तमेन समररसेन युद्धरसेन समारब्धाभिः कल-
हकथाभिः कंटकिता अंकुरिताः सुभटानां सुवीराणां कपोलभित्तयो गल्लप्रांताः
यासु ताः। लोहस्तंभादभ्यधिको गरिमा गुरुत्वं यस्य तादृशो गर्भो मध्यो
यस्य तत्।

तत इति। एवं वृत्ते देवो हर्षश्चचालेति संबंधः। कृकवाकुकुलेषु कुक्कुट-
समूहेषु। 'कृकवाकुस्ताम्रचूडः कुक्कुट' इत्यमरः। ताम्यत्यल्पीभवति। मंदीभूत आ-

वनाय प्रस्थितेषु पत्ररथेषु, सद्यस्तनूभूते ताम्यति तमसि, मन्दीभूतात्मस्नेहेष्वभावमभिलषत्सु प्रदीपेषु, स्फुरदरुणवल्कलप्रावृतवपुषि प्रव्रज्यामिव प्रतिपन्ने नभसि, प्रभातसमयेन समुत्तीर्यमाणासु पार्थिवास्थिशकलकलास्विव कलविङ्ककंधराधूसरासु तारकासु, भूभृद्धातुगर्भकुम्भधारिषु विविधसरःसरित्तीर्थाभिमुखेषु प्रस्थितेषु वनकरिकुलेषु, शावशुचिसिक्थपटलपाण्डुरे पिण्ड इवापरपयोनिधिपुलिनपरिसरे पात्यमाने शशिनि, क्रमेण नृपचितानलधूमविसरधूसरीकृततेजसीव नरपतिशोकपावकदाहकिणकलङ्ककालीकृतचेतसीव प्रोषितसमस्तान्तःपुरपुरंध्रिमुखचन्द्रवृन्दोद्वेगविद्राणवपुषीव प्रथमास्तमितरोहिणीरणरणकविमनसीव चास्तमुपगते रजनिकरे, राजनीव[1] देवे दिवमारूढे सवितरि, परिवृत्ते राज्य इव रजनीप्रबन्धे, प्रबुद्धराजहंसमण्डलप्रबो- 5 10

त्मनः स्नेहो प्रेमा तैलं च येषां तेषु। स्फुरन् विकसन् अरुण एव वल्कलं तेन प्रावृतं वपुः शरीरं येन पक्षे स्फुरता दीप्तिमताऽरुणेन ताम्रेण वल्कलेन प्रावृतं शरीरं येन। प्रवज्यां संन्यासम् । कलविंकानां चटकानां कंधरा इव धूसरा मलिनास्तासु समुत्तीर्यमाणासु निःसार्यमाणासु । भूभृतः पर्वतस्य धातवो गैरिकादयो गर्भे येषां तादृशान् कुंभान् धरंति तेषु। पक्षे भूभृतो नृपस्य धातवो लघून्यस्थीनि गर्भे येषां तादृशान् कुंभान् घटान् धरंति तेषु।शावेन शवसंबंधिना शुचीनां स्वच्छानां सिक्थानां पुलकानां पटलेन समूहेन ओदनेनेत्यर्थः पांडुरे पिण्ड इव । अथवा शावं धूसरं सिक्थपटलं मधूच्छिष्टं "मधाचें पोंवळे" इति भाषायां । तस्मिन्निव पांडुरे च शशिनि । 'सिक्थं भक्तपुलाके ना मधूच्छिष्टे नपुंसकम्' इति मेदिनी। रजनिकरे अस्तमुपगते । कथमिव नृपस्य चितायां धूमविसरेण धूमसमूहेन धूसरीकृतं मलिनीकृतं तेजो यस्य तस्मिन्निव । नरपतेः शोक एव पावकोऽग्निस्तस्य दाहस्य किणकलंको दाहजकलंकः तेन कालीकृतं श्यामीकृतं चेतो मनो यस्य तस्मिन्निव । प्रोषितस्य मृतस्य राज्ञः समस्तांतःपुरपुरंध्रीणां मुखचंद्रवृंदस्य मुखशशिसमूहस्योद्वेगेन दुःखेन विद्राणे दुःखिनीव । राजनीव नृप इव देवे सवितरि सूर्ये दिवं स्वर्गमाकाशं च । रजनीप्रबन्धे रात्रिप्रसरे परिवृत्ते विनिमयं प्राप्ते । यथा राज्यं हर्षेणाप्तं तद्वद्रात्रिप्रसरो दिवसेनाप्त इति तात्पर्यार्थः । प्रबुद्धानां हंससदृशां राज्ञां मंडलेन प्रबोध्यमानः । पक्षे प्रबुद्धेन राजहंसमंडलेन प्रबोध्यमानः । पंकजाकर इव पद्मसमूह इव । 'राजहंसास्तु

---

[1] 'राजतीव'.

ध्यमानः पङ्कजाकर इव चचाल देवो हर्षः । ततश्च नूपुररवविराम-
मूकमन्दमन्दिरहंसेषु, शोकाकुलकतिपयकञ्चुकिमात्रावशेषेषु, शुद्धा-
न्तेषु, पतितयूथप इव वनगजयूथे कक्ष्यान्तरवर्तिनि पितृपरिजने,
विषादिन्युपरिरुदन्निषादिनि च स्तम्भनिषण्णे निष्पन्दमन्दे राजकुञ्जरे,
मन्दुरापालकाक्रन्दकथिते चाजिरभाजि राजवाजिनि, विश्रान्तजयश- 5
ब्दकलकले च शून्ये च महास्थानमण्डपे दह्यमानदृष्टिर्निर्जगाम राजकु-
लात् । अगाच्च सरस्वतीतीरं तस्यां स्नात्वा पित्रे ददावुदकम् । अप-
स्नातश्चानिष्पीडितमौलिरेव परिधायोद्गमनीयदुकूलवाससी निश्वास-
परो निरातपत्रो निरुत्सारणः समुपनीतेऽपि सप्तौ चरणाभ्यामेव ना-
साग्रासक्तेन रक्ततामरसताम्रेण चक्षुषा हृदयावशेषस्यापि पितुर्दाहश- 10
ङ्कया शोकाग्निमिव उद्गिरन्नताम्बूलस्यापि सुचिरप्रक्षालितस्य कल्पत-
रुकिशलयस्येव स्वभावपाटलस्याधरपल्लवस्य प्रभया मांसरुधिरकवला-
निव हृदयाभिघातादुद्वमन्नुष्णनिश्वासमोक्षैर्भवनमाजगाम ।

33 राजवल्लभास्तु भृत्याः सुहृदः सचिवाश्च तस्मिन्नेवाहनि
निर्गत्य प्रियं पुत्रदारमुत्सृज्योद्वाष्पैर्बन्धुभिर्वार्यमाणा अपि बहुनृपगुण- 15
गणहृतहृदयाः केचिदात्मानं भृगुषु बबन्धुः, केचित्तत्रैव तीर्थेषु तस्थुः,

---

ते चंचुचरणैर्लोहितैः सिताः ' इत्यमरः । **ततश्चेति** । राजकुलान्निर्जगामेति संबंधः । नूपुररवस्य विरामेण विश्रांत्या मूका मंदाश्च मांदिरहंसा गृहहंसास्तेषु । शोकेनाकुलाः कतिपये कंचुकिन एवावशेषा येषां तेषु । कक्ष्यांतरवर्तिनि मंदिरांतरवर्तिनि । पक्षे शृंखलांतरवर्तिनि । नष्टाग्रणीर्गजयूथो यथा शृंखलया बद्धो भवति तद्वत् कक्ष्यांतरवर्तिनि पितृपरिजने । ' कक्ष्या स्पर्धापदे कांच्यां रथगेहप्रकोष्ठयोः । गजरज्जौ ' इति धरणिः । रुदन् निषादी हस्तिपको यस्मिन् । अजिरं चत्वरं भजति तस्मिन् । विश्रांतो नष्टो जयशब्दस्य कलकलो यस्मिन् । अपस्नातो मृतमुद्दिश्य स्नातः । ' अपस्नातो मृतस्नातः ' इत्यमरः । अनिष्पीडितोऽनिष्पिष्टो मौलिर्मस्तकं येन सः। आर्द्रमस्तक एवेत्यर्थः । उद्गमनीयदुकूलवाससी धौतवस्त्रयुगलम् । ' उद्गमनीयमुपस्थेये धौतांशुकद्वये ' इति मेदिनी । निरातपत्रः छत्ररहितः ।

राजवल्लभा इति । बहुभिर्नृपस्य गुणगणैर्गुणसमूहैः हृतमाकृष्टं हृदयं येषां ते । भृगुषु तटेषु । ' भृगुः पुमान् । मुनौ हरे तटे ' इति मेदिनी । गृहीत-

केचिदनशनैरास्तीर्णतृणकुशा व्यथमानमानसाः शुचमसमामशमयन्, केचिच्छलभा इव वैश्वानरं शोकावेगविवशा विविशुः, केचिद्दारुणदुःखदहनदह्यमानहृदया गृहीतवाचस्तुषारशिखरिणं शरणं ययुः, केचिद्विन्ध्योपत्यकासु वनकरिकुलकरशीकरासारसिच्यमानतनवः पल्लवशयनशायिनः संतापमशमयन्, केचित्संनिहितानपि विषयानुत्सृज्य सेवाविमुखाः परिच्छिन्नैः पिण्डकैरटवीभुवः शून्या जगृहुः, केचित्पवनाशना धर्मधना धमद्धमनयो मुनयो बभूवुः, केचिद्गृहीतकाषायाः कापिलं मतमधिजगिरे गिरिषु, केचिदाचोटितचूडामणिषु शिरःसु शरणीकृतधूर्जटयो जटा जघटिरे। अपरे परिपाटलप्रलम्बचीवराम्बरसंवीताः स्वाम्यनुरागमुज्ज्वलं चक्रुः। अन्ये तपोवनहरिणजिह्वाञ्चलैर्लिह्यमानमूर्तयो जरां ययुः। अपरे पुनः पाणिपल्लवप्रमृष्टैराताम्ररागैर्नयनपुटैः कमण्डलुभिश्च वारि वहन्तो गृहीतव्रता मुण्डा विचेरुः।

34 देवमपि हर्षं तदवस्थं पितृशोकविह्वलीकृतम्, श्रियं शाप इति, महीं महापातकमिति, राज्यं रोग इति, भोगान्भुजङ्गा इति, निलयं निरय इति, बन्धुं बन्धनमिति, जीवितमयश इति, देहं द्रोह इति, कल्यतां कलङ्क इति, आयुरपुण्यफलमिति, आहारं विष-

---

वाचः स्वीकृतमौनाः। तुषारशिखरिणं हिमाचलम्। विंध्यस्य उपत्यकासु समीपभूमिषु। 'उपत्यकाद्रेरासन्ना भूमिः' इत्यमरः। वनकरिणामारण्यकगजानां करैः शुंडादंडैः शीकरासारैरंबुकणसमूहैः सिच्यमानास्तनवो येषां ते। पल्लवशयनेषु पत्रशय्यासु शेरते स्वपंति ते। परिच्छिन्नैः पिंडकैरल्पैराहारैः। धमन्त्यो धमनयो नाड्यो येषां ते। चलच्छिरा इत्यर्थः। आचोटिता उत्खाताश्चूडामणयः शिरोभूषणानि येभ्यस्तेषु। परिपाटलेनाताम्रेण प्रलंबेन चीवरांबरेण वल्कलेन संवीता वेष्टिताः तपोवनस्याश्रमस्य हरिणानां मृगाणां जिव्हाञ्चलैर्जिव्हाभिरुल्लिह्यमाना आस्वाद्यमाना मूर्तयो येषां ते। पाणिपल्लवप्रमृष्टैरिति नयनानां कमंडलूनां च विशेषणम्।

देवमपीति। श्रियं शाप इत्यादीनां मन्यमानमित्यनेन संबंधः। तादृशं हर्षमेवंविधा जना पर्यवारयन्नित्यन्वयः। कल्यतामरोगिताम्। ग्राह्यगिर

मिति, विषममृतमिति, चन्दनं दहन इति, कामं क्रकच इति, हृद-
यस्फोटनमभ्युदय इति च मन्यमानम्, सर्वासु क्रियासु विमुखम्,
पितृपितामहपरिग्रहागताश्चिरंतनाः कुलपुत्राः, वंशक्रमाहितगौरवाश्च
ग्राह्यगिरो गुरवः, श्रुतिस्मृतीतिहासविशारदाश्च जरद्द्विजातयः, श्रुता-
भिजनशीलशालिनो मूर्धाभिषिक्ताश्चामात्या राजानो, यथावदधिगता- 5
त्मतत्त्वाश्च संस्तुता मस्करिणः, समदुःखसुखाश्च मुनयः, संसारासार-
त्वकथनकुशला ब्रह्मवादिनः, शोकापनयननिपुणाश्च पौराणिकाः
पर्यवारयन् ।

35 अस्वतन्त्रीकृतश्च तैर्मनसापि नालभत शोकानुप्रवणमाच-
रितुम् । अनुनीयमानश्च कथं कथमप्याहारादिकासु क्रियास्वाभिमुख्य- 10
मभजत । भ्रातृगतहृदयश्चाचिन्तयत्—अपि नाम तातस्य मरणं महाप्र-
लयसदृशमिदमुपश्रुत्य आर्यो बाष्पजलस्नातो न गृह्णीयाद्वल्कले । ना-
श्रयेद्वा राजर्षिराश्रमपदम् । न विशेद्वा पुरुषसिंहो गिरिगुहाम् । अस्र-
सलिलनिर्भरभरितनयननलिनयुगलो वा पश्येदनाथां पृथिवीम् । प्रथ-
मव्यसनाविषमविषविह्वलः स्मरेदात्मानं वा पुरुषोत्तमः । अनित्यतया 15
जनितवैराग्यो वा न निराकुर्यादुपसर्पन्तीं राज्यलक्ष्मीम् । दारुणदुःख-
दहनप्रज्वलितदेहो वा प्रतिपद्येताभिषेकम् । इहागतो वा राजभिरभि-
धीयमानो न पराचीनतामाचरेत् । अतिपितृपक्षपाती खल्वार्यः ।

आदेयवाचः । श्रुतं ज्ञानमभिजनः कुलं शीलं स्वभावश्च तैः शालंते शोभंते ते । मस्करिणः परिव्राजकाः । समे दुःखसुखे येषां ते । शोकस्यापनयने दूरीकरणे निपुणाः कुशलाः ।

तैरिति । अस्वतंत्रीकृतः परतंत्रीकृतो मनसापि शोकानुप्रवणं शोक-योग्यमाचरितुं नालभत । **अनुनीयमानश्चेति** । तेषां निर्बन्धाच्छोकं लघूकृत्याहारादिक्रिया अन्वतिष्ठदित्यर्थः । अस्रसलिलनिर्भरेण नेत्रोदकाधिक्येन भरितं नयननलिनयुगलं नेत्रकमलद्वंद्वं यस्य सः । पराचीनतां पराङ्मुखत्वम् । वदान्यो दाता ।

---

१ 'शोकमनुप्रचरितुम्'. २ 'वा न'

सर्वदा तातश्लाघया मामभिधत्ते–'तात हर्ष, कस्याचिदभूद्भविष्यति वा पुनः काञ्चनतालतरुप्रांशु कायप्रमाणमिदम्। ईदृक्च दिवसकर-प्रीत्या दिवसमुन्मुखविकसितं मुखमहाकमलम्। एतौ च वज्रस्तम्भ-भास्वरौ भुजकाण्डौ। एते च हसितमदालसहलधरविभ्रमा विलासाः कोऽन्यो मानी विक्रान्तो वदान्यो वा' इति। एतानि चान्यानि च ऽन्तियन्दर्शनोत्सुकहृदयो भ्रातुरागमनमुदीक्षमाणः कथं कथमप्य-तिष्ठदिति। 5

इति श्रीबाणभट्टकृतौ हर्षचरिते महाराजमरणवर्णनं नाम पञ्चम उच्छ्वासः।

इति श्रीबाणभट्टकृतहर्षचरितव्याख्यायां बालबोधिन्यां पंचम उच्छ्वासः।

षष्ठ उच्छ्वासः ।

उच्चित्योच्चित्य भुवि प्रहितनिगूढात्मदूतनीतानाम् ।
विजिगीषुरिव कृतान्तः शूराणां संग्रहं कुरुते ॥ १ ॥
विस्रब्धघातदोषः स्ववधाय खलस्य वीरकोपकरः ।
नवतरुभङ्गध्वनिरिव हरिनिद्रातस्करः करिणः ॥ २ ॥

श्रीवेङ्कटेशो विजयते ।

सुमङ्गलीं जन्मदात्रीं **महालक्ष्म्य**भिधां सतीम् ।
प्रणम्य हर्षचरिते षष्ठव्याख्यां समारभे ॥ १ ॥

सकलोच्छ्वासार्थसंग्रहं कृतान्तवर्णनमिषेणाह । **उच्चित्येति** । कृतान्तो यमः प्रहितैः प्रेषितैर्निगूढैः प्रच्छन्नैरात्मदूतैः स्वदूतैर्नीतानां शूराणामुच्चित्योच्चित्यान्विष्यान्विष्य संग्रहं कुरुते । कथमिव विजिगीषुरिव जयेच्छुरिव । स यथा निगूढप्रहितैः स्वदूतैः शत्रुपक्षीयाणां शूराणां संग्रहं कुरुतेऽथवा स्वपक्ष एवान्विष्यान्विष्य संग्रहं कुरुते तद्वत् । अनेनोच्छ्वासार्थो व्यक्तः । यथा कृतान्तो यमसदृशोऽथवा कृतोऽन्तो नाशः येन सः गौडाधिपः । अनेन विशेषणेनैतेन दुष्कृत्येन स्वस्य भावी नाशस्तेनैव संपादित इति सूच्यते । प्रहितैर्निगूढैरात्मदूतैर्नीतानां राज्यवर्धनपक्षीयशूराणां संग्रहं कुरुते । गौडाधिपेन शशांकेन दूतमुखेन कन्यादानप्रलोभितो राज्यवर्धनः स्वगृहमानीय भोजनवेलायां सानुचरो भुञ्जानः छद्मना हत इति तात्कालिकी कथात्रानुसंधेया ॥ १ ॥

एवं गौडदुष्कृत्यं सूचयित्वा तस्य भावि फलमाह । **विस्रब्धेति** । खलस्य नीचस्य वीरस्य हर्षस्य कोपकरः क्रोधजनकः विस्रब्धं विश्वासेन घातदोषोऽन्यनाशदोषः स्ववधाय स्वनाशाय । तादर्थ्ये चतुर्थी । भवतीतिशेषः । अनेन श्रुतभ्रातृवधो हर्षः कुपितोऽवश्यं गौडं हन्यादिति सूचितम् । दृष्टान्तमाह हरेः सिंहस्य निद्रायाः सुप्तेस्तस्करश्चोरस्तन्नाशकः करिणः हस्तिनो नवस्य तरोर्भंगस्योच्छेदस्य ध्वनिः शब्द इव । गजेन कृतस्य नवस्य वृक्षस्य भंगो महता शब्देन सिंहं निद्रितमुत्थापयति । उत्थितश्च सिंहो हस्तिनं घातयाति तद्वत् । उपमालंकारः ॥ २ ॥

1 अथ प्रथमप्रेतपिण्डभुजि भुक्ते द्विजन्मनि, गतेषूद्वेजनीयेष्वशौचदिवसेषु, चक्षुर्दोहदायिनि दीयमाने द्विजेभ्यः शयनासनचामरातपत्रामत्रपत्रशस्त्रादिके नृपनिकटोपकरणकलापे, नीतेषु तीर्थस्थानानि सह जनहृदयैः कीकसेषु कल्पितशोकशल्येषु, सुधानिचयचिते चिताचैत्यचिह्ने, वनाय विसर्जिते महाजिजिति राजगजेन्द्रे, क्रमेण च मन्देष्वाक्रन्देषु, विरलीभवत्सु च विलापेषु, विश्राम्यत्यश्रुणि, शिथिलीभवत्सु श्वसितेषु, अविस्पष्टेषु हाकष्टाक्षरेषु, उत्सार्यमाणासु च व्यसनशय्यासु, उपदेशश्रवणक्षमेषु श्रोत्रेषु, अनुरोधावधानयोग्येषु हृदयेषु, गणनीयेषु नृपगुणेषु, प्रदेशवृत्तितामाश्रयति शोके, कृतेषु कविरुदितकेषु, जाते च स्वप्नावशेषदर्शने हृदयावशेषस्थाने चित्रावशेषाकृतौ काव्यावशेषनाम्नि नरनाथे देवो हर्षः कदाचिदुत्सृष्टव्यापारः पुञ्जीभूतवृद्धबन्धुवर्गाग्रसरेणावनतमूकमुखेन महाजनेन मौलेनाकाल आत्मानं वेष्ट्यमानमद्राक्षीत्। दृष्ट्वा चाकरोन्मनसि—'किमन्यत् आर्यमागत-

अथेति। एवं सति देवो हर्षो मौलेन महाजनेनाकाल एवानवसरे एवात्मानं वेष्टयमानमद्राक्षीदिति संबंधः। प्रथमप्रेतपिण्डं द्वादशे दिने क्रियमाणस्य श्राद्धस्य पिण्डं भुंक्ते तच्छीले द्विजन्मनि भुक्ते भुक्तवति सति। भुक्तं भोजनं 'नपुंसके भावे क्तः'। तदस्यास्तीति भुक्तस्तमिन्। 'अर्शआदिभ्योच्' इत्यनेन मत्वर्थीयोऽच्। चक्षुर्दोहदायिनि नेत्रपीडाकरे। मृतस्य वस्तुजातं प्रेक्ष्य बान्धवा दुःखिनो भवन्ति। शयनं शय्याऽऽसनं विष्टरं चामराणि आतपत्राणि छत्राणि अमत्राणि भाजनानि पत्राणि वाहनानि शस्त्राणि चादीनि यस्य तस्मिन् नृपस्य निकटोपकरणानां समीपस्थपदार्थानां कलापे समूहे। इदं शयनादीनां विशेषणम्। 'नृपकथोपकरणे' इतिपाठे नृपस्मरणजनक इत्यर्थः। कलितानि शोकशल्यानि येन तस्मिन् सुधानिचयेन सुधासमूहेन चिते उत्थापिते चिताचैत्यचिन्हे नृपशवदाहस्थाने देवगृहे 'समाधि' इति महाराष्ट्रभाषया प्रसिद्धे। एतेन महतां दहनस्थानेषु देवतास्थानबंधनपद्धतिस्तदानीमासीदिति ज्ञायते। अद्यापि भूपतीनां दहनस्थानेषु देवतास्थापनपद्धतिर्वरीवर्ति। महाजिजिति महायुद्धानां जेतरि। उत्सार्यमाणास्वपसार्यमाणासु। गणनीयेषु संख्यानयोग्येषु। शोकस्य प्राथम्ये केवलं प्रियवियोगजनितं गुणदोषविचारहीनं दुःखं वर्तते।

1 'शल्ये'.

मावेदयत्ययं शोकपराभूतो लोकाकरः' इति। वेपमानहृदयश्च पप्रच्छ प्रविशन्तमधिकतरप्रचारमन्यतमं पुरुषम् 'अङ्ग, कथय। किमार्यः प्राप्तः' इति। स मन्दमब्रवीत्—'देव, यथादिशसि द्वारि' इति श्रुत्वा च सोदर्यस्नेहनिहितनिरतिशयमन्युमृदूकृतमना: कथमपि न ववाम बाष्पवारिप्रवाहोत्पीडेन सह जीवितम्। 5

2 अनन्तरं च द्वारपालमुक्तेन प्रथमप्रविष्टेन परिजनेनेवाक्रन्देन कथ्यमानम्, दूरद्रुतागमनमुषितवाहुल्येन विच्छिन्नच्छत्रधारेण लम्बिताम्बरवाहिना भ्रष्टभृङ्गारग्राहिणा च्युताचमनधारिणा ताम्यत्ताम्बूलिकेन खञ्जत्खड्गग्राहिणा कतिपयप्रकाशदासेरकप्रायेण बहुवासरान्तरितस्नानभोजनशयनश्यामक्षामवपुषा परिजनेन परिवृतम्, अविरलमार्गधूलिधूसरितशरीरतया शरणीकृतमिवाशरणया क्रमागतया वसुंधर- 10

अतिक्रान्ते च काले वियुक्तस्य गुणगणनया मनःशांतिमधिगन्तुं प्रयतते जन इति प्रसिद्धम्। प्रदेशवृत्तितां तद्देशस्थत्वमाश्रयति स्वीकुर्वति। शोकोपि तद्देशनिवास्येवाभूत्तस्य नाविन्यं प्राघूर्णकत्वं वा गतमिति तात्पर्यार्थः। स्वप्ने अवशिष्टं दर्शनं यस्य तस्मिन्। हृदयेऽवशेषमवशिष्टं स्थानं स्थलं यस्य तस्मिन्। काव्येऽवशेषं नाम यस्य तस्मिन् नरनाथे सति। पुञ्जीभूतानामेकीभूतानां वृद्धानां बन्धूनां बान्धवानां वर्गस्याग्रेसरेणाग्रगामिना। अवनतमधः स्थितं मूकं शब्दविहीनं मुखं यस्य तेन मौलेन परंपरागतेन। लोकाकरः लोकसमूहः। सोदर्यस्नेहेन भ्रातृप्रेम्णा निहितः स्थापितो निरतिशयो मन्युः खेदस्तेन मृदूकृतं मनो यस्य सः। स्नेहेन तैलेन चावयवो मृदुर्भवतीति हि प्रत्यक्षम्। कथमपि महता कष्टेन।

अनन्तरमिति। प्रविशन्तं जेष्ठं भ्रातरमद्राक्षीदिति संबंधः। द्वारपालैर्मुक्तः कृतः अन्तः प्रवेशितश्च। प्रथमं प्रविष्टः परिजनः प्रथममागत आक्रन्दोपि प्रथमं श्रुतः दूरं द्रुतागमने तूर्णागमनेन मुषितं चोरितमर्थादल्पीभूतं वाहुल्यं यस्य तेन। विच्छिन्नः पश्चात्स्थितः छत्रधारो यस्मात् तेन। अम्बरवाही वस्त्रधारकः। भृंगारं पात्रविशेषः। आचमनधारी निष्ठीवनपात्रधारी। खञ्जन् पादवैक्लव्ययुतः पंगुरित्यर्थः खड्गग्राही यस्य। दूरागमनेन तस्य पादपीडासीत्तेन स खञ्जो जात इति तात्पर्यम्। कतिपये प्रकाशाः प्रकटं ज्ञायमाना दासेरका दासीपुत्राः प्राया बहुला यस्मिन्। हूणनिर्जयसमरे हूणानां निःशेषो जयो यस्मिन् तस्मिन् शरव्रणेषु बाणक्षतेषु बद्धैः पट्टकैर्दीर्घधवलैः समासन्नाया

या, हूणनिर्जयसमरशरव्रणबद्धपट्टकैर्दीर्घधवलैः समासन्नराज्यलक्ष्मी-
कटाक्षपातैरिव शबलीकृतकायम्, अवनिपतिप्राणपरित्राणार्थमिव च
शोकहुतभुजि हुतमांसैरतिकृशैरवयवैरावेद्यमानदुःखभारम्, अपगत-
चूडामणिनि मलिनाकुलकुन्तले शेखरशून्ये शिरसि शुचमारूढां मूर्ति-
मतीमिव दधानम्, आतपगलितस्वेदराजिना रुदतेव पितृपादपतनो-
त्कण्ठितेन ललाटपट्टेन लक्ष्यमाणम्, प्रथीयसा बाष्पपयःप्रवाहेनाभि- 5
मतपतिमरणमूर्च्छितामिव महीमनवरतं सिञ्चन्तम्, अनन्तसंतताश्रुप्र-
वाहनिपतननिम्नीकृताविव दुःखक्षामौ कपोलावुद्वहन्तम्, अत्युष्णमु-
खमारुतमार्गगतेन द्रवतेव गलितताम्बूलरागेणाधरबिम्बेनोपलक्षितम्,
पवित्रिकामात्रावशेषेन्द्रनीलिकांशुश्यामायमानमचिरश्रुतपितृमरणमहा-
शोकाग्निदग्धमिव श्रवणप्रदेशमुद्वहन्तम्, अस्फुटाभिव्यक्तव्यञ्जनेना- 10
प्यधोमुखस्तिमितनयननीलतारकमयूखमालाखचितेन शोकप्ररूढश्म-
श्रुश्यामलेनेव मुखशशिना लक्ष्यमाणम्, केसरिणमिव महाभूभृद्विनि-
पातविह्वलनिरवलम्बनम्, दिवसमिव तेजःपतिपतनपरिम्लानश्रियं
श्यामीभूतम्, नन्दनमिव भग्नकल्पपादपं विच्छायम्, दिग्भागमिव
प्रोषितदिक्कुञ्जरशून्यम्, गिरिमिव गुरुवज्रपातदारितं कम्पमानम्, 15

समीपं प्राप्तायाः राज्यलक्ष्म्याः कटाक्षपातैरिव । दीर्घाणां धवलानां बाणक्षतो-परि बद्धानां पट्टकानां राज्यलक्ष्म्याः कटाक्षसादृश्यम् । तैः शबरीकृतश्चित्रितः कायो देहो यस्य । अवनिपतेः राज्ञः स्वपितुः प्राणपरित्राणार्थं जीवरक्षणार्थम् । शोक एव हुतभुग् अग्निस्तस्मिन् हुतं मांसं येषां तैरतएवातिकृशैः । आवेद्यमानः कथ्यमानोः दुःखभारो यस्य तम् । अपगतेति । केशसंस्कारहीने पुष्पगुच्छविरहिते मस्तके मूर्तिमन्तं शोकं धारयन्तमिति तात्पर्यार्थः । अत्र च संस्कारादिरहितमेव शोकशरीरम्। आतपेन घर्मेण गलिता पतिता स्वेदराजिर्घर्मोदकपंक्तिर्यस्मात्तेन। प्रथीयसा महत्तरेण । अभिमतो मान्यः पतिर्भर्ता तस्य मरणेन मूर्छितामिव मूढामिव । विचेतसं पयःप्रवाहसिंचनेन प्रकृतिमानयन्ति । अनन्तेनापरिमितेन संततेनाश्रुप्रवाहेन निम्नीकृतौ कृशीकृतौ । पितृचिंतया कृशयोः कपोलयोः कृशिम्णः कारणं सततश्रुप्रवाहपतनमिति कल्पितम् । पवित्रिकामात्रे कर्णभूषणविशेष एवावशेषाभिरिन्द्रनीलिकाणामिन्द्रनीलमणीनामंशुभिः किरणैः श्यामायमानम् । अचिरश्रुतेन पितृमरणेन यो महाशोकः स एवाग्निस्तेन दग्धमिव श्रवणप्रदेशं कर्णप्रदेशमुद्वहन्तं धारयन्तम् । न स्फुटमभिव्यक्तं प्रकटं व्यंजनं श्मश्रु यस्य तेन

क्रीतमिव कार्श्येन, किंकरीकृतमिव कारुण्येन, दासीकृतमिव दौर्मनस्येन, शिष्यीकृतमिव शोचित्तव्येन, आत्मीकृतमिवाधिना, मूकीकृतमिव मौनेन, पिष्टमिव पीडया, स्विन्नमिव संतापेन, उच्चितमिव चिन्तया, लुप्तमिव विलपेन, धृतमिव वैराग्येण, प्रत्याख्यातमिव प्रतिसंख्यानेन, अवज्ञातमिव प्रज्ञया, दूरीकृतमिव दुरभिभवत्वेन, अबोध्येन वृद्धबुद्धीनाम्, असाध्येन साधुभाषितानाम्, अगम्येन गुरुगिराम्, अशक्येन शास्त्रशक्तीनाम्, अपथेन प्रज्ञाप्रयत्नानाम्, अगोचरेण सुहृदनुरोधानाम्, अविषयेण विषयोपभोगानाम्, अभूमिभूतेन कालक्रमोपचयानां[1] शोकेन कवलीकृतं ज्येष्ठं भ्रातरमपश्यत्। आवेगोद्गतकृत्स्नस्नेहोत्कलिकाकलापोत्क्षिप्यमाणकाय इव च परवशः समुदगात्।

3 अथ दूरादेव दृष्ट्वा देवो राज्यवर्धनश्चिरकालकलितं बाष्पवेगं मुमुक्षुः सुदूरप्रसारितेन संकल्पयन्निव सर्वदुःखानि दीर्घेण दोर्द-

---

'व्यंजनं तेमने चिन्हे श्मश्रुण्यवयवेऽहनि'। अप्ररूढविशेषश्मश्रुणापीत्यर्थः। अधोमुखयोः स्तिमितयोः स्तब्धयोः नयनयोर्नेत्रयोर्नीले नीलवर्णे तारके कनीनिके तयोर्मयूखमालया किरणपंक्त्या खचितेन। इदं श्यामताधिक्यस्य कारणं तेन च शोकप्ररूढश्मश्रुजालत्वं मुखे परिकल्पितम्। महाभूभृतो महाराजस्य पर्वतराजस्य च विनिपातेन नाशेन विव्हलं निरवलंबं निराश्रयं केसरिणं सिंहमिव। तेजःपतिर्नृपः सूर्यश्च। सूर्यास्ते दिवसोपि श्यामायां रात्र्यां परिवर्तितो भवति। भग्नो नष्टः कल्पपादपः कल्पवृक्षो यस्य तत्। अतएव विच्छायं विगता छाया आतपाभावो यस्य तत्। पक्षे विगता छाया कान्तिर्यस्य तम्। प्रत्याख्यातं त्यक्तमिव प्रतिसंख्यानेन विवेककुशलया बुद्ध्या। कालक्रमेणापचयस्य ह्रासस्याभूमिभूतेनास्थानेन। कालक्रमेण शोकोऽल्पीभवति तथा नेत्यर्थः। कवलीकृतं भक्षितम्। आवेगेनोद्गतानामुत्पन्नानां कृत्स्नस्य सकलस्य स्नेहस्य प्रेम्ण उत्कलिकानामुत्कण्ठानां कलापेन समूहेनोत्क्षिप्यमाण उद्ध्रियमाणः कायो देहो यस्य स हर्षः। 'कथितोत्कलिकोत्कण्ठा हेला सलिलवीचिषु' इति मेदिनी।

अथेति। सर्वदुःखानि संकल्पयन्निव निश्चिन्वान इव। दुःखावेगाद्दोर्दण्डः सुदूरं प्रसारितः। स तु दुःखेयत्तापरिगणने कल्पितो न्विति वितर्कः। पतितं क्षौमं वस्त्रं यस्मात्तादृशि। स्मृतो नृपतिर्येन तेन राजवल्लभेन राज्ञः प्रियेण

---

[1] 'क्रमोपचयानां'.

ण्डद्वयेन गृहीत्वा कण्ठे मुक्तकण्ठं पुनः पतितक्षौमे क्षामे वक्षसि पुनः कण्ठे पुनः स्कन्धभागे पुनः कपोलोदरे निधाय तथा तथा रुरोद यथा सबन्धनानीवोदपाट्यन्त हृदयानि। स्मृतनृपतिना राजवल्लभेनापि प्रतिशब्दनिभेन निर्भरमिवारुद्यत। सुचिराच्च कथं कथमपि निर्वृष्टनयनजलः पर्जन्य इव शरदि स्वयमेवोपशशाम। उपविष्टश्च 5 परिजनोपनीतेन तोयेन तत्करनखमयूखपुञ्जतया महाजलप्लवजायमानफेनलेखमिव पुनः पुनः प्रमृष्टमपि पक्ष्माग्रसंगलद्बिन्दुवृन्दमन्दोन्मेषमुषितदर्शनं कथं कथमपि चक्षुरक्षालयत्। ताम्बूलिकोपस्थापितेन च वाससा चन्द्रातपशकलेनेवोष्णोष्णबाष्पदग्धं वदनमुन्ममार्ज। तूष्णीमेव च चिरं स्थित्वोत्थाय स्नानभूमिमगात्। तस्यां च स्थित्वा 10 विभूषं विस्रस्तव्यस्तकुन्तलं मौलिमनादरान्निष्पीड्य सावशेषमन्युस्फुरितेन जिजीविषतेव जलधौतसुभगमात्मानमपि चुचुम्बिषतेवाधरेण क्षालितस्य चक्षुषः श्वैतिम्ना च शारदशशिकरविकसितविशदकुमुदव-

---

प्रासादेनेति विशेषमध्याहार्यम्। अथवा 'विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ'—इति वामनसूत्रानुसारेण विशेषस्यानुपादानम्। यथा निधानगर्भामिव सागराम्बरामिस्यत्र। प्रतिशब्दस्य प्रतिध्वनेर्निभेन मिषेण। **उपविष्टेति**। तस्य करस्य हस्तस्य नखमयूखानां नखकिरणानां पुंजतया समूहत्वेन महान् जलप्लवो जलपूरस्तेन जायमाना फेनलेखा यस्मिंस्तदिव। पक्ष्माग्रेभ्यः संगलतां बिन्दूनां वृन्देन मन्दोन्मेषः मन्दं विकसनं तेन मुषितं चोरितं दर्शनमवलोकनं यस्य। ताम्बूलिकया ताम्बूलधारिण्योपस्थापितेनानीतेन। दग्धस्यावयवस्य यथाशीतलस्पर्शस्तद्वच्चन्द्रातपशकलसदृशेन वस्त्रेण मुखसंमार्जनम्। विस्रस्ताः पीडिता व्यस्ताः क्षिप्ताः कुन्तला यस्मिंस्तं मौलिं मूर्धानम्। 'मौलिः किरीटे धम्मिल्ले चूडाकंकेलिमूर्धसु' इति हेमचन्द्रः। एतेन 'चूडा किरीटं केशाश्च संयता मौलयस्त्रयः' इत्युक्तमत्र तूपचारान्मौलिशब्देन शिर उच्यते इति शंकरोक्तं परास्तम्। मौलिशब्दस्य मूर्धवाचकस्य प्रसिद्धत्वाद्धेमेनानुमतत्वादनेकैः कविभिः प्रयुक्तत्वाच्चेत्यास्तां तावत्। सावशेषोवशिष्टो मन्युः शोकः तस्य स्फुरितं स्फुरणं तेन करणेन। धौतं शुद्धं स्वच्छमिति यावत्। अतएव सुभगं सुंदरमात्मानं स्वं प्रत्यपि चुम्बितुमिच्छतेवाधरेणोपलक्षितम्। चुचुम्बिषता चुम्बनेच्छुना। शोकेनाधरस्फुरणं तच्च स्वचुम्बनाभिलाषेण जीवनेच्छया वाऽधरेणानुष्ठितमिति कल्पना। अधरेणेत्थंभूतलक्षणे तृतीया। शारदस्य शरत्संबन्धिनः शशि-

नदलावलिबलिविक्षेपैरिव दिग्देवतार्चनकर्म कुर्वाणश्चतुःशालवित-र्दिकायां नीचापाश्रयविनिहितैकोपवर्हायां पर्यङ्किकायां निपत्य जो-षमस्थात्।

4 देवोऽपि हर्षस्तथैव स्नात्वा धरणितलनिहितकुथाप्रसारित-मूर्तिरदूर एवास्य तूष्णीमेव समवातिष्ठत। दृष्ट्वा दृष्ट्वा दूयमानमानस-मग्रजन्मानं समस्फुटदिवास्य सहस्रधा हृदयम्। औरसदर्शनं हि यौवनं शोकस्य। लोकस्य तु नरपतिमरणदिवसादपि दारुणः स बभूव दिवसः। सर्वस्मिन्नेव नगरे न केनचिदपाचि न केनचिद-स्नायि नाभोजि सर्वत्र सर्वेणारोदि। केवलमनेन क्रमेणातिचक्राम दिवसः। स च प्रत्यग्रत्वष्टृटङ्कतष्टतनुरिव वहद्वहलरुधिररसमांसच्छ-विरपरपारावारपयसि ममज्ज मञ्जिष्ठारुणोऽरुणसारथिः। मुकुलायमा-

---

नश्चन्द्रस्य किरणैः करैः विकसितस्य विशदस्य स्वच्छस्य कुमुदवनस्य श्वेतक-मलसमूहस्य दलानां पर्णानामावलय एव पंक्तय एव बलिप्रक्षेपा बलित्यागा-स्तैरिव। नेत्रश्वैत्यस्य शारदकुमुददलप्रक्षेपसाम्यं श्वेतत्वात्। चतुःशालस्य राज-गृहसम्बंधिनः 'चौसोपि' 'चौक' इति प्रसिद्धस्य वितर्दिकायां वेदिकायाम् नीचापाश्रये अधोलम्बमाने विताने विनिहिता स्थापिता एका उपवर्हा उपधानं यस्यां तस्याम्।

देव इति। धरणितले भूपृष्ठे निहितायां स्थापितायां कुथायां वर्णकम्बले प्रसा-रिताः मूर्तिः शरीरं येन सः। औरसस्य उरसो हृदयस्य प्रियस्तस्य भ्रातुरितिशेषो दर्श-नम्। प्रत्यग्रं तत्कालं त्वष्ट्रा देवशिल्पिना टंकेन पाषाणभेदनेन तष्टा तनूकृता तनुर्यस्य। वहन्निर्गच्छद्वहलरुधिरं रसः मांसं च तदिव च्छविर्यस्य सः ताम्र इत्यर्थः। अरु-णसारथिः सूर्यः। 'आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रेव यत्नोल्लिखितो विभाति' इति कालिदासेन पि सूर्यस्त्वष्ट्रा तनूकृत इति कथितम्। अपरपारावारः पश्चिमो-दधिः। मुकुलायमानैः संकुचद्भिः कमलिनीकोषैः कमलिनीकुड्मलैः विकलं-पीडितं चञ्चरीककुलं भ्रमरसमूहः चकाण जुगुञ्ज। सविधस्य समीपस्य विर-हस्य वियोगस्य व्याधिना विधुराभिः पीडिताभिः वधूभिर्बाध्यमानं पीड्यमानं चक्रवालं समूहः विबुद्धस्य प्रफुल्लस्य बन्धूकस्य बन्धूकपुष्पस्येव भाः कान्तिर्य-स्य तस्मिन् भास्वति सूर्ये। मधुकररवेण भ्रमरशब्देन सहितं कलहंसानां काद-म्बानां रमणीभां रमणीयं मनोहरं कैरवाकरं कुमुदाकरं संचरन्त्या गच्छन्त्याः श्रि-

नकमलिनीकोपविकलं चकाण चञ्चरीककुलं कमलसरसि । सविधवि-
रहव्याधिविधुरवधूबाध्यमानं बबन्ध बन्धाविव विबुद्धबन्धूकभासि
भास्वतिं सास्त्रां दृशं चक्रवाकचक्रवालम् । संचरन्त्याः समधुकररवं
कैरवाकरं कलहंसरमणीरमणीयं माणिक्यकाञ्चीकिङ्किणीजालमिवाच-
काण श्रियः । प्रकटकलङ्कमुदयमानं विशङ्कटविषाणोत्कीर्णपङ्कसंकर- 5
शंकरशङ्करशक्करककुदकूटसंकाशमकाशताकाशे शशाङ्कमण्डलम् ।

5 अस्यां च वेलायामनतिक्रमणवचनैरुपसृत्य प्रधानसामन्तै-
र्विज्ञाप्यमानः कथं कथमप्यभुक्त । प्रभातायां च शर्वर्यां सर्वेषु प्रवि-
ष्टेषु राजसु समीपस्थितं हर्षदेवमुवाच—'तात, भूमिरसि गुरुर्नियोगानाम्।
शैशव एवाग्राहि गुणवत्पताकेव भवता तातस्य चित्तवृत्तिः । यतो 10
भवन्तमेवंविधं विधेयं विधिविधानोपनतनैर्घृण्यमिदं किमपि बिभणि-
षति मे हृदयम् । नावलम्बनीया बालभावसुलभा प्रेमविलोमा वा-
मता । वैधेय इव मा कृथाः प्रत्यूहमीहितेऽस्मिन् । न खलु न जा-

यो लक्ष्म्याः शोभायाः माणिक्यस्य काञ्च्या रशनायाः किंकिणीजालमिव घण्टिका-
समूह इवाचकाण चुकूज । सायं कमलात्कैरवं श्रीर्गच्छति तस्या रशनार्किकिण्य
इव । प्रकटो व्यक्तः कलंको यस्मिंस्तद् । विशंकटाभ्यां विशालाभ्यां विषाणा-
भ्यां शृंगाभ्यामुत्कीर्णस्योत्खातस्य पंकस्य संकरः संबंधो यस्मिंस्तादृशं यच्छंक-
रस्य शकुरस्य दान्तस्य शक्करस्य वृषस्य ककुदकूटं ककुदाग्रं तेन संकाशं सदृशं
शशाङ्कमण्डलं चन्द्रबिम्बमशोभत । अनेन वर्णनेन शशांकाख्यस्य गौडाधि-
पस्य विजयोऽग्रे सूचितः। प्रकटकलंक इति विशेषणेन च तस्य दुष्टत्वमपि
व्यंजितम् ।

अस्यामिति । प्रभातायां भातुं प्रवृत्तायां शर्वर्यां रात्रौ । आदिकर्म-
णि क्तः । गुरवश्च ते नियोगा आदेशा अथवा गुरूणां नियोगाः। **शैशव इति** ।
पितुस्त्वय्यतीव प्रेमेत्यर्थः । विधेयमायत्तम् । विधेर्दैवस्य विधानेन कृत्येनोपनतं
नैर्घृण्यं नैष्ठुर्यं यस्य तन्मे हृदयम् । बिभणिषति भणितुमिच्छति भणेः सन् ।
प्रेम्णो विलोमा विपरीताऽनुचितो योर्थः वामता प्रातिकूल्यम् । 'विलोमस्तु-
प्रतीपे स्यात्' इति मेदिनी । वैधेयो मूर्खः । मा कृथाः आज्ञायां लुङ् ।
प्रत्यूहो विघ्नः। ईहितमीहा वाञ्छा 'ईहोद्यमवाञ्छयोः' इतिवचनात्। न खलु न ।
द्वौ नञौ प्रकृतमर्थं दार्ढ्यं गमयतः । भ्रूलतयादिष्टान्याज्ञप्तान्यष्टादशानि द्वीपा-
नि येन तेन । महासुराणां दानवश्रेष्ठानां समरस्य मध्यमध्यासितेन दशरथेन

नास्ति लोकवृत्तम् । लोकत्रयत्रातरि मांधातरि मृते किं कृतं पुरुकुत्सेन, भूलतादिष्टाष्टादशद्वीपे दिलीपे वा रघुणा, महासुरसमरमध्याध्यासितत्रिदशरथे दशरथे वा रामेण, गोष्पदीकृतचतुरुदन्वदन्ते दुष्यन्ते वा भरतेन । तिष्ठन्तु तावदेते तातेनैव शतसमधिकाध्वरधूमविसरधूसरितवासवयशंसि सुगृहीतनाम्नि तत्रभवति परासुतां गते पितरि किं नाकारि राज्यम् । यं च किल शोकः समभिभवति तं कापुरुषमाचक्षते शास्त्रविदः । स्त्रियो हि विषयः शुचाम् । तथापि किं करोमि । स्वभावस्य सेयं कापुरुषता वा स्त्रैणं वा यदेवमास्पदं पितृशोकहुतभुजो जातोस्मि । मम हि भूभृति पर्यस्ते निरवशेषतः प्रस्रवणानीव स्रुतान्यश्रूणि, अस्तमिते महति तेजस्यन्धकारीभूतदशाशस्य प्रनष्टः प्रज्ञानलोकः, प्रज्वलितं हृदयम्, आत्मदाहभीत इव स्वप्नेऽपि नोपसर्पति विवेकः, बलीयसा संतापेन जातुषमिव विलीनमखिलं धैर्यम्, पदे पदे दिग्धरोपाहतेव हरिणी मुह्यति मतिः, पुरुषद्वेषिणीव दूरत एव भ्रमन्ती परिहरति स्मृतिः, अम्बेव तातेनैव सह गता धृतिः, वार्द्धुषिकप्रयुक्तानीव वित्तानि प्रतिदिवसं वर्धन्ते दुःखानि, शोकानलधूमसंभूताम्भोधरभरितमिव वर्षति नयनवारिधाराविसरं शरीरम् । सर्वः पञ्चजनः पञ्चत्वमुपरतः प्रयाति वितथमेतद्वदति

गोष्पदीकृतः धेनोश्चरण इव सुलभतयोल्लंघितः चतुर्णामुदन्वतां समुद्राणामन्तो येन । शतसमधिकानामध्वराणां यज्ञानां धूमेन धूसरितं मलिनीकृतं वासवस्येन्द्रस्य यशः किर्तिः येन । सुगृहीतनाम्नि प्रातःस्मरणीये । ' स सुगृहीतनामा स्याद्यः प्रातः स्मर्यते बुधैः ' । कापुरुषं कुत्सितपुरुषं । ' विभाषा पुरुषे ' इत्यनेन कुशब्दस्य कादेशः । अन्धकारीभूता दश आशा दिशो यस्य तस्य । जातुषमिव जतुविकारमिव ' त्रपुजतुनोः षुक् ' इत्यनेन षुगागमः । दिग्धेन विषलिप्तेन रोपेणाहता ताडितेव । ' दिग्धो विषाक्तबाणे स्यात् ' इति मेदिनी । वार्धुषिकः कुसीदिकः । ' प्रयच्छति गर्ह्यम् ' इत्यनेन ठक् । वृद्धेर्वृधुषिभावः । शोकानलस्य दुःखाग्नेर्धूमसंभारेण धूमसमूहेन संभूतैरुत्पन्नैरंभोधरैर्मेघैर्भरितं व्याप्तमिव । नयनवारीणां बाष्पाम्भसां धाराणां विसरं व्रजमिव । ' विरसः प्रसरे व्रज ' इति मेदिनी । उपरतो मृतः पंचजनो नरः पंचत्वं पंचभूतेषु लयम् । ' स्युः पुंमासः पंचजनाः पुरुषाः पूरुषा नराः '

१ ' वयसि '

बालो लोकः । ततो हुताशनतामेव केवलमापन्नो येनैवं दहति माम् । इदमसांपरायिकमिव हृदयमवष्टभ्य व्युत्थितः शोको दुर्निवारः वाडव इव वारिराशिम्, पविरिव पर्वतम्, क्षय इव क्षपाकरम्, राहुरिव रविम्, दहति दारयति तनूकरोति कवलयति । न शक्नोति मे हृदयं तादृशस्य सुमेरुकल्पस्य महापुरुषस्य विनिपातमश्रुभिरेव केवलैरतिवाहयितुम् । राज्ये विष इव चकोरस्य मे विरक्तं चक्षुः । बहुमृतपटावगुण्ठनां रञ्जितरङ्गां जनंगमानामिव वंशवाह्यामनार्यां श्रियं त्यक्तुमभिलपति मे मनः । क्षणमपि दग्धगृहे शकुलिरिव न पारयामि स्थातुम् । सोऽहमिच्छामि मनसि वाससीव सुलग्नं स्नेहमलमिदममलैः शिखरिशिखरप्रस्रवणस्वच्छस्रोतोऽम्बुभिः क्षालयितुमाश्रमपदे। यतस्त्वमन्तरितयौवनसुखामनभिमतामपि जरामिव पुरुराज्ञया गुरोर्गृहाण मे राज्यचिन्ताम् । त्यक्तसकलबालक्रीडेन हरिणेव दीयतामुरो लक्ष्म्यै । परित्यक्तं मया शस्त्रम् ।' इत्येवमभिधाय खड्गग्राहिणो हस्तादादाय निजं निस्त्रिंशमुत्ससर्ज धरण्याम् ।

इत्यमरः । असांपरायिकं संपरायाय संग्रामाय न प्रभवति असांपरायिकम् । सभयमित्यर्थः । हृदयमवष्टभ्य पराजित्य व्युत्थितः उत्पन्नः । भीतः कथं व्युत्थितं निवारयेदतः शोकस्य दुर्निवारता । वाडव इवेत्यादीनां चतुर्णां यथासंख्येन दहतीत्यादिभिः संबन्धः । **राज्य इति** । विषं दृष्ट्वा चकोरस्य नेत्रे रज्येते । तथा च सूत्रस्थाने वाग्भटः 'चकोरस्याक्षिवैराग्यं क्रौंचस्य स्यान्मदोदयः' इति । बहवो मृतस्य पटा अथवा बहूनां मृतानां पटा अवगुण्ठनानि शिरोवेष्टनानि यस्यास्ताम् । रञ्जित आकृष्टो दूषितो वा रंगः समाजो यया ताम् । जनंगमाः चंडालाः । वंशेभ्यः कुलेभ्यः बाह्यां दूरीभूताम् । चांडालश्रीपक्षे वंशैर्वाह्यांवोढव्याम् । शकुलिर्गृहचटिकेति संकेतः गृहशारिकेत्यन्ये । निर्जले कूपे कुलीर इवेति समीचीनः पाठः । शिखरिणां पर्वतानां शिखराणि अग्राणि तेषां प्रस्रवणानां निर्झराणां स्वच्छैः स्रोतोऽम्बुभिः प्रवाहोदकैः । **अन्तरितेति** । पुरा किल शुक्रशापाज्जरामाप्तो ययातिः स्वपुत्रे पुरौ निजां जरां संक्रामयामासेति महाभारते । जरापि केनापि नाभिलष्यते यौवनसुखप्रतिबन्धिका च ।

---

१ 'निर्जले कूपे कुलीर इव.'

6 अथ तच्छ्रुत्वा निशितशिखेन शूलेनेवाहतः प्रविदीर्णहृदयो देवो हर्षः समचिन्तयत्—'किं नु खलु मामन्तरेणार्यः केनचिदसहिष्णुना किंचिद्ग्राहितः कुपितः स्यात्। उतानया दिशा परीक्षितुकामो माम्। उत शोकजन्मा चेतसः समाक्षेपोऽयमस्य। आहोस्विदार्य एवायं न भवति। किं वार्येणान्यदेवाभिहितमन्यदेवाश्रावि मया शोकशून्येन श्रवणेन्द्रियेण। आर्यस्य वान्यदेव विवक्षितमन्यदेवापतितं मुखेन। अथवा सकलवंशविनाशाय निपातनोपायोऽयं विधेः, मम वा निखिलपुण्यपरिक्षयोपक्षेपः, कर्मणामननुकूलसमग्रग्रहचक्रवालविलसितं वा। अथवा तातविनाशनिःशङ्ककलिकालक्रीडितं येनार्यं यःकश्चिदिव यत्किंचनकारिणं मामपुष्पभूतिवंशसंभूतमिव, अताततनयमिव, अनात्मानुजमिव, अभक्तमिव, दृष्टदोषमिव, श्रोत्रियमिव सुरापाने, सद्भृत्यमिव स्वामिद्रोहे, सज्जनमिव नीचोपसर्पणे, सुकलत्रमिव व्यभिचारे, अतिदुष्करे कर्मणि समादिष्टवान्। तदेतत्तावदनुरूपं यच्छौर्योन्मादमदिरोन्मत्तसमस्तसामन्तमण्डलसमुद्रमथनमन्दरे तादृशि पितरि मृते तपोवनं वा गम्यते वल्कलानि वा गृह्यन्ते तपांसि वा सेव्यन्ते। या तु मयि राज्याज्ञा सा दग्धेऽपि दाहकारिणी मय्यवग्रहग्लपिते धन्वनीवाङ्गारवृष्टिः। तदसदृशमिदमार्यस्य। यद्यपि च विभुरनभिमानः, मुनिररोषणः, द्विजातिरनेषणः, कपिरचपलः, कविरमत्सरः, वणिगतस्करः, प्रियजानिरकुहनः, साधुरद-

अथेति। समाक्षेपो भ्रमणम्। अननुकूलानां प्रतिकूलानां समग्राणां ग्रहाणां चक्रवालस्य समूहस्य विलसितं क्रीडितम्। श्रोत्रियो वेदपारगः। शौर्योन्मादो वीर्योन्माद एव मदिरा तयोन्मत्तानां समस्तसामन्तानां मंडलं समूह एव समुद्रस्तस्य मथनस्य विलोडनस्य मन्दरे। एतादृशि पितरि मृते तपोवनगमनादि योग्यमेवेत्यर्थः। एवं भ्रातुस्तपोवनगमनं प्रशस्य स्वस्य राज्यकरणं निन्दति। या त्विति। अवग्रहेणावर्षणेन ग्लपिते पीडिते धन्वनि मरुदेशे अंगारवृष्टिरिव उल्मुकवृष्टिरिव 'धन्वा तु मरुदेशे ना' इति मेदिनी। 'अंगारो द्विविधः साग्निर्निरग्निश्च। तत्र साग्नौ यथा 'अंगारच्युम्बितामिव व्यथमानमास्ते' निरग्नौ यथा 'कलंकस्तन्त्रत्यो व्रजति मलिनांगारतुलनाम्' इति' इति मुकुटः। अनेषणो निरभिलाषः। प्रिया जाया यस्य स प्रियजानिः। जायाया निङ्। न कुहन ईर्ष्यालुरकुहनः। 'कुहना दंभचर्यायामीर्ष्यालौ कुहनं त्रिषु' इति मेदिनी। एतेन कुहना ईर्ष्येति शंक-

रिद्रः, द्रविणवानखलः, कीनाशोऽनक्षिगतः, मृगयुरहिंस्रः, पाराशरी ब्राह्मण्यः, सेवकः सुखी, कितवः कृतज्ञः, परिव्राडबुभुक्षुः, नृशंसः प्रियवाक्, अमात्यः सत्यवादी, राजसूनुरदुर्विनीतश्च जगति दुर्लभः, तथापि ममार्य एवाचार्यः। को हि नाम तद्विधे निपतिते राजगन्ध-कुञ्जरे जनयितरि, ईदृशे च विफलीकृतविशालशिलास्तम्भोरुभुजे 5 भूभुजि भ्रातरि त्यक्तराज्ये ज्यायसि नववयसि तपोवनं गच्छति, स-कललोकलोचनजलपातापवित्रं मृद्वोलकं वसुधाभिधानं धनमदखेल-निखिलखलमुखविकारलक्षणाख्यायमाननीचाचरणां च श्रीसंज्ञिकां सुभटकुटुम्बकर्मकुम्भदासीं चण्डालोऽपि कामयेत। कथमिव संभा-वितमत्यन्तमनुचितामिदमार्येण। किमुपलक्षितमनवदातमिदं मयि। 10 किं वास्य चेतसश्च्युतः सौमित्रिर्विस्मृता वा वृकोदरप्रभृतयः। अन-पेक्षितभक्तजना स्वार्थैकनिष्पादननिष्ठुरा नासीदियमार्यस्येदृशी प्रभवि-ष्णुता। अपि चार्ये तपोवनं गते जिजीविषुः को हि नाम महीं मन-सापि ध्यायेत्। कुलिशशिखरखरनखरप्रचयप्रचण्डचपेटापाटितमत्त-मातङ्गोत्तमाङ्गमदच्छटाच्छुरितचारुकेसरभारभास्वरमुखे केशरिणि वन- 15 विहाराय विनिर्गते निवासं गिरिगुहां कः पाति पृष्ठतः। प्रतापस-हाया हि सत्त्ववन्तः। कश्चपलां लक्ष्मीं प्रत्यनुरोधोऽयमार्यस्य यदीय-मपि न चीरान्तरितकुचा कुशकुसुमसमित्पलाशपूलिकां वहन्ती तत्रैव

रोक्तं पर्यायदानमसंगतं तत्पुरुषेणैव निर्वाहे बहुव्रीहेरनुचितत्वस्य मीमांसकसंमत-त्वात्। अनक्षिगतः अद्वेष्यः। "द्वेष्ये त्वक्षिगत" इत्यमरः। मृगयुर्व्याधः। पाराशरी पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीते स पाराशरी भिक्षुः। 'पाराशर्यशि-लालिभ्यां भिक्षुनटसूत्रयोः' इत्यनेन णिनिः। कितवो द्यूतकृत्। 'कितवोऽक्षधूर्तो द्युतकृत्समा' इत्यमरः। राजसूनुर्दुर्विनीत इदं मुख्यप्रतिपाद्यम्। विफलीकृतं विशालं शिलास्तंभमिवोरुभुजं येन तस्मिन्। ऊरू च भुजौ चोरुभुजम्। प्राण्यंग-त्वादेकवद्भावः। धनमदेन खेलानां सविलासानां निखिलानां खलानां नीचानां मुखविकारलक्षणैर्मुखविकारचिन्हैराख्यायमानं नीचाचरणं यस्यास्ताम्। सुभ-टानां वीराणां कुटुम्बस्य कर्मणः कुम्भदासीं कुट्टिनीम्। अनवदातमनिर्मलम्। कुलिशशिखरमिव वज्राग्रमिव खरस्तीक्ष्णा नखरा नखास्तेषां प्रचयेन समूहेन प्रचंडया चपेटिकया कराघातेन पाटितानि विदारितानि मत्तानां मातंगमानां हस्तिनामुत्तमांगानि मस्तकानि तेषां मदच्छटया मदसमूहेन छुरितेन व्याप्तेन

तपोवने वनमृगीव नीयते जराजालिनी । किं वा ममानेन वृथा बहुधा विकल्पितेन तूष्णीमेवार्यमनुगमिष्यामि । गुरुवचनातिक्रमकृतं च किल्बिषमेतत्तपोवने तप एवापास्यति ’। इत्यवधार्य मनसा प्रथमतरं गतस्तपोवनमधोमुखस्तूष्णीमेवातिष्ठत ।

7 अत्रान्तरे पूर्वादिष्टेनैव रुदता वस्त्रकर्मान्तिकेन समुपस्थापितेषु वल्कलेषु, निर्दयकरतलताडनभियेव क्वापि गतेहृदये रटति राजस्त्रैणे, तारमब्रह्मण्यमूर्ध्वदोष्णि विरुदति विप्रजने, पादप्रणतिपरे फूत्कुर्वति पौरवृन्दे, विद्राति विद्रुतचेतसि चिरंतने परिजने, परिजनावलम्बिते वेपमानवपुषि पर्याकुलवाससि शोकगद्गदवचसि गलितनयनपयसि निवारणोद्यतमनसि वर्षीयसि विशति बन्धुवर्गे, निराशेषु नखलिखितमणिकुट्टिमेष्ववाङ्मुखेषु निश्वसत्सु सामन्तेषु, सबालवृद्धासु तपोवनाय प्रस्थितासु सर्वासु प्रजासु सहसैव प्रविश्य शोकविक्लवः प्रक्षरितनयनसलिलो राज्यश्रियः परिचारकः संवादको नाम प्रज्ञाततमो विमुक्ताक्रन्दः सदस्यात्मानमपातयत् ।

8 अथ संभ्रान्तो भ्रात्रा सह स्वयं देवो राज्यवर्धनस्तं पर्यपृच्छत्—‘भद्र, भण भण किमस्मद्व्यसनव्यवसायवर्धनबद्धधृतिः,

---

चारुणा मनोहरेण केसरभारेण सटाभारेण भास्वरं दीप्तिमन्मुखं यस्य तस्मिन् । चीरेण वल्कलेनान्तरितावाच्छादितौ कुचौ यस्याः सा । वनमृग्यपि कुशादि वहति । जराजालिनी जराया वार्धक्यस्य जालं विद्यते यस्याः सा ।

अत्रेति । संवादको नाम सदस्यात्मानमपातयदिति संबन्धः । हृदये उरसि निर्दयं यत्करताडनं तस्य भियेव क्वापिगतं कुत्रापि स्थितं हृदयं यस्य तस्मिन् । शोकेन शून्यहृदयाः स्त्रिय आरटन् परं वक्षसः पलायनस्य करताडनभीतिः कारणं परिकल्पिता । राजस्त्रैणे राजस्त्रीसमूहे रटति सति । ग्लपितहृदय इत्यपि पाठः साधुः । ऊर्ध्वदोष्णि ऊर्ध्वहस्ते । फूत्कुर्वत्युद्दामं रुदति । विद्राति पलायमाने । प्रक्षरितं गलितं नयनसलिलं नेत्रोदकं यस्य सः । विमुक्तः कृत आक्रन्द आरटनं येन सः ।

अथेति । भद्र कल्याणिन् । अस्माकं व्यसनव्यवसायस्य संकटोद्यमस्य

---

१ ‘ग्लपितहृदये’.

अवनिपतिमरणमुदितमतिः, अधृतिकरमपरमधिकतरमितः समुपनयति विधिः' इति। स कथं कथमप्यकथयत्—'देव, पिशाचानामिव नीचात्मानां चरितानि छिद्रप्रहारीणि प्रायशो भवन्ति। यतो यस्मिन्नहन्यवनिपतिरुपरत इत्यभूद्वार्ता तस्मिन्नेव देवो ग्रहवर्मा दुरात्मना मालवराजेन जीवलोकमात्मनः सुकृतेन सह त्याजितः। भर्तृदारिकापि राज्यश्रीः कालायसनिगडयुगलचुम्बितचरणा चौराङ्गनेव संयता कान्यकुब्जे कारायां निक्षिप्ता। किंवदन्ती च यथा किलानायकं साधनं मत्वा जिघृक्षुः सुदुर्मतिरेतामपि भुवमाजिगमिषति। इति विज्ञापिते प्रभुः प्रभवतीति।' 5

9 ततश्च तादृशमनुपेक्षणीयमसंभावितमाकस्मिकमपरं व्यतिकरमाकर्ण्याश्रुतपूर्वत्वात्परिभवस्य, परपरिभवासहिष्णुतया च स्वभावस्य, दर्पबहुलतया च नवयौवनस्य, वीरक्षेत्रसंभवत्वाच्च जन्मनः, कृपाभूमिभूतायाश्च स्वसुः स्नेहात्स तादृशोऽपि बद्धमूलोऽप्यात्यन्तगुरुरेकपद एवास्य ननाश शोकावेगः। विवेश च सहसा केसरीव गिरिगुहागृहं गम्भीरं हृदयं भयंकरः कोपावेगः। केशिनिषूदनशङ्काकुलकालियकुलभङ्गुरभ्रूभङ्गतरङ्गिणी श्यामायमाना यमस्वसेव प्रथीयसि ललाटपट्टे भीषणा भ्रुकुटिरुदभिद्यत। दर्पात्परामृशन्नखकिरणसलिलनिर्झरैः समरभारसंभावनाभिषेकमिव चकार दिङ्नागकुम्भकूटविकटस्य 10 15

वर्द्धने वृद्धौ बद्धा धृतिधैर्यं येन सः। अवनिपतेर्नृपस्य मरणेन मुदिता संतुष्टा मतिर्यस्य सः। कालायसस्य लोहविशेषस्य निगडयुगलेन शृंखलाद्वयेन चुम्बितौ चरणौ यस्याः सा संयता बद्धा। किंवदन्ती लोकवार्ता। अनायकं नृपमरणाद्भर्तृहीनं साधनं सैन्यं जिघृक्षुः ग्रहीतुमिच्छुः। आजिगमिषत्यागंतुमिच्छति।

ततश्चेति। व्यतिकरं संकटम्। परेण कृतस्य परिभवस्यासहिष्णुतया। केशिनिषूदनस्य अश्वरूपधारिणः कंसपक्षीयस्य केशिनाम्नोऽसुरस्य हन्तुः श्रीकृष्णस्य शंकया आकुलं कालियकुलं तन्नामकनागकुलमिव भंगुराश्चञ्चला भ्रूभंगतरंगा विद्यन्ते यस्याः सा भ्रुकुटिः। पक्षे केशिनिषूदनस्य शंकया आकुलेन कालियकुलेन भंगुराश्चञ्चला भ्रूभंगा इव तरंगा लहर्यो विद्यन्ते यस्याः सा यमस्वसा। दर्पादिति। नखकिरणान्येव सलिलनिर्झरास्तैः। दिङ्नागस्य दिग्गजस्य कुंभकूटमिव गंडस्थलशिखरमिव विकटं विशालं तस्य। बाहुशिखरमेव कोषं कुड्मलं तस्य। कुड्मलाकारं पुष्टं

बाहुशिखरकोषस्य वामः पाणिपल्लवः । संगलत्स्वेदसलिलपूरितोदरो निर्मूलं मालवोन्मूलनाय गृहीतकेश इव दुर्मदश्रीकचग्रहोत्कण्ठयेव च कम्पमानः पुनरपि समुत्ससर्प भीषणं कृपाणं पाणिरपरः । शस्त्रग्रहणमुदितराजलक्ष्मीक्रियमाणादिष्टवृद्धिविधुतसिन्दूरधूलिरिव कपिलः कपोलयोरदृश्यत रोषरागः । समासन्नसकलमहीपालचूडामणिचक्राक्रमणजाताहंकार इव च समारुरोह वाममूरुदण्डमुत्तानितश्चरणो दक्षिणः । निष्ठुराङ्गुष्ठकषणनिष्ठ्यूतधूमलेखो निर्वीरोर्वीकरणाय विमुक्तशिख इव लिलेख मणिकुट्टिममितरः पादपद्मः । दर्पस्फुटितसरसव्रणोच्छालितरुधिरच्छटावसेकैः शोकविषप्रसुप्तं प्रबोधयन्निव पराक्रममनुजमवादीत्—'आयुष्मन्, इदं राजकुलम्, अमी बान्धवाः, परिजनोऽयम्, इयं भूमिः, भूपतिभुजपरिघपालिताश्चैताः प्रजाः, गतोऽहमद्यैव मालवराजकुलप्रलयाय । इदमेव तावद्वल्कलग्रहणमिदमेव तपः शोकापगमोपायश्चायमेव यदत्यन्ताविनीतारिनिग्रहः । सोऽयं कुरङ्गकैः कचग्रहः केशरिणः, भेकैः करपातः कालसर्पस्य, वत्सकैर्वन्दिग्रहो व्याघ्रस्य, अलगर्दैर्गलग्रहो गरुडस्य, दारुभिर्दाहादेशो दहनस्य, तिमिरैस्तिरस्कारो रवेः, यो मालवैः परिभवः पुष्पभूतिवंशस्य । अन्तरितस्तापो मे महीयसा मन्युना । तिष्ठन्तु सर्व एव राजानः करिणश्च त्वयैव

बाहुशिखरमिति कोषशब्देन सूचितम् । संकेतस्तु कोषो दिव्यमित्याह तन्नास्माकं चार्वेवभाति । संगलद्भिः स्वेदसलिलैर्घर्मबिन्दुभिः पूरितमुदरं यस्य । दुर्मदाया उन्मत्ताया श्रियः कचग्रहस्य केशग्रहणस्योत्कंठयेव । स्त्रियः केशग्रहणे कामिनो हस्तः कम्पमानः स्वेदवांश्च भवति । अत्र श्रीः शत्रोः । शस्त्रग्रहणेन मुदितया वनवासोद्यमात्प्रतिनिवृत्तेनानेन शस्त्रं गृहीतमिति संतुष्टया राज्यलक्ष्म्या क्रियमाणायां दिष्टवृद्ध्यामानन्दवर्धने विधुता त्यक्ता सिन्दूरधूलिरिव काश्मीरजपराग इव । समासन्नानां समीपमुपस्थास्यमानानामादिकर्मणिक्तः सकलमहीपालानां सर्वेषां नृपाणां चूडामणिचक्रस्य शिरोमणिसमूहस्याक्रमणेनातिलंघनेन जातोऽहंकारो यस्य सः । निष्ठुरं निर्दयमंगुष्ठनिकषणमंगुलिघर्षणं तेन निष्ठ्यूता बहिरागता धूमलेखा यस्मात्सः । विमुक्ता शिखा येन सः । यथा चाणक्येन नन्दनाशं प्रतिज्ञाय शिखा मुक्ता तद्वदस्य चरणेनापि धूमरूपा शिखा निर्वीरोर्वीकरणाय मुक्ता । दर्पेणा-

सार्धम्। अयमेको भण्डिरयुतमात्रेण तुरङ्गमाणामनुयातु माम्।' इत्यभिधाय चानन्तरमेव प्रयाणपटहमादिदेश।

10 तं च तथा समादिशन्तमाकर्ण्य जामिजामातृवृत्तान्तविज्ञानप्रकोपाधानदूयमाने मनसि निवर्तनादेशेन दूरप्ररूढप्रणयपीड इव प्रोवाच देवो हर्षः—'कमिव दोषं पश्यत्यार्यो ममानुगमनेन। यदि 5 बाल इति नितरां तर्हि न त्याज्योऽस्मि, रक्षणीय इति भवद्भुजपञ्जरं रक्षास्थानम्, अशक्त इति क्व परीक्षितोऽस्मि, संवर्धनीय इति वियोगस्तनूकरोति, अक्लेशसह इति स्त्रीपक्षे निक्षिप्तोऽस्मि, सुखमनुभवत्विति त्वय्येव सह तत्प्रयाति, महानध्वनः क्लेश इति विरहोऽविषह्यतरः, कलत्रं रक्षत्विति श्रीस्ते निस्त्रिंशेऽधिवसति, पृष्ठतस्तिष्ठत्विति तिष्ठत्येव प्रतापः, राजकमनधिष्ठितमिति तत्सुबद्धमार्यगुणैः, 10 न बाह्यः सहायो महत इति व्यतिरिक्तमिव मां गणयति, प्रलघुपरिकरः प्रयामीति पादरजसि कोऽतिभारः, द्वयोर्गमनमसांप्रतमिति मामनुगृहाण गमनाज्ञया, कातरो भ्रातृस्नेह इति सदृशो दोषः। का चेयमात्मंभरिता भुजस्य ते यदेकाकी क्षीरोदफेनपटलपाण्डुरममृतमिव 15 यशः पिपासति। अवञ्चितपूर्वोऽस्मि प्रसादेषु। तत्प्रसीदत्वार्यो नयतु मामपि' इत्यभिधाय क्षितितलविनिहितमौलिः पादयोरपतत्।

भिमानेन स्फुटितान्द्विधाभूतांत्सरसाद्व्रणादुच्छलिताया गलिताया रुधिरच्छटाया रक्तपरंपराया अवसेकैः सिंचनैः। भेकैर्मण्डूकैः। अलगर्दैर्जलसर्पैः इतिशंकरः। जलसर्पाः 'विरोळा' इतिप्रसिद्धाः। वत्सकैरल्पैर्वत्सैस्तर्णकैः। अल्पार्थेकन्। अयुतमात्रेण दशसहस्रमात्रेण।

तमिति। जामिर्भगिनी जामाता तत्पतिस्तयोर्वृत्तान्तविज्ञानेन यत् प्रकोपस्य आधानं प्राप्तिस्तेन प्रकोपेन दूयमाने पीड्यमाने मानसे। दूरं प्ररूढा प्रणयस्य प्रेम्णः पीडा त्रासो यस्य सः। तथादेशेन आत्मनि भ्रातुः प्रेमाभावमाशंक्य दूयमान इत्यर्थः। बाह्यो भिन्नः सहायः। य एव त्वं स एवाहमतः कः कस्य सहाय इत्यर्थः। आत्मंभरिता स्वार्थमात्रपरता। 'फलेग्रहिरात्मंभरिश्च' इत्यनेन निपातित आत्मंभरिशब्दः। क्षीरोदस्य दुग्धसमुद्रस्य फेनपटलमिव फेनसमूहमिव पाण्डुरं यशः। अमृतमपि क्षीरोदफेनेन पाण्डु वर्तते तज्जत्वात्तस्य।

11 तमुत्थाप्य पुनरग्रजो जगाद—'तात, किमेवमतिमहारम्भपरिग्रहणेन गरिमाणमारोप्यते बलादतिलघीयानप्यहितः। हरिणार्थमतिहेपणः सिंहसंभारः। तृणानामुपरि कति कवचयन्त्याशुशुक्षणयः। अपि च तवाष्टादशद्वीपाष्टमङ्गलकमालिनी मेदिन्यस्त्येव विक्रमस्य विषयः। नहि कुलशैलनिवहवाहिनो वायवः संनह्यन्त्यतितरले तूलराशौ। न सुमेरुवप्रप्रणयप्रगल्भा वा दिक्करिणः परिणमन्त्यणीयसि वल्मीके। ग्रहीष्यसि सकलपृथ्वीपातिप्रलयोत्पातमहाधूमकेतुं मांधातेव चारुचामीकरपत्रलतालंकाराङ्कायं कार्मुकं ककुभां विजये। मम तु दुर्निवारायामस्यां विपक्षक्षपणक्षुधि क्षुभितायां क्षम्यतामयमेकाकिनः कोपकवल एकः। तिष्ठतु भवान्।' इत्यभिधाय च तस्मिन्नेव वासरे निर्जगामाभ्यमित्रम्।

12 अथ तथागते भ्रातरि, उपरते च पितरि, प्रोषितजीविते च जामातरि, मृतायां च मातरि, संयतायां च च स्वसरि, स्वयूथभ्रष्ट इव वन्यः करी देवो हर्षः कथं कथमप्येकाकी कालं तमनैषीत्। अतिक्रान्तेषु बहुषु वासरेषु कदाचित्तयैव भ्रातृगमनदुःखासिकया दत्तप्रजागरस्त्रिभागशेषायां त्रियामायां यामिकेन गीयमानामिमामार्यां शुश्राव—

'द्वीपोपगीतगुणमपि समुपार्जितरत्नराशिसारमपि।
पोतं पवन इव विधिः पुरुषमकाण्डे निपातयति॥ ३॥'

तमुत्थाप्येति। अहितः शत्रुः। अतिहेपणोऽत्यंतलज्जाकरः सिंहसंभारः सिंहग्रहणसामग्री। अष्टादशसु द्वीपेषु अष्टमंगलानां सिंहादीनां ब्राह्मणादीनां वाष्टानां मंगलपदार्थानां माला सास्यास्तीति तादृशी। सर्वेषु द्वीपेषु विद्यमानैर्मंगलपदार्थैः शोभमानेत्यर्थः। न परिणमन्ति तटाघातक्रीडां न कुर्वन्ति। वल्मीके नाकौ पिपीलिकोत्खाते मृत्पिण्डे। अभ्यमित्रं शत्रुसंमुखम्। 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यनेनाव्ययीभावः।

अथेति। यामिकेन जागरिकेन। **द्वीपेति**। द्वीपेषूपगीताः स्तुता गुणाः शौर्यादयो जलगमने वेगादयश्च यस्य तम्। समुपार्जितः पराक्रमादिना लब्ध उद्यमार्थमानीतश्च रत्नानां राशीनां समूहानां सारो येन तं पुरुषं विधिर्दैवमकाण्डे सपद्येव पोतं नावं पवनो वायुरिव निपातयति घातयति जले निमज्जयति वा।

तां च श्रुत्वा सुतरामनित्यताभावनया दूयमानहृदयः प्रक्षीणभूयिष्ठायां क्षपायां क्षणमिव निद्रामलभत स्वप्ने चाभ्रंलिहं लोहस्तम्भं भज्यमानमपश्यत् । उत्कम्पमानहृदयश्च पुनः प्रत्यबुध्यत । अचिन्तयच्च—'किं नु खलु मामेवममी सततमनुबध्नन्ति दुःस्वप्नाः । स्फुरति च दिवानिशमकल्याणाख्यानविचक्षणमदक्षिणमक्षि । सुदारुणाश्चाक्षुद्रक्षितिपक्षयमाचक्षाणाः क्षणमपि न शाम्यन्ति पुनरुत्पाताः । प्रत्यहं राहुरविकलकायबन्ध इव कबन्धवति ब्रध्नबिम्बे घटमानो विभाव्यते । तपःकरणकालकवलितानिव धूसरितसमग्रग्रहानुद्गिरन्ति धूमोद्गारान्सप्तर्षयः । दिने दिने दारुणा दिशां दाहा दृश्यन्ते । दिग्दाहभस्मकणनिकर इव निपतति नभस्तलात्तारागणः । तारापातशुचेव निष्प्रभः शशी । निशि निशि इतस्ततः प्रज्वलिताभिरुल्काभिरुग्रं ग्रहयुद्धमिव वियति विलोकयन्ति विलोलतारकाः ककुभः । राज्यसंचारसूचकः संचारयतीव क्ष्मां क्वापि वहद्बहलरजःपटलकलिलशर्कराशकलसूत्कारी मारुतः । न कुशलमिव पश्यामि लग्नस्य । अस्मिन्नस्मद्वंशे करिण इव करीरं कोमलमपि कलयतः कृतान्तस्य कः परिपन्थी । सर्वथा स्वस्ति भवत्वार्याय ।' इति चिन्तयित्वा च अ-

---

सुतरामत्यन्तं दूयमानं पीड्यमानं हृदयं यस्य सः । प्रक्षीणो भूयिष्ठो बहुतमभागो यस्यास्ताम् । अभ्रंलिहं नभःस्पृशम् । 'वहाभ्रेलिहः' इत्यनेन खशि 'अरुर्द्विषदजन्तस्य मुम्' इत्यनेन पूर्वपदस्य मुमागमः । अकल्याणस्याशुभस्याख्याने कथने विचक्षणं प्रवीणमदक्षिणं वामम् । अक्षुद्रस्य महतः क्षितिपस्य राज्ञः क्षयं नाशमाचक्षाणाः कथयन्तः । अविकलोऽन्यूनः पूर्ण इत्यर्थः कायबन्धो देहबन्धो यस्य सः । ब्रध्नबिम्बे रविबिम्बे । तपःकरणकाले तपश्चर्यावेलायां कवलितान् भक्षितानिव । धूसरिता मलिनिताः समग्राः सकला ग्रहा यैस्तान् । तारापातशुचा तारकापतनशोकेन तारा शशिनो भार्येति तस्य शोकः । विलोलतारकाः तारकारूपनेत्रयुक्ता युद्धदर्शनवेलायां चंचलदृष्टय इत्यर्थः । वहन् वेगेन गच्छन् बहलेन प्रभूतेन रजःपटलेन धूलिसमूहेन कलिलैर्व्याप्तैः शर्कराशकलैर्वालुकाशकलैः सूत्कारी सूदितिशब्दं कुर्वाणश्च । वंशोऽन्वये वेणौ च । करीरं वंशांकुरं कलयतो भंजतः । परिपन्थी रोधकः । तत्ताभावादिति भावः । परि दोषाख्यानं पन्थयति करोति सः परिपन्थी परिशब्दस्य दोषाख्यानवाचित्वं 'दोषाख्याने

न्तर्भिन्नभातृस्नेहकातरं द्रवदिव हृदयं कथं कथमपि संस्तभ्योत्थाय यथाक्रियमाणं क्रियाकलापमकरोत् ।

13 आस्थानगतश्च सहसैव प्रविशन्तम्, अनुप्रविशता विषण्णवदनेन लोकेनानुगम्यमानम्, असह्यदुःखोष्णनिश्वासधूमरक्ततन्तुनेव मलिनेन पटेन प्रावृतवपुषम्, जीवितधारणलज्जयेवावनतमुखम्, 5 नासावंशस्याग्रे ग्रथितदृष्टिम्, दुःखदूरप्ररूढरोम्णा मूकेनापि मुखेन स्वामिव्यसनमविच्छिन्नैरश्रुबिन्दुभिर्विज्ञापयन्तं कुन्तलं नाम बृहदश्ववारम्, राज्यवर्धनस्य प्रसादभूमिमभिजाततमं ददर्श दृष्ट्वा च जाताशङ्कश्चक्षुषि सलिलेन, मुखशशिनि श्वसितेन, हृदये हुताशेन, उत्सङ्गे भुवा, दारुणाप्रियश्रवणसमये सममिव सर्वेष्वङ्गेष्वगृह्यत लोकपालैः । 10 तस्माच्च हेलानिर्जितमालवानीकमपि गौडाधिपेन मिथ्योपचारोपचितविश्वासं मुक्तशस्त्रमेकाकिनं विश्रब्धं स्वभवन एव भ्रातरं व्यापादितमश्रौषीत् ।

14 श्रुत्वा च महातेजस्वी प्रचण्डकोपपावकप्रसरपरिचीयमानशोकावेगः सहसैव प्रजज्वाल । ततश्चामर्षविधुतशिरःशीर्यमाण- 15

निरसने पूजाव्याप्त्योश्च भूषणे ' इति मेदिनीकोषात् । ' सुप्यजातौ णिनिस्ताच्छील्ये ' इत्यनेन णिनिः । एतेन ' परिपूर्वपर्यायः परिपन्थशब्दोऽस्तीति ज्ञापितम् ' इति परास्तम् ।

आस्थानगत इति। असह्येन दुःखेन उष्णा निश्वासा एव धूमस्तेन रक्तास्तन्तवो यस्य तेनेव । दूरागमनान्मलिनं वस्त्रं श्वासधूमेन मलिनीकृतमितिकल्पना । दुःखेनानतमुखत्वे जीवितधारणलज्जा कारणं प्रदर्शिता। लोकपालैः । भुवो लोकपालत्वाभावाल्लोकान् पालयतीति व्युत्पत्त्या लोकपालशब्दं निष्पाद्य संज्ञावाचकलोकपालशब्देनैकशेषः । हेलया लीलया निर्जितं मालवानीकं मालवसैन्यं येन तं मिथ्योपचारेणासत्योपचारेणोपचितो वर्धितो विश्वासो यस्य तम् । गौडाधिपेन शशांकेनेत्यर्थः । अतएव पूर्वं चन्द्रोदयवर्णने प्रकटकलंकमुदयानं शशांकमण्डलमितिश्लेषेण वर्णनं युज्यते ।

श्रुत्वेति । प्रचण्डेन विशालेन शोकपावकस्य शोकाग्नेः प्रसरेण विस्तारेण परिचीयमानो नश्यमानः शोकावेगो यस्य सः। अमर्षेण क्रोधेन विधूतात्कंपितात् शिरसो मस्तकात् शीर्यमाणैर्गलद्भिः शिखामणिशकलैः शिखारत्नखण्डैः

शिखामणिशकलाङ्गारकितमिव रोषाग्निमुद्वमन्, अनवरतस्फुरितेन पिबन्निव सर्वतेजस्विनामायूंषि रोषनिर्भुग्नेन दशनच्छदेन, लोहिताय-मानलोचनालोककिक्षेपैर्दिग्दाहानिव दर्शयन्, रोषानलेनान्यसह्यसह-जशौर्योष्मदहनदह्यमानेनेव वितन्यमानस्वेदसलिलशीकरासारदुर्दिनः, स्वावयवैरप्यदृष्टपूर्वप्रकोपभीतैरिव कम्पमानैरुपेतः, हर इव कृतभै-रवाकारः हरिरिव प्रकटितनरसिंहरूपः, सूर्यकान्तशैल इवापरतेजःप्रस-रदर्शनप्रज्वलितः, क्षयदिवस इवोदितद्वादशदिनकरदुर्निरीक्ष्यमूर्तिः, महोत्पातमारुत इव सकलभूभृत्कम्पकारी, विन्ध्य इव विवर्धमान-विग्रहोत्सेधः, महाशीविष इव दुर्नरेन्द्राभिभवरोषितः, पारीक्षित इव सर्वभोगिदहनोद्यतः, वृकोदर इव रिपुरुधिरतृषितः, सुरगज इव

अंगारकितमिव संजातागारमिव रोषाग्निं क्रोधाग्निमुद्वमन् । अनवरतं सततं यत् स्फुरितं स्फुरणं तेन रोषेण क्रोधेन निर्भुग्नेन खण्डितेन दश-नच्छदेनौष्ठेन युक्त उपलक्षणे तृतीया । 'ओष्ठाधरौ रदनच्छदौ' इत्यमरः । लोहितायमानानां ताम्राणां लोचनानामालोकविक्षेपैर्दर्शनप्रक्षेपैः । लोहिताव-लोकनैर्दिशोऽपि लोहितास्तेन तासां दाहो जातो नु । असह्येन सोढुमशक्येन सह-जेन शौर्योष्मणैव दहनेनाग्निना दह्यमानेनेव ज्वल्यमानेनेव । इदं रोषानलविशे-षणम् । अग्निदाहभीतेन च सलिलं दह्यमानोपरि क्षिप्यते । वितन्यमानेन विस्ता-र्यमाणेन स्वेदसलिलस्य घर्मोदकस्य शीकराणां कणानामासारेण समूहेन दुर्दि-नो व्याम: । **स्वावयवैरिति।** कोपेनावयवानां कम्पनं क्रोधस्य तादृशस्यादृष्टपूर्वत्व-कारणात्कल्पितम् । कृतो भैरवो भयंकरस्तत्संज्ञकश्चाकारो येन । नरसिंहो नरश्रेष्ठः पक्षे चतुर्थावतारः । 'स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुंजराः । सिंहशार्दूलनागाद्या पुंसि श्रेष्ठार्थगोचराः' इत्यमरः । अपरस्य शत्रोः पक्षे सूर्यस्य तेजःप्रसरस्य तेजः-समूहस्य दर्शनेन प्रज्वलितः । उदिता द्वादशदिनकराः सूर्या इव पक्षे तैश्च दुर्निरीक्ष्या दुर्दर्शनीया मूर्तिः शरीरं यस्य सः । भूभृतो नृपाः पर्वताश्च । वर्धमानो विग्रहस्य शरीरस्य युद्धस्य च उत्सेध औन्नत्यं यस्य सः । यथा विन्ध्यः सूर्यस्य चंद्रमसश्च गतिं रोद्धुं स्वशरीरं वर्धयामास तद्वदयमपि दुष्टारिं रोद्धुमिति भावः । महाशीविष इव महासर्प इव दुर्नरेन्द्राभिभवेन दुष्टेन नृपतिना मंत्र-ज्ञेन च कृतेन पराजयेन रोषितः कोपितः : परीक्षितेरपत्यंपुमान् पारीक्षितो जनमेजय इव । सर्वेषां भोगिनां नृपाणां सर्पाणां च दहनायो-

प्रतिपक्षवारणप्रधावितः, पूर्वागम इव पौरुषस्य, उन्माद इव मदस्य, आवेग इवावलेपस्य, तारुण्यावतार इव तेजसः, सर्वोद्योग इव दर्पस्य, युगागम इव यौवनोष्मणः, राज्याभिषेक इव रणरसस्य, नीराजनदिवस इवासहिष्णुतायाः, परां भीषणतामयासीत् ।

15 अवादीच्च 'गौडाधिपमपहाय कस्तादृशं महापुरुषं तत्क्षण एव निर्व्याजभुजवीर्यनिर्जितसमस्तराजकं मुक्तशस्त्रं कलशयोनिमिव कृष्णवर्त्मप्रसूतिरीदृशेन सर्वलोकविगर्हितेन मृत्युना शमयेदार्यम् । अनार्यं च तं मुक्त्वा भागीरथीफेनपटलपाण्डुराः केषां मनःसु सरःसु राजहंसा इव परशुरामपराक्रमस्मृतिकृतो न कुर्युरार्यशौर्यगुणाः पक्षपातम् । कथमिवात्युग्रस्य स्यायंजीवितहरणे निदाघरवेरिव कमलाकरसलिलशोषणेऽनपेक्षितप्रतियः प्रसृताः कराः । कां नु गतिं गमि- 5 10

द्यत उद्युक्तः । 'भोगी भुजंगमेऽपि स्यात् ग्रामपात्रे नृपे पुमान्' इति मेदिनी पितृवधामर्षितो जनमेजयो निखिलसर्पोन्मूलनाय सर्पसत्रं चकारेति भारते । वृकोदर इव भीम इव । भीमेन हि दुःशासनस्य रुधिरं पातुं प्रतिज्ञातम् । प्रतिपक्षस्य शत्रोर्वारणे निषेधे पक्षे गजे च प्रधावितः । अवलेपस्य गर्वस्य । नीराजनं नीराजनदिवस इव प्रादुर्भावदिनमिव । यः कोपि मान्यः समायाति तस्य नीराजनं कुर्वन्तीत्याचारः । नीराजनं शान्तिकर्मविशेष इति शंकरः । भीषणतां भयानकत्वम् ।

अवादीदिति । निर्व्याजेनाकृत्रिमेन भुजवीर्येण बाहुबलेन निर्जितं पराजितं समस्तं सकलं राजकं नृपसमूहो येन तं मुक्तं त्यक्तं शस्त्रं येन तम् । भोजनार्थमागतस्य शस्त्राभावाद्युज्यत इदं वर्णनम् । कृष्णवर्त्मप्रसूतिः पापकर्मप्रवर्तकः कृष्णवर्त्मणोऽग्नेः प्रसूतिरपत्यं धृष्टद्युम्नः कलशयोनिमिव द्रोणमिव । सर्वलोकेन सकलेन जनेन विगर्हितेन निंदितेन मृत्युना विषान्नदानरूपेण त्यक्तशस्त्रस्य शिखां धृत्वा शीर्षे प्रहारेण च। धृष्टद्युम्नेन श्रुतपुत्रवधस्त्यक्तशस्त्रो द्रोणो मस्तके शिखां धृत्वा हत इति भारते । भागीरथ्या गंगायाः फेनपटल इव पांडुराः शुभ्राः । गुणानां हंसानां च शुभ्रत्वम् । परशुरामपराक्रमस्य स्मृतिं स्मरणं कुर्वन्ति ते । परशुरामसदृशपराक्रमत्वात्परशुरामस्मरणम् । रामेण च स्वबाणेन कैलासाद्रेर्विवरं कृत्वा हंसा जगत्यानीता अतस्तेषां तत्पराक्रमस्मारकत्वम् । पक्षपातं स्नेहं पक्षैः पातं गमनं च । अत्युग्रस्यातिक्रूरस्यातिचंडस्य च । कमलानामाकरस्य समूहस्य सलिलशोषण उदकनाशने । अनपेक्षिताऽनवलोकिता प्रीतिः प्रेम यैस्ते करा हस्ता

ष्यति, कां वा योनिं प्रवेक्ष्यति, कस्मिन्वा नरके निपतिष्यति । श्वपाकोऽपि क इदमाचरेत् । नामापि गृह्णतोऽस्य पापकारिणः पापमलेन लिप्यत इव मे जिह्वा । किं वाङ्गीकृत्य कार्यमार्यस्तेन क्षुद्रेणानुप्रविश्य विगतघृणेन घुणेनेव सकलभुवनाह्लादनचतुरश्चन्दनस्तम्भः क्षयमुपनीतः । नूनं नानेन मूढेन मधुरसास्वादलुब्धेन मध्विवार्यजीवितमाकर्षता भावी दृष्टः शिलीमुखसंपातोपद्रवः । निजगृहदूषणं जालमार्गप्रदीपकेन कज्जलमिवातिमलिनं केवलमयशः संचितं गौडाधमेन । नत्वाश्वेवास्तमुपगतवत्यपि त्रिभुवनचूडामणौ सवितरि वेधसादिष्टः सत्पथशत्रोरन्धकारस्य निग्रहाय ग्रहषण्डविहारैकहरिणाधिपः शशी । विनयविधायिनि भग्नेऽपि चाङ्कुशे विद्यत एव व्यालवारणस्य विनयाय सकलमत्तमातङ्गकुम्भस्थलस्थिरशिरोभागभिदुरः खरतरः के-

---

रश्मयश्च । आर्यस्य कमलाकरसाम्यम् । गौडस्य निदाघरविसाम्यं च । **नामापीति** । पाप्मनो नाम्नोऽग्रहणेन कविनापि किंनामधेयः स गौड इति न कथितम् । केवलं गौडाधिप इत्येवोल्लेखितं परमस्योच्छ्वासस्य प्रारंभे ' प्रकटकलंकं शशांकमंडलमाकाशेकाशत ' इत्यत्र श्लेषेण गौडाधिपनाम शंशाकेतिसूचितमित्यवभाति । **किमिति** । किंवा कार्यं कृत्यमंगीकृत्य तेन नीचेन अल्पेन च विगतघृणेन निर्दयेन क्षुद्रेन परिचितपणेन चानुप्रविश्य विश्वासं समुत्पाद्यान्तःप्रविश्य च सकलभुवनस्याल्हादन आनंदने चतुरः क्षुद्रेण घुणेन चंदनस्तंभ इवार्थः क्षयं नाशमुपनीतः । ' घुणः स्यात्काष्ठवेधक ' इति रत्नकोषः । शिलीमुखानां शराणां भ्रमराणां च संतापस्य पतनस्योपद्रवः पीडा । जालस्य दंभस्य मार्गस्य कपटमार्गस्य प्रदीपक उज्वलकस्तेन । पक्षे जालमार्गस्य गवाक्षमार्गस्य प्रदीपकेन दीपेन । वातायने स्थापितो दीपो वातवशाद्यथाऽधिकं कज्जलं गृहदूषकं वमति तद्वदनेन कपटमार्गगामिना केवलं स्वकुलनाशकमयशः संचितमित्यर्थः । **न त्विति** । त्रिभुवनस्य चूडामणावलंकारे सवितरि सूर्येऽस्तमुपगतवत्यपि आशु एव शीघ्रमेव सत्पथशत्रोः सन्मार्गस्यारेः सतां नक्षत्राणां पथः आकाशस्य निग्रहाय निग्रहं विधातुं तुमर्थादिति चतुर्थी । वेधसा ब्रह्मणाऽऽदिष्ट आज्ञापितो ग्रहषंडस्य ग्रहसमूहस्य विहारो विशेषेण हरणं विच्छायीकरणं तत्र एकः प्रधानो हरिणाधिपः सिंह एव शशी चन्द्रः नतु नास्ति किमित्यर्थः । सिंहोपि समूहे विहारं गमनं क्रीडां वा करोति । व्यालवारणस्य दुष्टगजस्य । सकलानां मत्तमातंगजानामुन्मत्तहस्तिनां कुंभस्थलानां गंडस्थलानां स्थिरस्य दृढस्य शिरोभागस्य प्रधान-

सरिनखरः । तादृशाः कुवैकटिका इव तेजस्विरत्नविनाशकाः कस्य न वध्याः । क्वेदानीं यास्यति दुर्बुद्धिः ।'

16 इत्येतदभिदधत एवास्य पितुरपि मित्रं सेनापतिः समग्रविग्रहप्राग्रहरो, हरितालशैलावदातदेहः, परिणतप्रगुणसालप्रकाण्डप्रकाशः, प्रांशुः, अीतशौर्योष्मणेव परिपाकमागतो, गतभूयिष्ठे वयसि वर्तमानः, बहुशरशयनसुप्तोत्थितोऽपि हसन्निव शान्तनवमतिदीर्घेणायुषा, दुरभिभवशरीरतया जरयापि भीतभीतयेव प्रकटितप्रकम्पया परामृष्टः कथमपि सारमयेषु शिरोरुहेषु, शशिकरनिकरसितसरलशिरोरुहसटालां सैंहीमिव निष्कपटपराक्रमरसरचितां संक्रान्तो जीवन्नेव जा- 5

भागस्य भिदुरः छेदकः । 'विदिभिदिच्छिदेः कुरच्' इत्यनेन भिनत्तेः कुरच् । नृपपक्षेपि मृगयासु मत्तमातंगजानां गंडस्थलभेदनस्य संभवाद्युज्यते विशेषणम् । केसरिणः सिंहस्य नखरः । हर्षे च हरिनखस्यारोपः । तेन राज्यवर्धने मृतेपि हर्षो वियत एवेत्यर्थाभिव्यक्तिः । कुवैकटिका कुत्सिता रत्नवन्धका इव । तेजस्विनो रत्नस्य नरश्रेष्ठस्य हीरकादेश्च विनाशकाः ।

इत्येवमिति । इत्येवमित्यादौ सेनापतिः सिंहनादनामा संनिधावेव समुपविष्टो विज्ञापितवानिति संबंधः । पितुरपि मित्रमित्यनेन तस्यानतिक्रमणीयवचनत्वं व्यज्यते । समग्रेषु विग्रहेषु समरेषु प्राग्रहरोऽग्रयायी । हरितालशैल इव धातुविशेषपर्वत इवावदात उज्वलो देहो यस्य सः । 'हरितालं धातुभेदे' इति मेदिनी । परिणतः परिपाकमागतः पूर्णतामापन्नः प्रगुण ऋजुः सालप्रकाण्ड इव सालस्कन्ध इव प्रकाशः प्रसिद्धः । प्रांशुरुन्नतः । 'सालप्रकाण्डप्रांशुः' इति पाठे तु सालप्रकाण्ड इव प्रांशुरुन्नत इत्यर्थोग्राह्यः । सालसाधर्म्यं च शौर्योष्मणा परिपाकत्वं प्रांशुत्वं चेति दिक् । गतं भूयिष्ठं बहुतमं यस्य तादृशि वयसि वर्तमानः स्थविर इत्यर्थः । बहुषु शरशयनेषु सुप्तः पश्चादुत्थितोपि शान्तनवं भीष्मं । स तु शरासने स्वासुत्यागमकरोत् अयं तु शरशयनशयितोपि पुनर्दीर्घायुरतो भीष्माधिकः । प्रकटितः प्रकंपो यया तया । वार्धक्यारंभे कंपोत्पत्तिवर्णनं योग्यमेव । सारमयेषु उर्वरितेषु । शशिकराणां चंद्रकिरणानां विकर इव समूह इव सिताः शुभ्राः सरलाः शिरोरुहाः केशा एव सटाः केसराणि ता विद्यन्ते यस्यास्ताम् । 'प्राणिस्थादातो लजन्यतरस्याम्' इत्यनेन लच् । निष्कपटेन कपटरहितेन पराक्रमरसेन रचितां सैंहीं सिंहसंबंधिनीं जातिं

---

१ 'प्राकाण्डप्रांशुः'

तिम्, अपरस्वामिमुखदर्शनमहापातकपरिजिहीर्षयेव भ्रूयुगलेन वलितशिथिलप्रलम्बचर्मणा स्थगितदृष्टिः, धवलस्थूलगुञ्जापिच्छप्रच्छादितकपोलभागभास्वरेण वमन्निव विक्रमकालमकालेऽपि विकाशिकाशकाननविशदं शरदारम्भं भीमेन मुखेन, मृतमपि हृदयास्थितं स्वामिनमिव सितचामरेण वीजयन्नाभिलम्बेन कूर्चकलापेन, परिणामेऽपि धौतासिधाराजलपानतृषितैरिव विवृतवदनैर्बृहद्भिर्व्रणविदरैर्वैषमितविशालवक्षाः, निशितशस्त्रटङ्ककोटिकुट्टितबहुबृहद्व्रणाक्षरपङ्क्तिनिरन्तरतया च सकलसमरविजयपर्वगणनामिव कुर्वन्पूर्ववृत्तान्त इव पादचारी, विविधवीररसवृत्तान्तरामणीयकेन महाभारतमपि लघयन्निव, 5

जीवन्नेव देहपातमकृत्वैवेत्यर्थः संक्रांतः। सैंहीसाधर्म्यं पराक्रमवत्त्वं सटावत्त्वं चेति बोध्यम्। धवलेन शुभ्रेण स्थूलेन बृहता गुंजापिच्छेन श्मश्रुराज्या प्रच्छादित आच्छादितः कपोलभागस्तेन भास्वरेण दीप्तिमता। गुंजाशब्दस्य श्मश्रुरूपार्थोऽप्रसिद्धः। अतएव जीवानन्दस्य धवलस्थूलश्मश्रुपिच्छेति पाठः साधीयान्। भीमेन भयंकरेण मुखेन अकालेपि अयोग्यवेलायामपि। विकाशिभिः प्रफुल्लैः काशकाननैस्तृणविशेषवनैर्विशदं स्वच्छं विक्रमस्य पराक्रमस्य कालम् अथवा विक्रमस्य तन्नाम्नो नृपस्य कालं संवत्सरारंभकालं वमन्निव। शरदारंभे युद्धव्यापाराय वीरा निर्गच्छन्त्यतो विक्रमकालत्वं तस्य। अथवा विक्रमनृपतेः संवत्सरारंभः शरद्यतो विक्रमकालत्वमिति ज्ञेयम्। कूर्चकलापेन श्मश्रुसमूहेन। परिणामेपि वार्द्धक्येपि। धौतायाः शुभ्राया असिधारायाः खड्गाग्रस्य जलपाने तृषितैरिवातएव विवृतवदनैर्विकसितमुखैर्बृहद्भिर्महद्भिर्व्रणविदरैः क्षतस्फुटनैः। 'विदरः स्फुटनं भिदा' इत्यमरः। जलपाने च विवृतवदनत्वमपेक्षितम्। निशितानि तीक्ष्णानि शस्त्राण्येव टंकाः पाषाणभेदनास्तेषां कोटिभिरग्रैः कुट्टिता उत्खाता बहवो बृहन्त्यो व्रणरूपाक्षराणां पंक्तयो राजयस्ताभिर्निरन्तरतया व्याप्ततया सकलानां समरविजयानां पर्वगणनां भागगणनामिव कुर्वन्। पादचारी पादाभ्यां चरति सः। पूर्ववृत्तान्त इव। भृतदेहः प्राचीनेतिहास इव। पूर्वपर्वत इव पादचारीति पाठः पूर्वाद्रेः कालगणनोपयोगितया युज्यत इति दिक्। विविधानामनेकेषां वीररसवृत्तान्तानां रामणीयकेन रमणीयतया। मनोज्ञादित्वाद्वुञ्। लंघयन्नतिक्राम्यन्निव। प्रतिपक्षाणां शत्रूणां क्षपणे नाशनेऽतिनिर्बन्धेनात्यताम्र-

---

१ 'श्मश्रुपिच्छ'. २ 'कुर्वन्पूर्वपर्वत'.

प्रतिपक्षक्षपणातिनिर्बन्धेन परशुराममपि शिक्षयन्निव, अभ्रमणेनाना-
दरश्रीसमाकर्षणविभ्रमेण मन्दरमपि मन्दयन्निव, वाहिनीनायकमर्या-
दानुवर्तनेनाम्भोधिमप्यभिभवन्निव, स्थैर्यकार्कश्योन्नतिभिरचलानपि ह्रे-
पयन्निव, सहजप्रचण्डतेजःप्रसरपरिस्फुरणेन सवितारमपि तृणीकुर्व-
न्निव, ईश्वरभारोद्वहनघृष्टपृष्ठतया हरवृषभमपि हसन्निव, अरणिरम- 5
र्षाग्नेः, ऐश्वर्यं शौर्यस्य, मदो मदस्य, विसर्पो दर्पस्य, हृदयं हठस्य,
जीवितं जिगीषुतायाः, उच्छ्वसितमुत्साहस्य, अङ्कुशो दुर्मदानाम्,
नागदमनो दुष्टभोगिनाम्, विरामो वरमनुष्यतायाः, कुलगुरुर्वीरगो-
ष्ठीनाम्, तुला शौर्यशालिनाम्, सीमान्तदृश्वा शस्त्रग्रामस्य, निर्वोढा
प्रौढवादानाम्, संस्तम्भयिता भग्नानाम्, पारगः प्रतिज्ञायाः, मर्मज्ञो 10
महाविग्रहाणाम्, आघोषणापटहः समरार्थिनाम्, संनिधावेव समुप-
विष्टः सिंहनादनामा स्वरेणैव दुन्दुभिघोषगम्भीरेण सुभटानां समर-
समानयन्विज्ञापितवान्—

17 'देव, न क्वचित्कृताश्रयया मलिनया मलिनतराः कोकि-
लया काका इव कापुरुषा हतलक्ष्म्या विप्रलभ्यमानमात्मानं न चेत- 15

ह्रेण । परशुरामेण शत्रवो मुक्ता अतः पुनः क्षत्रियनिर्मूलनत्रासः संजातः अयं तु
जीवतः शत्रून्कदापि न मुंचतीति परशुरामगुरुरित्यर्थः । अभ्रमणेन समुद्रया-
त्रया जलपरिवर्तनेन च । अनादरेण श्रियो लक्ष्म्याः समाकर्षणेन विविधेन
भ्रमेण । एतेन समुद्रयात्रयाऽन्यदेशान्विजित्य धनमानीतमिति व्यज्यते ।
मंदरापेक्षयास्य श्रेष्ठत्वं त्वनादरवत्वात् । वाहिनीनायकस्य सेनापतेः समुद्र-
स्य च मर्यादाया अनुवर्तनेन परिपालनेन । स्थैर्यमुद्यमादचलनं दृढता च कार्क-
श्यं शत्रुषु निर्दयत्वं काठिन्यं च उन्नतिरभिमानं उच्चैस्त्वं ताभिः अचलान् पर्वतान्
ह्रेपयन् लज्जयन्निव। ईश्वरस्य नृपस्य हरस्य च भारस्तदर्पितं कार्यं भरः न तेन घृष्टं
क्षुण्णं पृष्ठं तस्य भावस्तया । महाभारदम्यत्वेनेत्यर्थः । अरणिर्वन्हिमंथनपात्रम् ।
अमर्षाग्नेः क्रोधवन्हेः । विसर्पः प्रसरः । नागदमनो गजमर्दनो गरुडश्च । दुष्टभो-
गिनां दुष्टनृपाणां दुष्टसर्पाणां च । 'भोगी भुजंगमेऽपिस्याद् ग्रामपात्रे नृपे पुमान् '
इति मेदिनी । विरामोऽवसानभूमिः । महाविग्रहाणां महाहवानाम् । आघो-
षणापटह उत्तेजकः । यथा पटहनिनादेन वीरा उत्साहवन्तो भवन्ति तद्वदनेना-
पीति भावः । सुभटानां सुवीराणाम् ।

देवेति । क्वचित्कुत्रचिन्न कृत आश्रयो यया तया अनिर्न्चलयेत्यर्थः

यन्ते। श्रियो हि दोषान्धतादयः कामला विकाराः। छत्रच्छायान्तरितरवयो विस्मरन्त्यन्यं तेजस्विनं जडधियः। किं वा करोतु वराकः येनातिभीरुतया नित्यपराङ्मुखेन न तु दृष्टान्येव सर्वातिशायिशौर्यातिशयश्वयथुकपिलकपोलपुलकपल्लवितकोपानलानि कुपितानां तेजस्विनां मुखानि। नासौ तपस्वी जानात्येवं यथाभिचारा इव विप्रकृताः सद्यः सकलकुलप्रलयमुपहरन्ति मनस्विनः। जलेऽपि ज्वलन्ति ताडितास्तेजस्विनः। सकलवीरगोष्ठीबाह्यस्य तस्यैवेदमुचितमनुत्तारनिरयनिपातनिपुणं कर्म। मनस्विनां हि प्रधनप्रधानधने धनुषि ध्रियमाणे, सति च कमलाकलहंसीकेलिकुवलयकानने कृपाणे कृपणो-

5

हृतलक्ष्म्या विप्रलभ्यमानं वंच्यमानमात्मानं मलिनतराः पापाः कापुरुषाः कुत्सिता जना न चेतयन्ते न जानन्ति। कथमिव कोकिलया विप्रलभ्यमाना मलिनतराः कृष्णवर्णाः काका इव। कोकिला हि स्वापत्यानि काकैः पोषयन्ति। तथाच कालिदासः 'प्रागंतरिक्षगमनात्स्वमपत्यजातमन्यैर्द्विजैः परभृतः खलु पोषयन्ति'। दोषेष्वन्धता दोषापरिज्ञानमादिर्येषां ते विकाराः श्रियः कामलाः कमलेभ्य आगताः। तानि दोषायां रात्रावंधानि संकुचितानि भवन्ति। लक्ष्म्या अपि तत्र निवासात्ते दोषा समागता इत्यर्थः। कामला नाम 'कामीण' इति भाषायां प्रसिद्धो विकारस्तेन च सर्वे शंखादयोपि शुभ्राः पदार्थाः पीता दृश्यन्ते। तेनच रात्रावन्धताऽऽगच्छति। छत्राणां छाया छत्रछायम्। 'छाया बाहुल्ये' इत्यनेन क्लीबत्वं तेनान्तरितः पिहितः रविः यैस्ते जडधियो मूढाः। अदर्शनेनैव तेजस्व्यन्तराणामभावं मन्यन्त इत्यर्थः। सर्वातिशायिना सर्वेभ्योऽधिकेन शौर्यातिशयेन शौर्याधिक्येन श्वयथुः शोफः 'सूज' इति भाषायां प्रसिद्धो येषां तानि तानि च कपिलैस्ताम्रैः कपोलपुलकैर्गल्लरोमांचैः पल्लवितः कोपानलो येषां तानि। इत्युभयोर्बहुव्रीह्योः कर्मधारयः। तपस्वी वराकः। विप्रकृताः पीडिता मनस्विनस्तेजस्विनः सद्यस्तत्काल एव सकलकुलस्य प्रलयं नाशमर्थाद्विप्रकर्तुः। कथमिव यथा विप्रैर्ब्राम्हणैः कृता अभिचारा हिंसाकर्माणि। 'हिंसाकर्माभिचारः स्यात्' इत्यमरः। ताडिता अभिहता विद्युत्संबंधिनश्च। जलेपि डलयोरभेदान्मूढेपि। मूढकृतमप्यपकारं न सहन्ते। वीरगोष्ठीषु वीरसमाजेषु बाह्यस्य बहिष्कृतस्य। बहिष्कृतो गुर्वादीनामसेवनाद्धर्मादि न जानात्यतः सुदुस्तरनरकपातयोग्यं कर्माचरतीत्यर्थः। प्रधनस्य युद्धस्य प्रधानं प्रमुखं धनं द्रव्यं तस्मिन्धनुषि ध्रियमाणे स्वीकृते सति। कमला श्रीरेव कलहंसी तस्याः केल्याः क्रीडायाः कुवलयकानन उत्पलवने

पायाः पयोधिमथनप्रभृतयोऽपि श्रीसमुत्थानस्य किं पुनरीदृशाः। येषां च धात्रा धरित्रीं त्रातुं नियुक्ताः स्वयमसमर्था इव कुलिशकर्कशभुजपरिघप्रहरणहेतोरुद्गिरन्ति गिरयोऽपि लोहानि ते कथमिव बाहुशालिनो मनसापि विमलयशोबान्धवा ध्यायेयुरकार्यम्। सर्वग्रहाभिभवभास्वराणां हि सुभटकराणामग्रतो दिग्ग्रहणे पङ्गवः पतङ्गकराः। महामहिषशृङ्गतरङ्गभङ्गुरभङ्गभीषणान्तराला लोकप्रवादमात्रेण दक्षिणाशा परमार्थतो भटभ्रुकुटिरधिवासो यमस्य। चित्रं च यदुन्मुक्तसिंहनादानां सहसा साहसरसरोमाञ्चकण्टकनिकरेण सह न निर्यान्ति सटाः शूराणां रणेषु। द्वयमेव च चतुःसागरसंभूतस्य भूतिसंभारस्य भाजनं प्रतिपक्षदाहि दारुणं वडवामुखं वा महापुरुषहृदयं वा। तेजस्विनः सकलाननवाप्य पयोराशीन् सहजस्य कुतो निवृत्तिरूष्मणः। वृथाविततविपुलफणाभारो भुजङ्गानां भर्ता बिभर्ति यो भोगेन मृत्पिण्डमेव केवलम्। अप्रतिहतशासनाक्रान्त्युपभोगसुखरसं तु रसाया दिक्कुञ्ज-

---

कृपाणेऽसौ ध्रियमाणेसति। पयोधिमथनं समुद्रमथनं प्रभृति येषां ते। कृपणोपाया दीना उपायाः। किंपुनरीदृशा विषान्नदानादय इत्यर्थः। कुलिशमिव वज्रमिव कर्कशः कठोरो भुज एव परिघोऽर्गलस्तस्य प्रहरणहेतोः शस्त्रार्थम्। 'षष्ठी हेतुप्रयोगे' इत्यनेन षष्ठी। गिरिभ्यो जायमाना लोहोत्पत्तिः तैः स्वासामर्थ्यं मन्वानैः स्वकार्यसंपादकानां वीराणां शस्त्रार्थं कृतेत्युत्प्रेक्षा। विमलं निर्मलं यश एव बान्धवो येषां ते। अत एव कार्यध्यानाभावः। सर्वेषां ग्रहाणां रणोद्यमानामभिभवेन पराभवेन भास्वरा दीप्तिमन्तस्तेषां पक्षे ग्रहाश्चन्द्राद्याः। दिग्ग्रहणे दिशामात्मसात्करणे स्पर्शने च। पतंगकराः सूर्यकिरणानि। महामहिषस्य यमवाहनस्य शृंगयोस्तरंग इव भंगुरो वक्रो भंगो रचना यस्य तथाभूतं भीषणमन्तरालं मध्यो यस्याः सा भटभ्रुकुटिः। दिक्पक्षे महामहिषशृंगतरंगभंगेन भीषणमन्तरालं यस्याः सा। उन्मुक्तसिंहनादानां कृतगर्जनानां साहसरसस्य वीररसस्य रोमाञ्चनिकरेण पुलकसमूहेन सह सटाः शिखाः। भूतिसंभारस्य संपत्समूहस्य भस्मचयस्य वा। तेजस्विनो वीरस्य वडवाग्नेश्च। सकालन् पयोराशीननवाप्य सकालान् समुद्रानाजित्वा समुद्रानलब्ध्वा च। पयोराशिसहजस्येत्यपपाठः। यो भोगेन फणया केवलं मृत्पिंडं भूवलयरूपं बिभर्ति स भुजंगानां भर्ता वृथा विततो विस्तृतो विपुलो महान् फणाभारो यस्य तथाभूतोऽस्ति। रसायाः पृथ्व्या अप्रतिहतस्यानिरुद्धस्य शासनस्य आज्ञाया आक्रान्त्या आक्रमणस्योपभोगसुखस्य

रकरभारभास्वरप्रकोष्ठा वीरबाहव एव जानन्ति । रविरिवोन्मुखपद्मा-
करगृहीतपादपल्लवः सुखेनाखण्डिततेजा दिवसान्नयति शूरः । कात-
रस्य तु शशिन इव हरिणहृदयस्य पाण्डुरप्रभस्य कुतो द्विरात्रमपि
निश्चला लक्ष्मीः । अपरिमितयशःप्रकरवर्षी - विकासी वीररसः ।
पुरःप्रवृत्तप्रतापप्रहताः पन्थानः पौरुषस्य । शब्दविद्रुतद्विषन्ति भवन्ति- 5
द्वाराणि दर्पस्य । शस्त्रालोकप्रकाशिताः शून्या दिशः शौर्यस्य ।
रिपुरुधिरशीकरासारेण भूरिव श्रीरप्यनुरज्यते । बहुनरपतिमुकुटमणि-
शिलाशाणकोणकषणेन चरणनखराजिरिव राजताप्युज्ज्वलीभवति ।
अनवरतशस्त्राभ्यासेन करतलानीव रिपुमुखानि श्यामीभवन्ति । वि-
विधव्रणबद्धपट्टकशतैः शरीरमिव यशोऽपि धवलीभवति । कवचिषु 10

य उपभोगः अनुभवः तेन यत् सुखं तस्य दिक्कुंजराणां करभार इव शुण्डासमूह इव-भास्वराणि प्रकोष्ठानि येषां ते वीरबाहव एव जानन्ति।उन्मुखाया उर्ध्वविलोकिन्याः पद्मायाः लक्ष्म्याः करेण गृहीतः पादपल्लवो यस्य पक्षे उन्मुखानां विकसितनां पद्मानां कमलानामाकरेण समूहेन गृहीतः पादपल्लवो यस्य सः । सुखेन दिवसान् नयति इति संबंधः। अखंडितं तेजो यस्य सः। संकेतस्तु सुखेनेति पाठं गृहीत्वा रविपक्षे सुखे-न शोभनाकाशेनेति व्याख्यातवान् । हरिणस्येव हृदयं यस्य तस्याल्पसत्वस्य पक्षे-हरिणो हृदये वक्षसि यस्य । पाण्डुरहृदयस्य देशभाषया निर्लज्जस्यापीति संकेतः परं सोऽर्थो न शोभनोऽवभाति । तद्भाषाज्ञत्वादितिदिक् । द्विरात्रमपि ' संख्यापूर्वं रात्रं क्लीबम् ' इत्यनेन क्लीबता। चंद्रमसः सकलायाः शोभायाः पौर्णमास्यामेक-स्मिन्नेव दिने विद्यमानत्वात् । निश्चला अचंचला लक्ष्मीः संपच्छोभा च । अप-रिमितस्यासंख्येयस्य यशसः कीर्तेः प्रकरं समुदायं वर्षति स विकासी विकसनशी-लो वर्धमान इत्यर्थः । शब्देन विद्रुताः पलायिता द्विषन्तः शत्रवो येभ्यस्तानि । शस्त्रालोकेन शस्त्रकान्त्या प्रकाशिताः शून्या अनावृताः । रिपूणां रुधिरस्य रक्तस्य शीकराणां बिन्दूनामासारेण समूहेन । अनुरज्यते अनुरक्ता भवति भूपक्षे रक्त-वर्णा भवति । बहूनां नरपतीनां मुकुटमणिशिला मुकुटरत्नान्येव शाणो निकष-स्तस्य कोणः कोटिस्तस्मिन् कषणेन घर्षणेन । राजता नृपत्वम् । उज्ज्वलीभवति कान्तित्वमापद्यते । पक्षे स्वच्छीभवति । श्यामीभवन्ति विच्छायानि मलिनानि च भवन्ति । पावकशिखामिव लोहेषु पतिताच्छस्त्रादग्न्युत्पत्तेर्जायमानत्वाद्युज्यत इदं वर्णनम् । यश्चेति । यश्चेत्यस्य स श्रेयान् इत्यनेन संबंधः । अहितैः शत्रुभिर्हतः स्वजन आप्तो यस्य स मनस्विजनो मानिलोको द्विषतां शत्रूणां योषितां प्रमदाना-

रिपूरःकवाटेपु पात्यमानाः पावकशिखामिव श्रियमपि वमन्ति नि-
ष्ठुरा निस्त्रिंशप्रहाराः। यश्चाहितहतस्वजनो मनस्विजनो द्विषद्योषिदु-
रस्ताडनेन कथयति हृदयदुःखम्, परुषासिलतानिपातपवनेनोच्छ्व-
सिति, निरुच्छ्वसितशत्रुशरीराश्रुधारापातेन रोदिति, विपक्षवनिताच-
क्षुषा ददाति जलं स श्रेयान्नेतरः। न च स्वप्नदृष्टनष्टेष्विव क्षणिकेषु 5
शरीरेषु निबध्नन्ति बन्धुबुद्धिं प्रबुद्धाः। स्थायिनि यशसि शरीरधीर्वी-
राणाम्। अनवरतप्रज्वलिततेजःप्रसरभास्वरस्वभावं च मणिप्रदीप-
मिव कलुषः कज्जलमलो न स्पृशत्येव तेजस्विनं शोकः। स त्वं
सत्त्ववतामग्रणीः प्राग्रहरः प्राज्ञानां प्रथमः समर्थानां प्रष्ठोऽभिजाता-
नामग्रेसरस्तेजस्विनामादिरसहिष्णूनाम्। एताश्च सततसंनिहितधू- 10
मायमानकोपाग्नयः सुलभासिधारातोयतृप्तयो विकटबाहुवनच्छायोप-
गूढा धीरताया निवासशिशिरभूमयः स्वायत्ताः सुभटानामुरःकवाट-

मुरस्ताडनेन। परुषाणां कठोराणामसिलतानां निपातस्य पतनस्य पवनेन वायुना।
निरुच्छ्वसिते गतजीविते शत्रोः शरीरेऽश्रुधाराणां पातेन। मृते वैराभावात्तन्मर-
णजः दुःखेनाश्रुपातः। विपक्षवनितानां शत्रुस्त्रीणां चक्षुषा जात्यैकवचनं नयने-
जलं ददाति तर्पणं करोति स श्रेयान् प्रशस्यः। **न चेति**। स्वप्ने दृष्टेषु पश्चान्नष्टेषु
अत्यंतास्थिरेषु क्षणिकेषु शरीरेषु बन्धुबुद्धिमाप्तधियम्। अतएव कालिदासः
'किमप्यहिंस्यस्तवचेन्मतोहं यशःशरीरे भव मे दयालुः। एकान्त-
विध्वंसिषु मद्विधानां पिंडेष्वनास्था खलु भौतिकेषु' इति। **अनवरतेति**।
अनवरतं सततं प्रज्वलितः प्रकर्षेण दीप्तिमान् यस्तेजःप्रसरः प्रभासमूहः कांति-
समूहश्च तेन भास्वरः स्वभावः स्वरूपं यस्य तम्। सततं प्रज्वलिततेजसः प्रक-
टनात्स्वभावोपि तथा जात इत्यर्थः। अतएव दीप्तिमन्तं मणिदीपं कज्जलमिव
शोकस्तं न स्पृशति। रत्नदीपा रत्नानां कान्तिभिरेव प्रज्वलन्ति न तैलापेक्षयातस्तेषां
कज्जलाभावः। प्रष्ठोऽग्रगामी 'प्रष्ठोऽग्रगामिनि' इत्यनेन निपात्यत इदम्। अभिजातानां
कुलीनानाम्। **एता इति**। सततं सन्निहिता धूमायमानाः कोपाग्नयो यासां ताः
धूमायमानेति विशेषणेन कोपाग्नीनामस्तित्वं व्यज्यते। सुलभा असिधारा खड्ग-
धारैव तोयं तेन तृप्तयो यासां ताः। विकटं विशालं बाहुवनं भुजसमूहस्तस्य
छाययोपगूढाः पिहिताः सुभटानां वीराणामेतास्त्वत्सैन्यवर्तिन्य उरःकवाटभि-
त्तयः। सर्वस्या उर्व्याः पृथ्व्याः श्रद्धाया विश्वासस्य कामुका अभिकास्तेषाम्।
रुधिरगंधेनान्धानां गृध्राणां मंडलस्याच्छादनैः। मृतानां तेषामुपरि स्थितया

भित्तयः । यतः किं गौडाधिपेनैकेन । तथा कुरु यथा नान्योऽपि कश्चिदाचरत्येवं भूयः । सर्वोर्वीश्रद्धाकामुकानामलीकविजिगीषूणां संचारय चामराण्यन्तःपुरपुरंध्रिनिश्वसितैः । उच्छिन्धि रुधिरगन्धान्धगृध्रमण्डलच्छादनैश्छत्त्रच्छायाव्यसनानि । अपाकुरु कदुष्णशोणितोदकस्वेदैः कुलक्ष्मीकुलटाकटाक्षचक्षूरागरोगान् । उपशमय निशितशरशिरावेधैरकार्यशौर्यश्वयथून् । उन्मूलय लोहनिगडापीडमालामलमहौषधैः पादपीठदोहददुर्ललितपादपटुमान्द्यानि । क्षपय तीक्ष्णाज्ञाक्षरक्षारपातैर्जयशब्दश्रवणकर्णकण्डूः । अपनय चरणनखमरीचिचन्दनचर्चाललाटलेपैरनमितस्तिमितमस्तकस्तम्भविकारान् । उद्धर करदानसंदेशसंदंशैर्द्रविणदर्पोष्मायमाणदुःशीललीलाशल्यानि । भिन्धि मणिपादपीठदीधितिप्रदीपिकाभिः शुष्कसुभटाटोपभ्रुकुटिबन्धान्धकारान् । जय चरणलङ्घनलाघवगलितशिरोगौरवारोग्यैर्मिथ्याभिमानमहासंनिपातान् । म्रदय सततसेवाञ्जलिमुकुलितकरसंपुटोष्मभिरिष्वसनगुणकिणकार्कश्यानि । येनैव ते गतः पिता पितामहः प्रपितामहो वा तमेव मा

गृध्रछायया छत्रेच्छां पूरयेत्यर्थः । कदुष्णस्य कवोष्णस्य शोणीतोदकस्य रक्तजलस्य स्वेदैर्घर्मैः कुलक्ष्मीर्दुष्टा लक्ष्मीरेव कुलटा जारिणी तस्याः कटाक्षाणां चक्षूरागाः प्रेमकटाक्षाः त एव रोगास्तान् । नेत्ररोगश्च घर्मनिष्पत्त्या नश्यति । निशितैःशरैः शिराणां वेधा वेधनानि तैः।अकार्येऽसत्कार्ये शौर्यं तस्य श्वयथून् शोफान् ।शोफनाशश्च शिरावेधनेन । लोहनिगडानां लोहशृंखलानामापीडस्य पीडनस्य मालया परंपरया यो मलः कार्ष्ण्यं स एव महौषधानि तैः। लोहशृंखलाया दृढं निबंधनेनोत्पन्नैर्मलरूपौषधैरित्यर्थः । पादपीठस्य दोहदे अभिलाषे दुर्ललितानामासक्तिमतां पादानां चरणानां पटूनि मांद्यानि जाड्यानि । मांद्यदूरीकरणे लोहभस्मैवोपायः । तीक्ष्णायाः कठोराया आज्ञाया अक्षराण्येव क्षारस्तस्य पाते । कंडूश्च क्षारप्रक्षेपणेन नश्यति । चरणनखानां मरीचयः किरणा एव चंदनं तस्य चर्चा अंगरागस्तस्य ललाटलेपैः । अनमितमनम्रमतएव स्तिमितं स्तब्धं चलनाभावात् स्तिमितत्वम् । मस्तकं तस्य स्तंभविकारा जाड्यानि तान् । मस्तकजाड्यं चंदनलेपनेन तिरोभवति । करं देयो भागस्तस्य दानस्य । संदेशा एव संदंशाः शल्योद्धारकाः शस्त्रविशेषाः ‘ चिमटा ’ इति भाषायां प्रथितास्तैः । द्रविणदर्पस्य धनमदस्य ऊष्माणमुद्वमदूष्मायमाणं दुःशीलं दुःस्वभावस्तस्यलीलैव शल्यानि कंटकास्तानि । ‘ बाष्पोष्मभ्यामुद्वमने ’ इत्यनेन क्यङ् । मणिपादपीठं मणिमयं पादपीठं तस्य

हासीस्त्रिभुवनस्पृहणीयं पन्थानम् । अपहाय कुपुरुषोचितां शुचं प्रतिपद्यस्व कुलक्रमागतां केसरीव कुरङ्गीं राजलक्ष्मीम् । देव, देवभूयं गते नरेन्द्रे दुष्टगौडभुजङ्गजग्धजीविते च राज्यवर्धने वृत्तेऽस्मिन्महाप्रलये धरणीधारणायाधुना त्वं शेषः । समाश्वासय अशरणाः प्रजाः । क्ष्मापतीनां शिरःसु शरत्सवितेव ललाटंतपान्प्रयच्छ पादन्यासान् । अहितानामभिनवसेवादीक्षादुःखसंतप्तश्वासधूममण्डलैर्नखंपचैः प्रचलितचूडामणिचक्रवालबालातपैश्चायाहि कल्माषपादताम् । अपि च हते पितर्येकाकी तपस्वी मृगैः सह संवर्धितः सहजब्राह्मण्यमार्दवसुकुमारमनाः क्रु- 5

दीधितयः किरणा एव प्रदीपिकास्ताभिः । शुष्को व्यर्थो यः सुभटानां वीराणामाटोपो गर्वस्तेन कृतान् भ्रूकुटिबन्धानां भ्रूरचनानामंधकारान् । **चरणेति** । चरणयोः पादयोर्लंघनेन नमनेन यल्लाघवं लघुत्वं दास्यमिति यावत्तेन गलितं नष्टं यच्छिरोगौरवं शीर्षजाड्यं मंद इति यावत् तदेवारोग्यं नीरोगत्वं तैः । मिथ्या असत्या येऽभिमाना अहंकारा त एव महासंनिपाता रोगविशेषास्तान् जय नाशय । लंघनेनानशनेनापि मस्तकजाड्यं सन्निपातज्वरश्च नश्यत इति ध्वनिः। सततं सेवांजलिषु सेवार्थं क्रियमाणेषु अंजलिषु मुकुलितानां करसंपुटानामूष्मभिः। सततं सेवायां बद्धानां कराणां परस्परस्पर्शज उष्मा स्वाभाविक इति भावः । इष्वसनं धनुस्तस्य गुणो ज्या तस्य किणानां व्रणजचिन्हानां कार्कश्यानि काठिन्यानि । देवभूयं देवत्वम् । 'भुवो भावे' इत्यनेन क्यप् । दुष्टगौड एव भुजंगः सर्पस्तेन जग्धं भक्षितं जीवितं यस्य तस्मिन् । 'अदो जग्धिर्ल्यप् ति किति' इत्यनेन निष्ठायां जग्ध्यादेशः । शेषोऽवशिष्टो नागराजश्च । क्ष्मापतीनां नृपाणां पर्वतानां च । **ललाटंतपानि** । 'असूर्यललाटयोर्दृशितपोः' इत्यनेन खश् । एतेन तापप्राचण्ड्यं द्योत्यते । पादन्यासान् चरणन्यासान् किरणन्यासांश्च अहितानां शत्रूणामभिनवसेवाया नूतनसेवाया दीक्षाया दुःखेन संतप्तैः श्वासैरेव धूममंडलैः । नखंपचैः । 'मितनखे च' इत्यनेन खच् । नखपाकक्षद्भिरुष्णैः श्वासैरित्यर्थः । प्रचलितानां कम्पितानां चूडामणीनां शिरोभूषणानां चक्रवालस्य समुदायस्य बालातपैः कोमलैः किरणैश्च कल्माषपादतां चित्रचरणत्वम् । सर्वेऽपि शत्रवस्त्वत्पादार्चनपराः स्वचूडामणिमरीचिभिस्ते चरणौ किर्मीरवर्णौ कुर्वन्त्वित्यर्थः । **अपि चेति** । तपस्वी वराकः । चान्द्रायणादिव्रताचरणकर्ता च । सहजेन ब्राह्मण्यस्य मार्दवेन मृदुतया सुकुमारं कोमलं मनो यस्य सः । चंडानां भयं

तनिश्चयश्चण्डचापवनाटनिटांकारनादनिर्मदीकृतदिग्गजं गुञ्जज्ज्याजा-
लजनितजगज्ज्वरं समग्रमुद्यतमेकविंशतिकृत्वः कृत्तवंशमुत्खातवान्रा-
जन्यकं परशुरामः। किं पुनर्नैसर्गिककायकार्कश्यकुलिशायमानमान-
सो मानिनां मूर्धन्यो देवः। तदद्यैव कृतप्रतिज्ञो गृहाण गौडाधमजी-
वितध्वस्तये जीवितसंकलनाकुलकालाकाण्डदण्डयात्राचिह्नध्वजं धनुः। 5
न ह्ययमरातिरक्तचन्दनचर्चाशिशिरोपचारमंतरेण शाम्यति परिभ-
वानलपच्यमानदेहस्य देवस्य दुःखदाहज्वरः सुदारुणः। निकारसं-
तापशान्त्युपायपरिक्षये हि हिडिम्बाचुम्बनास्वादितमिव रिपुरुधिरामृ-
तममन्दरोपायमपायि पवनात्मजेन। जामदग्न्येन च शाम्यन्मन्युशिखि-
शिखासंज्वरसुखायमानस्पर्शशीतलेषु क्षत्रियक्षतजह्रदेष्वस्नायि'। इत्यु- 10
क्त्वा व्यरंसीत्।

कराणां चापानां धनुषां वनस्य समूहस्य अटनीनामग्रभागानां टांकारनादेन टांकार इतिध्वनिना निर्मदीकृता निर्गतो मदो येषां तथाकृता दिग्गजा येन तत्। 'कोटिरस्याटनिः' इत्यमरः। गुञ्जन्तीनां गर्जन्तीनां ज्यानां धनुर्गुणानां जालेन चक्रवालेन जनित उत्पादितो जगतो ज्वरो येन तत्। एकविंशतिकृत्वः एकविंशतिवारम्। 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इत्यनेन कृत्वसुच्। कृत्तः छिन्नो वंशोऽन्वयो ऽस्य तत्। राजन्यकं राज्ञामपत्यानि पुमांसो राजन्याः 'राजश्वशुराद्यत्' तेषां समूहो राजन्यकम्। गोत्रोक्षोष्ट्रोरभ्रराजन्ये-त्यादिना वुञ्। नैसर्गिकं सहजं कायकार्श्यं देहदार्ढ्यं तेन कुलिशायमानं वज्रायमाणं मानसं यस्य सः। मानिनामभिमानवतां मूर्धन्यः श्रेष्ठः। 'शरीरावयवाद्यत्' इत्यनेन मूर्धन्शब्दाद्यत्। गौडस्य जीवितस्य ध्वस्तये नाशाय। जीवितानां संकलने संहरणे आकुलस्य कालस्य यमस्य अकाण्डेऽनवसरे दण्डयात्रा दिग्विजयस्तस्य चिन्हस्य ध्वजं पताका। 'दंडयात्रा दिग्विजये संयानवरयात्रयोः' इति मेदिनी। परिभवानलेन पराभवाग्निना पच्यमानस्योत्क्वथ्यमानस्य देहस्य। निकारसंतापः पराभवपीडा तस्य शान्तेर्नाशस्योपायानां परिक्षये नाशे। हिडिंबायाः स्वपत्न्याश्चुम्बने आस्वादितमिव पूर्वानुभूतमिव। राक्षस्यास्तस्या रुधिरभक्षणेनतदोष्ठे रुधिरस्यास्वादो युक्त एव। अमंदरा महान्त उपाया यस्य तत् अमृतं तु मंदरपर्वतोपायेनेदं तु तद्विरुद्धमित्यर्थः। 'मंदरस्तु पुमान् मंथशैले मंदारपादपे। वाच्यवद्बहले मंदे' इति मेदिनी। **जामदग्न्येनेति**। शाम्यतो नश्यतो मन्युशिखिनः क्रोधवन्हेः शिखानां ज्वालानां संज्वरस्य सुखायमानः स्पर्शो येषां ते च शीतलाश्च तेषु। क्षत्रियाणां क्षतजस्य रुधिरस्य ह्रदेषु संचयेषु।

18 देवस्तु हर्षस्तं प्रत्यवादीत्—'करणीयमेवेदमभिहितं मान्येन । इतरथा हि मे गृहीतभुवि भोगिनाथेऽपि दायादद्दष्टिरीर्ष्यालोभुजस्य । उपरि गच्छतीच्छति निग्रहाय ग्रहगणेऽपि भ्रूलता चलितुम्। अनमत्सु शैलेष्वपि कचग्रहमभिलषति दातुं करः । तेजोदुर्विदग्धानर्ककरानपि चामराणि ग्राहयितुमीहते हृदयम् । राजशब्दरुषा मृगराजानामपि शिरांसि वाञ्छति पादः पादपीठीकर्तुम् । स्वच्छन्दलोकपालस्वेच्छागृहीतानामाक्षेपादेशाय दिशामपि स्फुरत्यधरः किं पुनरीदृशे दुर्जाते जाते जातामर्षनिर्भरे च मनसि नास्त्येवावकाशः शोकक्रियाकरणस्य । अपि च हृदयविषमशल्ये मुसल्ये जीवति जाल्मे जगद्विगर्हिते गौडाधिपाधमचण्डाले जिहेमि शुष्काधरपुटः पोटेव प्रतिकारशून्यं शुचा सूत्कर्तुम् । अकृतरिपुबलाबलाविलोललोचनोदकदुर्दिनस्य मे कुतः करयुगलस्य जलाञ्जलिदानम् । अदृष्टगौडाधमचिताधूममण्डलस्य वा चक्षुषः स्वल्पमप्यश्रुसलिलम् । श्रूयतां मे प्रतिज्ञा । शपाम्यार्यस्यैव पादपांशुस्पर्शेन यदि परिगणितैरेव वासरैः सकलचापचापलदुर्ललितनरपतिचरणरणरणायमाननिगडां निर्गौडां न करोमि

देव इति । इतरथाहि ईदृशे दुष्कर्मण्यजातेऽपि मे गृहीता शिरसि धृता स्वीकृता च भूर्येन तस्मिन्भोगिनाथेऽपि शेषेपीर्ष्यालोस्तदुत्कर्षमसहमानस्य भुजस्य दायादद्दष्टिर्वैरिदृष्टिः किंपुनरीदृशे दुर्जाते व्यसने इत्यग्रिमेण संबंधः । गच्छतीति सप्तम्यन्तम् । अनमत्सु नमस्कारमकुर्वाणेषु । कचग्रहं केशग्रहणम् । तेजसा दुर्विदग्धान् गर्वयुतान् । राजशब्दस्य मृगराजेतिपदे विद्यमानस्य राजशब्दस्य रुषा कोपेन । स्वच्छन्दैः स्वैरैर्लोकपालैः स्वेच्छया गृहीतानां दिशामप्याक्षेपस्थापहरणस्यादेशायाज्ञादानाय । मुसल्ये मुसलेन वध्ये । 'दण्डादिभ्यो यः' इत्यनेनं यः । पोटेव नपुंसकमिव । शुष्काधरपुटो नपुंसकस्य चुम्बनलाभाभावाच्छुष्काधरत्वम् । शुचा स्वासामर्थ्येन शोकः । अकृतं रिपुबलस्य शत्रुसैन्यस्याबलानां प्रमदानां लोचनोदकैर्वाष्पांबुभिर्दुर्दिनं येन तस्य । **अदृष्टेति** । धूमदर्शनेन नेत्रयोरश्रुपातः । सकलानां चापचालनेन धनुश्चापल्येन दुर्ललितानां नरपतीनां चरणेषु रणरणायमाना दुःखदायका निगडाः शृंखला यस्यां तां मेदिनीं पृथ्वीम् । महत्सु संधिषु विग्रहेषु चाधिकृतं नियुक्तम् । अवन्तिं तन्नामकम् । रविरथस्य सूर्यरथस्य चक्राणां चीत्कारेण ध्वनिना चकितैश्चारणमिथुनैर्देवबन्दिद्वन्द्वैर्मुक्ताः सानवः शिखराणि यस्य तस्मादुदयाचलात्पूर्वपर्वता-

मेदिनीं ततस्तनूनपाति पीतसर्पिषि पतङ्ग इव पातकी पातयाम्यात्मा-
नम्'। इत्युक्त्वा च महासंधिविग्रहाधिकृतमवन्तिमन्तिकस्थमादि-
देश—'लिख्यताम्। आ रविरथचक्रचीत्कारचकितचारणमिथुनमुक्त-
सानोरुदयाचलात्, आ त्रिकूटकटककुट्टाकटङ्कलिखितकाकुत्स्थलङ्का-
लुण्ठनव्यतिकरात्सुवेलात्, आ वारुणीमदस्खलितवरुणवरनारीनूपुररव- 5
मुखरकुहरकुक्षेरस्तगिरेः, आ गुह्यकगेहिनीपरिमलसुगन्धिगन्धपाषाण-
वासितगुहागृहाच्च गन्धमादनात्, सर्वेषां राज्ञां सज्जीक्रियन्तां कराः
करदानाय शस्त्रग्रहणाय वा, गृह्यन्तां दिशश्चामराणि वा, नमन्तु
शिरांसि धनूंषि वा, कर्णपूरीक्रियन्तामाज्ञा मौर्व्यो वा, शेखरीभवन्तु
पादरजांसि शिरस्त्राणि वा, घटन्तामञ्जलयः करिघटाबन्धा वा, मुच्यन्तां 10
भूमय इषवो वा, समालम्ब्यन्तां वेत्रयष्टयः कुन्तयष्टयो वा, सुदृष्टः

दापर्यन्तम्। त्रयाणां कूटानां शिखराणां कटकेपूर्ध्वभागेषु कुट्टाकैः भेदकैष्टङ्कैर्लि-
खितः काकुत्स्थस्य रामस्य लंकालुंठनव्यतिकरो यस्मिन् तस्मात् सुवेलाल्लंकास्थ-
पर्वतादा पर्यन्तम्। वारुणीमदेन मद्यमदेन स्खलितं स्खलनं यासां ता वरुणस्य
वरनार्यः श्रेष्ठाः प्रमदास्तासां नूपुररवैर्मंजीरध्वनिभिर्मुखराः सशब्दाः कुहराणां
गुहानां कुक्षयोऽन्तर्भागा यस्य तस्मादस्तगिरेरस्ताचलादा पर्यन्तम्। गुह्यकानां
निधिरक्षकयक्षाणां गेहिनीनां गृहिणीनां परिमलैः सुगन्धिभिः गन्धपाषाणैः
शिलाजतुभिर्वासितानि सुवासितानि गुहागृहाणि यस्य तस्माद्गन्धमादनात्तन्नामका-
दुत्तरस्यां दिशि वर्तमानादद्रेः। 'निधिं रक्षन्ति ये यक्षास्तेस्युर्गुह्यकसंज्ञकाः' इति
व्याडिः। **सर्वेषामिति**। कराः हस्ताः करदानाय देयभागं दातुं शस्त्रग्रहणाय शस्त्रं
ग्रहीतुं वा। युद्धाय सज्जन्तु मांडलिकत्वमंगीकुर्वन्तु वेत्यर्थः। **गृह्यन्तामिति**।
आत्मानं निन्होतुं पलायितुं वेत्यर्थः। अथवा तथाऽसामर्थ्ये सेवकत्वमूरीकृत्य
चामरग्रहणं क्रियतामित्यर्थः। **नमन्त्विति**। पादयोः पतत वा युद्धाय
सज्जधन्वानो वा भवतेत्यर्थः। **कर्णेति**। कर्णपूरीक्रियन्तां कर्णाभरणमिव
तत्र स्थाप्यन्तां श्रूयन्तामित्यर्थः। आज्ञापालनपरा भवत कर्णान्तं धनुराकर्षत
वेत्यर्थः। **शेखरीति**। मस्तकैः पादधूलिर्ध्रियतां युद्धे शिरस्त्राणि वा। **घटता-
मिति**। नमस्कारान्कुरुत आहवार्थं गजघटाबन्धं वा रचयतेत्यर्थः। **मुच्य-
न्तामिति**। स्वराज्यं बाणान्वा त्यजतेत्यर्थः। **समालंब्यन्तामिति**।
कञ्चुकित्वं स्वीक्रियतां कुन्ताः प्रासा वा हस्ते गृह्यन्ताम्। 'कुन्तः प्रासे'
इति विश्वः। **सुदृष्ट इति**। मत्चरणनखेषु मत्पादवंदनवेलायां दीप्तिमत्सु

क्रियतामात्मा मच्चरणनखेषु कृपाणदर्पणेषु वा। परागतोऽहम्। पङ्गोरिव मे कुतो निवृत्तिस्तावद्यावन्न कृतः सर्वद्वीपान्तरसंचारी सकलनरपति-मुकुटमणिशिलालेकमयः पादलेपः'। इति कृतनिश्चयश्च मुक्तास्थानो विसर्जितराजलोकः स्नानारम्भाकाङ्क्षी सभामत्याक्षीत्। उत्थाय च स्व-स्थवन्निःशेषमाह्निकमकार्षीत्। अगलच्च दर्पप्रसर इव श्रुतप्रतिज्ञस्य शाम्यदुष्मा दिवसस्त्रिभुवनस्य। 5

19 ततश्च निजाधिकारापहारभीत इव भगवत्यपि क्वापि गते गततेजस्यहिमभासि, तामरसवनेष्वपि निगूढशिलीमुखालापेषु त्रासादिव संकुचत्सु, विहगगणेष्वपि समुपसंहृतनिजपक्षविक्षेपनिश्चलेषु भियेवाप्रक-टीभवत्सु, भुवनव्यापिनीं संध्यां प्रतिज्ञामिव मानयति नतशिरसि घटिताञ्जलिवने जने सकले, स्वपदच्युतिचकितदिक्पालदीयमानाभ्रं- 10 लिहलोहप्राकारवलयास्विव बहलतिमिरमालातिरोधीयमानासु दिक्षु प्रदोपास्थाने नातिचिरं तस्थौ। नमन्नृपलोकलोलांशुकपवनकम्पितशिखे-

---

मन्नखेषु कृपाणा एवाऽस्य एव दर्पणास्तेषु वा आत्मा स्वप्रतिबिम्बं सुदृष्टः क्रियतां सम्यग् दृश्यताम्। **पङ्गोरिति**। सकलद्वीपेषु संचरणं विना सर्वेषां राज्ञां मुटकुमणिशिलानां प्रभाया लेपोऽशक्यः। पङ्गोश्च पङ्गुत्वदूरीकरणार्थं पादे शिलाविशेषस्य च लेपोऽप्यावश्यक एवेति युज्यत इदम्। प्राचुर्ये मयट्। स्नानारंभमाकांक्षतीच्छति स सिष्णासुरित्यर्थः। आन्हिकम्। 'कालाट्ठञ्'। अकार्षीत्। भूते लुङ्। शाम्यन् प्रतिज्ञाश्रवणाद्गलित उष्मा औष्ण्यं दर्पो वा यस्य सः दिवसोऽगलदगच्छत्।

ततश्चेति। निजाधिकारस्यापहारादपहरणाद्भीत इव दिग्विजयाय प्रस्थि-तोऽयमात्मनोऽधिकारं हरेदतोऽस्य पुरतो न स्थातव्यमिति भीत्या सूर्योऽस्तं गतो न्विति कल्पना। निगूढा गुप्ता शिलीमुखानां भ्रमरगणां बाणानां चालापा येषु तेषु। समुपसंहृतः निजानां पक्षाणां विक्षेपः प्रसारणं तेन निश्चलेषु। पक्षे पक्षविक्षेपः साहाय्यप्रसरणम्। घटितमञ्जलिवनं करसमूहो येन तस्मिन्। कृतनमस्कार इत्यर्थः। स्वपदस्य च्युतिर्भ्रंशस्तया चकितैर्भीतैर्दिक्पालैर्दीयमानाः स्वरक्षणार्थं निर्मीयमाणा अभ्रंलिहानां मेघमंडलस्पृशां लोहप्राकाराणां लोहवप्राणां वलया यासु तास्विव। तमासि दिक्पालैः स्वरक्षणाय रचितानां लोहवप्राणामारोपः। बहलाभिस्तिमिरमालाभिस्तमःपंक्तिभिस्तिरोधीयमानासु आच्छाद्यमानासु। प्रदोषास्थाने सायंसभामंडपे। नमतां नृपलोकानां लोलानां चंचलानामंशुकानां

दीपिकाचक्रवालैरपि प्रणम्यमान इव प्राड्विणोल्लोकं प्रतिषिद्धपरिजनप्रवे-
शश्च शयनगृहं प्राविशत् । उत्तानश्च मुमोचाङ्गानि शयनतले ।
दीपद्वितीयं च तमभिसर इव लब्धावसरस्तरसा भ्रातृशोको जग्राह ।
जीवन्तमिव हृदये निमीलितलोचनो ददर्शाग्रजम् । उपर्युपरि भ्रातृजी-
वितान्वेषिण इव प्रसस्रुः श्वासाः । धवलांशुकपटान्तेनेव चाश्रुजल- 5
प्लवेन मुखमाच्छाद्य निःशब्दमतिचिरं रुरोद । चकार च चेतसि—
'कथं नामाकृतेस्तादृश्या युक्तः परिणामोऽयमीदृशः । पृथुशिलासंघात-
कर्कशकायबन्धात्तातादचलादिव लोहधातुः कठिनतर आसीदार्यः ।
कथं चास्य मे हतहृदयस्यार्यविरहे सकृदपि युक्तमुच्छ्वसितुम् । इयं
सा प्रीतिर्भक्तिरनुवृत्तिर्वा । बालिशोऽपि कः संभावयेदार्यमरणे म- 10
ज्जीवितम् । तत्तादृशमैक्यमेकपद एव क्वापि गतम् । अयत्नेनैव हत-
विधिना पृथक्कृतोऽस्मि । दग्धरोषान्तरितशुचा सुचिरं रुदितमपि न
मुक्तकण्ठं गतघृणेन मया । सर्वथा लूतातन्तुच्छटाच्छिदुरास्तुच्छाः
प्रीतयः प्राणिनाम् । लोकयात्रामात्रनिबन्धना बान्धवता यतोऽहमपि
नाम पर इवार्ये स्वर्गस्थे स्वस्थ इवासे । किंच दैवहतकेन फलमासा- 15
दितमीदृशि परस्परप्रीतिबन्धनिर्वृतहृदये सुखभाजि भ्रातृमिथुने विघ-
टिते । तथा चन्द्रमया इव जगदाह्लादिनो लोकान्तरीभूतस्य लग्न-
चिताग्नय इवार्यस्य त एव दहन्ति गुणाः' । इत्येतानि चान्यानि
च हृदयेन पर्यदेवत । प्रभातायां च शर्वर्यां प्रातरेव प्रतीहारमादिदे-
शाशेषगजसाधनाधिकृतं चन्द्रगुप्तं द्रष्टुमिच्छामीति । 20

वक्त्राणां पवनैर्वातैः कंपिताश्चालिताः शिखा येषां तैर्दीपिकाचक्रवालैर्दीपसमूहैः । अभिसर इव स्तेन इव । अभिसरशब्दस्य न स्तेनवाचित्वं प्रत्युत स सहायवाची परमत्र कवेः स्तेनार्थ एवाभिमतः संकेतोप्यत्र तस्य चोरार्थमाह । पृथूनां महतीनां शिलानां संघातः समूह इव कर्कशः कठिनः कायबन्धो देहयष्टिर्यस्य तस्मात्तातात्जनकात् । दग्धेन हतेन रोषेण गौडोपरि क्रोधेनान्तरिता आच्छादिता शुक् शोको यस्य तेन । लूतानां तन्तुवायानां तन्तुच्छटेव सूत्रजालमिव भिदुरा भेदनशीलाः प्राणिनां जन्तूनां प्रीतयः । यत इति । पर इव परकीय इव स्वर्गस्थे आर्ये भ्रातरि स्वस्थ इव अकृतोद्यम इव । परस्परस्य प्रीतिबन्धेन निर्वृतं सुखि हृदयं यस्य तस्मिन् । भ्रातृमिथुने बन्धुद्वये विघटिते वियोजिते सति किंफलमासादितम् को लाभो लब्धो न किंचिदपीत्यर्थः ।

20 अथ युगपत्प्रधावितबहुपुरुषपरम्पराहूयमानः, स्वमन्दिरादप्रतिपालितकरेणुश्चरणाभ्यामेव संभ्रान्तः ससंभ्रमैर्दाण्डिभिरुत्सार्यमाणजनपदः, पदे पदे प्रणमतः प्रतिदिशमिभभिषग्वरान्वरवारणानां विभावरीवार्ताः पृच्छन्, उच्छ्रितशिखिपिच्छलाञ्छितवंशलतावनगहनगृहीतदिगायामैर्विन्ध्यवनैरिव वारणबन्धविमर्दोद्योगागतैः, पुरःप्रधावद्भिरनायत्तमण्डलैराधोरणगणैश्च मरकतहरितघासमुष्टीश्च दर्शयद्भिर्नवग्रहगजपतींश्च प्रार्थयमानैश्च लब्धाभिमतमत्तमातङ्गमुदितमानसैश्च सुदूरमुपसृत्य नमस्यद्भिरात्मीयमातङ्गमदागमांश्च निवेदयद्भिः, डिण्डिमाधिरोहणाय च विज्ञापयद्भिः, प्रमादपतितापराधापहृतद्विरददुःखधृतदीर्घश्मश्रुभिरग्रतो गच्छद्भिः, अभिनवोपसृतैश्च कर्पटिभिर्वारणाप्तिसुखप्रत्याशया धावमानैः, गणिकाधिकारिगणैश्चिरलब्धान्तरैरुच्छ्रितकरैः कर्मण्यकरेणुकासंकथनाकुलैः, उल्लासितपल्लवचिह्नाभिररण्य-

---

अर्थेति । अथ स्कन्धगुप्त एतैरेतैः क्रियमाणकोलाहलो राजकुलं विवेशेति संबंधः । युगपद्राजाज्ञाक्षण एव प्रधावितानां बहूनां पुरुषाणां परंपरया आहूयमान आकार्यमाणः अप्रतिपालिता अनवेक्षिता करेणुः करिणी येन सः । इभभिषग्वरान् हस्तिवैद्यश्रेष्ठान् वरवारणानां श्रेष्ठगजानां विभावरीवार्ता रात्रिवृत्तानि पृच्छन् । उच्छ्रिता ऊर्ध्वं धृताः शिखिपिच्छैर्मयूरबर्हैर्लाञ्छिता वंशलता वेणवस्तासां वनेन समूहेन गहनं निविडं गृहीतो दिगायामो दिशां दैर्घ्यं यैस्ते । पक्षे उच्छ्रितानामुपरिस्थितानां शिखिनां पिच्छैर्लाञ्छितेन वंशलतावनेन वेणुविपिनेन गहनं दृढं गृहीतो दिगायामो यैस्तैर्विंध्यवनैरिव । वारणबंधो गजरोधनं तस्य विमर्दो नाशस्तस्योद्योगायागतैः । अनायत्तानामलब्धसेवाधिकाराणां मंडलैः । संकेतकारस्तु अनायत्तेतिपाठं गृहीत्वा तस्य हस्तिपार्श्वरक्षक इत्यर्थं इति व्याख्यातवान् । आधोरणगणैर्हस्तिपकसमूहैः । नवो ग्रहो ग्रहणं येषां ते च ते गजपतयस्तान् । लब्धोऽधिगतोऽभिमतोऽपेक्षितो मत्तमातंग उन्मत्तगजस्तेन मुदितं मानसं येषां तैः । आत्मीयानां स्वीयानां मातंगानां मदागमं मदप्राप्तिम् । डिंडिमाधिरोहणाय पटहप्रस्थापनाय । स्वगजे पटहः स्थापनीय इति विज्ञापयद्भिरित्यर्थः । प्रमादेनानवधानेन पतितात्कृतादपराधादपहृतो निष्कासितो द्विरदस्तस्य दुःखेन धृता दीर्घाः श्मश्रवो यैस्तैः कर्पटिभिर्वस्त्रच्छेदधारिभिः । चिरेण बहुकालेन लब्धोऽन्तरोऽवकाशो यैस्तैः । उच्छ्रिताः करा यैस्तैः कर्मण्यकरेणुकाः करिग्रहकुशलिन्यः करिण्यस्तासां संकथने आकुलैर्गणिकानां गजप्रलोभिनीनां करि-

पालपङ्क्तिभिश्च निष्पादितनवग्रहनागनिवहनिवेदनोद्यताभिरुत्तम्भित-तुङ्गतोत्रवनाभिः, महामात्रपेटकैश्च प्रकटितकरिकर्मचर्मपुटैः, अभि-नवगजसाधनसंचरणवार्तानिवेदनविसर्जितैश्च नागवनवीथीपालवृन्दैः, प्रतिक्षणप्रत्यवेक्षितकरिकवलकूटैः, कटभङ्गसंग्रहं ग्रामनगरनिगमेषु निवेदयमानैः कटककदम्बकैः क्रियमाणकोलाहलः, स्वामिप्रसा- 5
दसंभृतेन महाधिकाराविष्कारेण स्वाभाविकेन चावष्टम्भाभोगेनोदासीनोऽप्यादिशन्निव, असंख्यकरिकर्णशङ्खसंपत्संपादनाय समुद्रानाज्ञापयन्निव, शृङ्गारगैरिकपङ्काङ्गरागसंग्रहाय गिरीन्मुष्णन्निव, दिग्गजाधिकारं ककुभामैरावतमिवापहरन्हरेः, हरपदभरनमितकैलासगिरिगुरुभिः पादन्यासैर्गुरुभारग्रहणगर्वमुर्व्याः संहरन्निव, गतिवशविलोलस्य चा- 10
जानुलम्बस्य बाहुदण्डद्वयस्य विक्षेपैरालानशिलास्तम्भमालामिवोभयतो

णीनामधिकारिगणैः। उल्लासितानि ऊर्ध्वं धृतानि पल्लवचिन्हानि यैस्ताभिर्निष्पादिता गृहीता नवग्रहा नूत्नसंपादिता नागा हस्तिनस्तेषां निवहस्य समूहस्य निवेदने उद्यताभिरुद्युक्ताभिरुत्तंभितमुच्छ्रितं तुंगानामुन्नतानां तोत्राणामंकुशानां वनं समूहो याभिस्ताभिररण्यपालानां वनरक्षकाणां पंक्तिभिः। प्रकटितानि करिकर्मणां गजशिक्षार्थं क्रियमाणानां चर्मपुटानि चर्ममया गजा यैस्तैर्महामात्राणां प्रधानहस्तिपकानां पेटकैः समूहैः। अभिनवस्य गजसाधनस्य गजसैन्यस्य संचरणवार्तायाः भ्रमणवार्तायाः निवेदनाय कथनाय विसर्जितैः प्रेषितैः नागवनं गजारण्यं तस्य वीथीपालाः मार्गपालकास्तेषां वृंदैः समूहैः। प्रतिक्षणं प्रत्यवेक्षिताः करिकवलानां गजग्रासानां कूटाः समूहा यैस्तैः कटभंगसंग्रहं हस्तछिन्नसस्यसंग्रहम्। ग्रामनगराणां निगमेषु वणिक्पथेषु आपणेष्वित्यर्थः। 'कटभंगो नृपात्यये। हस्तछेदे च सस्यानाम्' इति हैमः। 'निगमो वाणिजे पुर्यां कटे वेदे वणिक्पथे' इति मेदिनी। कटका हस्तिपटनियुक्ता अग्रेसरा वेत्रिणो वा तेषां कदम्बैः समूहैः। स्वामिप्रसादेन राजकृपया संभृतेन संपादितेन महाधिकारस्याविष्करणेन प्रकटनेन स्वाभाविकेन च नैसर्गिकेण चावष्टंभाभोगेन गर्वाधिक्येन। उदासीनोऽपि स्वस्थोऽप्यादिशन्निवाज्ञापयन्निव। असंख्यानां कर्णानां गजश्रवणनां शंखसंपदलंकारार्थं शंखास्तस्याः संपादनाय लाभाय समुद्रान् तेषु शंखसमृद्धेर्विद्यमानत्वात्। हरेरिन्द्रस्यैरावतमिव ककुभां दिग्गजाधिकारं हरन्निव गृह्णन्निव। हरपदभरेण शंकरचरणभारेण नमितः कैलासगिरिरिव गुरवो महान्तस्तैः पादन्यासैरुर्व्याः पृथ्व्या गुरुभारस्य महाभारस्य ग्रहणस्य धारणस्य गर्वं संहरन्निव यथा

निखनन्, ईषदुत्तुङ्गलम्बेनाधरबिम्बेनामृतरसस्वादुना नवपल्लवकोमलेन कवलेनेव श्रीकरेणुकां विलोभयन्, निजनृपवंशदीर्घं नासावंशं दधानः, अतिस्निग्धमधुरधवलविशालतया पीतक्षीरोदेनेव पिबन्नीक्षणयुग्मायामेन दिशामायामं, मेरुतटादपि विकटविपुलालिकः, सततमविच्छिन्नच्छत्रच्छायाप्ररूढिवशादिव नितान्तायतनीलकोमलच्छविसुभगेन स्वभावभङ्गुरेण कुन्तलबालवल्लरीवेल्लितविलासिना लुनान्निव लुप्तालोकानर्ककरान्बर्बरकेण, अरिपक्षपरिक्षयपरित्यक्तकार्मुककर्मापि सकलदिगन्तश्रूयमाणगुरुगुणध्वनिः, आत्मस्थसमस्तमत्तमातङ्गसाधनोऽप्यस्पृष्टो मदेन, भूतिमानपि स्नेहमयः, पार्थिवोऽपि गुणमयः, करिणामिव दानवतामुपरि स्थितः, स्वामितामिव स्पृहणीयां भृत्यतामप्यपरिभूतामुद्वहन्, एकभर्तृभक्तिनिश्चलां कुलाङ्गनामिवानन्यगम्यां प्रभुप्रसा-

---

शंकरचरणभारेणाधिकभारं दधतः कैलासाद्रेर्धारणे धरिण्याः श्रमः एवं कैलासाद्रेरिव गुरूणां भारवतामस्य पादन्यासानां धारणेपीत्यर्थः । आलानशिलास्तंभान् गजबंधनस्य शिलामयान् स्तंभान् । श्रीरेवकेरणुका ताम् । करिणी च कवलेन विलोभ्यते । निजनृपवंश इव दीर्घम् । नासिकाया दैर्घ्यं स्वराजवंशदैर्घ्यमिवेत्यर्थः । पीतः क्षीरोदः क्षीरसमुद्रो येन तेनेव । तत्र च हेतुरतिस्निग्धत्वं मधुरत्वं धवलता विशालता च । ईक्षणयुग्मस्य नेत्रद्वयस्यायामेन दैर्घ्येण । विकटं विशालं विपुलं महदलिकं ललाटं यस्य सः । 'ललाटमलिकम्' इत्यमरः । अविच्छिनायां छत्रच्छायायां प्ररूढिवशाद्वर्धनवशादिव नितान्तमत्यन्तमायता विस्तृता नीला कोमला छविस्तया सुभगः सुन्दरस्तेन स्वभावभंगुरेण नैसर्गिककुटिलेन कुंतला एव केशा एव बालवल्लरी बाललता तस्या वल्लितेन चलनेन विलासिना शोभमानेन बर्बरकेण श्वेतचंदनेन लुप्त आलोको येषां तान् अर्ककिरणान् सूर्यरश्मीन् लुनन्निव । अत्र नितांतेत्यादि स्वभावभंगुरेणेत्यंतं विशेषणद्वयं कुन्तलस्य समासैकदेशस्थस्येत्यवभाति । अरिपक्षस्य शत्रुपक्षस्य परिक्षयेण नाशेन परित्यक्तं कार्मुककर्म येन सः । सकलदिगन्तेषु श्रूयमाणो गुरूणां गुणानां वीर्यादीनां ध्वनिः स्तुतिशब्दो यस्य पक्षे गुरुर्महान् गुणध्वनिर्ज्याशब्दः । कार्मुकत्यागेपि गुणशब्दश्रवणं विरोधः परिहारस्तूक्त एव । आत्मस्थं स्वात्मनि तिष्ठत्स्वायत्तं समस्तमत्तमातंगानां साधनं सैन्यं यस्य सः । भूतिमानप्यैश्वर्यवानपि भस्मवानपि स्नेहमयः प्रेमवान् । भस्मसत्वे स्नेहस्यार्द्रतायाः नाशोऽतो विरोधः । पार्थिवोपि पृथ्व्यारब्धोपि नृपोपि गुणमयस्तन्तुमयः पृथ्व्यारब्धो घटो न पट इति विरोधः । दानवतां मद-

दभूमिमारूढः, निष्कारणबान्धवो विदग्धानाम्, अभृतभृत्यो भजताम्, अक्रीतदासो विदुषाम्, स्कन्दगुप्तो विवेश राजकुलम्। दूरादेव चोभयकरकमलावलम्बितं स्पृशन्मौलिना महीतलं नमस्कारमकरोत्।

२१ उपविष्टं नातिनिकटे तं तदा जगाद देवो हर्षः---'श्रुतो विस्तर एवास्यार्यव्यतिकरस्यास्मच्चिकीर्षितस्य च। अतः शीघ्रं प्रवेश्यन्तां प्रचारनिर्गतानि गजसाधनानि। न क्षाम्यत्यतिस्वल्पमप्यार्यपरिभवपीडापावकः प्रयाणविलम्बम्'। इत्येवमभिहितश्च प्रणम्य व्यज्ञापयत्---'कृतमवधारयतु स्वामी समादिष्टं किंतु स्वल्पं विज्ञाप्यमस्ति भर्तृभक्तेः। तदाकर्णयतु देवः। देवेन हि पुष्पभूतिवंशसंभूतस्याभिजनस्याभिजात्यस्य सहजस्य तेजसो दिक्करिकरप्रलम्बस्य बाहुयुगलस्यासाधारणस्य च सोदरस्नेहस्य सर्वं सदृशमुपक्रान्तम्। काकोदराभिधानाः कृपणाः कृमयोऽपि न मृष्यन्ति विकारं किमुत भवादृशास्तेजसां राशयः। केवलं देवराज्यवर्धनोदन्तेन कियदपि दृष्टमेव देवेन दुर्जनदौरात्म्यम्। ईदृशाः खलु लोकस्वभावाः प्रतिग्रामं प्रतिनगरं प्रतिदेशं प्रतिद्वीपं प्रतिदिशं च भिन्ना वेशाश्चाकाराश्चाहाराश्च व्यवहाराश्च जनपदानाम्। तदियमात्मदेशाचारोचिता स्वभावसरलहृदयजा त्यज्यतां सर्वविश्वासिता। प्रमाददोषाभिषङ्गेषु श्रुतबहुवार्त एव

वतां वितरणाधिकारिणां च। उभयकरकमलाभ्यामवलंबितं महीतलं मौलिना मस्तकेन स्पृशन्। हस्ताभ्यां मूर्ध्ना च भूमिं स्पृशन्नित्यर्थः।

उपविष्टमिति। प्रचाराय भक्षणाय निर्गतानि गजसाधनानि गजसेनाः। स्वामी समादिष्टं कृतमवधारयतु जानातु। भवदाज्ञा संपादितेवेत्यर्थः। आभिजात्यस्य कुलीनत्वस्य। काकोदराभिधानाः सर्पजातिविशेषाः कृपणा दीनाः कृमयः कीटका अपि न मृष्यन्ति न सहन्ते। सर्पा विप्रकारं न सहन्ते किन्तु अवमानितुर्नाशाय यतन्त इति लोकप्रसिद्धिः। कियदपि किंचित्परिणाम मपि। **यथेति**। नागसेननामा नृपः पद्मावत्यां मंत्रिणमर्धराज्यापहारकं नाशयितुं शारिकासमक्षं मंत्रयामास। स च मंत्री तन्मंत्रं शारिकामुखाद्विज्ञाय राज्ञो विश्वासमुत्पाद्य तं दंडेनावधीत्.' भिन्दन्त्यवमता मंत्रं तैर्यग्योनास्तथैव च। स्त्रियश्चैव विशेषेण तस्मात्तत्रादृतो भवेत्' इति मनुनापि मंत्रकरण आद-

प्रतिदिनं देवः । यथा नागकुलजन्मनः सारिकाश्रावितमन्त्रस्यासीन्नाशो नागसेनस्य पद्मावत्याम् । शुकश्रुतरहस्यस्य च श्रीरक्षीयंत श्रुतवर्मणः श्रावस्त्याम् । स्वप्नायमानस्य च मन्त्रभेदोऽभून्मृत्यवे मृत्तिकावत्यां सुवर्णचूडस्य । चूडामणिलग्नलेखप्रतिबिम्बवाचिताक्षरा च चारुचामीकरचामरग्राहिणी यमतां ययौ यवनेश्वरस्य । लोभबहुलं च बहुलनिशि निधानमुत्खनन्तमुत्खातखड्गप्रमाथिनी ममन्थ माथुरं बृहद्रथं विदूरथवरूथिनी । नागवनविहारशीलं च मायामातङ्गाङ्गान्निर्गता महासेनसैनिका वत्सपतिं न्ययं- 5

रवता भाव्यमित्युक्तम् । अस्याश्च कथाया गूढमन्त्रेषु यत्नतो भाव्यमित्यभिप्रायः। श्रावन्त्यामीशान्यकोसलराजधान्यां पूर्ववदेव शुकेनोद्घाटितरहस्यस्य श्रुतवर्मणः श्रीरनश्यदस्या अपि कथायाः तात्पर्यं पूर्ववदेव । **स्वप्नायमानस्येति** । मृत्तिकावत्यां सुवर्णचूडो नाम राजा कंचिद्विश्वासतो जिघांसुः स्वमन्त्रमेवोत्स्वप्नायमानोऽवदत्तत्र च तच्छत्रुप्रेषितस्तस्य शिरोरक्षकस्तत् श्रुत्वा तमहन् । एतेन भृत्याः सुपरीक्ष्य कर्तव्या इति निवेदितम् । **चूडामणीति** । चूडामणौ शिरोभूषणे लग्नं पतितं लेखप्रतिबिम्बं तस्मिन् वाचितान्यक्षराणि यया सा चारु मनोहरं चामीकरचामरं धरति सा । इदं हेतुगर्भं विशेषणं । शिरोभूषणे विपरीतं प्रतिविंबितानामक्षराणां पुनः प्रतिविंबं चामीकरचामरे पतितं तदनया सुलभतया वाचितम् । यवनेश्वरः केनचिदरिणा हन्तुमिष्ट आसीदेकदा तन्मित्रेणेमं वृत्तान्तं स लेखेन बोधितः । लेखवाचनवेलायां शत्रुप्रयुक्तचामरग्राहिणी लेखाक्षरप्रतिबिंवतो तत्पत्रवृत्तान्तं ज्ञात्वा स्वप्रभवे न्यवेदयत्तदाज्ञया च तं जघान । अनेन च सूक्ष्ममपि रहस्यभेदकारणं रक्षितव्यमित्युक्तम् । **लोभबहुलमिति** । लोभेन बहुलो व्याप्तस्तं बहुलनिशि कृष्णपक्षरात्रौ निधानं भूगतं द्रव्यराशिमुत्खनन्तं निष्कासयन्तं माथुरं मथुराधिपं बृहद्रथं तन्नामकं नृपम् उत्खातैर्विकोशैः खड्गैः । प्रमाथिनी विध्वंसिका विदूरथस्य तन्नामकस्य नृपस्य वरूथिनी सेना ममन्थ विलोडयामास जघानेत्यर्थः। अतः लोभेन क्वापि न प्रवर्तितव्यमिति सूचितम्। **नागेती** । वत्सराजं नामकौशांब्यधिपं स्वकन्यार्थमानिनीषुर्महासेनो नाम नृपस्तस्य गजवने विहारेच्छां ज्ञात्वा चर्ममयं गूढसैनिकं गजं निर्माय तद्धरणार्थं गजहरणसाधनीभूतया घोषवत्याख्यया वीणया सहागतं स्वसैनिकैर्गजचर्म विदार्य बहिरागतैर्बद्ध्वाहं गृहीतं तमुज्जयिनीं निनायेति कथा कथासरित्सागरे द्वादशे लंबके । अतो नाल्पपरिवारेण त्वयाऽटव्यामाहिण्डितव्यम् । **अतिदयितस्येति** । अतिदयितमत्यन्तं प्रियं लास्यं नृत्यं यस्य तस्याग्निमित्रात्मजस्याग्निमित्रपुत्रस्य सुमित्रस्य मूर्धानं मस्तकं मित्रदेवस्तन्नामकस्तत्सुहृद् शैलूषमध्यं नटमध्यमध्यास्य नट-

सिधुः। अतिदयितलास्यस्य च शैलूषमध्यमध्यास्य मूर्धानमसिलतया मृ-
णालमिवालुनादग्निमित्रात्मजस्य सुमित्रस्य मित्रदेवः।प्रियतन्त्रीवाद्यस्या-
लाबूवीणाभ्यन्तरशुषिरनिहितनिशिततरवारयो गान्धर्वच्छात्रच्छद्मानः
चिच्छिदुरश्मकेश्वरस्य शरभस्य शिरो रिपुपुरुषाः। प्रज्ञादुर्बलं च
बलदर्शनव्यपदेशदर्शिताशेषसैन्यः सेनानीरनार्यो मौर्यं बृहद्रथं पिपेष 5
पुष्पमित्रः स्वामिनम्। आश्चर्यकुतूहली च चण्डीपतिर्दण्डोपनतयव-
ननिर्मितेन नभस्तलयायिना यन्त्रयानेनानीयत क्वापि काकवर्णः।
शैशुनागिश्च नगरोपकण्ठे कण्ठे निचकृते निस्त्रिंशेन। अतिस्त्रीसङ्गर-
तमनङ्गपरवशं शुङ्गममात्यो वसुदेवो देवभूतिदासीदुहित्रा देवीव्य-
ञ्जनया वीतजीवितमकारयत्। असुरविवरव्यसनिनं चापजह्रुरपरि- 10
मितरमणीमणिनूपुरझणझणाह्लादरम्यया मागधं गोधनगिरिसुरङ्गया
स्वविषयं मेकलाधिपमन्त्रिणः। महाकालमहे च महामांसविक्रयवाद-
वातूलं वेतालस्तालजङ्घो जघान जघन्यजं प्रद्योतस्य पौणिकिं कुमारं

मध्ये तच्छद्मना स्थित्वाऽसिलतया खड्गेन मृणालमिवेत्यनेन शिरश्छेदः सुलभ-
तयाऽप्रतिरोधेनेति ज्ञायते अलुनाच्छिच्छेद। **प्रियतन्त्रीति**। प्रियं तंत्रीवाद्यं
यस्य तस्याश्मकेश्वरस्य शरभस्य शिरो मूर्धानम् अलाबुवीणानामभ्यन्तरशुषि-
रेष्वन्तःछिद्रेषु निहिताः स्थापिता निशिताः तरवारयः खड्गा येस्ते गांधर्वच्छात्र-
च्छद्मानो गायकशिष्यवेषधारिणो रिपुपुरुषाः चिच्छिदुः। 'ऋष्टिः खड्गस्तरवारिः'
इति त्रिकाण्डशेषः। **प्रज्ञेति**। बलदर्शनस्य सैन्यावलोकनस्य व्यपदेशेन मिषेण
दर्शितमशेषं सैन्यं येन सोऽनार्योऽसत्कुलोत्पन्नः पुष्पमित्रो नाम सेनानीः सेनाधिपः
स्वामिनं चन्द्रगुप्तान्वयजं मौर्यं मौर्यकुलोत्पन्नं बृहद्रथं पिपेष चूर्णयामास। अतः
स्वबलावलोकनमप्यविश्वासितया स्वरक्षणोद्यममकृत्वा न कार्यमित्यर्थः। **आश्च-
र्येति**। आश्चर्ये कुतूहलं कौतुकं विद्यते यस्य सः। चंडीपतिः यंत्रयानेन विमाना-
दिना पंचतन्त्रे वर्णितरीत्या लगुडाश्वेन वा। अतः शत्रुप्रेषितेषु भृत्येषु न विश्वा-
स्यम्। **अतीति**। शुंगं तन्नामकम्। **असुरेति**। मेकलाधिपस्य किष्किन्धाया दक्षि-
णतो विद्यमानस्य देशस्य स्वामिनो मंत्रिणः। वर्णिता चेयं पुष्पमित्रस्य च कथा
विष्णुपुराणे चतुर्थांशस्य चतुर्विंशेऽध्याये। असुरविवरेऽहिविवरे व्यसनिनमासक्त-
मपरिमितानामसंख्यानां रमणीनां मणिनूपुराणां झणझणाह्लादेन झणझणेतिशब्देन
रम्यया मनोहरया गोधनस्य गिरेः सुरंगया विवरमार्गेण स्वविषयं स्वदेशमपजह्रुः।
महेति। महाकालमहे महाकालोत्सवे महामांसं नरमांसं तस्य विक्रयस्य

कुमारसेनम् । रसायनरसाभिनिवेशिनश्च वैद्यव्यञ्जनाः सुबहुपुरुषान्त-
रप्रकाशितौषधगुणा गणपतेर्विदेहराजसुतस्य राजयक्ष्माणमजनयन् ।
स्त्रीविश्वासिनश्च महादेवीगृहगूढभित्तिभागभ्राता भद्रसेनस्याभवन्मृत्यवे
कालिङ्गस्य वीरसेनः । मातृशयनीयतूलिकातलनिषण्णश्च तनयोऽन्यं
तनयमभिषेक्तुकामस्य दध्रस्य करूषाधिपतेरभवन्मृत्यवे । उत्सारकरुचिं 5
च रहसि ससचिवमेव दूरीचकार चकोरनाथं शूद्रकदूतश्चन्द्रकेतुं
जीवितात् । मृगयासक्तस्य च मध्नतो गण्डकानुद्दण्डनड्वलनलवन-
निलीनाश्च चम्पाधिपचमूचरभटाश्चामुण्डीपतेराचेमुः प्राणान्पुष्करस्य ।
बन्दिरागपरं च परप्रयुक्ता जयशब्दमुखरमुखा मङ्क्षु मौखरिं मूर्खं
क्षत्रवर्माणमुदखनन् । अरिपुरे च परकलत्रकामुकं कामिनीवेशगुप्तश्च 10

वादस्तस्मिन्वातूलमुन्मत्तं पौणकिं पुणकगोत्रोत्पन्नं प्रद्योतस्य जघन्यजं कनीयांसं कुमारं बालं कुमारसेनं तालजंघस्तन्नामको वेतालो जघान । अत ईदृशैर्विवादोपि न कार्य इत्यर्थः । **रसायनेति** । सुबहुष्वनेकेषु पुरुषान्तरेष्वन्येषु पुरुषेषु प्रकाशिता औषधगुणा यैस्ते वैद्यस्य व्यंजनं वेशो येषां ते जना रसायने औषधविशेषेऽभिनिवेशिनो बद्धादरस्य विदेहराजसुतस्य गणपते राजयक्ष्माणं क्षयरोगमजनयन् । अतो वैद्यादीन् सुपरीक्ष्यैवौषधं ग्राह्यमित्यर्थः । **स्त्रीविश्वासिन इति** । पत्नीष्वपि न विश्वास्यमित्यर्थः । **मात्रिति** । मातुः शयनीयस्य शय्यायास्तूलिकोपधानं तस्य तले निषण्णो दध्रस्य तन्नामकस्य । पुत्रतोपि नृपाणां भीतिः । तदुक्तं कामंदकनीतिशास्त्रे सप्तमे सर्गे । 'नहि देवीगृहं गच्छेदात्मीयात्स निवेशनात् । अत्यर्थं वल्लभोपीह विश्वासं स्त्रीषु न व्रजेत् ॥ ५१ ॥ देवीगृहगतं भ्राता भद्रसेनममारयत् । मातुः शय्यांतरे लीनः कारुषं चौरसः सुतः ॥ ५२ ॥ **उत्सारकेति** । उत्सारके कंचुकिनि रुचिः प्रेम यस्य तं चकोरनाथं ससचिवं समन्त्रिणं चन्द्रकेतुं शूद्रकदूतो दूरीचकार जघान । अतः सेवकजने नातिप्रेमवता भाव्यम् । **मृगयेति** । गंडकान् खड्गान् । उद्धतो दंडो यस्य तस्य नड्वलस्य नलप्रचुरस्य नलवने निलीनाः । अत्र पुनर्नलो द्विरुक्तः नड्वल इत्यनेनैव तस्योक्तत्वात् । कोशेषु नडशब्दस्य नलवाचित्वात् । 'नडशादाड्ड्वलच्' इत्यनेन नडशब्दाड् ड्वलच् प्रत्ययो मत्वर्थीयः । चामुंडीपतेः तन्नामिकाया नगर्याः स्वामिनः । **बंदीति** । मंखाश्चारणाः । **अरिपुर इति** । कामिनीवेषगुप्तः गूढं धृतकामिनीवेशः । चन्द्रगुप्तभ्रातृजायां ध्रुवदेवीं कामयमानो ध्रुवदेवीवेषधारिणा

चन्द्रगुप्तः शकपतिमशातयदिति । प्रमत्तानां प्रमदाकृताः प्रमादाः श्रुतिविषयमागता एव देवस्य । यथा मधुमोदितं मधुरकसंलिप्तैर्लाजैः सुप्रभा पुत्रराज्यार्थं महासेनं काशिराजं जघान । व्याजजनितकंदर्पदर्पा च दर्पणेन क्षुरधारापर्यन्तेनायोध्याधिपतिं परंतपं रत्नवती जारूथम्, विषचूर्णचुम्बितमकरन्देन च कर्णेन्दीवरेण देवकी देवरानुरक्ता 5 देवसेनं सौम्हयम्, योगपरागविरसवर्षिणा च मणिनूपुरेण वल्लभा सपत्नीरुषा वैरन्त्यं रन्तिदेवम्, वेणीनिगूढेन च शस्त्रेण विन्दुमती वृष्णिं विदूरथम्, रसदिग्धमध्येन च मेखलामणिना हंसवती सौवीरं वीरसेनम्, अदृश्यागदलिप्तवदना च विषवारुणीगण्डूषपायनेन पौरवी पौरवेश्वरं सोमकम्'। इत्युक्त्वा विरराम स्वाम्यादेशसंपादनाय 10 च निर्जगाम ।

चन्द्रगुप्तेन शकाधिपतिर्हतः । प्रमदाभिः युवतिभिः कृताः । अतएव स्त्रीषु नैव विश्वास्यम् । तांश्च प्रमादान्कथयति । मधुना मद्येन मोदितं संतुष्टम् । एतेन विषमिश्रितलाजदानवेलायां तदज्ञाने कारणत्वं दर्शितम् । मधुरकेण विषेण संलिप्तैर्लाजैः । तदुक्तं तत्रैव कामंदके । 'लाजान् विषेण संयोज्य मधुनातिविलोभितां । देवी तु काशीराजानं निजघान रहोगतं' ॥ ५३॥ व्याजेन जनितः कंदर्पदर्पो मदनपीडा यया सा क्षुरधारेव नापितशस्त्राग्रमिव पर्यंतो यस्य तेन दर्पणेन मुकुरेण । परंतपं परान् शत्रून् तापयति पीडयति तम् । 'द्विषत्परयोस्तापे' इत्यनेन खच् । विषचूर्णेन विषक्षोदेन चुम्बितो युक्त इत्यर्थः मकरन्दो मधु यस्य तेन कर्णेन्दीवरेण श्रवणालंकारकमलेन देवरे भर्तुः कनीयसि भ्रातर्यनुरक्ता प्रेमवती । योगपरागस्य अभिचारचूर्णस्य विसरं समूहं वर्षति तेन मणिनूपुरेण वैरन्त्यं विरन्त्या नाम नगर्याः स्वामिनम् । **वेणीनिगूढेनेति** । तथा च वराहमिहिरः 'शस्त्रेण वेणीविनिगूहितेन विदूरथं स्वा महिषी जघान। विषप्रदिग्धेन च नूपुरेण देवी विरक्ता किल काशिराजम्' । रसदिग्धो विषलिप्तो मध्यो यस्य तेन मेखलामणिना रसनारत्नेन । तदुक्तं तत्रैव कामंदके 'विषदिग्धेन सौवीरं मेखलामणिना नृपं । नूपुरेण च वैरंत्यं जारुथं दर्पणेन च ॥ ५४ ॥ वेण्यां शस्त्रं समाधाय तथापि च विदूरथम्' इति। अदृश्येनागदेन विषहरौषधेन लिप्तं वदनं यस्याः सा विषवारुण्या विषमिश्रितमद्यस्य गण्डूषस्य चुलुकस्य पायनेन प्राशनेन । विषहरौषधेन लिप्ते स्वमुखे विषमिश्रितं मद्यं धृत्वा तस्य चुलुको राज्ञो मुखे क्षिप्तस्तेन च पौरवेश्वरो मृत इत्यर्थः ।

22 देवोऽपि हर्षः सकलराज्यस्थितीश्चकार। ततश्च तथा कृतप्रतिज्ञे प्रयाणं विजयाय दिशां समादिशति देवे हर्षे गतायुषां प्रतिसामन्तानामुदवसितेषु बहुरूपाण्युपलिङ्गानि वितेनिरे। तथा ह्यविप्रकृष्टाः कालदूतदृष्टय इवेतस्ततश्चेरुश्चटुलाः कृष्णशारश्रेणयः। प्रचलितलक्ष्मीनूपुरप्रणादप्रतिमा मधुसरघासंघातझंकारा जह्लादिरेऽजिरे। विवृतविकृत- 5 वदनविवरविसृतवह्निविसरा वासरेऽपि विरसं विरेसुश्चिरमशिवार्थमशिवाः शिवाः। शवपिशितप्ररूढप्रणया इव कपिपोतकपोलकपिलपक्षतयः काननकपोताः पेतुः। आमन्त्रयमाणा इव दधुरकालकुसुमानि सममुपवनतरवः। तरलकरतलप्रहारप्रहतपयोधरा रुरुदुः प्रसभं सभाशालभञ्जिकाः। ददृशुरासन्नकचग्रहभयोद्भ्रान्तोत्तमाङ्गमिवात्मानं कबन्धमादर्शोदरेषु 10 योधाः। चूडामणिषु चक्रशङ्खकमललक्ष्माणः प्रादुरभवन्पादन्यासा राज-

देवोपीति। उदवासितेषु गृहेषु। उपलिंगानि दुश्चिन्हानि। अविप्रकृष्टाः अदूराः कृष्णशारश्रेणयो मृगपंक्तयः। वन्यानां मृगाणां समीपागमनं न शुभम्। तदुक्तं वराहमिहिरेण 'सीमागता वन्यमृगा रुवन्तः स्थिता व्रजन्तोऽथ समापतन्तः। संप्रत्यतीतैष्यभयानि दीप्ताः कुर्वन्ति शून्याः परितो भ्रमन्तः'। प्रचलिताया निर्गच्छन्त्या लक्ष्म्या नूपुरप्रणादप्रतिमा मंजीरनादतुल्या मधुसरघानां 'मधमाशी' इति भाषायां प्रसिद्धानां संघातस्य समूहस्य झांकारास्तथाशब्दा अजिरेऽगणे जह्लादिरे रुरुवुः। विवृतानां विकासिनां विकृतानां विकारिणां वदनानां मुखानां विवरेभ्यो विसृता बहिरागता वन्हिविसरा वन्हिसमूहा यासां ताः। अशिवा अशुभसूचका शिवाश्चिरं बहुकालं विरसं कठोरं वासरेपि दिवापि विरेसुः आरेटुः। तदुक्तं वराहमिहिरेण 'सर्वदिक्ष्वशुभा दीप्ता विशेषेणान्ह्यशोभनाः। पुरे सैन्येऽपसव्या च कष्टा सूर्योन्मुखी शिवा'। कपिपोतस्य कपिबालस्य कपोल इव गल्ल इव कपिलास्ताम्रवर्णाः पक्षतयो पक्षमूलानि येषां ते काननकपोता वनपारावताः शवपिशिते प्रेतमांसे प्ररूढः प्रणयः प्रेम येषां तथाभूता इव। तरलानां चंचलानां करतालानां प्रहारैः प्रहताः पयोधराः स्तना याभिस्ताः सभासालभंजिकाः सभास्था मूर्तयः प्रसभमुच्चै रुरुदुः। ददृशुरिति। आसन्नस्य समीपागतस्य कचग्रहस्य केशग्रहस्य भयादुद्भ्रान्तं यत्र कुत्रापि गतमुत्तमांगं शिरो यस्य तथैव कबंधं शिरोरहितं देहं योधा आदर्शेषु मुकुरेषु ददृशुः। समासन्ननाशो नरः स्वशिरो न पश्यति। तथाच धर्मसिन्धौ 'अदर्शनं स्वशिरसः प्रतिबिम्बे जलादिषु।

१ 'प्रसरा'

महिषीणाम् । चेटीचामराण्यकस्मादधावन्त पाणिपल्लवात् । प्रणयकलहेऽपि दत्तपृष्ठाश्चिरमभवन्भटाः पराङ्मुखा मानिनीनाम् । करिकपोलेषु व्यघटन्त मधुलिहां मधुमदिरापानगोष्ठ्यः । समाघ्रातयममहिषगन्धा इव ताम्यन्तः स्तम्बकरिमपि हरयो हरितं नवयवसं न चेरुः । चलवलयावलीवाचालबालिकातालिकातोद्यलालिता अपि न ननृतुर्मन्दा मन्दिरमयूराः । निशि निशि रजनिकरहरिणनिहितनयन इवोन्मुखस्तारमुपतोरणमकारणमकाणीत्कौलेयकगणः । गणयन्तीव गतायुषस्तर्जनतरलया तर्जन्या दिवसमाट वाटकेषु कोटवी । कुट्टिमेषु कुटिलहरिणखुरवेणीतरङ्गिण्यः शष्पराजयोऽजायन्त । जनितवेणीबंधानि निरञ्जनलोचनारोचींषि चषकमधुनि मुखकमलप्रतिबिम्बान्यदृश्यन्त भटीनाम् । 10

छिद्रप्रतीतिः छायायां स चिरं नैव जीवति ’ । अधावन्तापतन् । प्रणयकलहेपि प्रेमकलहेपि दत्तपृष्ठाः पृष्ठदर्शिनः किमु युद्धेष्वित्यर्थः । स्तम्बकरिं बद्धस्तम्बं पक्कं वा हरितं हरिद्वर्णं यवसं तृणं न चेरुर्नादुः । ‘स्तम्बशकृतोरिन्’ इत्यनेनेन् । अश्वानां यवसाद्यभक्षणमरिष्टसूचकम् । तथा च वराहमिहिरः । ‘ प्रद्वेषो यवसाम्भसां प्रपतनं स्वेदो निमित्ताद्विना कंपो वा वदनाच्च रक्तपतनं धूमस्य वा संभवः । अस्वप्नश्च विरोधिता निशि दिवा निद्रालसध्यानता सादोऽधोमुखता विचेष्टितमिदं नेष्टं स्मृतं वाजिनाम् ’ । चलानां वलयानां कंकणानामवलीभिः पंक्तिभिर्वाचाला बालिकानां तालिकाः करतालध्वनय एवातोद्यानि वाद्यानि तैर्लालिता अनुनीता मंदिरमयूरा गृहबर्हिणो न ननृतुः । **निशीति** । रजनिकरस्य चंद्रमसो हरिणे लांछने निहितनयनः स्थापितदृष्टिरिवोन्मुखः । ऊर्ध्वमुखत्वस्य कारणमिदम् । कौलेयकगणः सारमेयसमूहः । ‘ कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु ’ इत्यनेन ढकञ् । उपतोरणं गोपुरोपरि । तदुक्तं वराहमिहिरेण ‘ पीडा पुरस्यैव च गोपुरस्थे ’ इति । गतायुषो मृतान् तर्जनेन क्रोधेन तरलया तर्जन्या अंगुष्ठसमीपाङ्गुल्या गणयन्तीव कोटवी नग्ना स्त्री वाटकेषु रथ्यासु बभ्राम । ‘ स्त्री नग्निका कोटवी स्य त् ’ इत्यमरः । ‘ वाटः पथि वृतौ वाटम् ’ इति हैमः । कुट्टिमेषु निबद्धासु भूमिषु कुटिला वक्रा हरिणखुरवेण्यो हरिणशफपरंपरा एव तरंगा विद्यन्ते यस्यास्ताम् । अत्र बहुव्रीहिणैव निर्वाहे मत्वर्थीयश्चिन्त्यः । ‘न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः ’ इतिवचनात् । **जनितेति** । निरंजनान्यंजनरहितानि लोचनत्विषि नेत्रकान्तयो येषां तानि भटीनां वीरवनितानां

---

१ ‘ रोचना ’ ‘ लोचनरुचीनि ’

समासन्नात्मापहारचकिता इव चक्रम्पिरे भूमयः । वध्यालंकाररक्तचन्दनरसच्छटा इवालक्ष्यन्त शूराणां पतिताः शरीरेषु विकसितबन्धूककुसुमशोणितशोचिषः शोणितवृष्टयः । पर्यग्नीकुर्वाणा इव विनश्वरीं श्रियमविरलस्फुरत्स्फुलिङ्गाङ्गारोद्गारदग्धतारागणा गणशः पतन्तः प्रज्वलन्तो न व्यरंसिषुरुल्कादण्डाः । प्रथममेव प्रतीहारीवापहरन्ती प्रतिभवनं चामरातपत्रव्यजनानि परुषा बभ्राम वात्येति । 5

इति श्रीबाणभट्टकृतौ हर्षचरिते राजप्रतिज्ञावर्णनं नाम षष्ठ उच्छ्वासः ।

मुखकमलप्रतिबिंबानि । वीरमरणेन नेत्राणामंजनराहित्यं तच्चाशुभसूचकम् । वध्येति । विकसितं प्रफुल्लबन्धूककुसुमं बंधुजीवपुष्पं तदिव शोणितानि रक्तानि शोचींषि रोचींषि यासां ताः शोणितस्य रक्तस्य वृष्टयः । विनश्वरीं नश्यन्तीं श्रियं लक्ष्मीं पर्यग्नीकुर्वाणा इव अपरिगताग्निं परिगताग्निं कुर्वाणा इव । हवनीयद्रव्यमभितः साग्निज्वालानां दर्भाणां प्रदक्षिणीकरणं पर्यग्नीकरणमुच्यते । अत्र तु नभस्तःपतितैरुल्कादण्डै राज्यश्रियः पर्यग्नीकरणं कृतमिति कल्पना । अविरलं सततं स्फुरद्भिर्विलसद्भिः स्फुलिंगांगाराणामग्निकणानामुद्गारैर्वह्निः क्षेपणैर्दग्धास्तारागणा यैस्ते । उल्कादण्डा नभस्तः पतन्तो तारकादण्डा न व्यरंसिषुर्न निववृतिरे । 'यमरमनमातां सक्च' इत्यनेन सगागमः । 'व्याङ्परिभ्यो रमः' इत्यनेन परस्मैपदं च ।

इति महाकविश्रीबाणभट्टकृतहर्षचरितव्याख्यायां बालबोधिन्यां षष्ठ उच्छ्वासः ।

सप्तम उच्छ्वासः ।

अङ्गनवेदी वसुधा कुल्या जलधिः स्थली च पातालम् ।
वल्मीकश्च सुमेरुः कृतप्रातिज्ञस्य वीरस्य ॥ १ ॥
धृतधनुषि बाहुशालिनि शैला न नमन्ति यत्तदाश्चर्यम् ।
रिपुसंज्ञकेषु गणना कैव वराकेषु काकेषु ॥ २ ॥

I अथ व्यतीतेषु च केषुचिद्दिवसेषु, मौहूर्तिकमण्डलेन शतशः 5
सुगणिते सुप्रशस्तेऽहनि, दत्ते चतसृणामपि दिशां विजययोग्ये दण्ड-

---

श्रीवेङ्कटेशो विजयते ।

यत्कृपावशतो मादृक्छक्तो व्याख्यानकर्मणि ।
सर्वविद्यावदातं तं राघवेन्द्रं गुरुं भजे ॥ १ ॥

ननु दुःखाभिभूतेन भूमेर्निर्गौडीकरणं प्रतिज्ञातमपि विपुलतया भूप्रदेशस्य यत्र कुत्राप्यात्मानं निगूहयंतं तं कथं हर्षो हन्यादित्यादिशंकादूरीकरणाय वीरसामर्थ्यं वर्णयति । **अंगनेति** । कृतप्रतिज्ञस्यारूढप्रतिज्ञस्य वीरस्य हर्षस्य वसुधा पृथ्वी अंगनवेदी चत्वरस्था परिष्कृता भूमिः । एतेन वीरस्य सकलभुवि सुखेन पर्यटनं द्योत्यते । जलधिः सागरः कुल्या वारिप्रणालिका । एतेन द्वीपांतरेऽपि गमनसौकर्यं ज्ञायते । ‘ कुल्या वारिप्रणालिका ’ इति धरणिः । पातालं रसातलं स्थल्यकृत्रिमा भूः । एतेन पातालावतरणेऽपि प्रयासाभावः सूचितः । सुमेरुस्तदाख्यपर्वतो वल्मीकः । तदारोहणमप्यनायासेनेति ध्वनितम् ॥ १ ॥

एवमारूढप्रतिज्ञस्य हर्षस्य सामर्थ्यवर्णनेन तत्तुल्यो वीरो रिपुपक्षे नास्ति किमित्यत आह । **धृतेति** । बाहुभ्यां शालते शोभते तस्मिन् वीरे धृतधनुषि गृहीतधनुष्ये सति । समासान्तविधेरनित्यत्वाद् ‘धनुषश्च’ इत्यनेन प्राप्तस्यानङोऽभावः। शैलाः पर्वता यत्र नमन्ति नम्रा न भवन्ति तदाश्चर्यं स चमत्कारः । रिपुः संज्ञा नाम येषां तेषु वराकेषु दीनेषु काकेषु बलिभुक्षु कैव गणना किं संख्यानम् । ते तु नम्रा भविष्यन्त्येवेति भावः ॥ २ ॥

अथेति । भवनान्निर्जगामेति संबंधः । व्यतीतेष्वतिक्रान्तेषु । मौहूर्तिकानां गणकानां मण्डलेन समूहेन । विजयस्य जयस्य योग्ये दण्डस्य सेनाया

यात्रालग्ने, सलिलमोक्षविशारदैः शारदैरिवाम्भोधरैः कालधौतैः शात-
कौम्भैश्च कुम्भैः स्नात्वा, विरचय्य परमया भक्त्या भगवतो नीललोहित-
स्यार्चाम्, उदर्चिषं हुत्वा प्रदक्षिणावर्तशिखाकलापमाशुशुक्षणिं, दत्त्वा
द्विजेभ्यो रत्नवन्ति राजतानि जातरूपमयानि च सहस्रशस्तिलपात्राणि
कनकपत्रलतालंकृतशफशृङ्गशिखरा गाश्चार्बुदशः, समुपविश्य वितत- 5
व्याघ्रचर्मणि भद्रासने, विलिप्य प्रथमविलिप्तायुधो निजयशोधवले-
नाचरणतश्चन्दनेन शरीरं, परिधाय राजहंसमिथुनलक्ष्मणी सदृशे दुकू-
ले, परमेश्वरचिह्नभूतां शशिकलामिव कल्पयित्वा सितकुसुममुण्डमा-
लिकां शिरसि, नीत्वा कर्णाभरणमरकतमयूखमिव कर्णगोचरतां गोरो-
चनाच्छुरितमभिनवं दूर्वापल्लवं, विन्यस्य सह शासनवलयेन गमनम- 10

यात्राया गमनस्य लग्ने मेषादिराश्युदये । 'राशीनामुदयो लग्नम्' इत्यमरः । सलिलमोक्षो जलसिंचनं वृष्टिश्च तस्मिन्विशारदैः प्रवीणैः शारदैः शरत्संबधिभिरंभोधरैर्मेघैरिव । 'संधिवेलाद्यृतुनक्षत्रेभ्योण्' इत्यनेनाण् । सलिलस्य जलस्य मोक्षेण वर्षाकाले कृतेन त्यागेन विशारदैः इदानीं शुभ्रैः प्रवीणैश्च । कालधौतै राजतैः शातकुम्भैः सुवर्णमयैश्च कुम्भैर्घटैः करणैः स्नात्वा नीललोहितस्य शंकरस्यार्चां पूजां विरचय्य कृत्वा प्रदक्षिणोऽपसव्य आवर्तो वर्तुलः शिखानां ज्वालानां कलापः समूहो यस्य तमुदर्चिषमुद्गतमार्चिस्तेजो यस्य तमाशुशुक्षणिमग्निम् । रत्नवन्ति रत्नयुक्तानि राजतानि रौप्यमयानि जातरूपमयानि सुवर्णमयानि तिलपात्राणि तिलपूरितभाजनानि। कनकस्य हेम्नः पत्रलताभिः अलंकृता भूषिताः शफाः खुराः शृंगाणां विषाणानां शिखराण्यग्राणि यासां ताः । अर्बुदशः अर्बुदं दशकोट्यः अर्बुदमर्बुदमित्यर्बुदशः । 'संख्यैकवचनाच्च वीप्सायाम्' इति शः । विततमास्तीर्णं व्याघ्रचर्म व्याघ्राजिनं यस्मिंस्तस्मिन् भद्रासने मणिमये नृपासने निजयश इव स्वकीर्तिरिव धवलं शुभ्रं तेन चंदनेन मलयजेन प्रथममादौ विलिप्तं चर्चितमायुधं शस्त्रं येन सः शरीरं देहमाचरणतश्चरणादारभ्य । राजहंसमिथुनस्य राजहंसद्वन्द्वस्य लक्ष्म चिन्हं ययोस्ते सदृशे समे दुकूले परिधाय धृत्वा । परमेश्वरस्य शंकरस्य नृपश्रेष्ठस्य च चिन्हभूतां शशिकलां चन्द्रलेखामिव सितानां शुभ्राणां कुसुमानां मुण्डमालिकां शिरोमाळां शिरसि मूर्धनि कल्पयित्वा कृत्वा । गोरोचना गोपित्तोद्भवपदार्थस्तेन च्छुरितं व्याप्तमभिनवं नूतनं दूर्वापल्लवं कर्णाभरणं कर्णालंकारस्तस्य मरकतस्य गारुत्मतस्य मयूखं किरणमिव कर्णगोचरतां कर्णविषयं नीत्वा । शासनवलयेन मुद्रा-

ङ्गलप्रतिसरं प्रकोष्ठे, परिपूजितप्रहृष्टपुरोहितकरप्रकीर्यमाणशान्तिसलिलसीकरनिकराभ्युक्षितशिराः संप्रेष्य महार्हाणि वाहनानि बहलरत्नालोकलिप्तककुम्भि च भूषणानि भूभुजां, संविभज्य क्लिष्टकार्पटिककुलपुत्रलोकमुचितैः प्रसाददानैश्च, विमुच्य बन्धनानि, नियुज्य तत्कालस्मरणस्फुरणेन कथितात्मानमिव चाष्टादशद्वीपजेतव्याधिकारे दक्षिणं भुजस्तम्भम्, अहमहमिकया सेवकैरिव सुनिमित्तैरपि समग्रैरग्रतो भवद्भिः प्रमुदितप्रजाजन्यमानजयशब्दकोलाहलो हिरण्यगर्भ इव ब्रह्माण्डात्कृतयुगकरणाय भवनान्निर्जगाम । 5

कटकेन सह गमनस्य मंगलप्रतिसरो मंगलकंकणं प्रकोष्ठे कूर्परादधःप्रदेशे विन्यस्य संस्थाप्य परिपूजितैः सत्कृतैरत एव प्रहृष्टैः पुरोहितैः उपाध्यायैः करप्रकीर्यमाणं हस्ताक्षिप्यमाणं शान्तिसलिलं शान्त्युदकं तस्य सीकरनिकरेण कणसमूहेनाभ्युक्षितं सिक्तं शिरो मस्तकं यस्य सः । महार्हाण्यमूल्यानि वाहनानि यानानि । बहलेन महता रत्नानामालोकेन तेजसा लिप्ता दिग्धाः ककुभो दिशो यैस्तानि भूषणान्यलंकारान् । भूभुजां संप्रेष्य नृपसमीपं प्रहित्य । क्लिष्टाः श्रान्ताः कार्पटिका यात्रिकाः कुलपुत्राः कुलीना राजपुत्राश्च तेषां लोकं समूहमुचितैः प्रसाददानैर्योग्यैः प्रसादविसर्जनैः संविभज्य विभागं कृत्वा समीपस्थितानां श्रान्तानां यात्रिकाणां कुलपुत्राणां च भेदं योग्यसत्कारेण प्रदर्श्येत्यर्थः । 'कुलपुत्रलोकमोचितैः' इत्यपपाठः । बन्धनानि कारागृहाणि कारास्थजनानित्यर्थः विमुच्य उत्सृज्य तत्काले तदानीं स्मरणस्य स्फुरितं स्पन्दनं स्मरणजनकस्पन्दनं तेन । तत्कालस्फुरितेनेति सम्यक्पाठः । कथितः सूचित आत्मा येन तमिव दक्षिणं भुजस्तंभमपसव्यं हस्तम् अष्टादशानां द्वीपानां जेतव्यं जयस्तस्याधिकारे नियुज्य । जेतव्येति भावे तव्यः । अहमहमिकया परस्परस्पर्धया । अहमिति विभक्तिप्रतिरूपाव्ययस्य वीप्सायां द्वित्वे 'अत इनिठनौ' इत्यनेन मत्वर्थीयष्ठन् । सुनिमित्तैः शुभैः शकुनैः करणैः प्रमुदितया संतुष्टया प्रजया जन्यमानः क्रियमाणो जयशब्दस्य कोलाहलः कलकलो यस्य सः ब्रम्हाण्डाद् ब्रम्होत्पत्तिस्थानाद्धिरण्यगर्भो ब्रह्मा इव । 'अप एव ससर्जादौ तासु वीर्यमवासृजत् । तदण्डमवभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन् जज्ञे स्वयं ब्रम्हा' इति वचनाद् ब्रह्माण्डस्य ब्रह्मकारणत्वम् । तस्मादण्डाच्च कृतयुगोत्पादनाय ब्रह्मा निर्जगाम । हर्षोऽपि कलिधर्मप्रवर्तकान् हत्वा कृतयुगम् कर्तुमित्यर्थः ।

---

१ 'मोचितैः' २ 'तत्कालस्फुरितेन',

2 नातिदूरे च नगरादुपसरस्वति निर्मिते महति तृणमये, समुत्तम्भिततुङ्गतोरणे, वेदीविनिहितपल्लवललामहेमकलशे, बद्धवनमालादाम्नि, धवलध्वजमालिनि, भ्रमच्छुक्लवाससि, पठद्द्विजन्मनि मान्दिरे प्रस्थानमकरोत्। तत्रस्थस्य चास्य ग्रामाक्षपटलिकः सकलकरणिपरिकरः 'करोतु देवो दिवसग्रहणमद्यैवावन्ध्यशासनः शासनानाम्' 5 इत्यभिधाय वृषाङ्कामभिनवघटितां हाटकमयीं मुद्रामुपनिन्ये। जग्राह च तां राजा। समुपस्थापिते च प्रथमत एव मृत्पिण्डे परिभ्रश्य करकमलादधोमुखी महीतले पपात मुद्रा। मन्दाश्यानपङ्कपटले मृदुमृदि सरस्वतीतीरे स्फुटं व्यराजन्त राजयो वर्णानाम्। अमङ्गलाशङ्किनि च विषीदति परिजने नरपतिरकरोन्मनस्येतत्—'अतत्त्वदर्शिन्यो हि भव- 10

नातिदूर इति। उपसरस्वति सरस्वत्याः समीपे। समुत्तम्भितानि उत्थापितानि तुंगानि तोरणानि बहिर्द्वाराणि यस्य तस्मिन्। वेद्यां परिष्कृतभुवि विनिहिताः स्थापिताः पल्लवैः पर्णैः ललामाः सुंदराः अथवा पर्णानां ललामानि चिन्हानि येषु ते हेमकलशाः सुवर्णघटाः यस्मिंस्तस्मिन्। बद्धा वनमालादामानः पुष्पैः पर्णैश्च ग्रथितानां स्रजो यस्मिन्। दामशब्दोऽलंकारार्थः। धवलानां शुभ्राणां ध्वजानां पताकानां माला पंक्तिर्विद्यते यस्य तस्मिन्। वीह्यादित्वादिनिर्मत्वर्थीयः। भ्रमन्ति शुक्लानि शुभ्राणि वासांसि वस्त्राणि यस्य तस्मिन्। पठन्तो वेदमन्त्रान् जपन्तो ब्राह्मणा यस्मिंस्तस्मिन् मंदिरे प्रस्थानं गमनमकरोत्। **तत्रस्थस्येति**। ग्रामाक्षपटलिकः 'पाटील' इति महाराष्ट्रभाषायां प्रथितो ग्रामाधिकारी सकलाः करणयः कायस्था लेख्यानि वा परिकरः सामग्री यस्य सः। स्वलेखकैः कायस्थैः 'कुलकर्णी' इति महाराष्ट्रभाषायां प्रथितैर्युक्त इत्यर्थः। अवन्ध्यं सफलं शासनमाज्ञा यस्य स देवः शासनानामाज्ञानां दिवसग्रहणं प्रारंभ इत्यर्थः करोतु। वृषो वृषभोऽङ्कश्चिन्हं यस्यां तामभिनवघटितां नूत्ननिर्मितां हाटकमयीं सुवर्णमयीं मुद्रां शासनांगुलीयम्। समुपस्थापित आनीते मृत्पिंडे मृद्गोलके परिभ्रश्य पश्चान्महीतले भूपृष्ठे पपात। मन्दाश्यान ईषच्छुष्कः पंकपटलः कर्दमसमूहो यस्य तस्मिन्। मृद्वी मृन्मृत्तिका यस्य तस्मिन्। अनेनाक्षरप्रातिमोत्पत्तेः संभवः सूचितः। अमङ्गलमशिवमाशंकते तस्मिन् परिजने सेवकवर्गे विषीदति खिद्यति सति। 'यस्य च भावेन भावलक्षणम्' इत्यनेन सप्तमी। अविदग्धानामपंडितानां धियो बुद्धयोऽतत्वदर्शिन्यः तत्वमनवलोकयन्त्यः सन्ति। निमित्तेन मुद्रास्खलनाक्षरप्रतिमोद्गमरूपशकुनेन। एकमप्रतिहतं शासनं यस्या-

न्यविदग्धानां धियः। तथाहि एकशासनमुद्राङ्का भूर्भवतो भविष्यतीति निवेदितमपि निमित्तेनान्यथा गृह्णन्ति ग्राम्याः'। इत्यभिनन्द्य मनसा महानिमित्तं तत्सीरसहस्रसंमितसीम्नां ग्रामाणां शतमदाद्द्विजेभ्यः। निनाय च तत्र तं दिवसम्। प्रतिपन्नायां शर्वर्यां संमानितसर्वराजलोकः सुष्वाप। 5

3 अथ गलति तृतीये यामे सुप्तसमस्तसत्त्वनिःशब्दे दिक्कुञ्जरजृम्भमाणगम्भीरध्वनिरताड्यत प्रयाणपटहः। अग्रतः स्थित्वा च मुहूर्तमिव पुनः प्रयाणक्रोशसंख्यापकाः स्पष्टमष्टावदीयन्त प्रहाराः पटहे पटीयांसः।

4 ततो रटत्पटहे, नन्दन्नान्दीके, गुञ्जद्गुञ्जे, कूजत्काहले, 10

स्तथाभूता मुद्रा अंके यस्याः सा भूः पृथ्वी। मुद्रांकिता भूर्भवदायत्ता स्यादिति शकुनतात्पर्यम्। ग्राम्याः ग्रामस्थाः युक्तायुक्तविवेचनरहिता इत्यर्थः। अन्यथा अमंगलत्वेन। सीरसहस्रेण हलस्य भूविलेखनवेलायां एकदा गमनं एकहलः। अनया रीत्या हलसहस्रेण संमिता परिच्छिन्ना सीमा येषां तेषां ग्रामाणां शतम्।

अथेति। सुप्तानि निद्रितानि यानि समस्तानि सकलानि सत्वानि प्राणिनः तेन निःशब्दे निनदरहिते तृतीये यामे प्रहरे गलति सत्यतिक्राम्यति सति। जृंभमाणश्च स दिक्कुंजरश्च विशेषणस्य परनिपातः बहुलग्रहणात्। दिक्कुञ्जरजृम्भमाण इव गम्भीरो ध्वनिर्यस्य सः। वस्तुतो 'दिक्कुञ्जरजृम्भणगंभीरध्वनिः' इति पाठेन भाव्यं परं न स उपलभ्यते। प्रयाणस्य क्रोशानां संख्यापकाः कथकाः। शेषषष्ठ्या समासः। अतएव तृजकाभ्यां कर्तरीति निषेधो न। पटीयांसः पटुतराः अष्टौ पटहे भेर्यां प्रहाराः दण्डताडनानि। अथाष्टक्रोशपरिमितं गमनं भावीति पटहप्रहारेण निवेदितमित्यर्थः।

तत इति। एवंविधे प्रयाणसमये राजभिः राजद्वारमापुपूर इति संबंधः। प्रयाणसमयं विशिनष्टि। रटन्तः शब्दं विदधतः पटहा आनका 'नगारा' इति भाषायां प्रसिद्धा यस्मिंस्तस्मिन्। नन्दन्ती संतुष्यन्त्यर्थात् शब्दं कुर्वाणा नान्दी मंगलपटहो यस्मिन्। गुञ्जन्त्यो विराविण्यः गुञ्जाः पटहभेदा यस्मिन्। गुञ्जा तु काकचिंचायां पटहे च कलध्वनौ' इति मेदिनी। शंकरस्तु 'गुंजासंज्ञः शंखभेदो यत्पृष्ठे जतु परिकीलितं भवति' इत्याह। कूजन्त्यः रवं कुर्वत्यः

---

1 'गुञ्जत्कुञ्जे'

शङ्खायमानशङ्खे, क्रमोपचीयमानकटककलकले, परिजनोत्थापनव्यापृत-
व्यवहारिणि, द्रुतद्रुघनघातघट्यमानकोणिकाकीलकोलाहलकलितक-
कुभि, बलाधिकृतबध्यमानपाटीपतिपेटके, जनज्वलितोल्कासहस्रालो-
कलुप्यमानत्रियामातमसि, यामचेटीचरणचलनोत्थाप्यमानकामिमिथुने,
कटुककटुकनिर्देशनश्यन्निद्रोन्मिषन्निषादिनि, प्रबुद्धहास्तिकशून्यीक्रिय- 5
माणशय्यागृहे, सुप्तोत्थिताश्वीयविधूयमानसटे, रटत्कटकमुखरखनित्र-
खन्यमानक्षोणीपाशे, समुत्कील्यमानकीलशिञ्जानहिञ्जीरे, उपनीयमा-

काहला वाद्यविशेषाः 'कर्णा' इति भाषायां प्रसिद्धाः यस्मिन् । 'काहला वाद्यभांडस्य भेदे' इति मेदिनी। क्रमेणोपचीयमानो वर्धमानः कटकस्य सेनायाः कोलाहलः कलकलो यस्मिन्। परिजनानां सेवकानामुत्थापने व्यापृता आसक्ता व्यवहारिणस्तत्तदधिकारिणो यस्मिन् । द्रुतं तूर्णं द्रुघनस्य मुद्गरस्य 'घण' इति भाषायां प्रसिद्धस्य घातेन ताडनेन घट्यमानाः उत्पाट्यमाना ये कोणिकाकीलाः पटकुट्यादिषु स्थापिताः कीलकास्तेषां कोलाहलेन ध्वनिना कलिता व्याप्ताः ककुभो दिशो यस्मिन् । बलाधिकृतेन सेनापतिना बध्यमानः परिगणनार्थमेकीकृतः पाटीपतीनां सैन्यागाराधिपानां कुलपुत्रकाणां वा पेटकः समूहो यस्मिन् । 'पेटकः पुस्तकादीनां मञ्जूषायां कदम्बके' इति मेदिनी । जनैर्ज्वलितानां प्रदीपितानामुल्कासहस्राणां दीपिकासहस्राणामालोकेन प्रकाशेन लुप्यमानं नश्यत् त्रियामाया रात्रेस्तमोन्धकारो यस्मिन् । यामचेटी प्रहरजागरणे नियुक्ता यामिका तया चरणस्य चलनेन पादस्पर्शेनोत्थाप्यमानानि विबोध्यमानानि कामिमिथुनानि कामिद्वन्द्वानि यस्मिन् । कटुकः प्रखरः कटुकानां प्रतिहाराणां निर्देश आज्ञा तेन नश्यन्ती निद्रा येषां ते तथाभूता अतएव उन्मिषन्तो जाग्रतो निषादिनो महामात्रा यस्मिन् । प्रतिहाराणां कटुवचनैर्गतनिद्रा गजपालका आसन्निति तात्पर्यार्थः । कटुकशब्दस्य प्रतिहारवाचकत्वं शंकरेणास्मिन्नेवोच्छ्वासे हंसवेगभाषणे 'कटुकवचनैरुद्वेजितस्य' इति प्रतीकेऽङ्गीकृतम् । प्रबुद्धेन निद्रोत्थितेन हास्तिकेन गजसमूहेन शून्यीक्रियमाणानि शय्यागृहाणि यस्मिन् । 'अचित्तहस्तिधेनोष्ठग्' इत्यनेन ठक् । आदौ सुप्तेन पश्चादुत्थितेनाश्वीयेनाश्वसमुदायेन विधूयमानाः कम्पिताः सटा ग्रीवारोमाणि यस्मिन् । 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' इत्यनेन छः । रटता खननवेलायां कृतशब्देन कटकेन सेनया मुखरैः सशब्दैः खनित्रैः अवदारणैः खन्यमाना उत्पाट्यमानाः क्षोणीपाशाः 'कुंपण' इति भाषायां प्रसिद्धाः क्षोणीबंधनानि यस्मिन् । समुत्कील्यमानैरुत्पाट्यमानैः कीलैः कीलकैः शिञ्जानाः

नानिगडतालकलरवोत्तालतुरङ्गतरङ्ग्यमाणखुरपुटे, लेशिकमुच्यमानमदस्यन्दिदन्तिसंदानशृङ्खलाखनखननिनादनिर्भरभरितदशदिशि, घासपूलकप्रहारप्रमृष्टपांसुलकरिपृष्ठप्रसार्यमाणप्रस्फोटितचर्मणि, गृहचिन्तकचेटकसंवेष्ट्यमानपटकुटीकाण्डपटमण्डपपरिवस्त्रावितानके, कीलककलापापूर्यमाणचिपिटचर्मपुटे, संभाण्डायमानभाण्डागारिणि, भाण्डागारवहनवाह्यमानबहुनालीवाहिके, निषादिनिश्चलानेकानेकपारोप्यमाणकोशकलसपीडापीडसंकटायमानसामन्तौकसि, दूरगतदक्षदासेरकाक्षि- 5

खनन्तो हिंजीरा गजशृंखला यस्मिन्। 'पारी तु शृंखला हिंजीरोऽस्त्री स्याद्' इति त्रिकाण्डशेषः। उपनीयमानानां समीपानीतानां निगडतालानां लोहमयाद्बंधनानां कलरवेणास्पष्टशब्देनोत्तालैर्बंधनासहत्वेन चंचलैस्तुरंगैरश्वैस्तरंग्यमाणाः कुटिलीक्रियमाणाः खुरपुटाः शफपुटा यस्मिन्। लेशिकैर्गजपालैर्मुच्यमाना उत्सृज्यमाना मदस्यंदिन उन्मत्ता दंतिनस्तेषां संदानशृंखलानां बंधनशृंखलानां खनखननिनादस्य खनखनेतिशब्दस्य निर्भरेणाधिक्येन भरिता व्याप्ता दश दिशो यस्मिन्। घासपूलकस्य तृणसमूहस्य प्रहारैः ताडनैः प्रमृष्टेषु शोधितेषु पांसुलेषु धूलिव्याप्तेषु करिपृष्ठेषु गजपृष्ठेषु प्रसार्यमाणानि स्थाप्यमानानि प्रस्फोटितानि शोधितानि चर्माणि चर्ममयाण्यास्तरणानि यस्मिन्। गृहचिंतकैर्गृहनिर्मातृभिश्चेटकैर्दासैः संवेष्ट्यमानानि संव्रियमाणानि पटकुट्यः 'राहुटि' इति प्रसिद्धाः कांडपटानां 'कनात' इति भाषायां प्रसिद्धानां मंडपाः परिवस्त्रास्तिरस्करिण्यो 'पडदा' इति भाषायां प्रसिद्धाः वितानानि च 'छत' इति भाषायां प्रसिद्धानि यस्मिन्। कीलकलापेन उत्पाटितकीलकसमूहेनापूर्यमाणा भ्रियमाणाः चिपिटा ह्रस्वाश्चर्मपुटाश्चर्मप्रसेवका यस्मिन्। संभाण्डायमाना भाण्डानि पात्राणि संचिन्वन्तो भाण्डागारिणो भांडागाराधिकारिणो यस्मिन्। 'पुच्छभांडचीवराण्णिङ्' इत्यनेन 'भांडात्समाचयने' इत्यस्मिन्नर्थे णिङि शानच्। भाण्डागारस्य पात्रादिगृहस्यार्थात्पात्रसमूहस्य वहने नयने वाह्यमाना नियुक्ता बहवो नालीवाहिका गजसेवकाः 'करिणां वासग्रहणेनियुक्ता' इति शंकरेण वर्णिता यस्मिन्। गजार्थं तृणसंचये नियुक्त इत्यर्थके नालीवासिकस्थाने लेखकप्रमादात् नालीवाहिकशब्दः पतितः इत्यपि स्यात्। निषादिभिर्महामात्रैर्निश्चलास्तेभ्यो भीत्या स्तब्धा अनेके च ते अनेपका गजास्तेष्वारोप्यमाणानां स्थाप्यमानानां कोशकलशानां धनघटानां पीडायास्त्रासस्यापीडेन संप्राप्त्या संकटायमानानि संबाधवन्ति सामन्तौकांसि समीपस्थगृ-

प्रप्रक्षिप्यमाणोपकरणसंभारभ्रियमाणदुष्टदन्तिनि, तिर्यगानमज्जाघनिक-
रकृच्छ्राकृष्टलम्बमानपरतन्त्रतुन्दिलचुन्दीजनजनितजनहासे, पीड्यमान-
शारशारिवरत्रागुणग्राहितगात्रविहारबृंहद्बहुबृहदुन्मदकरिणि, करिघटा-
घटमानघण्टाटांकाराक्रियमाणकर्णज्वरे, पृष्ठप्रतिष्ठाप्यमानकण्ठालककद-
र्थितकूजत्करभे, अभिजातराजपुत्रप्रेष्यमाणकुप्रयुक्ताकुलकुलीनकुलपु- 5
त्रकलत्रवाहने, गमनवेलाविप्रलब्धवारणाधोरणान्विष्यमाणनवसेवके, प्र-
सादवित्तपत्तिनीयमाननरपतिवल्लभवारवाजिनि, चारुचारभटसैन्यन्य-

ह्राणि यस्मिन्। हस्तिपृष्ठे स्थापनार्थमानीतैः कोशघटैः समीपस्थगृहाणां द्वाराणि पिहितानि तेन गृहवासिनां संकटमासीदिति तात्पर्यम्। दूरं गतं गमनं येषां तैः क्षिप्रगामिभिर्दक्षैः प्रवीणैः दासेरकैर्भृत्यैः क्षिप्रं तूर्णं प्रक्षिप्यमाणेन स्थाप्यमानेनोपकरणसंभारेण सामग्रीसमूहेन भ्रियमाणाः पूर्यमाणा दुष्टा दन्तिनो गजा यस्मिन्। तिर्यक्तिरश्चीनमानमन्तीषु जाघनिषु जंघासु करैर्हस्तैः कृच्छ्रेण कष्टेनाकृष्टो लंबमानः परतन्त्रः पराधीनस्तुंदिलः स्थूलोदरः चुंदीजनः कुट्टिनीसमूहस्तेन जनितो जनहासो लोकहास्यं यस्मिन्। उदरस्थौल्येनाश्वमारोढुमसमर्था अतएवाश्वपालकैः स्वजंघासु निहिताः परतंत्राः कुट्टिनीर्वीक्ष्य जनो जहासेत्यर्थः। जाघनिशब्दो भृत्यार्थेश्वतसोप्यर्थः समीचीनः स्यात्। पीड्यमानैर्बध्यमानैः शारैः कर्बुरवर्णैः शारीणां हस्तिपर्याणानां वत्रागुणैर्दूष्यागुणैर्गजमध्यबंधनरज्जुभिर्ग्राहितानां प्रतिबद्धानां गात्राणां विहारेण कंपनेन गर्जन्तो बृहन्तो महान्त उन्मदा मत्ताः करिणो गजा यस्मिन्। करिघटया गजसमूहेन घटमानः क्रियमाणो घंटाटांकारो घंटाध्वनिस्तेन क्रियमाणः उत्पाद्यमानः कर्णज्वरः कर्णपीडा यस्मिन्। पृष्ठे प्रतिष्ठाप्यमानैः कंठालकैर्गोणीभिः कदर्थिताः पीडिताः कूजन्त आरटन्तः करभा उष्ट्रा यस्मिन्। अभिजातैर्मानार्हैं राजपुत्रैः प्रेष्यमाणाभिः कुत्सितं प्रयुक्तं प्रयोगो यासां ताभिः कुट्टिनीभिरित्यर्थः आकुलानि पीडितानि कुलपुत्राणां कलत्राणां पत्नीनां वाहनानि यानानि यस्मिन्। अनेन तदा अभिजाता अपि कुलीनानां साध्वीनां त्रासदा आसन्निति ज्ञायते। गमनवेलायां विप्रलब्धैर्वंचितैर्वारणाधोरणैर्हस्तिपकैरन्विष्यमाणा मार्ग्यमाणाः नवाः सेवका यस्मिन्। प्रसादेनानुग्रहेण वित्तैः प्रसिद्धैः पत्तिभिर्नीयमाना नरपतिवल्लभा राजप्रिया वारस्य समयस्य वाजिनः शोभार्थमग्रे स्थाप्यमाना अश्वा यस्मिन्। चारूणां मनोहराणां चारभटानां वीराणां सैन्येन न्यस्यमानाः स्थाप्यमाना नासीरस्य कर्पूरस्य मंडलाडंबरेभ्यो मंडलाकारारंभार्थमित्यर्थः स्थूलाः

स्यमाननासीरमण्डलाडम्बरस्थूलस्थासके, स्थानपालपर्याणलम्बमानलवणकलायीकिङ्किणीनालीसनाथसंकलिततलसारके, कुण्डलीकृतावरक्षिणीजालजटिलवल्लभपालाश्वघटानिवेश्यमानशाखामृगे, परिवर्धकाकृष्यमाणार्धजग्धप्राभातिकयोग्याशनप्ररोहके, व्याक्रोशीजृम्भमाणघासिकघोषे, गमनसंभ्रमभ्रमदुत्तुण्डतरुणतुरङ्गमतन्यमानानेकमन्दुराविमर्दे, सज्जीकृतकरेणुकारोहाह्वानसत्वरसुन्दरीदथिमानमुखालेपने, चलितमातङ्गतुरङ्गप्रधावितप्राकृतप्रातिवेश्यकलोकलुण्ठ्यमाननिर्घाससस्यसंचये, सं- 5

स्थासका रचनाविशेषा यस्मिन् । नासीरमंडलस्य सेनामुखसमूहस्य आडंबरे विस्तारे स्थूलस्थासका महांतः तिलका यत्र स्वीयसेनास्थजनज्ञानार्थं चिन्हविशेषाः कृता इत्यर्थः । स्थानपालानामश्वपालानां पर्याणेषु लंबमानाभिः लवणकलायीभिरश्वानां दारुमयीभिर्मृगाकृतिभिः किंकिणीभिः क्षुद्रघंटाभिः नालीभिः " मेख " इतिभाषायां प्रसिद्धाभिः सनाथा युक्ताः संकलिताः सम्यक्स्थापिताः तलसारका अश्वमुखपट्टिकाः ' जेरबंद ' इति महाराष्ट्रभाषायां प्रसिद्धा यस्मिन् । कुण्डलीकृतैर्वर्तुलाकारतया स्थापितैः अवरक्षणीजालैरश्वबंधनरज्जूनां ' कासरा ' इति भाषायां प्रसिद्धानां समूहैर्जटिला व्याप्ता वल्लभपाला अश्वपाला यासु तास्वश्वघटास्वश्वसमूहेषु निवेश्यमानाः स्थाप्यमाना शाखामृगा वानरा यस्मिन् । ' अश्ववारो वल्लभपालकः ' इति त्रिकाण्डशेषः । दग्धानामश्वानां वानरमांसं हितमित्यतो वानरा रक्ष्यन्ते । परिवर्धकैरश्वपालैराकृष्यमाणा अर्धजग्धा अर्धभक्षिता प्राभातिके प्रभातकाले योग्यमशनं भक्षणं येषां तथाभूता प्रारोहकाः कोमलांकुराः यस्मिन् । प्रारोहक इत्यत्र प्रौढिक इति टीकाकृत्पाठः समीचीनश्च । प्रौढिकाः ' तोवरा ' इति भाषायां प्रसिद्धाः । व्याक्रोशीभिः परस्पराव्हानैर्जृम्भमाणो वर्धमानो घासिकघोषो महामात्रशब्दो यस्मिन् । गमनस्य संभ्रमेण त्वरया भ्रमद्भिरुत्तुण्डैरूर्ध्ववदनैस्तरुणैस्तुरंगमैरश्वैस्तन्यमानः क्रियमाणोऽनेकेषां मंदुराणां वाजिशालानां विमर्दो ध्वंसो यस्मिन् । सज्जीकृतानां करेणुकानामारोहा हस्तिपालास्तेषामाव्हानेन सत्वराभिर्जाततवराभिः सुंदरीभिर्दीयमानं मुखालेपनं मुखालंकृतिलेपनं यस्मिन् । चलितैर्मातंगैर्हस्तिभिस्तुरंगैश्च करणैः प्रधावितास्तूर्णमागताः प्राकृता ग्राम्याः प्रातिवेश्यकलोकाः समीपनिवासिनो जनास्तैर्लुण्ठ्यमानः निर्घाससस्यस्य भुक्तशेषसस्यस्य संचयो यस्मिन् । संचरन्तश्चेलचक्रेण वस्त्रसमूहेनाक्रान्ताश्चक्रीवन्तो गर्दभा यस्मिन् ।

---

१ ' प्रौढिके '

चरच्चेलचक्राक्रान्तचक्रीवति, चक्रचीत्कारिगन्त्रीगणगृह्यमाणप्रहतवर्त्मनि, अकाण्डदीयमानभाण्डभरितानडुहि, निकटघासलाभलुभ्यल्लम्बमानप्रथमप्रसार्यमाणसारसौरभेये, प्रमुखप्रवर्त्यमानमहासामन्तमहानसे, पुरःप्रधावद्ध्वजवाहिनि, प्रियशतोपलभ्यमानसंकटकुटीरकान्तरालनिःसरणे, करिचरणदलितमठिकोत्थितलोकलोष्ठहन्यमानमेण्ठक्रियमाणासन्नसाक्षिणि, संघट्टाविघट्टमानव्याघ्रपल्लीपलायमानक्षुद्रकुटुम्बके, कलकलोपद्रवद्रवद्द्रविणबलीवर्दविद्राणवणिजि, पुरःसरदीपिकालोकविरलायमानलोकोत्पीडप्रस्थितान्तःपुरकरिणीकदम्बके, हयारोहाहूयमानलम्बितशुनि, सरभसचरणनिपतननिश्चलगमनसुखायमानखक्खटस्तू- 5

चक्रै रथांगैश्चीत्कारिणा शब्दं कुर्वाणेन गन्त्रीणां शकटानां समूहेन गृह्यमाणं स्वीक्रियमाणं प्रहतं क्षुण्णं वर्त्म मार्गो यस्मिन्। अकांडेऽनवसरे दीयमानेन भांडेन भरिता व्याप्ता अनड्वाहो वृषभा यस्मिन्। निकटघासस्य समीपस्थतृणस्य लाभे लुभ्यद्भिर्लंबमानैर्गर्दभदासैः प्रथमं प्रसार्यमाणा दूरीक्रियमाणाः सारसौरभेया बलवन्तो वृषभा यस्मिन्। लाम्बमानेत्यत्र लम्बनेति पाठोऽग्रिमपाठानुसारीति योग्यः। यतोऽग्रे सैन्यवर्णने 'मेण्ठवण्ठवठरलम्बनेत्यादिभिः स्तूयमानम्' इत्युक्तम् तत्र च संकेतेन लम्बनो गर्दभदास इत्युक्तम्। प्रमुखेऽग्रे प्रवर्त्यमानं प्रेर्यमाणं महासामन्तानां महानसं सूपागारं यस्मिन्। पुरोऽग्रे प्रधावन्तो ध्वजवाहिनो ध्वजधारका यस्मिन्। प्रियशतैश्चाटुशतैरुपलभ्यमानं संकटानां संबाधानां कुटीरकाणां स्वल्पगृहाणामन्तरालान्मध्यान्निसारणं बहिर्गमनं यस्मिन्। करिचरणैर्गजपादैर्दलिताभ्यो भग्नाभ्यो मठिकाभ्यः कुटीरेभ्य उत्थितैर्लोकैर्लोष्ठैर्मृत्पिण्डैर्हन्यमानास्ताड्यमाना मेण्ठा हस्तिरक्षकास्तैः क्रियमाणा आसन्ना समीपस्थाः साक्षिणो यस्मिन्। संघट्टेन घर्षणेन विघट्टमानाभ्यो भज्यमानाभ्यो व्याघ्रपल्लीभ्यः तृणकुटीभ्यः पलायमानानि क्षुद्रकुटुम्बकानि नीचजना यस्मिन्। कलकलोपद्रवेण ध्वनिपीडया द्रवद्भिः पलायमानैः द्रविणबलीवर्दैर्धनवृषभैः विद्राणा सशोका वणिजो यस्मिन्। पुरःसरेणाग्रयायिना दीपिकानामुल्कानामालोकेन प्रकाशेन विरलायमानेऽल्पीभवति लोकोत्पीडे जनसमूहे प्रस्थितः अन्तःपुरकरिणीनां हस्तिनीनां कदंबः समुदायो यस्मिन्। हयारोहैरश्वसादिभिराहूयमाना लंबिताः पश्चात्स्थिताः श्वानः सारमेया यस्मिन्। सरभसं वगेन चरणनिपतनं पादप्रक्षेपस्तेन निश्चलं गमनं तेन सुखायमानैः खक्खटैर्वृद्धैः स्तूय-

२ 'लम्बन'

यमानतुङ्गतुङ्गणगुणे, स्रस्तवेसरविसंवादिसीदद्दाक्षिणात्यसादिनि, रजोजग्धजगति प्रयाणसमये, प्रतिदिशमागच्छद्भिर्गजवधूसमारूढैराधोरणैरूर्ध्वध्रियमाणहेमपत्रभङ्गशारशार्ङ्गैः, अन्तरासनासीनान्तरङ्गगृहीतासिभिः, ताम्बूलिकविधूयमानचामरपल्लवैः, पश्चिमासनिकार्पितभस्त्राभरणाभिन्दिपालपूलिकैः, पत्रलताकुटिलकलधौतनलकपल्लवितपर्याणैः, पर्याणपक्षकपरिक्षेपपट्टिकाबन्धनिश्चलपट्टोपधानास्थिरावस्थानैः[1], प्रचलपादफलिकास्फालनस्फायमानपदबन्ध- 5

मानास्तुंगानामुच्चानां तुंगणानां तद्देशजाताश्वानां गुणा यस्मिन्। स्रस्तेति। स्रस्तानां हस्तात्खलीनभ्रंशेनेतस्ततः प्रधावितानां वेसराणां 'वेसराः संकीर्णाश्वाः।' इति सर्वंकषायां मल्लिनाथः महाराष्ट्रभाषायां ' खेचर ' इति प्रथितानां विसंवादिनः अपरिचिता अतएव सीदन्तः पीडिता दाक्षिणात्या दक्षिणदेशस्थाः सादिनोऽश्वारोहा यस्मिन् । दक्षिणदेशे वेसराणामभावादिति शंकरः । रजोभिर्धूलिभिर्जग्धं भक्षितं तमोऽधकारो यस्मिंस्तस्मिन् प्रयाणसमये गमनवेलायाम्। ' रजोजग्धजगति ' इति पाठे जग्धं व्याप्तं जगत् भूलोको यस्मिन्नित्यर्थः। **प्रतिदिशमिति**। इतः परं तृतीयान्तानां राजभिरित्यनेनान्वयः। गजवधूसमारूढैः करणीस्थितैः । आधोरणैर्हस्तिपकैः अस्य ध्रियमाणेत्यनेनान्वयः। ऊर्ध्वं ध्रियमाणानां हेमपत्राणां भंगै रचनाभिः शाराणि चित्राणि शार्ङ्गाणि धनूंषि येषां तैः। अंतरासने आसीनैर्मध्यासने उपविष्टैः समीपस्थैर्वासीनैरंतरंगैर्विश्वास्यैर्गृहीता असयः कृपाणा येषां तैः । तांबूलिकैस्तांबूलधारकैः विधूयमानानि चामरपल्लवानि पल्लवाकाराणि चामराणि येषां तैः। पश्चिमासु आसनिकासु आसनेष्वितिकर्मधारयः अथवा पश्चिमा आसनी आसनं येषां तेभ्य इति बहुव्रीहिर्वा अर्पितानि भस्त्राभरणानि तूणभेदा भिंदिपालानां तोमराणां पूलिका समूहो यैस्ते । पत्रलताभिच्छुरिकाभिः कुटिलानि वक्राणि कलधौतनलकैः सुवर्णबाणैः पल्लवितानि पर्याणानि पल्ययनानि येषां तैः। पर्याणस्य पक्षकः पार्श्वं प्रांतो वा तस्य परिक्षेपस्य बंधनस्य पट्टिका वस्त्रविशेषस्तस्य बंधेन निश्चलं निष्कंपं पट्टोपधानं वस्त्रमयमासनं तेन स्थिरमचंचलमवस्थानं स्थितिर्येषां तैः । प्रचलायाश्चंचलायाः पादफलिकायाः पर्याणपार्श्वोभयभागे क्रियमाणाया ' रिकेवी ' इति महाराष्ट्रभाषया प्रसिद्धायाः आस्फालनेन ताडनेन स्फायमानो वर्धमानः पदबन्धस्य पादकटकस्य मणिशिलानां रत्नग्राव्णां शब्दो

[1] ' वधानैः '

मणिशिलाशब्दैः, उच्चित्रनेत्रसुकुमारस्वस्थानस्थगितजङ्घाकाण्डैश्च कार्दमिकपटकल्माषितासिताङ्गैः, अलिनीलमसृणसतुलासमुत्पादितसितसमायोगपरभागैश्चावदातदेहविराजमानराजावर्तमेचककञ्चुकैश्चापचितचीनचोलकैश्च तारमुक्तास्तबकितस्तवरकवारबाणैश्च नानाकषायकर्बुरकूर्पासकैश्च शुकपिच्छच्छायाच्छादनकैश्च व्यायामोल्लुप्तपार्श्वप्रदेशप्रविष्टचारुशस्त्रैश्च गतिवशवेल्लितहारलतालग्नलोलकुण्डलोन्मोचनप्रधा- 5

येषां तैः । उच्चित्रैश्चित्रयुक्तैर्नेत्रैर्वस्त्रविशेषैः सुकुमारे स्वस्थाने कोमलस्थले मर्मस्थले इति यावत् । स्थगितानि आच्छादितानि जंघाकांडानि यैस्तैः । अत्र स्वशब्दस्य स्वारस्यं न प्रतिभाति । स्वस्थगनस्थगितेत्यपपाठः । कार्दमिकैः कर्दमेन रक्तैः पटैः कल्माषितानि कर्बुरितानि सितांगानि शुभ्रा अवयवा यैस्तैः । 'शकलकर्दमाभ्यामुपसंख्यानम्' इत्यनेन ठक् । 'कल्माषितपिशंगपिंगैः' इति पाठे कार्दमिकपटैः कल्माषिताः पिशंगा लोहिताः पिंगा जंघिका येषां तैरित्यर्थः । अलिभिरिव भ्रमरैरिव नीलाभिर्मसृणाभिर्मृदुभिः सतुलाभिः 'मांडचोळणा' इति भाषायां प्रसिद्धाभिः समुत्पादितः सितसमायोगस्य शुभ्रसंयोगस्य परभागः शोभातिशयो यैस्तैः । 'परभागो गुणोत्कर्षः' इति यादवः । स्वयंगौरैरलिवन्नीलाः सतुला धृतास्तेन शुभ्रस्य कृष्णेन संयोगात्परभाग उत्पन्न इति भावः । अवदातेषु गौरेषु देहेषु शरीरेषु विराजमानैः शोभमानैः राजावर्तैः कृष्णपाषाणैरितिशंकरः । रत्नविशेषैरिति युक्तम् । अमरटीकोक्तेः । मेचका बर्हिकण्ठवर्णाः कंचुका वारबाणा येषां तैः । अपचिताः धृताः चीनचोलकाः चीनवस्त्रकंचुका यैस्तैः । ताराभिर्शुद्धाभिर्मुक्ताभिः स्तबकिताः संजातपुष्पगुच्छनिभाः स्तवरका वस्त्रविशेषा वारबाणाः कंचुकाश्च येषां तैः । नानाकषायैर्नानावर्णैः कर्बुराः श्वित्रवर्णाः कूर्पासकाः कंचुकाः 'अंगरखा' इति प्रसिद्धाः येषां तैः । शुकपिच्छानीव शुकपक्षाणीव छाया कान्तिर्येषां तथाभूतान्याच्छादनकान्युत्तरीयाणि येषां तैः । व्यायामेन परिश्रमेणोल्लुप्तेषु तनूभूतेषु पार्श्वप्रदेशेषु प्रविष्टानि चारूणि मनोहराणि शस्त्राणि येषां तैः । शस्तानीति संकेतपाठः कटिसूत्राणि 'कंबरपट्टा' इति तस्यार्थः । गतिवशेन गमनवशाद्वेल्लितासु कम्पितासु हारलतासु लग्नानां संसक्तानां लोलनां चंचलानां कुंडलानां कर्णाभरणानामुन्मोचने विमुक्तीकरणे प्रधावितास्तूर्णागताः परिजना येषां तैः । चामी-

---

[1] 'पिशङ्गपिङ्गैः'

वितपरिजनैः, चामीकरपत्राङ्कुरकर्णपूरकविघट्टमानवाचालवालपाशैश्चो-
ष्णीषपट्टावष्टब्धकर्णोत्पलनालैश्च कुङ्कुमरागकोमलोत्तरीयान्तरितोत्तमा-
ङ्गैश्च चूडामणिखण्डखचितक्षौमचोलैश्च मायूरपत्रायमाणशेखरषट्पद-
पटलैश्च मार्गागतशारिकशारिवाहवेगदण्डैः, पुरश्चञ्चच्चामरकिर्मीर-
कार्दरङ्गचर्ममण्डलमण्डनोड्डीयमानचटुलडामरचारभटभरितभुवनान्त- 5
रैः, आस्कन्दत्काम्बोजवाजिशतशिञ्जानजातरूपायानरवमुखरितदिङ्मु-
खैश्च निर्दयप्रहतलम्बापटहशतपटुरवबधिरीकृतश्रवणविवरैः, उद्घो-
ष्यमाणनामभिः, उन्मुखपादातप्रतिपाल्यमानाज्ञापातै राजभिरापुपूरे
राजद्वारम् ।

करस्य सुवर्णस्य पत्रांकुर एव कर्णपूरकं कर्णभूषणं कर्णोपरि स्थापितो हेम-
मयः पत्रांकुरस्तेन विघट्टमानोत एव वाचालः शब्दायमानः वालपाशः कर्णाभर-
णभेदः येषां तैः । उष्णीषपट्टेन किरीटे वस्त्रेणावष्टब्धानि बद्धानि कर्णोत्पलानां
कर्णे स्थापितानां कमलानां नालानि यैस्तैः । कुंकुमरागेण काश्मीरजरागेण कोमलै-
र्मृदुभिरुत्तरीयैः प्रावारैरन्तरितानि बद्धान्युत्तमांगानि शिरांसि यैस्तैः । चूडामणि-
खण्डैः शिरोभूषणखण्डैः खचिताः क्षौमखोला दुकूलनिर्मितानि शिरस्त्राणि येषां
तैः । चोला इति पाठो न सम्यक् चूडामणिखंडानां चोलेष्वसंभवात् । मायूर-
पत्रायमाणं मयूरपिच्छ इवाचरत् शेखरषट्पदानां शिरःकुसुमगुच्छभ्रमराणां पटलं
समूहो येषां तैः । **मार्गागतेति** । मार्गे राजद्वारपथ आगताः संप्राप्ताः शारि-
कान् द्यूतकारान् शारींश्च द्युतसाहित्यानि च वहंन्ति धारयन्ति ते च ते शारिक-
शारिवाहा वेगदण्डास्तरुणहस्तिनो यान् तैः । द्यूतकारान् शारींश्च वहन्तो गजयु-
वानो मार्गे राजाभिर्मिलिता इत्यर्थः । पुरोऽग्रे चंचद्भिश्चंचलैश्चामरैः किर्मीराणि
कल्माषाणि कार्दरंगचर्माणि कार्दरंगदेशोद्भवानि चर्ममंडलान्यजिनमंडलानि
' ढाल ' इति प्रसिद्धानि मंडनानि भूषणानि येषां ते च त उड्डीयमाना उत्प्लव-
मानाश्चटुला मनोहरा डामरा गर्विष्ठाश्चारभटा योधास्तैर्भरितं व्यापितं भुवना-
न्तरं यैस्तैः । आस्कंदतामुत्प्लुत्य गच्छतां काम्बोजवाजिनां कम्बोजदेशोद्भवा-
श्वानां शतस्य शिंजानानि सशब्दानि जातरूपस्य सुवर्णस्यायानानि हयभूषणानि
तेषां रवेण भरितानि दिङ्मुखानि यैस्तैः । निर्दयं प्रहतानां ताडितानां लंबापट-
हानां पटहविशेषाणां शतस्य पटुना रवेण निनादेन बधिरीकृतानि श्रवणविवराणि
येषां तैः । उन्मुखैरूर्ध्वावलोकिभिः पादातैः पत्तिभिः प्रतिपाल्यमाना आज्ञापाता
आदेशकथनानि येषां तैः । आपुपूरे व्याप्तम् ।

5 उदिते च भगवति दिनकृति राज्ञः समायोगग्रहणसमयशंसी सस्वान संज्ञाशङ्खो मुहुर्मुहुः। अथ नचिरादिव प्रथमप्रयाण एव दिग्विजयाय दिग्गजसमागममिव गमनविलोलकर्णतालदोलाविलासैः कुर्वाणया करेणुकयोह्यमानः, वैदूर्यदण्डविकटेनोपरि प्रत्युप्तपद्मरागखण्डखचिततया सूर्योदयदर्शनकोपादिव लोहितायता¹ भ्रियमाणेन मङ्गलातपत्रेण, कदलीगर्भाभ्यधिकम्रदिम्ना नवनेत्रनिर्मितेन द्वितीय इव भोगिनामधिपतिरङ्गलग्नेन कञ्चुकेन अमृतमथनदिवस इव क्षीरोदफेनपटलधवलाम्बरवाही, बाल एव पारिजातपादप इवाखण्डलभूमिमारूढः, विधूयमानचामरमरुद्विधूतकर्णपूरकुसुममञ्जरीरजसा सकलभुवनवशीकरणचूर्णेनेव दिशश्छुरयन्, अभिमुखचूडामणिघटमानपाटलप्रतिबिम्बमुदयमानं सवितारमपि पिबन्निव तेजसा, बहलताम्बूलसिन्दूरच्छुरितया

उदित इति । समायोगग्रहणं सज्जीकरणं तस्य समयं वेलां शंसति सः । अथेति । द्विग्विजयाय नरपतिर्निजगामेति संबंधः । गमने विलोलयोश्चंचलयोः कर्णतालयोः कर्णास्फालनयोर्दोलाविलासैः क्रीडाविलासैर्दिग्गजसमागमं दिग्गजसंबंधमिव कुर्वाणया करेणुकया हस्तिन्या । वैदूर्यदण्डेन विदूरे पर्वत उत्पन्नस्य रत्नस्य दण्डेन विकटः सुंदरस्तेन । प्रत्युप्तैर्दृढं स्थापितैः पद्मरागखंडैः शोणरत्नखंडैः खचिततया व्याप्ततया सूर्योदयदर्शनस्य कोपात्क्रोधादिव लोहितेन रक्तेन आयता विस्तृतेन च । 'इण्' धातोः शतरि तृतीयान्तम् । स्वसदृशं वर्तुलं कान्तिमन्तं सूर्यं विलोक्य पद्मरागमिषेण क्रुद्धं नु छत्रमिति भावः । मंगलातपत्रेण मंगलछत्रेण । इत्थंभूतलक्षणे तृतीया कदलीगर्भाद्रंभामध्यादभ्यधिको म्रदिमा मृदुत्वं यस्य तेन नवेन नूतनेन नेत्रेण वस्त्रेण निर्मितस्तेन अंगे शरीरे लग्नः संसक्तस्तेन कंचुकेन चोलकेन निर्मोकेन च । भोगिनां सर्पाणामधिपतिः शेष इव । क्षीरोदस्य क्षीरोदधेः फेनपटल इव डिंडीरसमूह इव तेन वा धवलं शुभ्रमंबरं वसनं गगनं च वहति सः । आखण्डलभूमिमिन्द्रपदं नंदनोद्यान भूमिं च । विधूयमानानां चामराणां मरुता वायुना विधूताः कम्पिताः कर्णपूरकुसुममंजर्यस्तासां रजसा धूल्या सकलस्य भुवनस्य वशीकरणचूर्णेन स्वाधीनीकरणचूर्णेनेव । छुरयन् व्याप्नुवन् । अभिमुखे सन्मुखे अर्थात्सूर्यस्य चूडामणौ घटमानं पतितं पाटलं ताम्रं प्रतिबिंबं यस्य तं सवितारं सूर्यं तेजसा

---

१ 'तायतया'

विलभमान इव द्वीपान्तराण्योष्ठमुद्रयानुरागस्य, स्फुरन्महाहारमरीचिच-
क्रवालानि चामराणीव दिशोऽपि ग्राहयन्, राजकेक्षणोत्क्षिप्तत्रिभागया त्री-
नपि लोकान्करदानायाज्ञापयन्निव सविभ्रमं भ्रूलतया, द्राघीयसा बाहुप्रा-
कारेण परिक्षिपन्निव रिरक्षया सप्तापि सागरमहाखातान्, अखिलमिवक्षी-
रोदमाधुर्यमादायोद्गतया लक्ष्म्या समुपगूढः गाढममृतमय इव पीयमानः 5
कुतूहलोत्तानकटकलोकलोचनसहस्रैः, स्नेहार्द्रेषु राज्ञां हृदयेषु गुणगौरवेण
मज्जन्निव, मज्जामपि लिम्पन्निव सौभाग्यद्रव्येण द्रष्टृणाम्, अमरपतिरिवाग्र-
जवधकलङ्कप्रक्षालनाकुलः, पृथुरिव पृथिवीपरिशोधनावधानसंकलित-
सकलमहीभृत्समुत्सारणः, पुरःसरैरालोककारकैः सहस्रसंख्यैरर्क इव

कान्त्या पिबन्निव। बहलैर्बहुभिस्ताम्बूलैः सिंदूरेण च छुरितया व्याप्तयौष्ठमुद्रया
ओष्ठरूपशासनमुद्रया अनुरागस्य प्रेमवतो जनस्य द्वीपान्तराणि अन्यानि
द्वीपानि विलभमान इव दददिव। स्फुरतां चंचलानां महाहाराणां श्रेष्ठहाराणां
मरीचीणां किरणनां चक्रवालानि समूहान् चामराणीव। किरणानां शुभ्रत्वाच्चाम-
रसाम्यम्। दिशोऽपि दिग्भिरित्यर्थः ग्राहयन् स्वीकारयन्। गृह्णातेर्बोधनार्थत्वमं-
गीकृत्य दिश इत्यस्य कर्मत्वम्। अन्यथा गत्यादिसूत्रेऽस्याग्रहणादसंगतमिदं
स्यात्स्पष्टं चैतदष्टमोच्छ्वासान्ते टीकायामेव भविष्यति। राजकस्य राजसंघस्ये-
क्षणेऽवलोकने उत्क्षिप्ता उपरिकृतास्त्रयो भागा यया तया भ्रूलतया। बाहुप्राका-
रेण बाहुवलयेन सागरा एव महाखाता महापरिखास्तान् परिक्षिपन्निव वेष्टयन्निव
क्षीरोदस्य क्षीरोदधेर्माधुर्यं मधुरतामादायोद्गतया निर्गतया लक्ष्म्या निर्भरं दृढ-
मुपगूढ आलिंगितोऽतएवामृतमय इवामृतप्रचूर इव। कुतूहलेन कौतुकेनोत्तानै-
र्विस्तृतैः कटकलोकानां सेनाजनानां लोचनसहस्रैः पीयमान इव। स्नेहेति।
गुरुः पदार्थो जलादिषु निमज्जतीति भावः। द्रष्टृणां संबन्धसामान्ये षष्ठी द्रष्टृन्
इत्यर्थः। देहसारं सौभाग्यद्रव्येण लिंपन्निवोपदिहन्निव। अग्रजस्य ज्येष्ठस्य
भ्रातृ राज्यवर्धनस्य ब्राह्मणस्य च वधकलंकस्य प्रक्षालने आकुलः। इन्द्रस्त्वष्टुः
प्रजापतेः पुत्रं वृत्रं हत्वा ब्रह्महत्यापातकमकरोद्दूरीकरणे च प्रायततेति कथा
भागवते। पृथिव्याः परिशोधनं दुष्टनाशेन शुद्धीकरणं धान्याद्युत्पादार्थं पर्वतादि-
समुत्सारणया समीकरणं च तस्यावधानं परिकलिता कृता सकलानां महीभृतां
नृपाणां पर्वतानां च समुत्सारणा दूरीकरणं येन सः। पुरा वैन्यः पृथुः
सत्वरहितां विषमां भुवं समीचकारेति कथा भागवते चतुर्थस्कंदे।
पुरःसरैरित्यारभ्य तृतीयान्तानां दंडिभिरित्यनेनान्वयः। पुरःसरैरग्रेसरैः।

किरणैरधिकारचातुर्यचञ्चलचरणैर्व्यवस्थास्थापननिष्ठुरैः भयपलायमान-लोकोत्पीडान्तरिता दशापि दिशो ग्राहयद्भिरिव, चलितकदलिकासंपातपीतप्रचारं पवनमपि विनये स्थापयद्भिरिव, द्रुतचरणोद्धूतधूलिपटलावधूतान्दिनकरकिरणानप्युत्सारयद्भिरिव, कनकवेत्रलतालोकविक्षिप्यमाणं दिनमपि दूरीकुर्वद्भिरिव, दण्डिभिरितस्ततः समुत्सार्यमाणजनसमूहो निर्जगाम नरपतिः ।   5

6 अवनमति च विनयनमितवपुषि, भयचकितमनसि, चलनशिथिलमणिकनकमुकुटकिरणनिकररुचिरशिरसि, विलुलितकुसुमशेखररजसि राजचक्रे, प्रभामुचां चूडामणीनामवाञ्चस्तिर्यञ्च उदञ्चश्च

आलोक पश्य ' निगारखे महाराज ' इति भाषायाम् इति कुर्वन्ति ते उच्चैर्घोषन्ति ते तैः । पक्षे आलोकं प्रकाशं कुर्वन्ति तैः किरणैः । आलोकशब्दं वयसां विरावैरिति कालिदासः । अधिकारचातुर्येण अधिकारस्य कौशल्येन चंचलौ चरणौ येषां तैः । स्वाधिकारानुष्ठाने चंचलतया भ्रमद्भिरित्यर्थः । व्यवस्थास्थापने व्यवस्थाकरणे निष्ठुरैर्निर्दयैः । भयेन पलायमानानां लोकानामुत्पीडेन संबाधेनान्तरिता दशापि दिशः ग्राहयद्भिः गृह्णद्भिः स्वीकुर्वद्भिरिव । णिजर्थस्याविवक्षात्र । तथा च कञ्चुकिनः पलायमानैर्जनैर्दशापि दिशोऽगृह्णन्नित्यर्थः । ' दशाप्यादेशम् ' इति जीवानन्दपाठः समीचीनश्च । परं बहुषु पुस्तकेषु नोपलभ्यते तत्पाठे ण्यन्तत्वं साधु संगच्छते । चलितानां कंपितानां कदलिकानां पताकानां संपातेन समूहेन पीतः प्रचारो गमनं यस्य तं पवनं वायुमपि विनये स्थापयद्भिरिव । ' कदली पताका मृगभेदयोः ' इति मेदिनी । द्रुतेभ्यस्त्वरायुक्तेभ्यश्चरणेभ्य उद्धूतेनोत्पन्नेन धूलिपटलेन धूलिसमूहेनावधूतानाच्छादितान् दिनकराकिरणान्सूर्यरश्मीनप्युत्सारयद्भिरिव दूरीकुर्वद्भिरिव । कनकवेत्रलतानां कनकवेष्टितानां वेत्रलतानामालोकेन प्रकाशेन विक्षिप्यमाणं व्याप्यमानं दिनमपि दिवसमपि दूरीकुर्वद्भिरिव दण्डिभिः कंचुकिभिरितस्ततः समुत्सार्यमाणो दूरीक्रियमाणः विभाज्यमानो जनसमूहो येन स नरपतिर्हर्षदेवो निर्जगाम ।

अवनमतीति । विनयेन नमितं वपुः शरीरं यस्य तस्मिन् । भयेन भीत्या चकितं कंपितं मनो हृदयं यस्य तस्मिन् चलनेन गमनेन शिथिलानां मणिकनकमुकुटानां रत्नखचितसुवर्णमुकुटानां किरणनिकरेण रश्मिसमूहेन रुचिरं सुन्दरं शिरो मस्तकं यस्य तस्मिन् विलुलितं श्लथीभूतं कुसुमशेखराणां रजः परागो यस्य तस्मिन् राजचक्रे राजकेऽवनमति नम्रीभवति सति । प्रभां

---

१ ' दशाप्यादेशम् '

चञ्चन्तो मरीचयश्चाषराशय इव सुशकुनसंपादनाय चेलुः। मेघायमान-
रेणुमेदुरं मन्दिरशिखण्डिन इव खमुड्डीयमानाः कोमलकल्पपादपपल्ल-
ववेन्दनमालाकलापा इवाबध्यन्त दिग्द्वारेषु दिक्पालैः । प्रणम्यमानश्च
नेत्रत्रिभागैश्च कटाक्षैश्च समप्रेक्षितैर्भ्रूवञ्चितैश्चार्धस्मितैश्च परिहासैश्च
छेकालपैश्च कुशलप्रश्नैश्च प्रतिप्रणामैश्चोन्मत्तभ्रूवीक्षितैश्चाज्ञादानै- 5
श्चाक्रीर्णन्निव मानमयान्प्राणान्प्रणयदानैः प्रवीराणां वीरो यथानुरूपं
विबभाज राजकम् ।

7 अथ प्रस्थिते राजनि कलकलत्रस्तदिङ्नागशूत्काररव इवेत-
स्ततस्तस्तार तारतरःस्तूर्याणां प्रतिध्वनिराशातटेषु। दिग्गजेभ्यः प्रकुपि
तानां त्रिप्रस्रुतानां करिणां मदप्रस्रवणवीथीभिरालिकुलकालीभिः कालि- 10
न्दीवेणिकासहस्राणीव सस्यन्दिरे । सिन्दूररेणुराशिभिररुणायमानबिम्बे

कान्तिं मुञ्चन्तिं त्यजन्ति तेषां चूडामणीनां शिरोभूषणानामवाञ्चः अधः प्रसा-
रिणः तिर्यञ्चः तिरश्चीना उदञ्चः उर्ध्वं प्रसारिणश्चञ्चन्तो भ्रमन्तो मरीचयः
किरणानि चाषराशयः चाषसंज्ञकपक्षिसमूहा इव सुशकुनसंपादनाय शुभनिमि-
त्तावाप्तय इव चेलुः । तानेव मरीचीन्पुनरुत्प्रेक्षते । **मेघायमानेति** । मेघाय-
मानैर्मेघैः इवाचरद्भिः रेणुभिर्धूलिभिर्मेदुरं व्याप्तं खमाकाशमुड्डीयमाना मंदिरशिख-
ण्डिन इव गृहमयूरा इव मरीचयः कोमलानां कल्पपादपपल्लवानां कल्पतरुप-
र्णानां वंदनमालाः नृपादीनां स्वागतार्थं द्वारोपरि बध्यमानाः स्रजस्तासां कलापा
इव । दिक्पालैर्दिगीशैर्दिग्द्वारेषु दिश एव द्वाराणि तेष्ववध्यन्त । **प्रणम्यमान
इति** । प्रवीराणां प्रकृष्टानां श्रेष्ठानां वीराणां मध्ये वीरः स हर्षः । कटाक्षैरपांग-
दृष्टैः भ्रूवञ्चितैर्भ्रूचालितैः । छेकालापैर्वक्रोक्तिभिः मानमयान् मानप्रचुरान्प्रा-
णानाक्रीर्णन्निव संगृह्णन्निव । प्रणयदानैः प्रीतिविसर्जनैः यथानुरूपं यथायोग्यं
राजकं विबभाज राज्ञां यथायोग्यं प्रेम्णा संमानं चकारेत्यर्थः ।

अथेति । कलकलेन कोलाहलेन त्रस्तानां पीडितानां दिङ्नागानां
दिग्गजानां शूत्काररव इव शूत्कारइतिध्वनिरिव । तूर्याणां वाद्यविशेषाणां
तारतर उच्चैस्तरः प्रतिध्वनिः प्रतिशब्द आशातटेषु दिक्प्रान्तेषु तस्तार विस्तृतो
बभूव । दिग्गजेभ्यः क्रुधद्रुहेत्यादिना संप्रदानत्वम् । त्रिप्रस्रुतानां त्रिषु स्थानेषु
गंडादिषु मदस्राविणां करिणामलिकुलैर्भ्रमरसमूहैः कालीभिः कृष्णवर्णाभिः
मदप्रस्रवणवीथीभिः मदस्रावपंक्तिभिः । कालिंद्या यमुनाया वेणिकासहस्राणीव

---

१ 'चन्दनमाला' २ 'आक्रीडन्'.

रथावस्तमयसमयं शशङ्किरे शकुनयः । करिणां षट्पदकोलाहलमांसलैः कर्णतालनिस्वनैस्तिरोदधिरे दुन्दुभिध्वनयः । दोधूयमानश्च सचराचरमाचचाम चामरसंघातो विश्वम् । अश्वीयश्वासनिक्षिप्तैः शिश्विन्दे सिन्धुवारदामशुचिभिर्निरन्तरमन्तरिक्षं फेनपिण्डैः । पिण्डीभूततगरस्तबकपाण्डुराणि पपुरिव परस्परसंघट्टनष्टाष्टदिशं दिवसमुच्चचामीकरदण्डान्यातपत्रवनानि । रजोरजनीनिमीलितो मुकुटमणिशिलावलीबालातपेन विचकास वासरः । राजतैर्हिरण्मयैश्च मण्डनकभाण्डमण्डलैर्ह्रादमानैर्हरीणां कृताः परिह्लादा हरितो बधिरतां दधुः । अरिप्रतापान- 5

प्रवाहसहस्राणीव सस्यंदिरे उत्पादितानि । स्यन्दतेरन्तर्भावितण्यर्थत्वात्सकर्मकत्वम् । 'वीथी वर्त्मनि पंक्तौ च ' 'वेणी सेतुप्रवाहयोः ' इति हैमः । सिंदूररजसां राशिभिररुणायमाने ताम्रीकृते रवौ सति शकुनयः चक्रवाका अस्तमयसमयमस्तकालं शशंकिरे शंकितवन्तः वियोगभीत्येति भावः । षट्पदानां भ्रमराणां कोलाहलैर्मांसलाः पुष्टास्तैः कर्णतालनिस्वनैः कर्णास्फालनशब्दैः । तिरोदधिरे अन्तर्हिताः । दोधूयमानोऽतिशयेन कंपमानः । धुनातेर्यङन्ताद्भृशार्थाच्छानच् । चराचरेण स्थावरजंगमेन सहितं सचराचरं विश्वं भुवनमाचचाम प्राश व्याप्नोदित्यर्थः । अश्वीयानामश्वसमूहानां श्वासैर्निक्षिप्तास्त्यक्तास्तैः सिन्दुवाराणां श्वेतपुष्पाणां दामानीव शुचयस्तैः फेनपिंडैः डिंडीरपिंडैर्निरन्तरमन्तररहितमन्तरिक्षं गगनं शिश्विन्दे शुभ्रीकृतम् । 'सिंदुवारः श्वेतपुष्पः ' इतिमुकुटः । पिंडीभूता एकीभूतास्तगरस्तबकास्तगरगुच्छा इव पांडुराणि उच्चा उन्नताश्चामीकरदंडाः सुवर्णदंडा येषां तान्यातपत्रवनानि छत्रारण्यानि छत्रसमूहा इत्यर्थः दिवसं दिनं परस्परस्यान्योन्यस्य संघट्टेन घर्षणेन नष्टा अष्ट दिशो यस्मिन्यथा तथा पपुरिव । छत्राणां निरन्तरतया दिग्ज्ञानं नासीदिति तात्पर्यार्थः । रजांस्येव रजनी रात्रिस्तया निमीलितः संकुचितो वासरो दिवसो मुकुटमणिशिलानां मुकुटरत्नानामावल्यः पंक्तयस्तासां बालातपैः कोमलकिरणैर्विचकास दिदीपे । राजतै रूप्यमयैर्हिरण्मयैः सुवर्णमयैर्ह्रादमानैः सशब्दैः मंडनकानां शोभादायिनां भांडानामश्वाभरणानां मंडलैः । ' स्यात् भांडमश्वाभरणे ' इति कोशः । कृताः परिह्लादाः शब्दाः हरितो दिशो बधिरतां दधुः । रौप्यसुवर्णमयैः सशब्दैरश्वानां भूषणगात्रैः कृताः शब्दा दिग्बधिरतां जनयामासुरित्यर्थः । अथवा मंडलैरित्यंतानि तृतीयान्तानि इत्थंभूतलक्षणे तथा

' हरितीकृताः '.

लनिर्मूलनायेव मदोष्मशीकरैः शिशेकिरे करिणः ककुभां चक्रम् । चक्षुषामुन्मेषं मुमुषुस्तडिच्चञ्चलानि चूडामणीनामर्चींषि । स्वयमपि विसिस्मिये बलानां भूपालः सर्वतो विक्षिप्तचक्षुश्चाद्राक्षीदावासस्थान-सकाशात्प्रतिष्ठमानं स्कन्धावारम्, अधोक्षजकुक्षेरिव युगादौ निष्प-तन्तं जीवलोकम्, अम्भोनिधिमिव कुम्भभुवो वदनात्प्लावितभुवनमु-द्वमन्तम्, अर्जुनबाहुदण्डसहस्रसंपिण्डितोन्मुक्तमिव सहस्रधा प्रवर्त-मानं प्रवाहं नर्मदायाः । 'प्रसर तात। भाव, किं विलम्बसे। त्वङ्गति तुरङ्गमः । भद्र, भग्नचरण इव संचरसि यावदमी पुरःसराः सरभस-मुपरि पतन्ति । वाहयसि किमुग्रम् । न पश्यसि निर्दय, निःशूक, शिशुं शयानम् । वत्स रामिल, रजसि यथा न नश्यसि न पश्यसि । गलति शक्तुप्रसेवकः । किमेवमित्वर, त्वरसे। सौरभेय, सरणिमपहाय हयमध्यं धावसि। धीवरि, विशसि । गन्तुकामा मातङ्गि, मातङ्गमा

न्च तैर्युक्तानां हरीणां कृताः इत्यर्थः तृतीयार्थे शेष इत्यनेन षष्ठी । करिणो गजाः ककुभां दिशां चक्रं समूहं मदोष्मशीकरैः ऊष्मदानोदकबिन्दुभिः अरि-प्रतापानलस्य शत्रोः प्रतापाग्नेर्निर्मूलनाय नाशाय शिशेकिरे सिषिचुः । तडिच्चंच-लानि विद्युदिव चपलान्यर्चींषि किरणानि । उन्मेषं विकासं मुमुषुः चोरयमासुः । **स्वयमपीति** । बलानां करणे षष्ठी सैन्यैरित्यर्थः । आवासस्थानसकाशाच्छि-बिरसकाशात्प्रतिष्ठमानं निर्गच्छन्तम् । अधोक्षजकुक्षेर्नारायणस्य कुक्षेः । प्लावितं व्याप्तं भुवनं येन तमम्भोनिधिं समुद्रमिव कुम्भभुवोऽगस्त्यस्य वदनान्मुखादु-द्वमन्तम् । अर्जुनस्य कार्तवीर्यस्य बाहुदंडानां हस्तानां सहस्रेणादौ संपिंडित एकी-कृतः पश्चादुन्मुक्तस्तम् । पुरा कार्तवीर्यः स्वरमणीभिः सह विहरमाणो नर्मदा-प्रवाहं सहस्रभुजैररुणत्पश्चादमुञ्चचेति पौराणिकी कथात्रानुसंधेया । प्रसरेतिवा-क्यानामित्येवमादि प्रवर्तमानानेकसंलापमित्यनेन संबंधः । तात भावेति प्रेमा-व्हाने । त्वंगति धावति । भग्नचरण इव खंज इव । उपरि पतन्ति अग्रे गच्छन्ति।हे निःशूक निर्दय पदद्वयमेकार्थकम् ।शयानं शिशुं बालं न पश्यसि. 'शूकोऽनु क्रोशशुंगयोः' इति विश्वः । यथा न नश्यसि यथा ते नाशो न भवेत्तथा न पश्यसि किम् । तथा कुर्वित्यर्थः । शक्तुप्रसेवकः सक्तुस्यूतः इत्वरो गमनशीलः । 'इण्नशजिसर्तिभ्यः क्वरप्' इत्यनेन क्वरप् । सुरभ्या अपत्ये स्त्रीभ्यो ढक् । वृषल मार्गं त्यक्त्वाश्वमध्ये धावसि किमित्यर्थः । अवटं गर्तम् अतटेनामार्गेण । स्वैरिणि स्वतंत्रे । सौवीरककुम्भः कांजिकघटः

र्गम्। अङ्ग, गलति तिरश्चीना चणकगोणी। गणयसि न मामारट-न्तम्। अवटमतटेनावतरसि। मुखमास्स्व स्वैरिणि सौवीरककुम्भो भग्नः। मन्थरक, खादिष्यसि गतः सन्निक्षुम्। उक्षाणं प्रसारय[1]। कियच्चिरं चिनोपि चेट, बदराणि। दूरं गन्तव्यम्। किमद्यैव विद्रासि द्रोणक, द्राघीयसी दण्डयात्रा विनैकेन निष्ठुरकेण निष्ठेयमस्माकम्। 5
अग्रतः पन्थाः स्थपुटकः स्थावरक, यथा न भनक्षि फाणितस्थालीम्। गरीयान्गण्डक, तण्डुलभारको न निर्वहति दम्यः। दासक, माषीणाद-मुतो द्राग्दात्रेण मुखघासपूलकं छुनीहि। को जानाति यचसगतं गतानाम्। धव, वारय बलीवर्दान्। वाहीकरक्षितं क्षेत्रमिदम्। लम्बिता शकटी। शाक्करं धुरंधरं धुरि धवलं नियुङ्क्ष्व। यक्षपालित, 10
प्रमदाः पिनक्षि। अक्षिणी किं ते स्फुटिते। हत हस्तिपक रे, दीव्य-सि नेदीयसि करिकरदण्डे। समद, संमर्दकर्दमे स्खलसि। भ्रातर्भाव विधुरबन्धो, उद्धर पङ्कादनड्वाहम्। इत एहि माणवक, घनेभघटासंघट्टसंकटे नास्ति निस्तरणम्'। इत्येवमादिप्रवर्तमानाने-

प्रसारय चोदय प्रसादयेति पाठे प्रसन्नं कुरु। निष्ठुरकेण निर्दयेन विना द्राघी-यसी अस्माकं दण्डयात्रा गमनं निष्ठा स्थिता। एकस्य शठस्य कृते वयं विल-म्बिता इत्यर्थः। स्थपुटको नतोन्नतः अतः फाणितस्थालीनाशं गुडविकारघटनाशं रक्षयेत्यर्थः। हे गंडक गरीयान् दम्यो दान्तस्तंडुलवाहकः। माषीणाद् माष-क्षेत्रादमुतोऽस्मात्। 'विभापातिलमाषोमाभंगाणुभ्यः' इत्यनेन यतो विकल्पे खञ्। दात्रेण लवित्रेण छेदनशस्त्रेणेत्यर्थः। 'दात्रं लवित्रम्' इत्यमरः। किंचिन्मात्रं बुभुक्षानिवृत्तये घासः मुखघास इति शंकरः। गतानां दूरस्थि-तानां क्षेत्ररक्षकाणां मध्ये को जानाति। वाहीकेन परिपालकेन रक्षितम्। वाहीकः काष्ठकः गोरक्षको वेति संकेतः। लंबिता पश्चात्स्थिता। महानध्वा गंतव्य इत्यर्थः। अतएव तदुपायं कथयति। शाक्करं तरुणं शूरं वा धुरंधरं धूर्वोढारं धवलं महोक्षं धुरि नियुंक्ष्व नियोजय। 'अथ धवलो महोक्षे सुंदरे स्मिते' इति हैमः। यक्षपालितेति कस्यचिन्नाम। पिनक्षि पीडयसीत्यर्थः। नेदीयसि अंतिकतरे करिणो हस्तिनः करदण्डे शुंडादण्डे दीव्यसि क्रीडसि। समद हे उन्मत्त संमर्दकर्दमे संमर्देन जनसंमर्देन संजाते कर्दमे स्खलसि। घनं दृढमिभानां गजानां घटा संघातस्तस्य संघट्टसंकटे संमर्दसंकटे निस्तरणं बहिर्गमनं नास्ति।

[1] 'प्रसादय'

कसंलापं क्वचित्स्वेच्छामृदितोद्दामसस्यघासविघससुखसंपन्नान्नपुष्टैः केलिकलैः किलकिलायमानैर्मेण्ठवण्ठवठरलम्बनलेशिकलुण्ठकचेटशाटचण्डालमण्डलैराण्डीरैः स्तूयमानम्, क्वचिदसहायैः क्लेशार्जितकुग्रामकुटुम्बिसंपादितसीदत्सौरभेयशम्बलसंवाहनायासावेगागतसंयोगैः स्वयंगृहीतगृहोपस्करणैः 'इयमेका कथंचिद्दण्डयात्रा यातु, यातु पातालतलं, 5 तृष्णाभूतेरभवनिर्भवतु, शिवं सेवा करोतु, स्वस्ति सर्वदुःखकूटाय कटकाय' इति दुर्विधकुलपुत्रकैर्निन्द्यमानम्, क्वचिदतितीक्ष्णसलिलस्रोतःपातिनौगतैरिव ग्रथितैरिव पङ्क्तिभूतैर्जनैरतिद्रुतं द्रवद्भिः कृष्णकठि-

---

तादृशे संघट्टे पतितो बहिरागन्तुं न शक्नोतीत्यर्थः । एवमादयः प्रवर्तमाना अनेकसंलापा अनेकभाषणानि यस्मिंस्तम् । क्वचिदेकतः स्वेच्छयाऽनायासेन मृदितानि क्षुण्णानि उद्दामानि प्रभूतानि सस्यानि तथा घासो यवसं विघसो भृत्याद्युपभुक्तशेषमन्नं तैः संपन्नेन संजातेनान्नेन पुष्टैः केलिकलैः बहुभाषिभिः क्रीडायां जल्पद्भिर्वा किलकिलायमानैः किलकिलेतिशब्दं कुर्वद्भिः मेण्ठा हस्तिजागरिका वण्ठा अकृतविवाहास्तरुणा ये दण्डमादाय करिणां दर्पं निहन्ति पत्तयो वा वठरा मूर्खाः लंबना गर्दभदासा लेशिका जनसेवका लुंठकाश्चौराः चेटा दासाः शाटा धूर्ताः चण्डाला अश्वरक्षकास्तेषां मंडलैः संघैः स्तूयमानम् । अन्नादिलाभेन स्तुतिपरास्ते इत्यर्थः । क्वचिदन्यतः । क्लेशेन पीडयाऽर्जिताः लब्धाः कुग्रामकुटुंबिभिः कुग्रामस्थैर्जनैः संपादितः दत्ताः सीदन्तः असमर्था ये सौरभेयाः वृषभास्तैः शंबलस्य शम्बति गच्छति अनेन तच्छंबलं गमनसाधनं पाथेयं तस्य संवाहनं नयनं तस्य योगेन संबंधेनागतः संयोगश्चित्तक्षोभः येषां तैः स्वयं गृहीतानि गृहोपस्करणानि गृहवर्तिपदार्था यैस्तैः । 'इयमेका दण्डयात्रा गमनं यातु' 'यातु पातालतलम्' 'तृष्णायाः भूतेराधिक्यस्याभवनिरजननं भवतु' 'सेवा शिवं कल्याणं करोतु' 'सर्वेषां दुःखानां कूटाय राशये कटकाय सेनायै नमः' इति दुर्विधैर्दरिद्रैः कुलपुत्रकैः निंद्यमानम् । 'आक्रोशे नञ्यनिः' इत्यनेन नञ्युपपदेऽनिः । 'कूटोऽस्त्री निश्चले राशौ' इति मेदिनी । 'निःस्वस्तु दुर्विधो दीन' इत्यमरः । क्वचिदपरतः । तृतीयान्तानां समुत्सार्यमाणेत्यनेन संबंधः । अतितीक्ष्णेऽतिवेगवति सलिलस्रोतस्युदकप्रवाहे पतति तथाभूतां नावं गतैरिव नावि स्थितैरिवेत्यर्थः । अतएव ग्रथितैरेकीभूतैः पंक्तिभूतैरावल्या तिष्ठद्भिः अतिद्रुतं तूर्णतरं द्रवद्भिः पलायमानैः कृष्णाः कृष्ण-

---

१ 'चाट'.

नस्कन्धगुरुलगुडैर्गृहीतसौवर्णपादपीठीकरङ्ककलशपतद्ग्राहावग्राहैः प्रत्यासन्नपार्थिवोपकरणग्रहणगर्वदुर्वारैः सर्वमेव बहिःकारयद्भिर्भूपतिभृतकभारिकैर्महानसोपकरणवाहिभिश्च बद्धवराहवध्रवाध्रीणसैर्लम्बमानहरिणचटुकचटकजूटजटिलैः शिशुशशकशाकपत्रवेत्राग्रसंग्रहसंग्राहिभिः शुक्लकर्पटप्रावृतमुखैकदेशदत्तार्द्रमुद्रागुप्तगोरसभाण्डैस्तलकतापकतापिकाहस्तकताम्रचरुकटाहसंकटपिटकभारिकैः समुत्सार्यमाणपुरोवर्तिजनम्, क्वचित् 'क्लेशोऽस्माकम्, फलकालेऽन्य एव विटाः समुपस्थास्यन्ते' इति मुखरैः पदे पदे पततां दुर्बलबलीवर्दानां नियुक्तैः स्खलने खलचेटकैः[1] 5

वर्णाः कठिनाः स्कंध इव वृक्षशाखेव गुरवो महान्तो लगुडा यष्टयो येषां तैः। अथवा कृष्णेषु कठिनेषु स्कंधेषु गुरवो लगुडा येषां तैः। गृहीताः सौवर्णपादपीठं पर्यंकः करंकस्तांबूलकरंडकः कलशो घटः पतद्ग्रहो निष्ठीवनपात्रं 'पिकदाणी' इति भाषायां प्रसिद्धः 'पीकदाणी नामनी द्वे पतद्ग्रहकलाचिके' इति राजव्यवहारकोशः। अवग्राहः स्नानद्रोणी यैस्तैः। प्रत्यासन्नस्य समीपस्थस्य पार्थिवस्योपकरणस्य सामग्र्या ग्रहणस्य गर्वेण दुर्वारैः अतएव सर्वमेव जनं बहिः कारयद्भिः निःसारयद्भिः। समीपस्थं प्रभुं तोषयितुं निकटागताञ्जनान् स्वाधिकारप्रदर्शनपूर्वकं निःसारयद्भिरित्यर्थः। महानसोपकरणं सूपशालोपकरणं वहन्ति तैर्भूपतेर्नृपस्य भृतकैः वैतनिकैर्भारिकैर्भारवाहकैश्च। भृतकपदेन तदा वेतनमदत्वा जनान् भारार्थं नागृह्णन्निति ज्ञायते। बद्धा वराहस्य सूकरस्य वध्रैः चर्मरज्जुभिर्वाध्रीणसा यज्ञीयाश्छागा यैस्तैः। वराहचर्मरज्जुभिर्यज्ञपशवो यैर्बद्धा इत्यर्थः। लंबमाना हरिणानां चटुकाः पूर्वभागाश्चटकाः कलविंकास्तेषां जूटेन संघेन जटिला व्याप्तास्तैः। शिशुशशकाः शशकबालाः शाकपत्राणि वेत्राग्राणि वंशांकुरास्तेषां संग्रहं संघं संगृह्णन्ति तैः। शुक्लेन शुभ्रेण कर्पटेन वस्त्रखंडेन प्रावृतस्याच्छादितस्य मुखस्यैकदेशे एकभागे दत्तया आर्द्रया नवया मुद्रया गुप्तानि गोरसभाण्डानि गव्यदुग्धादिभाजनानि येषां तैः। तलकोऽग्निशकटिका 'शेगडी' तापकोऽपूपादिकरणस्थानं 'भट्टी' इति भाषायां प्रसिद्धः तापिका काकपालिका यस्यामपूपादि पच्यते 'कढई' इति प्रसिद्धा हस्तकः शूलः ताम्रस्ताम्रमयश्चरुकटाहश्चरुपात्रं तैः संकटानां संबाधानां पिटकानां भाण्डानां भारिकैर्वाहकैः समुत्सार्यमाणा दूरीक्रियमाणाः पुरोवर्तिनो जना यस्मिंस्तत्। फलकाले वेतनग्रहणकाले समुपस्थास्यन्ते उपस्थिता भविष्यन्ति। पततां स्खलताम्

---

[1] 'खेटने खेटचेटकैः'

खेद्यमानासंविभक्तकुलपुत्रलोकम्, क्वचिन्नरपतिदर्शनकुतूहलादुभयतः प्रजवितप्रधावितग्रामेयकजनपदम्, मार्गग्रामनिर्गतैराग्रहारिकजाल्मैः पुरःसरजरन्महत्तरोत्तम्भिताम्भःकुम्भैरुपायनीकृतदधिगुडखण्डकुसुमकरण्डैर्घटितपेटकैः सरभसं समुत्सर्पद्भिः प्रकुपितप्रचण्डदण्डिवित्रासनविद्रुतैर्दूरगतैरपि स्खलद्भिरपि पतद्भिरपि नरेन्द्रनिहितदृष्टिभिरसतोऽपि पूर्वभोगपतिदोषानुद्भावयद्भिरतिक्रान्तायुक्तकशतानि च शंसद्भिश्चिरंतनचाटापराधांश्चाभिदधानैर्मृग्यमाणसस्यसंरक्षणम्, अपरैरादिष्टपरिपालकपुरुषपरितुष्टैः 'धर्मः प्रत्यक्षो देवः' इति स्तुतीरातन्वद्भिरपरैर्लूयमाननिष्पन्नसस्यप्रकटितविषादैः क्षेत्रशुचा सकुटुम्बैरेव निर्गतैः प्ररूढप्राणच्छेदैः परितापत्याजितभयैः 'क्व राजा, कुतो राजा, कीदृशो वा राजा' इति प्रारब्धनरनाथनिन्दम्, शाकैश्च पदे पदे प्रजविप्रचण्डद-

---

स्खलने प्रेरणे नियुक्तैः स्थापितैः खलचेटकैर्दुष्टचेटैः खेद्यमानः पीड्यमानोऽसंविभक्तः अकृतविभागः कुलपुत्रलोको यस्मिन्। प्रजविता वेगवन्तः प्रधाविता ग्रामेयका ग्रामीणा जनपदा यस्मिन्। 'कत्र्यादिभ्यो ढकञ्' इत्यनेन ढकञ्। **मार्गेति**। इत आरभ्याभिदधानैरित्यन्तानां मृग्यमाणसस्यसंरक्षणमित्यनेन संबंधः। आग्रहारिका अग्रहारदानंग्रहीतारस्तेषु जाल्मैर्मूढैस्तत्स्थानाधिकारिभिर्वा। पुरःसैरग्रयायिभिर्जरन्महत्तरैर्वृद्धश्रेष्ठैरुत्तंभिता धृता अम्भःकुंभा जलकलशा येषां तैः। उपायनीकृता उपहारीकृता दध्नां गुडस्य खंडस्य शर्कराविशेषस्य कुसुमानां च करंडा यैस्तैः घटिताः कृताः पेटकाः समूहा यैस्तैः। प्रकुपितानां क्रुद्धानां प्रचंडानां भयंकराणां दंडिनां वित्रासनेन भयोत्पादनेन विद्रुतैः पलायितैरतएव दूरगतैरपि नरेन्द्रे निहिता स्थापिता दृष्टयो यैस्तैः। पूर्वभोगपतिदोषान् पूर्वाधिकारिदोषान् उद्भावयद्भिः प्रकटयद्भिः अतिक्रान्तानामायुक्तकानामधिकारिणां शतानि शंसद्भिः। चिरंतनानां बहुकालीनानां चाटानां धूर्तानामपराधान्। मृग्यमाणमन्वेष्यमाणं सस्यसंरक्षणं यस्मात्तत्। आदिष्टैराज्ञापितैः परिपालकपुरुषैरधिकारिभिः परितुष्टास्तैः 'देवः प्रत्यक्षो धर्म' इति स्तुतीः प्रशंसा आतन्वद्भिः कुर्वद्भिः। अपरैरित्यस्य प्रारब्धनरनाथनिन्दमित्यनेन संबंधः। लूयमानं छिन्नं निष्पन्नं पक्वं सस्यं तेन प्रकटितो विषादो दुःखं यैस्तैः क्षेत्रशुचा स्वभूमिदुःखेन सकुटुम्बैः सदारैर्निर्गतैः। प्ररूढः प्रादुर्भूतः प्राणच्छेदो जीवितच्छेदो जीवितनाशो येषां तैः प्ररूढेत्यत्रादिकर्मणि क्तः। सस्यनाशेन च प्राणधारणाभावाद् नरपतिनिन्दया वा प्राण-

ण्डपाणिपेटकानुबद्धैर्गिरिगुडकैरिव हन्यमानैरितस्ततः संचरद्भिरपरै-
र्युगपत्परापतितमहाजनग्रस्तैस्तिलशो विलुप्यमानैरन्यैरनेकजन्तुजङ्घान्त-
रालनिःसरणकुशलिभिः कुटिलिकाव्यंसितसादिबहुश्वभिः पतल्लोष्टल-
गुडकोणकुठारकीलकुद्दालखनित्रदात्रयष्टिभिरपि निःसरद्भिरायुषो ब-
लात्कृतकलकलम्, अन्यत्र संघशो घासिकैर्बुसधूलीधूसरितघासजाल- 5
जालकितजघनैश्च पुराणपर्याणैकदेशदोलायमानदात्रैश्च शीर्णोर्णाशकल-
शिथिलमलिनमलकुथैश्च प्रभुप्रसादीकृतपाटितपटच्चरचलच्चोलकधा-
रिभिश्च धावमानैरुद्धूयमानधूलिपटलम्, क्वचिदेकान्तप्रवृत्ताश्ववारच-

---

नाशः । परितापेन त्याजितं दूरीकृतं भयं येषां तैः प्रारब्धा नरनाथनिंदा नृपति-
निंदा यस्मिंस्तत् ।

शशकैश्चेति । शशकैरित्यस्य कृतकलकलमित्यनेन संबंधः । प्रजविनां
वेगवतां प्रचंडानां दंडपाणिनां दंडहस्तानां पुरुषाणां पेटकैः समूहैरनुबद्धा अनु-
सृतास्तैः । हन्यमानैस्ताड्यमानैर्गिरिगुडकैरिव लोष्टैरिवेतस्ततः संचरद्भिः। क्षिप्ता
लोष्टा यथेतस्ततो गच्छन्ति तद्वदिति भावः । परापतितेन प्रत्यागतेन महाजनेन
जनसमूहेन ग्रस्तैराच्छादितैरतएव तिलशो विलुप्यमानैः । अन्यैरपरैरनेकेषां
जंघान्तरालेभ्यो निःसरणे निर्गमने कुशलिभिः । कुटिलिकया वक्रगमनेन व्यं-
सिता वंचिता सादिनामश्वारोहाणां बहवः श्वानो यैस्तैः । पतन्तः लोष्टा लगु-
डानि कोणा वादनभांडानि कुठाराः परशवः कीलाः कुद्दालाःस्तंबघ्नाः खनित्राः
कुद्दालविशेषा दात्राणि लवित्राणि 'विळा' इति महाराष्ट्रभाषायां प्रसिद्धानि
यष्टयश्च येषु तैरपि आयुषो बलादायुष्यस्य विद्यमानत्वान्निःसरद्भिर्बहिर्गच्छद्भिः
कृतः कलकलो यस्मिन् । **अन्यत्रेति** । तृतीयान्तानां धूयमानधूलिपटलमित्य-
नेन संबंधः । संघशः संघं संघमिति संघशः गणशः । 'संख्यैकवचनाच्च वीप्सा-
याम्' इत्यनेन शः । घासिकैर्घासे नियुक्तैः । 'तत्र नियुक्त' इत्यनेन ठक् ।
बुसस्य कडारस्य धूल्या रजसा धूसरितेन मलिनीभूतेन घासजालेन घाससंघेन
जालकितानि व्याप्तानि जघनानि येषां तैः । पुराणानां जीर्णानां पर्याणानामेक-
देशेषु पश्चिमभागेषु दोलायमानानि दात्राणि लवित्राणि येषां तैः । शीर्णोर्णाश-
कलानां जीर्णोर्णाखंडानां शिथिला अघना मलिना मलकुथा मलिनवस्त्राणि
अंसोपरि धार्यमाणानि वसनानि वा येषां तैः । प्रभुभिः प्रसादीकृतानि प्रेम्णा
दत्तानि पाटितानि भग्नानि पटच्चराणि जीर्णवसनानि येषां तथा-
भूतान् चलतः कंपमानान् चोलकान् धारयन्ति तैः । उद्धूयमानं धूलिपटलं

क्वचर्व्यमाणागामिगौडविग्रहम्, क्वचित्पङ्किलप्रदेशपूरणादेशाकुलसक- ललोकलूयमानतृणपूलकम्, क्वचित्तलवर्तिवेत्रिवेत्रवित्रास्यमानशाखि- शिखरगतविक्रोशद्विवादिब्राह्मणम्, क्वचित्कुलुण्ठकपाशविवेष्ट्यमा- नग्रामीणग्रासोत्कृष्टकौलेयकम्, क्वचिदन्योन्यविभवस्पर्धोद्धुरराजपुत्रवा- ह्यमानवाजिसंघट्टमण्डितम्, अनेकवृत्तान्ततया कौतुकजननम्, प्रल- 5 यजलधिमिव जगद्ग्रासग्रहणाय प्रवृत्तम्, पातालमिव महाभोगिनां गुप्तये समुत्पादितम्, कैलासमिव परमेश्वरवसतये सृष्टम्, दृश्यमानस- कलप्राणिपर्यायं चतुर्युगसर्गकोशमिव प्रजापतीनाम्, क्लेशबहुलमपि तपःकरणमिव क्रमकारणं कल्याणानाम्। एवं च वीक्षमाणः कटकं जगाम।

धूलिसमूहो यस्मिन्। एकान्त एकदेशे प्रवृत्तेन गच्छताऽश्ववारचक्रेण सादि समूहेन चर्व्यमाणो भाषणेनास्वाद्यमान आगामी भावी गौडविग्रहो गौडाधि- पेन सह समरो यस्मिन्। पंकिलप्रदेशस्य सकर्दमप्रदेशस्य पूरणं तस्यादेशेना- ज्ञया आकुलैः सकलैर्लोकैर्लूयमानाश्छिद्यमानास्तृणपूलका यस्मिन्। तलवर्तिना- मधःस्थानां वेत्रिणां कंचुकिनां वेत्रैर्दण्डैर्वित्रास्यमानाः पीडिताः शाखिनां वृक्षाणां शिखरगता अग्रभागं गता विवादिनः कलहाकुला ब्राह्मणा यस्मिन्। कुलुण्ठकाः शुनां बंधनलगुडा इति संकेतः। कुलुंठकानां पाशेन विवेष्ट्यमाना ग्रामीणा ग्रामेभवा ग्रासैर्भक्ष्यपदार्थविशेषैराकृष्टाः कौलेयकाः श्वानो यस्मिन्। 'कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु' इत्यनेन ढकञ्। अन्योन्यविभवस्य पर- स्परसंपदः स्पर्धयोद्धुरैरुद्दामप्रसरै राजपुत्रैर्वाह्यमानानां वाजिनामश्वानां संघट्टेन संघर्षणेन मंडितमलंकृतम्। जगदेवग्रासस्तस्य ग्रहणाय स्वीकाराय प्लावनाय वा। महाभोगिनां भोग उपभोगः फणा च विद्यते येषां ते भोगिनो नृपाः सर्पाश्च महान्तश्च ते भोगिन इति समासः। अन्यथा 'न कर्मधारयान्मत्वर्थीय' इति निषेधेनाप्रयोगः स्यात्। परमेश्वरस्य नृपश्रेष्ठस्य हरस्य च। **दृश्यमा- नेति।** सृष्ट्यादौ प्रजापतिरस्मात्कोशादेव सामग्रीं गृहीत्वा जगन्निर्मिमीते न्विति कल्पनातात्पर्यम्। दृश्यमानः सकलानां प्राणिनां पर्यायः परितः समन्तादागमनं यस्मिंस्तम्। क्रमकारणं क्रमेण कारणमित्यर्थः। क्रमकारिणमिति पाठस्तु क्रमेण करोतीत्यर्थेन नेयः।

---

१ 'ग्रामाकृष्ट'. २ 'कारिणम्'

8 आसन्नवर्तिनां च 'तत्रभवता मांधात्रा प्रवर्तिताः पन्थानो दिग्विजयाय। अप्रतिहतरथरंहसा रघुणा लघुनैव कालेनाकारि ककुभां प्रसादनम्। शरासनद्वितीयः करदीचकार चक्रं क्रमागतभुजबलाभिजनधनमदावलिप्तानां भूभुजां पाण्डुः। पाण्डवः सव्यसाची चीनविषयमतिक्रम्य राजसूयसंपदे क्रुध्यद्गन्धर्वधनुष्कोटिटांकारकूजितकुञ्जं हेमकूटपर्वतं पराजेष्ट। संकल्पान्तरितो विजयस्तरस्विनाम्। सहिमहिमवद्व्यवहितोऽप्युवाह बाहुबलव्यतिकरकातरः करं कौरवेश्वरस्य किङ्कर इवाकृती द्रुमः। नातिजिगीषवः खलु पूर्वे येनाल्प एव भूभागे भूयांसो भगदत्तदन्तवक्रक्राथकर्णकौरवशिशुपालसाल्वजरासंधसिन्धुराजप्रभृतयोऽभवन्भूपतयः। संतुष्टो राजा युधिष्ठिरो यो ह्यसहत समीप 10

आसन्नेति। पार्थिवसुतानामेवं प्रायानालापान् शृण्वन्नेव समाससादेति संबंधः। **मांधात्रेति**। तत्रभवता पूज्येन। मांधाता नामेक्ष्वाकुकुलोद्भूतो युवनाश्वस्य प्राशितयज्ञोदकस्य स्वपितुः कुक्षेर्विनिर्गत इन्द्रेणायं मां धास्यतीत्युक्तोत एव लब्धमांधातृसंज्ञो नृपः यश्चैकेनान्हा सकलां भूमिमात्मसादकरोदिति कथा भारते। अप्रतिहतं रथस्य रंहो वेगो यस्य तेन रघुणा श्रीरामपूर्वजेन दिलीपपौत्रेण दीर्घबाहोः सुतेन ककुभां दिशां प्रसादनं प्रसन्नीकरणं लघुनैव कालेन स्वल्पकालेनेत्यर्थः। क्रमागतं कुलपरंपराप्राप्तं भुजबलं बाहुसामर्थ्यमाभिजनः स्ववंशः धनं संपच्चैषां मदेनावलिप्ताः मत्तास्तेषां भूभुजां राज्ञां चक्रं समूहं करदीचकार करं ददाति तथाभूतं चकार सासन्तं विदधावित्यर्थः। सव्यसाच्यर्जुनः। क्रुध्यतां कुप्यतां गंधर्वाणां धनुष्कोटीनां टांकारैर्ध्वनिभिः कूजिताः नादिताः कुंजा निकुंजा यस्य तम्। पराजेष्ट। 'विपराभ्यां जेः' इत्यनेन तङि लुङो रूपम्। तरस्विनां पराक्रमिणाम्। हिमेन सहितो हिमवान् हिमालयस्तेन व्यवहितोप्यंतरितोपि किंकर इव सेवक इव द्रुमस्तन्नामकः किन्नराधिपः कौरवेश्वरस्य दुर्योधनस्य करं देयं भागमुवाह धारयामास। भगदत्तो नरकासुरतनयः किराताधिपस्य चीननाथस्य च परमसुहृत्। यो दुर्योधनसहायं भारतीययुद्धे विदधानो जिष्णुना हतः। दंतवक्रो वक्रदंतापरनामको वृद्धशर्मणः करूषाधिपतेस्तनयो यो भगवता दैत्यांश इति हत इति भागवते दशमे अष्टसप्तते ऽध्याये। क्राथको नाम कश्चिन्नृपो यत्पुत्रोऽभिमन्युना युद्धे हतः। कर्णः कुन्त्यास्तनयोऽङ्गराजः सूतपुत्र इति प्रथितो दुर्योधनसखः। शिशुपालो दमघोषतनयः कृष्णस्य भागिनेयश्चैद्यो हिरण्यकशिपोरंशेनावतीर्णो यं भगवान् राजसूययज्ञे जघान। साल्वः कश्चित्साल्वाधिपः। जरासंधो मगधा-

एव धनंजयजयजनितजगत्कम्पः किंपुरुषाणां राज्यम्। अलसश्चण्ड-कोशो यो न प्राविक्षत्क्ष्मां जित्वा स्त्रीराज्यम्। ह्रसीय एवान्तरं तुषारगिरिगन्धमादनयोः। उत्साहिनः किष्कुस्तुरुष्कविषयाः। प्रादेशः पारसीकदेशः। शशपदं शकस्थानम्। अदृश्यमानप्रतिप्रहारे पारियात्रे यात्रैव शिथिला। शौर्यशुल्कः सुलभो दक्षिणापथः। दक्षिणार्णवक-ल्लोलानिलचलितचन्दनलतासौरभसुन्दरीकृतदरीमन्दिराद्दुर्दुरादद्रेर्नेदी-यसि मलयो मलयलग्न एव च महेन्द्रः'। इत्येवंप्रायानुद्योगद्योतका-नामालापान्पार्थिवकुमाराणां बाहुशालिनां शृण्वन्नेवाससादावासम्। मन्दिरद्वारि चोभयतः सबहुमानं भ्रूलताभ्यां विसर्जितराजलोकः प्रविश्य चावततार बाह्यास्थानमण्डपस्थापितमासनमाचक्राम। प्रास्तस-मायोगश्च क्षणमासिष्ट।

9 अथ तत्र प्रतीहारः पृथ्वीपृष्ठप्रतिष्ठापितपाणिपल्लवो विज्ञा-पितवान्—'देव, प्राग्ज्योतिषेश्वरेण कुमारेण प्रहितो हंसवेगनामा

धिपो यश्च भगवत्सहायेन भीमेन ब्राह्मणरूपधारिणा युद्धभिक्षां याचित्वा हतः। सिंधुराजो जयद्रथो दुर्योधनभगिन्या दुःशीलाया भर्ता यश्च जिष्णुना पुत्रवधा-मर्षितेन प्रतिज्ञामारुह्य हतः। ननु स्त्रीराज्यस्य दवीयस्त्वान्न पारितं चंडकोशेन जेतुमिति शंकां निराकर्तुमाह। **ह्रसीय इति**। ह्रस्वतरमुत्साहिन उत्साह-वन्तस्तुरुष्कविषयास्तुरुष्कदेशाः किष्कुहस्तप्रमाणाः प्रमाणे द्वयसजित्यनेन जायमानस्य मात्रचः 'प्रमाणे लः' इत्यनेन लुक्। 'किष्कुर्हस्ते वितस्तौ च' इत्यमरः। प्रादेश इति तु पूर्ववद्व्याख्येयम्। 'प्रादेशो देशमात्रे स्यात्तर्जन्यंगुष्ठ-संमिते' इति मेदिनी। अदृश्यमानः प्रतिप्रहारोरिप्रहारो यस्मिंस्तस्मिन्पा-रियात्रे पर्वतविशेषे। शौर्यमेव शुल्कः पणो यत्र सः। दक्षिणार्णवस्य दक्षिणो-दधेः कल्लोलानिलेन वीचिवातेन चलितानां कंपितानां चंदनलतानां सौरभेण सुगन्धेन सुन्दरीकृतानि शोभितानि दरीमंदिराणि कंदरगृहाणि यस्य तस्माद् दर्दुरात्तन्नामकादद्रेः 'दर्दुरस्तोयदे भेके वाद्यभांडाद्रिभेदयोः' इति मेदिनी। नेदीयस्यन्तिकतरे। 'अंतिकबाढयोर्नेदसाधौ' इत्यनेन नेदादेशः। प्रास्तो दूरीकृतः समायोगः समूहो जनसंमर्द इत्यर्थो येन सः।

अथेति। पृथ्वीपृष्ठे भूतले प्रतिष्ठापितो निहितः पाणिपल्लवो येन सः। प्राग्ज्योतिषेश्वरेण कामरूपाधिपेनाधुना 'आसाम' इति प्रथितदेशस्य नाथेन।

दूतोऽन्तरङ्गस्तोरणमध्यास्ते' इति । राजा तु 'तमाशु प्रवेशय' इति सादरमादिदेश । अथ दक्षतया क्षितिपालादराच्च प्रतीहारः स्वयमेव निरगात् । अनन्तरं च हंसवेगः सविनयमाकल्पैव नयनानन्दसंपादनसुभगाभोगभद्रया समुल्लङ्घ्यमानगुणगरिमा प्रभूतप्राभृतभृतां पुरुषाणां समूहेन महतानुगम्यमानः प्रविवेश राजमन्दिरम् । आरादेव 5 पञ्चाङ्गालिङ्गिताङ्गनः प्रणाममकरोत् । 'एह्येहि' इति सबहुमानमाहूतश्च प्रधावितोऽप्सृतः पादपीठलुठितललाटलेखो न्यस्तहस्तः पृष्ठे पार्थिवेनोपसृत्य भूयो नमश्चक्रे । स्निग्धनरेन्द्रदृष्ट्या निर्दिष्टमविप्रकृष्टं स प्रदेशमध्यास्त । ततो राजा तिरश्चीं तनुमीषदिव दधानश्चामरग्राहिणीमन्तरालवर्तिनीं समुत्सार्य संमुखीनस्तं सप्रश्रयं पप्रच्छ---'हंसवेग, 10 श्रीमान्कच्चित्कुशली कुमारः' इति । स तमन्ववादीत्---'अद्य कुशली येनैवं स्नेहस्नपितया सौहार्दद्रवार्द्रया सगौरवं गिरा पृच्छति देवः' इति ।

10 स्थित्वा च मुहूर्तमिव पुनः स चतुरमुवाच---'चतुरम्भोधिभोगभूतिभाजनभूतस्य देवस्य सद्भावगर्भमपहाय हृदयमेकमन्यदनु- 15 रूपं प्राभृतमेव दुर्लभं लोके तथाप्यस्मत्स्वामिना संदेशमशून्यतां नयता पूर्वजोपार्जितं वारुणातपत्रमाभोगाख्यमनुरूपस्थानन्यासेन कृ-

---

अन्तरंगो विश्वास्यः । नयनयोरानंदस्य हर्षस्य संपादने सुभगः सुंदर आभोगो विस्तारस्तेन भद्रा कल्याणिनी तया आकल्पैव समुल्लंघ्यमान उन्नीयमानो गुणगरिमा गुणगौरवं यस्य सः । प्रभूतान्विपुलान्प्राभृतानुपायनानि बिभ्रति तेषाम् । 'उपायनमुपग्राह्यं प्राभृतं चोपदा स्त्रि ाम्' इत्यमरमाला । आरादेव दूरादेव । 'आराद्दूरसमीपयोः' इत्यमरः । पंचभिरंगैरवयवैः द्वाभ्यां हस्ताभ्यां पद्भ्यां शिरसा चालिंगितमाश्लिष्टमंगनं येन सः । पादपीठे लुठितो घृष्टो ललाटलेखो येन सः अविप्रकृष्टं समीपस्थम् । संमुखीनोऽभिमुखः ।

स्थित्वेति । चतुर्णामंभोधीनां सागराणां भोगस्योपभोगस्य पालनस्येत्यर्थः । भूतेः कल्याणस्य भाजनभूतः पात्रभूतस्तस्य । सद्भावः साधुभावो गर्भे यस्य तत् । अनुरूपं योग्यं प्राभृतमुपहारो दुर्लभमशक्यम् । वारुणातपत्रं वरुणस्य छत्रम् । आभोग इत्याख्या नाम यस्य तत् । अनुरूपस्थाने योग्ये त्वयि न्यासेन

तार्थीकृतमेतत् । अस्य च कुतूहलकृन्ति बहूनि आश्चर्याणि दृश्यन्ते । प्रतिदिवसं प्रविशति शैत्यहेतोश्छायायाः किरणसहस्रादेकैकः सोमस्य रश्मिरस्मिन् । अस्मिन्प्रविष्टे प्रध्यानानन्तरं स्वादवो दन्तवीणोपदेशाचार्याश्च्योतन्ति चन्द्रभासामम्भसां मणिशलाकाभ्यो यावदिच्छमच्छा धाराः । प्रचेता इव यश्चतुर्णामर्णवानामधिपतिर्भूतो भावी वा तमनुगृह्णाति च्छायया नेतरम् । इदं च न सप्तार्चिर्दहति, न पृषदश्वो हरति, नोदकमार्द्रयति, न रजांसि मलिनयन्ति, न जरा जर्जरयति । एतत्तावदनुगृह्णातु दृशा देवः संदेशमपि विस्रब्धं श्रोष्यति '। इत्येवमभिधाय विवृत्यात्मीयं पुरुषमभ्यधात्—'उत्तिष्ठ । दर्शय देवस्य' इति । 5

११ स वचनानन्तरमुत्थाय पुमानूर्ध्वीचकार तद्धौतदुकूलकल्पिताच्च निचोलकादकोषीत् । आकृष्यमाण एव च यस्मिन्नतिसितमहसि सरभसमहासीव हरेण, रसातलादुदलासीव शेषफणिफणाफलकमण्डलेन, अस्थायीव चक्रीभूयान्तरिक्षे क्षीरोदेन, अघटीव गगनाङ्गने गोष्ठीवन्धः शारदेन बलाहकव्यूहेन, विश्रान्तमिव विततपक्षतिना 10

दानेन कृतार्थीकृतं सफली कृतम् । कुतूहलं कौतुकं कुर्वन्ति तानि । शैत्यहेतोः शैत्यलाभार्थं ' षष्ठी हेतु प्रयोगे ' इत्यनेन षष्ठी । स्वादवो मधुराः दन्तवीणायाः शैत्याधिक्येन जायमानं दन्तानां परस्परघर्षणं तस्योपदेशस्याचार्या गुरवः । चन्द्र इव भाः कान्तिर्येषां तेषामम्भसामुदकानामच्छा धाराश्च्योतन्ति गलन्ति । सप्तार्चिरग्निः । पृषदश्वो मातरिश्वा । विवृत्य स्वपुरुषस्याभिमुखीभूय ।

सेति । धौतेन शुभ्रेण दुकूलेन वसनेन कल्पितात्कृतान्निचोलकादाच्छादनात् अकोषीन्निष्कासितवान् । अतिसितमतिशुभ्रं महस्तेजो यस्य तस्मिन् । हरेण शंकरेणाहसीवाट्टहासः कृतो नु । श्वैत्यानुगुणं सर्वं वर्णनमिदम् । अहसीति भावे लुङि प्रथमस्यैकवचनम् । एवमग्रे बोध्यम् । रसातलात्पातालात् । शेषाख्यस्य फणिनः सर्पस्य फणाफलकानां स्फटानां मंडलेन समूहेन शेषस्य सहस्रफणायुक्तत्वात् । उदलासीव बहिरुल्लसितमिव । चक्रीभूय स्वोदकमुन्नमय्यास्थायि स्थितम् । शारदेन शरत्संबंधिना बलाहकव्यूहेन पक्षिविशेषसमूहेन गोष्ठीबंधः सभारचना ' गोष्ठी सभासल्लापयोः स्त्रियाम् ' इति मेदिनी । अघटीव कृतो नु । वितताः पक्षतयः पक्षमूलानि यस्य

वियति पितामहविमानहंसयूथेन, अत्रिनेत्रनिर्गतस्य धवलधाममण्डल-
मनोहरो दृष्ट इव जनेन जन्मदिवसः कुमुदबन्धोः, प्रत्यक्षीकृत इवो-
द्गमनक्षणो नारायणनाभिपुण्डरीकस्य, आहितेव कौमुदीप्रदोषदर्शना-
नन्दतृप्तिरक्ष्णाम्, उदमाङ्क्षीदिव मन्दाकिनीपुलिनमण्डलं महदम्बरो-
दरे, परिवर्तित इव दिवसः पौर्णमासीनिशया, मन्दमन्दमिन्दूदयसंदे- 5
हदूयमानमानसैर्विघटितं घटमानचञ्चुच्युतमृणालकोटिभिरासन्नकमलि-
नीचक्रवाकमिथुनैः, शरज्जलधरपटलाशङ्कासंकोचितकेकारवमूकमुख-
पुटैः पराङ्मुखीभूतं भवनशिखण्डिमण्डलैः, प्रबुद्धमाबद्धचन्द्रानन्दोद्दा-
मोद्दलद्दलपुटाट्टहासविशदं कुमुदषण्डैः ।

12 चित्रीयमाणचेताश्च सराजको राजा दण्डानुसाराधिरोहिण्या 10
दृष्ट्या सादरमैक्षिष्ट तत्तिलकमिव त्रिभुवनस्य, शैशवमिव श्वेतद्वीपस्य,
अंशावतारमिव शरदिन्दोः, हृदयमिव धर्मस्य, निवेशमिव शशिलो-
कस्य, दन्तमण्डलधवलं मुखमिव चक्रवर्तित्वस्य, मौक्तिकजालपरिक-

तेन पितामहस्य ब्रह्मणो विमानहंसानां वाहनभूतानां मरालानां यूथेन समूहेन। कुमुदबन्धोश्चंद्रस्य धवलधाम्नः शुभ्रतेजसो मंडलेन मनोहरः सुंदरः । चंद्रस्यात्रिनेत्रादुत्पत्तिः प्रथितैव । तथा चोक्तम् । 'अयं नेत्रादत्रेरजनि रजनीवल्लभ इति' उद्गमनस्य प्रादुर्भावस्य क्षणः समयः । कौमुदीयुक्तस्य चंद्रिकासहितस्य प्रदोषस्य रजनीमुखस्य दर्शनमवलोकनं तस्यानंदस्य तृप्तिस्तर्पणम् । उदमांक्षीदिवोपरि समागतं नु । मंदाकिन्याः स्वर्गगायाः पुलिनमंडलं सैकतमंडलं महदम्बरोदरे नभोमध्ये । मंदमंदं शनैः शनैरिन्दूदयस्य चंद्रोदयस्य संदेहेन संशयेन दूयमानं पीड्यमानं मानसं मनो येषां तैर्घटमानाभ्यो विकसिताभ्यश्चञ्चुभ्यश्च्युता गलिता मृणालकोटयो बिसाग्राणि येषां तैरासन्नायाः समीपस्थायाः कमलिन्याश्चक्रवाकमिथुनैः कोकद्वन्द्वैर्विघटितं वियुक्तं नु । शरज्जलधराणां शारदमेघानां पटलस्य समूहस्याशंकया शंकोचितेनाल्पीकृतेन केकारवेण मूकानि स्तब्धानि मुखपुटानि येषां तैः । कुमुदषंडैः कैरवसमूहैः आबद्धो धृतश्चंद्रानंदश्चंद्रोदयानंदस्तेनोद्दाममतिशयमुद्दलन्ति विकसन्ति दलपुटान्येवाट्टहास उच्चैर्हास्यं तेन विशदं यथा स्यात्तथा प्रबुद्धं विकसितम् ।

चित्रीयमाणेति । राजकेन नृपसमूहेन सहितः । दंडानुसारेणाधिरोहत्यारोहति तया । तिलकमिव चंदनतिलकमिव श्वेतत्वात्तिलकसाम्यम् । निवेशं स्थानम् । **दंतमंडलेति** । दंतमंडलेन हस्तिदशनसमूहेन धवलं शुभ्रं मुखमिव

रसितं सीमन्तचक्रमिव दिवः, बहलज्योत्स्नाशुक्लोदरमैन्दवमिव परिवे-
शवलयं, शौक्ल्यहसितशङ्खश्रीकं श्रवणमण्डलमिव निश्चलतां गतमैरा-
वतस्य, श्वेतगङ्गावर्तपाण्डुरं पदमिव त्रिभुवनवन्दनीयं त्रिविक्रमस्य,
प्रचेतसश्चूडामणिमरीचिशिखाभिरिव श्लिष्टाभिर्मानसबिसतन्तुमयीभि-
श्चामरिकावलीभिर्विरचितपरिवेशम्, उपरि चक्रवर्तिलक्ष्मीनूपुरस्वन- 5
श्रवणदोहदनिश्चलेनेव लक्ष्मणा विततपत्रेण हंसेन सनाथीकृतशिखरम्,
स्पर्शवता च प्रभावस्तम्भितेन मन्दाकिनीमृणालेन मुकुलितफणेन
वासुकिनेव नीतेन दण्डतां द्योतमानम्, धवलिम्ना क्षालयदिव नक्ष-
त्रपथम्, प्रभाप्रवाहप्रथिम्ना प्रावृण्वदिव दिवसम्, समुच्छ्रायेणाधः-
कुर्वदिव दिवम्, उपरिस्थितमिव सर्वमङ्गलानाम्, श्वेतमण्डपमिव 10
श्रियः, स्तबकमिव ब्रह्मस्तम्भस्य, नाभिमण्डलमिव ज्योत्स्नायाः, विशदं
हासमिव कीर्तेः, फेनराशिमिव खड्गधाराजलानाम्, यशःपटलमिव
शौर्यशालितायाः, त्रैलोक्याद्भुतं महच्छत्रम् ।

प्रारंभ इव । चक्रवर्तित्वसर्वाकर्त्रा राज्ञा हस्तिदंतसमूहेन प्रासादादिप्रसाधनप्रारंभः कार्यः इत्याचार इति भाति । पक्षे दशनसमूहेन शुभ्रं मुखमाननम् । मौक्तिकजालस्य जालमयमौक्तिकालंकारस्य परिकरेण परिवेष्टनेन सितं दिवः स्वर्गस्य सीमन्तचक्रमिव केशवेशवर्तुलमिव । बहलया विपुलया ज्योत्स्नया चंद्रिकया शुक्लमुदरं यस्य तदैंदवं चंद्रसंबंधि परिवेशमासमंताज्जायमानं परिधिवर्तुलमिव । शौक्ल्येन शुभ्रत्वेन हसिता धिक्कृता शंखश्रीर्येन तदैरावतस्य श्रवणमंडलं कर्णवर्तुलम् । श्वेतेन गंगाया आवर्तेनोदकभ्रमेण पांडुरम् । **प्रचेतस इति** । छत्रमभितो बिसमयानि चामराणि वर्तुलतया स्थापितानि तेषु च वरुणस्य चूडामणिकिरणानामेकीभूतानामारोप इति भावः । **उपरीति** । चक्रवर्तिनो लक्ष्म्या नूपुरस्वनस्य नूपुरशब्दस्य श्रवणदोहदेन श्रवणेच्छया निश्चलेनेव लक्ष्मणा चिन्हेन हंसेन सनाथीकृतं युक्तं शिखरं यस्य । यस्योपरि हंसप्रतिमा लिखिता तस्यां च साम्राज्यश्रियो नूपुरनादशुश्रूषया निश्चलत्वारोपः । स्पर्शवता प्रशस्तस्पर्शेन प्रशंसायां मतुब् । प्रभावेण स्तंभित एकीकृतस्तेन स्तब्धतां नीतेन वा । दण्डतां नीतेन मंदाकिनीमृणालेन स्वर्गंगाबिसेन मुकुलिताः संकोचिताः फणा येन तेन वासुकिनेव द्योतमानं शोभमानम् । प्रभायाः कान्त्याः प्रवाहस्यौघस्य प्रथिम्ना पृथुतया दिवसं प्रावृण्वदिवाच्छादयदिव । समुच्छ्रयेणोन्नत्येन । दिवमाकाशम् । स्तबकमिव पुष्पगुच्छमिव ब्रह्मस्तम्भस्य ब्रह्मरूपवृक्षकांडस्य ।

13 दृष्टे च तस्मिन्राज्ञा प्रथमे शेषमपि प्राभृतं प्रकाशयांचक्रुः क्रमेण कार्माः। तद्यथा—परार्ध्यरत्नांशुशोणीकृतदिग्भागान् भगदत्तप्रभृतिख्यातपार्थिवपरागतानाहतलक्षणानलंकारान्, प्रभालेपिनां च चूडामणीनां समुत्कर्षान्, क्षीरोदधेर्धवलताहेतूनिव हारान्, अनेकरागरुचिरवेत्रकरण्डकुण्डलीकृतानि शरच्चन्द्रमरीचिरुञ्जि शौचक्षमाणि क्षौमाणि, 5
कुशलशिल्पिलोकोल्लिखितानां च शुक्तिशङ्खगल्वर्कप्रमुखानां पानभाजनानां निचयान्, निचोलकरक्षितरुचां च रुचिरकाञ्चनपत्रभङ्गभङ्गुराणामतिबन्धुरपरिवेशानां कार्दरङ्गचर्मणां संभारान्, भूर्जत्वक्कोमलाः स्पर्शवतीः जातीपट्टिकाः, चित्रपटानां च म्रदीयसां समूरुकोपधानादीन्विकारान्, प्रियङ्गुप्रसवपिङ्गलत्वञ्चि चासनानि वेत्रमयानि, अगुरु- 10

दृष्ट इति। कार्माः कर्म शीलं येषां ते सेवकाः। कर्मशब्दाद् 'छत्रादिभ्यो णः' इत्यनेन णः। पराध्यर्णां महार्हाणां रत्नानामंशुभिः किरणैः शोणीकृतास्ताम्रीकृता दिग्भागा यैस्तान्। भगदत्तः पांडवकालीनो दुर्योधनसखः स प्रभृतिर्येषां ते ख्याताः पार्थिवा नृपास्तेभ्यः परागतान्परंपरया प्राप्तान् आहतलक्षणान् गुणैः प्रथितानलंकारान्। 'गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ' इत्यमरः। प्रभया लिंपन्ति तेषां समुत्कर्षानतिशयान्। अनेके रागे रंगे रुचिरेषु मनोहरेषु करंडकेषु कुंडलीकृतानि वर्तुलतया स्थापितानि शरच्चंद्रस्य मरीचयः किरणानीव रुक् कान्तिर्येषां तानि शौचस्य शोधनस्य क्षमाणि योग्यानि क्षौमाणि क्षुमाविकारान्। कुशलैः शिल्पिलोकैरुल्लिखितानां कृतानां शुक्तयः शंखा गल्वर्को मसराख्यामणिविशेषश्चंद्रकान्ता वा प्रमुखा येषां तेषां तन्मयानित्यर्थः पानभाजनानां पानपात्राणां निचयान्समूहान्। निचोलकैराच्छादनै रक्षिता रुक् कान्तिर्येषां तेषां रुचिरैर्मनोहरैः कांचनपत्रभंगैः सुवर्णरचनाविशेषैर्भंगुरा वक्रास्तेषामतिबन्धुरोऽतिहृद्यः परिवेशो मंडलं येषां तेषां कार्दरंगचर्मणां कार्दरंगदेशोद्भवानां चर्मणां 'ढाल' इति महाराष्ट्रभाषायां प्रथितानां संभारान्संचयान्। भूर्जत्वचमिव वृक्षविशेषत्वचमिव कोमलाः स्पर्शवतीः मृदुस्पर्शयुक्ता जातिपट्टिकाः श्रेष्ठानि जघनग्रंथनानि 'कंमरपट्टा' इति महाराष्ट्रभाषायां प्रथिताः। म्रदीयसां मृदुतराणां चित्रपटानां समूरुकोपधानानि ऊरूणामाच्छादकानि 'मांडचोळणा' इति प्रसिद्धानि आदीनि येषां तान् विकारान् अनेकवस्त्रभेदान्। प्रियंगुप्रसव इव श्यामाकुसुममिव पिंगला त्वक् येषां तानि वेत्रमयानि वेतसकल्पितान्यासनानि। अगुरुवल्कलैश्चंदनत्वग्भिः कल्पिताः संचयाः पत्रसमूहा

१६

वल्कलकल्पितसंचयानि च सुभाषितभाञ्जि पुस्तकानि, परिणतपाटल-
पटोलत्विंषि च तरुणहारीतहरिन्ति क्षीरक्षारीणि च पूगानां पल्लवल-
म्बीनि सरसानि फलानि, सहकारलतारसानां च कृष्णागुरुतैलस्य च
कुपितकपिकपोलकपिलकापोतिकापलाशकोशीकचचिताङ्गीः स्थवीय-
सीर्वैणवीर्नाडीश्च पट्टसूत्रप्रसेवकार्पितांश्च भिन्नाञ्जनकृष्णस्य कृष्णागु- 5
रुणः, गुरुपरितापमुषश्च गोशीर्षचन्दनस्य, तुषारशिलाशकलशिशिर-
स्वच्छसितस्य च कर्पूरस्य, कस्तूरिकाकोशकानां च पक्वफलजूटजटि-
लानां च कक्कोलपल्लवानाम्, लवङ्गपुष्पमञ्जरीणां जातीफलस्तबकानां
च राशीन्; अतिमधुरमधुरसामोदनिर्हारिणीश्चोल्लककलशीः, सिता-
सितस्य च चामरजातस्य निचयान्, अवलम्बमानतूलिकालाबुकांश्च 10
लिखितानालेख्यफलकसंपुटान्, कुतूहलकृन्ति कनकशृङ्खलानियमि-
तग्रीवाणां किन्नराणां च वनमानुषाणां च जीवञ्जीवकानां च जल-

येषां तानि सुभाषितानि सूक्तानि भजंते तानि पुस्तकानि । परिणतः पक्वः पाटलस्ताम्रः पटोल ओषधिविशेष इव त्विट् कान्तिर्येषां तानि तरुणहारीत इव युवहरिद्वर्णकपोत इव हरिन्ति हरिद्वर्णानि। 'हारीतो विहगान्तरे' इति हैमः। हारि इतं गमनं यस्येति व्युत्पत्तिश्च । क्षीरं जलं क्षरन्ति तानि प्रत्यग्राणीत्यर्थः पूगानां क्रमुकाणां पल्लवेषु पर्णेषु लंबन्ते तानि । कुपितस्य क्रुद्धस्य कपेः कपोल इव गल्लइव कपिलाः कापोतिकाया ओषधिविशेषस्य पलाशास्तेषां कोशाभि-राच्छादनैः कचिचितान्याच्छादितान्यंगानि यासां ताः स्थवीयसीः स्थूलतरा वैणवीर्नाडीः कीचकनलिकाः । पट्टसूत्राणां प्रसेवकेषु स्यूतेषु अर्पितान् । अस्य राशीनित्यनेनाग्रिमेण संबंधः। भिन्नं परिमृदितमंजनं कज्जलमिव कृष्णस्तस्य । गुरुं महान्तं परितापं पीडां मुष्णाति नाशयति तस्य गोशीर्षचंदनस्य चंदनभे-दस्य । तुषारशिला हिमशिलास्तस्याः शकल इव खंड इव शिशिरः शीतः स्वच्छो मलरहितः सितः शुभ्रस्तस्य। कस्तूरिकाकोशकानां कस्तूरिकानाभीनाम्। पक्वानां फलानां जूटेन समूहेन जटिलानां व्याप्तानाम्। अतिमधुरायाः मधुरसाया द्राक्षाया मधुरसस्य मकरन्दस्य वा आमोदं गन्धं निर्हरन्ति दूरं नयन्ति ता उल्लककलशीर्मद्यकुंभान् सुगन्धिफलरसकुंभान् वा । अवलंबमानास्तूलिकाश्चित्र-करणशलाका अलाबुका रंगपात्राणि येषां तान् लिखितांश्चित्रितानालेख्यफल-कानां संपुटान् समूहान् । जीवंजीवकानां चकोराणाम् । परिमलेन सुगंधेनामो-दिताः सुरभीकृताः ककुभो दिशो यैस्तान् । गेहे गृहे परिसरणं पर्यटनं तत्र

मानुषाणां च मिथुनानि, परिमलामोदितककुभश्च कस्तूरिकाकुरङ्गान्, गेहपरिसरणपरिचिताश्च चमरीः, चामीकररसचित्रवेत्रपञ्जरान्तर्गतांश्च सुबहुसुभाषितजल्पाकजिव्हांश्च शुकशारिकाप्रभृतीन्पक्षिणः, प्रवाल-पञ्जरगतांश्च चकोरान्, जलहस्तिनामुदग्रकुम्भमुक्ताफलदामदन्तुराणि च दन्तकाण्डकुण्डलानि । 5

14 राजा तु छत्रदर्शनात्प्रहृष्टहृदयः प्रथमप्रयाणे शोभननि-मित्तमिति मनसा जग्राह । हंसवेगं च प्रीयमाणो बभाषे—'भद्र, सकल-रत्नधाम्नः परमेश्वरशिरोधारणार्हस्यास्य महातपत्रस्य महार्णवादिव कुमुदबान्धवस्य कुमुराल्लाभो न विस्मयाय । बालविद्याः खलु मह-तामुपकृतयः' इति । अपनीतं च तस्मात्प्रदेशात्प्राभृतसंभारे क्षणमिव- 10 स्थित्वा 'हंसवेग, विश्रम्यताम्' इति प्रतीहारभवनं विसर्जयांबभूव । स्वयमप्युत्थाय स्नात्वा मङ्गलाकाङ्क्षी प्राङ्मुखः प्राविशदाभोगस्य छायाम् ।

15 अथ विशत एवास्य छायाजन्मना जडिम्ना चूडामणिता-मनीयतेव शशिबिम्बमम्बुबिन्दुमुचश्चुचुम्बुरिव चन्द्रकान्तमणयो लला- 15 टतटं, कर्पूररेणव इव व्यलीयन्त लोचनयुगले, गलत्तुहिनकणनिकर-कृतनीहारा हारा इवावध्यन्त, हरिचन्दनरसासारेणेवापाति संततमुरसि, कुमुदमयमिव हृदयमभवदतिशिशिरम्, अन्तर्हितहिमशिलेव विलीय-

---

परिचिता अभिज्ञा चमरीर्मृगीः । चामीकररसेन सुवर्णरसेन चित्राणां वेत्रपंजरा-णामन्तर्गतान् सुबहुषु अत्यंतेषु भाषितेषु जल्पाक्यो वाचाला जिव्हा येषां तान् । 'जल्पभिक्षकुट्टलुण्टवृङः षाकन्' इत्यनेन जल्पतेः षाकन् । उदग्राणां विशालानां कुम्भमुक्ताफलानां गंडस्थलमौक्तिकानां दामभिर्मालाभिर्दन्तुराणि नतोन्नतानि दन्तकांडस्य हस्तिदन्तखण्डस्य कुंडलानि कर्णभूषणानि ।

राजेति । सकलानां सर्वेषां रत्नानां धाम गृहं तस्मात् कुमारान्महार्ण-वाच्च । परमेश्वरेण सार्वभौमेन शिवेन च शिरोधारणस्यार्हं योग्यं तस्य । कुमु-दानां कैरवाणां बांधवः सुहृत् तथा कान्तिमत्वात्पक्षे चन्द्रस्य । बालविद्या बाल्ये एवाधिगता विद्या इत्यर्थः । आभोगस्य तदाख्यछत्रस्य ।

अथेति । **छायेति** । चन्द्रबिम्बमेव चूडामणौ प्रविष्टं न्वित्यर्थः । अम्बुबिन्दून् वारिकणान् मुंचंति ते चन्द्रकान्तमणयो ललाटतटं चुचुम्बुरिव । हरिचंदनरसस्यासारेण समूहेन उरसि वक्षस्यपाति पतितम् । अन्तर्हितं स्थापितं

माना व्यलिम्पदङ्गानि । जातविस्मयश्चाकरोन्मनसि एकमजर्यं संगत-
मपहाय कास्त्यन्या प्रतिकौशलिकेति । आहारकाले च हंसवेगाय
धवलकर्पटप्रावृतधौतनालिकेरपरिगृहीतं विलिप्तशेषं चन्दनमङ्गस्पृष्टे
च वाससी शरत्तारकाकारतारमुक्तास्तबकितपदं परिवेशं नाम कटि-
सूत्रमतिमहार्हपद्मरागालोकलोहितीकृतदिवसं च तरङ्गकं नाम कर्णा- 5
भरणं प्रभूतं च भोज्यजातं प्राहिणोत् । एवंप्रायेण च क्रमेण जगाम
दिवसः ।

16 ततः कटकस्थबलबहलधूलिधूसरितवपुरंशुमाली मलीम-
समङ्गमिव क्षालयितुमपरजलनिधिमवातरत् । आभोगातपत्रप्रदानवा-
र्तामिव निवेदयितुं वरुणाय वारुणीं दिशमयासीत् । मुकुलायमानस- 10
कलकमलवना प्रमुख एव बद्धसेवाञ्जलिपुटेव सव्रीडा भूरभवन्नृपतेः ।
नृपानुरागमय इव निखिलजीवलोकाञ्जलिबन्धबन्धुर्जगज्जग्राह संध्या-
रागः । गौडापराधशङ्किनीव श्यामतां प्रपेदे दिक्प्राची । प्रचिततिमिरनिवहा निर्वाणान्यनृपप्रतापानलकलापेव कालिमानमतानीन्मेदिनी।

हिमं यस्यां सा शिला करका सेव विलीयमाना द्रवमाणाऽङ्गान्यवयवान् व्यलिम्पत् । अजर्यं न जीर्यति नश्यति तथाभूतं स्थायि संगतं सौहार्दमपहाय वर्जयित्वा तादृशीं मैत्रीं विनेत्यर्थ । प्रतिकौशलिका प्रत्युपहारः । अस्योपायनस्योचितमभ्यस्तसौहार्दान्नेति भावः । धवलेन शुभ्रेण कर्पटेन वसनेन प्रावृते वेष्टिते धौते स्वच्छे नालिकेरे परिगृहीतं स्थापितं विलिप्तशेषमुपभुक्तावशिष्टं चंदनम् । अंगस्पृष्टे उपभुक्तपूर्वे वाससी वस्त्रद्वयम् । शरत्तारका शारदनक्षत्रमिवाकारो यासां ताभिस्ताराभिः स्वच्छाभिर्मुक्ताभिः स्तबकितं संजातगुच्छं पदं निवेशो यस्य तत् । अतिमहार्हाणाममूल्यानां पद्मरागाणां लोहितकानामालोकेन कान्त्या लोहितीकृतस्ताम्रीकृतो दिवसो येन तत् ।

तत इति । कटकं हस्त्यश्वादीनां संनिवेशदेशः शिबिरामिति लक्षणया प्राह्यं तस्य बलस्य सैन्यस्य धूलिभिः रजोभिः धूसरितं मलिनीकृतं वपुर्यस्य सः । वारुणीं पश्चिमां दिशम् । **मुकुलायमानेति** । सूर्यास्तेन कमलानां संकोच इति भावः । भूपाले नृपेऽनुरागो भक्तिस्तस्य राशिमयः समूहप्रचूर इव निखिलस्य सकलस्य जीवलोकस्य भूलोकस्य लोकाः प्राणिनस्तेषामंजलिबंधस्य नमस्कारस्य बंधुर्बांधवः संध्यारागो जगद् भुवं जग्राहालिलिंग । **गौडेति।** एतेन स गौडाधमः पूर्वदेशाधिप इति ज्ञायते । प्राचित एकीकृतास्तिमिरनिवहस्तमः-

मेदिनीशप्रदोषास्थानपुष्पनिकरमिव विकचतगररुचिरमवचकरुरुडुनि-
करमविरलं ककुभः । स्कन्धावारगन्धगजमदामोदधावितस्येव मार्गो
वियति विरराज रजःपाण्डुरैरावतस्य । कुपितनृपव्याघ्राघ्रातामुपसृष्टा-
मिव पौरुहूतीं विहाय विहायस्तलमारुरोह रोहिणीरमणः । प्रयाण-
वार्ता इव मानिनीनां हृदयभेदिन्यो ययुरिन्दुदीधितयो दश दिशः । 5
नवनृपदण्डयात्रात्रासातुरा इव तरलितसत्त्ववृत्तयश्चुक्षुभुः पतयो वा-
हिनीनाम् । चिन्तेव भूभृतां हृदयानि विवेश गुहाविवराणि विमु-
क्तसर्वाशातिमिरसंततिः । प्रतिसामन्तचक्षुषामिव ननाश निद्रा कुमु-
दवनानाम् ।

संचयो यया सा मेदिनी भूर्निर्वाणो नाशितोऽन्येषां नृपाणां प्रतापानलकलापः पराक्रमवन्हिसमूहो यया तथैव कालिमानं कार्ष्ण्यमतानीद्विस्तारयामास । **मेदिनीति** । ककुभो दिशो मेदिनीशस्य नृपस्य प्रदोषास्थानं सायंकालनिवासगृहं तस्य पुष्पनिकरमिव तत्र क्षिप्यमाणानां कुसुमानां संचयमिव विकचं प्रफुल्लं तगरं तगरपुष्पमिव रुचिरं मनोहरमुडुनिकरं नक्षत्रसमूहमवचकरुः प्रचिक्षिपुः। स्कन्धावारस्य सेनाया गन्धगजानां मत्तहस्तिनां मदामोदे मदगन्धे धावितस्य ऐरावतस्य रजोभिर्धूलिभिः पांडुर्मार्ग इव विरराज । गन्धगजेभ्यः कुपितस्य ऐरावतस्य शीघ्रगत्योत्थिता धूलिर्न्विर्यर्मित कल्पना धूसराकाशे ।कुपितेन नृपव्याघ्रेण हर्षेणाघ्रातामवलोकितां पौरुहूतीं प्राचीं दिशं विहाय त्यक्त्वा विहायस्तलं नभस्तलम् । रोहिणीरमणश्चन्द्रोवृषश्च । वृषभो व्याघ्रयुतां दिशं परित्यज्यान्यत्र यथा व्रजति तद्वच्चंद्रो नृपव्याघ्रेणाघ्रातां दिशं त्यक्त्वा नभ आरुरोहेत्यर्थः । ' रोहिणीसोमवल्के भे कंठरोगोमयोर्गवि ' इति हेमचंद्रः । **प्रयाणेति** । प्रेयसां प्रयाणवार्ताः प्रवासोदंताः यथा मानिनीनां प्रियविषये अभिमानवतीनां हृदयभेदिन्यः मनस्तापदाः भवन्ति एवं तादृशीनां तापदायिन्य इंदुदीधितयः दश दिशः ययुः प्रससुरित्यर्थः । **नवेति** । नवनृपस्य हर्षस्य दण्डयात्रा भूविजयाय गमनं तस्यास्त्रासेन आतुराः पीडिता इव तरलिताः कंपिताः सत्वस्य धैर्यस्य धृतेश्च: पक्षे सत्वानामन्तर्निवसतां प्राणिनां वृत्तयो यैस्ते वाहिनीनां सेनानां नदीनां च पतयः सेनापतयः समुद्रा वा चुक्षुभुः । विमुक्ता सर्वाः सकला आशा दिश इच्छां वा यया सा ।

17 अस्यां च वेलायां विततवितानतलवर्ती नरेन्द्रो 'यात तावत्' इति विसर्ज्यानुजीविनो हंसवेगमादिष्टवान्---'कथय संदेशम् इति'। प्रणम्य स कथयितुं प्रास्तावीत्---'देव, पुरा वराहसंपर्कसंभूतगर्भया भगवत्या भुवा नरको नाम सूनुरसावि रसातले। वीरस्य यस्याभवन्बाल्य एव पादप्रणामप्रणयिनश्चुडामणयो लोकपालानाम्। यस्य च त्रिभुवनभुजो भुजशौण्डस्य भवनकमलिनीचक्रवाकीकोपकुटिलकटाक्षेक्षितोऽपि भयचकितारुणपरिवर्तितरथो नाज्ञया विना रविरस्तमव्राजीत्। यश्च वरुणस्य बहिर्वृत्ति हृदयमिदमातपत्रमहार्षीत्। महात्मनस्तस्यान्वये भगदत्तपुष्पदत्तवज्रदत्तप्रभृतिषु व्यतीतेषु बहुषु मेरूपमेषु महत्सु महीपालेषु प्रपौत्रो महाराजभूतिवर्मणः पौत्रश्चन्द्रमुखवर्मणः पुत्रो देवस्य कैलासस्थिरस्थितेः स्थितिवर्मणः सुस्थिरवर्मा नाम महाराजाधिराजो जज्ञे तेजसां राशिर्मृगाङ्क इति यं जना जगुः। योऽयमजेनेवाजायत सहैवाहंकारेण। यश्च बाल एव प्रीत्या द्विजातीनप्रीत्या चारातीन्समग्रान्प्रतिग्रहानग्राहयत्। यत्र चातिदुर्लभं लवणालयसंभूतायाः परं माधुर्यमभूल्लक्ष्म्याः। तथा च यो वाहिनीनाथानां शङ्का-

---

अस्यामिति। विततस्य विस्तीर्णस्य वितानस्य उल्लोचस्य 'छत' इति ख्यातस्य तले वर्तते सः। रहसि हंसवेगभाषितं शुश्रूषुर्नृपः सेवकान्गच्छतेति वक्ति। **यातेति**। हंसवेग उपक्रमते। **देवेति**। संपर्कः संबन्धः रसातले भूपृष्ठे पादप्रणामे नमस्कारे प्रणयः प्रेमास्ति येषां तथाभूताः। मत्वर्थीय इनिः। त्रिभुवनभुजो जगत्त्रयाधिपस्य भुजाभ्यां शौंडस्य ख्यातस्य। 'शौंडो मत्ते च विख्याते' इति विश्वः। यस्य नरकस्याज्ञया विना भवनकमलिन्या गृहकमलिन्याश्चक्रवाकीणां कोपेन वियोगभीत्या जायमानेन क्रोधेन कुटिलैर्वक्रैः कटाक्षैरीक्षितोऽप्यवलोकितोपि भयेन भीत्या चकितस्त्रस्तोरुणोऽनूरुस्तेन परिवर्तितो रथो यस्य स रविः। अहार्षीत् प्रसभं जग्राह। अजेनेवानुत्पन्नेनेवाहंकारेण सहैवाजायत समुत्पन्नः। प्रतिग्रहान् दीयमानानर्थान् सैन्यपश्चाद्भागांश्च। अग्राहयन् स्वीकारयामास। ग्राहयतेर्द्विकर्मत्वाभावेपि ज्ञानार्थत्वं स्वीकृत्य द्विकर्मत्वं यथाकथंचिज्ज्ञापनीयम्। अनुमतं चेदं भट्टिना 'अजिग्रहत्तं जनको धनुस्तद्' इति प्रयोगेण। लवणालयात् सागरात् संभूतायाः माधुर्यमिति विरोधः परमा प्रीतिरिति परिहारः। स्पष्टं चेदमग्रे। वाहिनीनाथानां नृपाणां सागराणां च। अवनिभृतां राज्ञां पर्वतानां च।

ञ्जहार न रत्नानि, पृथिव्याः स्थैर्यं जग्राह न करम्, अवनिभृतां गौरवमादत्त न नैष्ठुर्यम् । तस्य च सुगृहीतनाम्नो देवस्य देव्यां श्यामादेव्यां भास्करद्युतिर्भास्करवर्मापरनामा तनयः शंतनोर्भागीरथ्यां भीष्म इव कुमारः समभवत् । अयमस्य च शैशवादारभ्य संकल्पः स्थेयान्स्थाणुपादारविन्दद्वयादृते नाहमन्यं नमस्कुर्यामिति । ईदृशश्चायं मनोरथस्त्रिभुवनदुर्लभस्त्रयाणामन्यतमेन संपद्यते सकलभुवनविजयेन वा मृत्युना वा यदि वा प्रचण्डप्रतापज्वलनजनितदिग्दाहेन जगत्येकवीरेण देवोपमेन मित्रेण । मैत्री च प्रायः कार्यव्यपेक्षिणी क्षोणीभृताम् । कार्यं च कीदृशं नाम तद्भवेद्यदुपन्यस्यमानमुपनयेन्मित्रतां देवम् । देवस्य हि यशांसि संचिचीषतो बहिरङ्गभूतानि धनानि । बाहावेव च केवले निषण्णस्य शेषावयवानामपि साहायकसंपादनमनोरथो निरवकाशः किमुत बाह्यजनस्य । चतुःसागरग्रामग्रहणघस्मरस्य पृथिव्येकदेशदानोपन्यासेनापि का तुष्टिः । अभिरूपकन्याविश्राणनविलोभनमपि लक्ष्मीमुखारविन्ददर्शनदुर्ललितदृष्टेरकिंचित्करम् । एवमघटमानसकलोपायसंपादितपदार्थेऽस्मिन्प्रार्थनामात्रमेव केवलमनुरुध्यमानः शृणोतु देवः । प्राग्ज्योतिषेश्वरो हि देवेनैकपिङ्ग इवानङ्गद्विषा, दशरथ इव गोत्रभिदा, धनंजय इव पुष्कराक्षेण, वैकर्तन इव दुर्योधनेन,

---

स्थेयान् स्थिरतरः । प्रियस्थिरेत्यादिना स्थादेशः । स्थाणो रुद्रस्य पादारविन्दद्वयात्पदकमलद्वयादृते विना । प्रचण्डेन महता प्रतापज्वलनेन प्रतापाग्निना जनितः कृतो दिग्दाहो दिशां ज्वलनं येन तेन एकवीरेण अद्वितीयवीरेण । कार्यं विशेषणापेक्षतेऽवलोकते तथाभूता क्षोणीभृतां नृपाणां मैत्री सौहार्दम् । बाहाविति स्वकरमात्रमाहात्म्येन सर्वं संपादयत इत्यर्थः । चतुर्णां सागराणां समुद्राणां ग्रामस्य समूहस्य ग्रहणेन स्वीकारेण घस्मरस्योपभोक्तुः । 'सृघस्यदः क्मरच्' इत्यनेन क्मरच् । पृथिव्या भुव एकदेशदानेनाल्पप्रदेशदानेन का परितुष्टिः कः संतोषः । अभिरूपायाः योग्यायाः कन्याया वध्वा विश्राणजस्य दानस्य विलोभनम् । लक्ष्म्या राज्यलक्ष्म्या मुखारविन्दस्य मुखकमलस्य दर्शनेऽवलोकने दुर्ललिता विशेषासक्ता दृष्टिर्यस्य तस्य । घटमानैर्युज्यमानैः सकलैरुपायैः संपादितो नेत्यघटमानसकलोपायसंपादितस्तथाभूतः पदार्थो मैत्रीरूपस्तस्मिन् । एकपिंगः कुबेरः । 'यक्षैकपिंगैलविलश्रीदपुण्यजनेश्वराः' इत्यमरः । अनंगद्विषा शंकरेण । गोत्रभिदेन्द्रेण । धनंजयोऽर्जुन इव पुष्कराक्षेण श्रीकृष्णेन ।

मलयानिल इव माधवेन, अजर्यं संगतमिच्छति । यदि च देवस्यापि मैत्रीयति हृदयमवगच्छति च पर्यायान्तरितं दास्यमनुतिष्ठन्ति सुहृद इति ततः किमास्यते समाज्ञाप्यतामनुभवतु विष्णोर्मन्दरगिरिरिव विकटकेयूरकोटिमणिविघट्टनक्वणितकटकमणिशिलाशकलानि गाढोपगूढानि देवस्य कामरूपाधिपतिः । अस्मिन्नातृप्तेरनवरतविमललावण्यसौभाग्यसुधानिर्झरिणि मुखशशिनि चिराच्चक्षुषी लालयतु प्राग्ज्योतिषेश्वरश्रीः । नाभिनन्दति चेद्देवः प्रणयमाज्ञापयतु किं कथनीयं मया स्वामिनः' इति । 5

18 विरतवचसि तस्मिन्भूपालः पूर्वोपलब्धैरेव गुरुभिर्गुणैरारोपितबहुमानः कुमारे सुदूरमाभोगातपत्रव्यतिकरेण तु परां कोटिमारोपिते प्रेम्णि लज्जमान इव सादरं जगाद— 'हंसवेग, कथमिव तादृशि महात्मनि महाभिजने पुण्यराशौ गुणिनां प्राग्रहरे परोक्षसुहृदि स्निह्यति मद्विधस्यान्यथा स्वप्नेऽपि प्रवर्तेत मनः । सकलजगदुत्तापनपटवोऽपि शिशिरायन्ते त्रिभुवननयनानन्दकरे कमलाकरे करास्तिग्मतेजसः । 10

वैकर्तनः कर्णः मलयानिल इव वासन्तानिल इव माधवेन वसन्तेन । ' झंझावातः प्रावृषिजो वासन्तो मलयानिल ' इति हारावली । अजर्यं चिरस्थायि संगतं सौहार्दम् । ' अजर्यं संगतम् ' इत्यनेन नञ्पूर्वाज्जीर्यतेः कर्तरि यत् । मैत्रीयति मैत्रीमिच्छति । ' सुप आत्मनः क्यच् ' इत्यनेन क्यच् । पर्यायेण मैत्रीरूपेणान्तरितमाच्छादितं दास्यमेवानुतिष्ठन्ति सुहृत्कार्यव्यापृतिरेव दास्यत्वमिति भावः । किमास्यते किमिति मुधा स्थीयत इत्यर्थः । **विष्णोर्मंदरगिरिरिवेति** । समुद्रमंथनवेलायामिति भावः । विकटयोर्विशालयोः केयूरयोः कोटीनामग्राणां मणिभिः रत्नैर्विघट्टनेन घर्षणेन क्वणिताः सशब्दाः कटकस्याद्रिनितंबस्येति मंदरपक्षे हस्तस्थवलयस्य मणिशिलानां रत्नानां शकलाः खंडा येषु तानि देवस्य ते हर्षस्य गाढोपगूढानि दृढालिंगनानि कामरूपाधिपतिः कुमारो भास्करवर्माऽनुभवतु । आ तृप्तेः भिन्नं पदद्वयं समासस्य वैकल्पिकत्वात् । अनवरतं सततं विमलं स्वच्छं लावण्यसौभाग्यं सौन्दर्यसौभाग्यमेव सुधा तस्या निर्झरः प्रवाहो विद्यते यस्य तस्मिन् मुखशशिनि मुखचंद्रे चिराद्बहुकालम् ।

विरतेति । पूर्वमादावुपलब्धैर्ज्ञातैः । प्राग्रहरे श्रेष्ठे । परोक्षसुहृदि दर्शनं विनापि मैत्रीं प्रविष्टे स्निह्यति प्रेमयुते । अन्यथा विपरीतम् । सकलस्य जगत उत्तापने पीडने पटवः कुशला अपि । तिग्मतेजसः सूर्यस्य कराः त्रिभुवनस्य

सुबहुगुणगणक्रीताश्च के वयं सख्यस्य। सज्जनमाधुर्याणाममृतदास्यो दश दिशः। एकान्तावदातोत्तानस्वभावसंभृतसादृश्यस्य कुमुदस्य कृते केनाभिहितः शिशिररश्मिः। श्रेयांश्च संकल्पः कुमारस्य। स्वयं बाहुशाली मयि च समालम्बितशरासने सुहृदि हरादृते कमन्यं नमस्यति। संवर्धिता मे प्रीतिरमुना संकल्पेन। अवलेपिनि पश्चादपि केसरिणि 5 बहुमानो हृदयस्य किं पुनः सुहृदि। तत्तथा यतेथाः यथा न चिरमियमस्मान्क्लेशयति कुमारदर्शनोत्कण्ठा' इति।

19 हंसवेगस्तु विज्ञापयांबभूव---'देव, किमपरमिदानीं क्लेशयत्यभिजातमभिहितं देवेन। सेवाभीरवो हि सन्तः, तत्रापि विशेषेणायमहंकारधनो वैष्णवो वंशः। आस्तां तावदस्मत्स्वामिवंशः। पश्यतु देवः पुरुषस्य हि सेवां प्रति दुर्जनन्येवातिवृद्धया दुर्गत्या वाभि- 10 मुखीक्रियमाणस्य, कुटुम्बिन्येवासंतुष्टया तृष्णया वा प्रेर्यमाणस्य, दुरपत्यैरिव यौवनजनितैर्नानाभिलाषिभिरसत्संकल्पैर्वाकुलीक्रियमाणस्य, जरत्कुमारीमिव परमार्गणयोग्यामतिमहतीं वा अवस्थां पश्यतः, स्वगृहे दुर्बन्धुभिरिव दुःस्थितैः समग्रैर्ग्रहैर्वा ग्राह्यमाणस्याभियोगं, पुरातनैरति-

---

नयनानामानंदकरे संतोषदे कमलाकरे कमलसमूहे शिशिरायन्ते शीतलीभवन्ति। अमृतदास्यो वेतनेन विना परिचारिकाः। एकान्तमत्यंतमवदातः शुभ्र उत्तान उपरिमुखश्च स्वभावस्तेन संभृतं संचितं सादृश्यं साधर्म्यं येन तस्य कुमुदस्य। अवलेपिनि सगर्वे क्लेशयति पीडयति।

हंसवेग इति। अभिजातं न्याय्यम्। 'अभिजातः कुलीने स्यान्न्याय्यपंडितयोस्त्रिषु' इति मेदिनी। **पश्यत्विति**। पुरुषस्येति विशेष्यभूतस्य 'अभिमुखीक्रियमाणस्य' इत्यारभ्य 'भृतकस्य' इत्यन्तानि विशेषणानि। प्रति विशेषणं च तस्य सेवाकारणं भिन्नया रीत्या प्रदर्शितम्। तदेवाह। **दुर्जनन्येवेति**। अतिवृद्धया बहुवृद्धिं गतया दुर्गत्या दुःस्थित्या। दुर्जननी चाकर्मणि स्वतनयं प्रेरयति तद्वत्। कुटुंबिन्येव भार्ययेवासंतुष्टया तृष्णया प्रेर्यमाणस्य तृष्णायाः कदापि संतोषो न किंतु सा भूयो भूयोऽभिवर्धते तस्या भार्यायाश्चासंतोषरूपं साम्यम्। अत्र सुगृहिणी न ग्राह्या। यौवनजनितैस्तारुण्येनोत्पादितैः नाना बहवोऽभिलाषा विद्यन्ते येषां तैः। असत्संकल्पैराकुलीक्रियमाणस्य पीड्यमानस्य। जरती चासौ कुमारी तामिव परस्य मार्गणं गवेषणं तस्य योग्याम्। **स्वगृह इति**। स्वस्य गेहे स्थानरूपमेषादिराशौ च। यथा गृह-

दुरत्ययजैर्भृत्यैरिव मलिनैः कर्मभिर्वानुवर्त्यमानस्य, सकलशरीरसंतापकरं कारीषाग्निमिव दुष्कृतिनः कृतचित्तस्य संप्रवेष्टुं राजकुलम्, उपहतसकलेन्द्रियशक्तेरिव मिथ्यैव हृदयगतविषयग्रामग्रहणाभिलाषस्य, प्रथममेव तोरणतले वन्दनमालाकिशलयस्येव शुष्यतो द्वाररक्षिभिर्निरुद्धस्य पीडितस्य, प्रविशतो द्वारे हरिणस्येवापरैर्हन्यमानस्य, करिकर्मचर्मपुटस्येव मुहुर्मुहुः प्रतिहारमण्डलकरप्रहारैर्निरस्यमानस्य, निधिपादपप्ररोहस्येव द्रविणाभिलाषादधोमुखीभवतः, दूरममार्गणस्याप्यतिविप्रकृष्टविवृत्तविसर्जितस्योद्वेगं व्रजतः, अकण्टकस्यापि चरणतललग्नस्याकृष्यक्षेपीयः क्षिप्यमाणस्य, अमकरकेतोरप्यकालोपसर्पणप्रकुपितेश्वरदृष्टिदग्धस्य प्रलयमुपगच्छतः, कपेरिव कोपनिर्भर्त्सितस्याप्यभिन्नमुखरागस्य, ब्रह्मा

स्थिता दुर्बान्धवाः कलहं जनेन कारयन्ति तद्वद्दुष्टा ग्रहा अपीति भावः। कारीषाणां महाराष्ट्रभाषया 'रानशेणी' इति प्रसिद्धानामग्निमिव सकलशरीरस्य संतापकरं तापदं राजकुलं संप्रवेष्टुं कृतं चित्तं मनो येन तस्य दुष्कृतिनो दुराचारिणः। उपहता नष्टा सकलानामिन्द्रियाणामवयवानां शक्तिर्यस्य तस्येव मिथ्यैवासत्यमेव हृदयगतानां मनसि स्थितानां विषयाणां ग्रामस्य समूहस्य ग्रहणे स्वीकारेऽभिलाषो यस्य तस्य। नष्टशक्तेरभिलाष आपरमात्मदर्शनं न निवर्तते तदनुरोधेनेदम्। तथा चोक्तं भगवता 'रसोप्यस्य परं दृष्ट्वा निवर्तते'। रसोऽभिलाषः। **प्रथममेवेति** वन्दनमाला बहिर्द्वारे स्थाप्यमाना मंगलमाला तत्किसलयस्येव तत्पर्णस्येव शुष्यतः। अन्तरप्रवेशेन बहिः स्थित्वा खिद्यमानस्येत्यर्थः। द्वाररक्षिभिर्द्वारपालैर्निरुद्धस्यात एव पीडितस्य दुःखितस्य। करिणो नूतनगजस्य कर्मणो युद्धशिक्षार्थं कृतश्चर्मपुटश्चर्ममयो हस्ती तस्येव प्रतिहाराणां द्वास्थानां मंडलेन समूहेन करप्रहारैर्हस्तेन ताडनैर्निरस्यमानस्य पक्षे प्रतिहारेण वेष्टनेन मंडलं यस्य तत्प्रहारैः। **निधीति**। यत्र भूमौ द्रविणं वर्तते तदुपरि निर्गतस्य वृक्षांकुरस्य पल्लवा अधोमुखा भवन्ति। तत्र च हेतुर्द्रविणाभिलाषस्तद्वत्सेवकोपि धनेच्छयाऽधोमुखो नम्रो भवतीत्यर्थः। अन्तर्गणस्याप्ययाचकस्यापि शरभिन्नस्यापि वा। अतिविप्रकृष्टैः प्राकृतैर्जनैर्विवृत्तः पश्चादाकृष्टस्ततश्च विसर्जितोऽग्रे कृतोऽतएव उद्वेगं दुःखं व्रजंस्तस्य। बाणोपि अतिविप्रकृष्टमाकर्णान्तं विवृत्त आकृष्टो विसर्जितश्चोद्धतवेगं यथा तथा याति। चरणतललग्नस्य पादौ स्पृशतः पादतले सक्तस्य च क्षेपीयः क्षिप्रतरं तूर्णमित्यर्थः। अमकरकेतोर्मदनभिन्नस्याप्यकालेऽनवसर उपसर्पणेन गमनेन प्रकुपितः क्रुद्ध

इव प्रतिदिवसवन्दनोद्घृष्टशिरःकपालस्य स्पर्शरहितस्याशुभकर्माणि निर्वहतः, त्रिशङ्कोरिवोभयलोकभ्रष्टस्य नक्तंदिनमर्वाक्शिरसस्तिष्ठतः, वाजिन इव कवलवशेन सुखवाह्यमात्मानं विदधानस्य, अनशनशायिन इव हृदयस्थापितजीवनाशस्य शरीरं क्षपयतः, शुन इव निजदारपराङ्मुखस्य जघन्यकर्मलग्नमात्मानं ताडयतः, प्रेतस्येवानुचितभूमिदीयमानान्नपिण्डस्य, बलिभुज इव जिह्वालौल्योपयुक्तपुरुषवर्चसो वृथा विहितायुषो जीवतः, श्मशानपादपानिव पिशाचस्य दग्धभूत्या परुषीकृतान्राजवल्लभानुपसर्पतः, विपरीतजिह्वाजनितमाधुर्यैरोष्ठमात्रप्रकटितरागैः राजशुकालापैः शिशोरिव मुग्धविलोभ्यमानस्य, वेतालस्येव

ईश्वरः शिवो नृपश्च तस्य दृष्टया दग्धस्य प्रलयं नाशं प्रकृष्टं लयं भीत्यादिसंश्लेषं वोपगच्छतः। कोपेन निर्भर्त्सितस्यापि तर्जितस्याप्यभिन्नोऽचलितो मुखरागो मुखकान्तिर्यस्य। कपेस्ताम्रमुखत्वान्मुखकान्तेरचलनम्। प्रतिदिवसं वन्दनायोद्घृष्टं सज्जीकृतं शिरःकपालं स्वमस्तकं येन तस्य। अशुभकर्माणि निर्वहतः कुर्वतः। ब्रह्महापि स्वपापक्षान्त्यै धृतनरकपालोऽशुभकर्माणि करोति । **त्रिशंकोरिवेति**। त्रिशंकुर्नामेक्ष्वाकुकुलोद्भूतो नृपो वशिष्ठशापेन चांडालभावमापन्नो विश्वामित्रसाहाय्येन यज्ञं विधाय स्वर्गं गच्छन्निन्द्रेणाधः प्रक्षिप्तो विश्वामित्रेण भिन्नां सृष्टिमुत्पिपादयिषुणा मध्य एव स्थापितः। वाजिन इवाश्वस्येव कवलवशेन ग्रासमात्रेण सुखेन वाह्यं वहनीयं बाह्यं सुखेभ्यो बहिर्भूतं ववयोरभेदादात्मानं विदधानस्य कुर्वाणस्य । अनशनेनोपवासेन शेते तस्येव कृतोपवासस्येव हृदये मनसि स्थापिता जीवनस्योदरपूर्तेराशा येन पक्षे हृदये स्थापितो जीवस्य प्राणानां नाशो येन तस्य। शरीरं क्षपयत इत्युभयत्रापि तुल्यम्। श्वापि मैथुने निजदारपराङ्मुखो भवति। जघन्यकर्मण्यनुचितकर्मणि मैथुने च लग्नं संसक्तम्। 'जघन्यं चरमे शिश्ने जघन्यं गर्हितेऽन्यवद्' इति विश्वः। अनुचितायामयोग्यायां भूमौ दीयमानं पिंडान्नं जठरपूरणं यस्मै पक्षे चितायाः पश्चादनुचितं दीयमानं पिंडान्नं श्राद्धान्नं यस्य तस्य । बलिभुज इव काकस्येव जिव्हाया लौल्येनाभिलाषेण चांचल्येन चोपभुक्तं व्ययीकृतं भुक्तं च पुरुषवर्चः पौरुषं विष्ठा च येन तस्य वृथा विहितं कृतमायुर्यस्य । इदं विशेषणं काकस्य दीर्घायुष्यत्वादुभयत्रैकार्थम् अथवा विभ्यः पक्षिभ्यो हितमुपयुक्तमायुर्यस्य । दग्धया हतया भूत्या संपदा दग्धानां भूत्या भस्मना च। विपरीतजिव्हयाऽस्पष्टोच्चारिण्या जिव्हया जनितं माधुर्यं यैस्तैः। ओष्ठमात्रे प्रकटितो रागः प्रेमा रंगश्च यैस्तैः राजान एव शुकास्तेषामालापैर्मुग्धं

नरेन्द्रप्रभावाविष्टस्य न किंचिन्नाचरतः, चित्रधनुष इवालीकगुणा-
ध्यारोपणैकक्रियानित्यनम्रस्य, निर्वाणतेजसः संमार्जनीसमुपार्जितरजसोऽ
वकरकूटस्येव निर्माल्यवाहिनः, कफविकारिण इव दिने दिने कटुकै-
रुद्वेज्यमानस्य, सौगतस्येवार्थशून्यविज्ञप्तिजनितवैराग्यस्य काषायाण्य-
भिलषतः, निशास्वपि मातृबलिपिण्डस्येव दिक्षु विक्षिप्यमाणस्य, अशौ- 5
चगतस्येव कुशयनजनितसमधिकतरदुःखवृत्तेः, तुलायन्त्रस्येव पश्चा-
त्कृतगौरवस्य तोयार्थमपि नमतः, अतिकृपणस्य शिरसा केवलेनासंतु-
ष्टस्य वचसापि पादौ स्पृशतः, निर्दयवेत्रिवेत्रताडनत्रस्तयेव त्रपया
त्यक्तस्य, दैन्यसंकोचितहृदयहृतावकाशयेवाहोपुरुषिकया परिवर्जि-

मूढं सुन्दरं वा यथा तथा विलोभ्यमानस्य प्रतार्यमाणस्य नरेन्द्रो नृपो मांत्रि-
कश्च तस्य प्रभावेण सामर्थ्येनाविष्टस्य व्याप्तस्य । अलीकानामसत्यानां गुणानाम-
ध्यारोपणस्यैकक्रियायां स्वस्वामिनोऽविद्यमानानामपि गुणानां वर्णने नित्यनम्र-
स्याथवा स्वस्य गुणाध्यारोपणक्रियया नित्यं नम्रस्य स्वस्तुल्या नम्रीभूय कार्याणि
संपादयत इत्यर्थः । पक्षे गुणस्य ज्याया अध्यारोपणक्रियायां नम्रस्य । निर्वाणं
गतं तेजो यस्य पक्षे निर्गतबाणं तेजो यस्य । संमार्जिन्या शोधिन्या समुपार्जितमे-
कीकृतं रजस्तृणादिसंघातः 'कर' इति भाषायां प्रसिद्धं यस्मिंस्तस्यावकरकूटः
'उकिरडा' इति भाषायां प्रसिद्धस्तस्येव निर्माल्यवाहिनः निस्तेजस उपभुक्त-
पुष्पादिधारकस्य च । 'संमार्जिनी शोधिनी स्यात्' इत्यमरः । कटुकैः प्रतीहारै-
स्तीक्ष्णौषधैश्चोद्वेज्यमानस्य पीड्यमानस्य । अर्थशून्यया निष्फलया विज्ञप्त्या
प्रार्थनया जनितं वैराग्यं यस्य पक्षे अर्थशून्यया वस्तूनामसत्यत्वात्तद्रहितया
विज्ञप्त्या ज्ञानेन जनितवैराग्यस्य सौगतस्येव बौद्धस्येव काषायाणि मधुराणि
वस्तूनि कषायेण रक्तानि वस्त्राणि चाभिलषत इच्छतः । मातृभ्यो देवताभ्यो
बलिपिंडस्येव दिक्षु विक्षिप्यमाणस्य कार्यार्थं प्रेष्यमाणस्य । अशौचगतस्येव
कुशयनेन कुत्सितशय्यया कौ भूमौ शयनेन च जनिता समधिकतरा दुःखवृत्ति-
र्यस्य तस्य । तुलायंत्रस्येव कूपघटीयंत्रस्येव पश्चात्कृतं वर्जितं गौरवं महत्वं येन
तस्य पक्षे पश्चात्पश्चाद्भागे कृतं गौरवं गुरुत्वं येन तस्य तोयार्थमप्युदकलाभा-
यापि नमतो नम्रीभवतः । केवलेन शिरसा नमस्कारमात्रेणासंतुष्टस्य जनस्य
स्वस्वामिन इत्यर्थः पादौ वचसापि स्पृशतो वाचा तत्स्तोत्रं विदधतोऽतिकृप-
णस्यातिदीनस्य । निर्दयेति । सेवायां लज्जात्यागे प्रतिहारिणां वेत्रप्रहाराः कार-
णत्वेन परिकल्पिताः । दैन्येन दीनतया संकोचितं हृदयं तेन हृतोवकाशः स्थलं

तस्य, कुत्सितकर्माङ्गीकरणकुपितयेवोन्नत्या वियुक्तस्य, धनश्रद्धया क्लेशानुपार्जयतः, स्ववृद्धिबुद्ध्यावमानं वर्धयतो, मूढस्य, सत्यपि विविधकुसुमाधिवाससुरभिणि वने तृष्णाञ्जलिमुपरचयतः, कुलपुत्रस्यापि कृतागस इव भीतभीतस्य समीपमुपसर्पतः, दर्शनीयस्याप्यालेख्यकुसुमस्येव निष्फलजन्मनः, विदुषोऽपि वैधेयस्येवापशब्दमुखस्य, शक्तिमतोऽपि श्वित्रिण इव संकोचितकरयुगलस्य, समसमुत्कर्षेषु निरग्निपच्यमानस्य, नीचसमीकरणेषु निरुच्छ्वासं म्रियमाणस्य, परिभवैस्तृणीकृतस्य, दुःखानिलेनानिर्वृतेः ज्वलतो, भक्तस्याप्यभक्तस्य, निरूष्मणः संतापयतो बन्धून्, विमानस्याप्यगतिकस्य, च्युतगौरवस्याप्यध- 5

यस्मात्तयेवाहोपुरुषिकया दर्पजेनात्मशक्त्याविष्कारेण परिवर्जितस्य रहितस्य । अहः शब्दोऽहंवाचकोऽव्ययम् । तस्य पुरुषशब्देन सुप्सुपेति समासः । तस्य भाव आहोपुरुषिका । द्वन्द्वमनोज्ञादिभ्यश्चेत्यनेन वुञ् । 'आहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि' इत्यमरः । कुत्सितकर्मणोऽकर्मणोऽङ्गीकरणेन स्वीकारेण कुपितया क्रुद्धयेवोन्नत्या वियुक्तस्य त्यक्तस्य । स्वस्य धनस्य वृद्धिबुध्या वर्धनेच्छयावमानमपमानं वर्धयतः । 'स्वोऽस्त्रियां धने' इत्यमरः । विविधानां कुसुमानां पुष्पाणामधिवासेन संस्कारेण सुरभिणि सुगन्धिनि वने कानने जले च सत्यपि तृष्णार्थे धनतृष्णार्थे मृगतृष्णिकार्थे वाऽञ्जलिमुपरचयतः कुर्वाणस्य । 'वनं नपुंसकं नीरे निवासालयकानने' 'अधिवासो निवासे स्यात्संस्कारे धूपनादिभिः' इति च मेदिनी । कृतमागोऽपराधो येन तस्येव । भीतभीतस्य वीप्सायां द्विरुक्तिः । आलेख्यकुसुमस्येव चित्रस्थपुष्पस्येव निष्फलं फलोत्पत्तिरहितं जन्मोत्पत्तिर्यस्य तस्य । वैधेयस्येव मूर्खस्येव अपगताः शब्दा यस्मात्तथा मुखं यस्य तस्य मूकतया तिष्ठत इत्यर्थः । पक्षे अपशब्दा गालिशब्दा मुखे यस्य तस्य मूर्खस्य । श्वित्रिण इव कुष्ठवत इव । समानां स्वतुल्यानां समुत्कर्षेषु संमाननेषु संजातेषु निरग्नि वह्निरहितं यथा तथा पच्यमानस्य मत्सरेण पीड्यमानस्य । नीचैः सह समीकरणेषु तुल्यतां नयनेषु निरुच्छ्वासमुच्छ्वासरहितं म्रियमाणस्य । दुःखानिलेन दुःखाग्निना न निर्वृतिः स्वास्थ्यं यस्य तस्यातएव ज्वलतः । भक्तस्यापि सेवकस्याप्यभक्तस्य न लब्धं भक्तं भागो वेतनं येन तस्य । नपुंसके भावे क्तः । विरोधाभासश्च । निरूष्मणो गर्वरहितस्य औष्ण्यरहितस्यापि बन्धून्बान्धवान्संतापयतः सेवायां तानपि पीडयत इत्यर्थः । धनाभावेन बन्धूनपि दुःखयत इति वा । विगतो मानो यस्य पक्षे आकाशयानस्य । अगतिकस्योपायरहितस्य पक्षे निश्चलस्य । च्युतं नष्टं गौरव-

स्ताद्गच्छतः, निःसत्त्वस्यापि महामांसविक्रयं कुर्वतः, निर्मदस्यास्वतन्त्रवृत्तेः, अयोगिनो ध्यानवशीकृतात्मनः, शय्योत्थायं प्रणमतो, दग्धमुण्डस्य, गोत्रविदूषकस्य, नक्तंदिनं नृत्यतो, मनस्विजनं हासयतः, कुलाङ्गारस्य वंशं दहतः, नृपशोः, तृणेऽपि लब्धे कन्धरामवनमयतः, जठरपरिपूरणमात्रप्रयोजनजन्मनो मांसपिण्डस्य, गर्भरोगस्य मातुरपुण्यानां कर्मणामाचरणाद्भृतकस्य किं प्रायश्चित्तम्, का प्रतिपत्तिक्रिया, क गतस्य शान्तिः, कीदृशं जीवितम्, कः पुरुषाभिमानः, किंनामानो विलासाः, कीदृशी भोगश्रद्धा, प्रबलपङ्क इव सर्वमधस्तान्नयति दारुणो दासशब्दः। धिक्तदुच्छ्वसितम्, उपयातु तद्धनं निधनम्, अभवनिर्भृतिरस्तु तस्याः, नमो भगवद्भ्यस्तेभ्यः सुखेभ्यः, तस्यायमञ्जलिरैश्वर्यस्य, तिष्ठतु दूर एव सा श्रीः, शिवं स परिच्छदः करोतु, यदर्थमुत्तमाङ्गं गां गमिष्यति। मुखप्रियरतः क्लीबो, अपूतिमांसमयः कु- 5 10

मादरो यस्य। गुरुरेव पदार्थोऽधो गच्छत्ययं तु गौरवरहितोऽप्यधोगच्छतीति विरोधः। निःसत्वस्याप्यशक्तस्यापिमहामांसस्य स्वमांसस्य विक्रयं स्वदेहविक्रयमित्यर्थः कुर्वतः। शक्तेरभावेऽपि स्वमांसविक्रयणं विरोधजनकं महामांसशब्दस्य शरीरार्थत्वेन च परिहारः। निर्मदस्य गर्ववर्जितस्य अमत्तस्य वा। अयोगः कुत्सितो योगो विद्यते यस्य तस्य विपरीतदैववत इत्यर्थः। दरिद्रस्येत्यर्थोऽपि संभाव्येत। ध्यानेन चित्तनिरोधेन वशीकृतः स्वाधीनीकृत आत्मा येन तस्य। शय्योथ्थायं शय्यायाः शयनात्सत्वरं यथा तथा उत्थाय प्रणमतो नमस्कुर्वतः। 'अपादाने परीप्सायाम्' इत्यनेन णमुल्। दग्धमातपेन हतं मुंडं शिरो यस्य पक्षे व्रतिभेदस्य। गोत्रस्य कुलस्य विशेषेण दूषकस्य पक्षे नर्मसुहृदः। वंशमन्वयं वेणुं च। **नृपशोरिति**। पशुश्च तृणलाभे तद्भक्षणाय कंधरामवनमयति। जठरपरिपूरणमेव स्वोदरपरिपूर्तिरेव जठरपरिपूरणमात्रं तदर्थं जन्म यस्य। मांसपिंडेऽपि जठरं स्थवयति। अपुण्यानां कर्मणामाचरणान्मातुर्गर्भरोगस्येत्यन्वयः। भृतकस्य सेवकस्य 'भृतको भृतिभुक्कर्मकरो वैतनिकश्च स' इत्यमरः। अधस्तान्नयति नीचपदवीमधोभागं च। परिच्छेदः छत्राद्युपकरणम्। मुखप्रियरत इत्यारभ्य वर्णितःसेवकोऽपि यदि मर्त्यमध्ये तदा राजिलोऽपि भोगी पुलाकोऽपि कलम इत्यन्वयः। मुखेन प्रियं यद्वचनं तस्मिन् रतः स क्लीबोऽशक्तः। पक्षे मुखे वदने प्रियं रतं मोहनं यस्य स क्लीबो नपुंसकः आसेक्यनामा पण्ढः। तदुक्तं सुश्रुते 'पित्रोरत्यल्पवीर्यत्वादासेक्यः पुरुषो भवेत्। स शुक्रं प्राश्य लभते ध्वजोच्छ्रायमसंशयमिति'

मिः, अगण्यमानो नरकः, पादरजोधूसरोत्तमाङ्गो जङ्गमः पादपीठः, पुंस्कोकिलः काकुक्वणितेषु, शिखी मुखकरकेकासु, स्थूलकूर्मः क्रोडकषणेषु, श्वा नीचचाटुकरणेषु, वेणुर्मूर्च्छनासु, वेश्याकायः करणबन्धक्लेशेषु, पलालं सत्वशालिषु, कृकलासः शिरोविडम्बनासु, जाहक आत्मसंकोचनेषु, प्रतिपादकः पादसंवाहनासु, कन्दुकः करतलताडनेषु, वणिादण्डः कोणाभिघातेषु, वराकः सेवकोऽपि मर्त्यमध्ये, राजिलोऽपि वा भोगी, पुलाकोऽपि वा कलमः । वरं क्षणमपि कृता मानवता मानवता, न मतो नमतस्त्रैलोक्याधिराज्योपभोगोऽपि मनस्विनः । तदेवमभिनन्दितास्मदीयप्रणयो देवोऽपि दिवसैः कतिपयैरेव परागतः प्राग्ज्योतिषेश्वर इति करोतु चेतसि ' इत्युक्त्वा तूष्णीमभूदचिराच्च नमस्कृत्य निर्जगाम । 10

प्राश्येति अन्येन स्वमुखे मैथुनं कारयित्वा पतितं शुक्रमिति भावः । अपूतिमांसमयः अदुर्गंधिमांसमयः कृमिः अगण्यमानो गणनानर्हः नरकः कुत्सितो नरः । पक्षेऽगण्यो मानो यस्य स नरको भौमासुरः । अथवा अगण्यो मानो यत्र तादृशो निरयः । काकुक्वणितेषु वक्रोक्तिषु मधुरवचनेषु च । स्थूलकूर्मः स्थूलकमठो भूमिस्थः कमठ इत्यर्थः । क्रोडकषणेषु वक्षःस्थलघर्षणेषु । मूर्छनासु मोहेषु स्वराणां रचनाभेदेषु च । वेश्याकायो वेश्याशरीरं करणबन्धानां शरीरबन्धानां क्लेशेषु पक्षे करणबन्धानां कामशास्त्रोक्तासनानां क्लेशेषु । सत्वेन बलेन शालन्ते शोभन्ते तेषु पलालं निष्फलः । पक्षे सत्वासु सत्वयुक्तासु शालिषु कलमेषु । पलालं फलरहितो नीवारस्तंबः । कृकलासः सरटः ' सरडा ' इति भाषायां शिरोविडंबनासु शिर उन्नमय्य स्थितिषु । आज्ञाश्रवणे स्वामिमुखावलोकने वा सेवकस्य शिरउन्नमनम् । ' सरटः कृकलासः स्याद् ' इत्यमरः । जाहको ' जळू ' इति भाषायां प्रथितः कीटक आत्मसंकोचेषु । सोपि कीटकः संकोचितशरीरो रक्तभक्षणेन विकासितकायो भवति । संकेतस्तु ' जाहकः प्राणिभेदः कूर्म इत्यन्ये ' इत्याह । प्रतिपादकः पादपीठः पादाभ्यां संवाहनेषु घर्षणेषु । कन्दुकः करतलताडनेषु । वराको दीनः सेवकोपि मर्त्यमध्ये गण्यत इति शेषस्तदा राजिलोपि डिंडिमाख्यो निर्विषसर्पः भोगी नागः पुलाकोपि तुच्छधान्यमपि कलमः शालिः । 'पुलाकस्तुच्छ धान्ये स्याद्' इति मेदिनी । **वरमिति** । मानवता मानिना क्षणमपि कृता मानवता मानवस्य भावः पौरुषं वरं परं नमतो नम्रस्य तेजस्विनस्त्रैलोक्यस्य त्रिलोक्या आधिराज्यस्य साम्राज्यस्योपभोगोपि न वरं न श्रेष्ठः ।

20 राजापि रजनीं तां कुमारदर्शनौत्सुक्यस्वीकृतहृदयः समनैषीत्। आत्मार्पणं हि महताममूलमन्त्रमयं वशीकरणम्। प्रभाते च प्रभूतं प्रतिप्राभृतं प्रधानप्रतिदूताधिष्ठितं दत्त्वा हंसवेगं प्राहिणोत्। आत्मनापि ततः प्रभृति प्रयाणकैरनवरतैरभ्यमित्रं प्रावर्तत। कदाचित्तु राज्यवर्धनभुजबलोपार्जितमशेषं मालवराजसाधनमादायागतं समीप 5 एवावासितं लेखहारकाद्भण्डिमशृणोत्। श्रुत्वा चाभिनवीभूतभ्रातृशोकहुताशनः कातरहृदयो बभूव, मूर्च्छान्धकारमिव विवेशातिष्ठच्च समुत्सृष्टसकलव्यापारः प्रतीहारनिवारणनिभृतनिःशब्दपरिजने निजमन्दिरे सराजकपरिवारस्तदागमनमुदीक्षमाणो मुहूर्तम्।

21 अथ भण्डिरेकेनैव वाजिना कतिपयकुलपुत्रपरिवृतो मलिन- 01

राजापीति। कुमारस्य भास्करवर्मणो दर्शनस्यौत्सुक्येनोत्कण्ठया स्वीकृतं हृदयं यस्य सः। नन्वनवलोकितकुमारस्य हर्षस्य मानसं कथमुत्कंठितमित्यत आह। **आत्मार्पणमिति**। महतो वशीकरण ओषधिमूलान्मन्त्राच्च भिन्न आत्मार्पणमेव श्रेष्ठ उपायः स च कुमारेण कृतोतो युज्यत औत्कंठ्यमिति भावः। प्रधानेन प्रमुखेण दूतेनाधिष्ठितं युक्तं प्रभूतं विपुलं प्रतिप्राभृतं प्रत्युपायनम्। अभ्यमित्रं मित्रं लक्ष्यीकृत्य 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यनेन समासः। राज्यवर्धनस्य स्वभ्रातुर्भुजबलेन करसामर्थ्येनोपार्जितं संपादितमशेषं सकलं मालवराजस्य भगिनीपतिघातकस्य साधनं सैन्यं समादाय सम्यग्गृहीत्वा। समीप एव निकट एवावासितं कृतावासं भण्डि तदाह्वयं भ्रात्रा सह गतं सेनापतिं लेखहारकाद् दूताद् अशृणोत्। भण्डिः समीपे स्थित इति तत आगताद् दूतादशृणोदित्यर्थः। 'दुःखानि बन्धुवियोगजानि। दृष्टे जने प्रेयसि दुःसहानि स्रोतःसहस्रैरिव संप्लवन्त' इति भवभूत्युक्तरीत्या तदा तस्य भ्रातृवियोगदुःखं वर्धितमित्याह। **श्रुत्वेति**। अभिनवीभूतो नूतनीभूतो भ्रातुः शोको हुताशन इव वह्निरिव यस्य सोऽतएव कातरं बान्धवदर्शनासमर्थं भीरु हृदयं मनो यस्य सः। प्रतिहाराणां कंचुकिनां निवारणेन तैः कृतेन रोधनेन निभृता निश्चला निःशब्दाः शब्दरहिताः परिजनाः सेवका यस्मिंस्तस्मिन्निजमंदिरे स्वावासे। संसृष्टः परित्यक्तः सकलव्यापारो येन सः राज्ञां समूहेन सहितः सराजकः परिवारो भृत्यगणो यस्य सः। तदागमनं भण्डेरागमनमुदीक्षमाणः प्रतिपालयन्।

अथेति। कतिपयैः कुलपुत्रैः परिवृतो वेष्टितः मलिनं सुदूरागमनाद्

वासा, रिपुशरशल्यपूरितेन निखातबहुलोहकीलकपरिकररक्षितस्फुटनेने-
व हृदयेन, हृदयलग्नैः स्वामिसत्कृतैरिव श्मश्रुभिः, शुचं समुपदर्शयन्,
दूरीकृतव्यायामशिथिलभुजदण्डदोलायमानमङ्गलवलयैकशेषालंकृ-
तिः, अनादरोपयुक्तताम्बूलविरलरागेण शोकदहनदह्यमानस्य हृदयस्या-
ङ्गारेणेव दीर्घनिश्वासवेगनिर्गतेनाधरेण शुष्यता, स्वामिविरहविधृतजी- 5
वितापराधवैलक्ष्यादिव बाष्पवारिपटलेन पटेनेव प्रावृतवदनः, विशन्नि-
व दुर्बलीभूतैः स्वाङ्गमपत्रपयाङ्गैः, वमन्निव च व्यर्थीभूतभुजोष्मा-
णमायतैर्निश्वसितैः, पातकीव, अपराधीव, द्रोहीव, मुषित इव, छलि

दुःखाभिभूतत्वाच्च कलुषं वासो वसनं यस्य सः। बहुदुःखपीडितस्याप्यस्य हृदयं कुतो न स्फुटितं तदाह। रिपुशल्यैः शत्रुबाणैः पूरितेन व्याप्तेनातएव निखातानां बहूनां लोहकीलकानां परिकरेण संबंधेन परिरक्षितं रुद्धं स्फुटनं यस्य तेनेव हृदयेन मनसा अस्य दर्शयन्नित्यत्र करणत्वेनान्वयः। अथवेत्थंभूतलक्षणे तृतीया। रिक्तपदार्थस्फुटनं सुलभमतः शल्यपूरितमिति कल्पना। स्फुटमानश्च कीलकैर्बद्धश्चेन्न स्फुटतीत्यनुभवस्तदनुरोधत इयमुत्प्रेक्षा। शोकेनाकृतश्मश्रुच्छेदनस्य तस्य मुखस्थाः केशा हृदयस्पर्शिन आसन्। तेषु च हृदयलग्नस्वामिसत्काराणामुत्प्रेक्षा। तथाभूतैः श्मश्रुभिः शुचं शोकं समुपदर्शयन्। शोकेनव्यायामाद्यभावात्कृशशरीरोऽधृतभूषणश्चेत्याह। **दूरीकृतेति**। दूरीकृतेन व्यायामेन शिथिले दार्ढ्यहीने भुजदण्डे करदण्डे दोलायमानं चंचलं मंगलवलयं मंगलार्थं धार्यमाणं कटकमेवैका शेषावशिष्टालंकृतिरलंकारो यस्य सः। अनादरेणोपयुक्तेनोपभुक्तेन तांबूलेन विरलः स्वल्पो रागो रक्तिमा यस्य तेन शोकेन दह्यमानस्य ज्वलयमानस्य हृदयस्यांगारेणेव दीर्घाणां स्थूलानां निश्वासानां वेगेन निर्गतः स्वस्थानाद्बहिरागतस्तथा दृश्यमानस्तेन शुष्यता शुष्केणाधरेणोपलक्षितः। नायमधरः किन्तु शोकदग्धस्य हृदयस्याङ्गारो वायुवेगेन वन्हेरिव निश्वासवेगेन बहिरागत इत्यधरेऽङ्गारोत्प्रेक्षा। स्वामिविरहे राज्यवर्धननाशे धृतं जीवितमेवापराधस्तेन वैलक्ष्यं लज्जा तस्मादिव पटेनेव वस्त्रेणेव बाष्पवारीणां नयनोदकानां पटलेन समूहेन प्रावृतं वेष्टितं वदनं येन सः। वान्धवदर्शनादुद्गतेषु बाष्पेषु मुखप्रावरणवसनकल्पना। लज्जितश्च स्वमुखं पटादिना छादयति। दुर्बलीभूतैर्निःशक्तैरंगैरपत्रपया लज्जया स्वांगं स्वशरीरं विशन्निव शोकात्कृशीभूतेष्ववयवेषु लज्जया शरीरप्रवेशस्तर्क्यते। स्वसामर्थ्यं स्वामिरक्षणायानुपयुक्तमतस्तत्त्यागमाह। **वमन्निति**। व्यर्थीभूतः स्वामिरक्षणेऽनुपयुक्तो भुजस्योष्मा तमाय

त इव, यूथपतिपतनविषण्ण इव वेगदण्डवारणः, सूर्यास्तमयनिः-श्रीक इव कमलाकरः, दुर्योधननिधनदुर्मना इव द्रौणिः, अपहृतरत्न इव सागरो राजद्वारमाजगाम । अवतीर्य च तुरङ्गादवनतमुखो विवेश राजमन्दिरम् । दूरादेव च विमुक्ताक्रन्दः पपात पादयोः ।

22 अवनिपतिरपि दृष्ट्वा तमुत्थाय विरलैः पदैः प्रत्युद्गम्यो-त्थाप्य च गाढमुपगूह्य कण्ठे करुणमतिचिरं रुरोद । शिथिलीभूतमन्यु-वेगश्च पुरेव पुनरागत्य निजासने निषसाद । प्रथमप्रक्षालितमुखे च भण्डौ मुखमक्षालयत् । समतिक्रान्ते च कियत्यपि काले भ्रातृमरणवृ-त्तान्तमप्राक्षीत् । अथाकथयच्च यथावृत्तमखिलं भण्डिः । अथ नर-पतिस्तमुवाच—'राज्यश्रीव्यतिकरः कः' इति । स पुनरवादीत्— 'देव, देवभूयं गते देवे राज्यवर्धने गुप्तनाम्ना च गृहीते कुशस्थले

तैर्दीर्घैर्निश्वसितैः श्वासैर्वमन्निवोद्गिरन्निव । शोकजानां श्वासानामौष्ण्याद्युज्यत इयमुत्प्रेक्षा । पातकीव स्वामिरक्षणरूपपुण्यानाचरणात्पातकित्वम् तथैवाग्रे द्रोही-वेत्यादौ ज्ञातव्यम् । यूथपतेः समूहाधिपस्य पतनेन नाशेन विषण्णो दुःखीव वेग-दण्डो युवा वारणो गजः । सूर्यास्तमये सूर्यास्तवेलायां तादात्म्ये मयट् । निःश्रीकः शोभावर्जित इव कमलाकरः कमलसमूहः । दुर्योधनस्य स्वस्वामिनो निधनेन मरणेन दुर्मना इव दुःखीव द्रौणिरश्वत्थामा तत्सेनापतिः । भण्डिनोऽश्वत्थाम्नश्च साजात्यं स्वस्वामिमरणे दुःखित्वं सेनापतित्वं च न तु सौहार्दं द्रौणेः कुरुराजस्य तथा सौहार्दस्याप्रसिद्धत्वात् । अपहृतानि चोरितानि रत्नानि यस्य सः अवनतमु-खः शोकेनान्यावेक्षणाक्षमत्वादधोवदन इत्यर्थः । श्रीहर्षं दृष्ट्वा शोकोर्मिभारेणाभि-भूत उच्चै रुरोदेत्याह । **दूरादेवेति** । विमुक्तः कृतः आक्रन्द उच्चैरारटनं येन सः ।

अवनिपतिरिति । विरलैः कतिपयैः पदैः शोकादूरमनागमनं गाढं दृढमुपगूह्याश्लिष्य चिरं बहुकालं रुरोद । एतादृशस्य शोकस्याल्पीभवनाय कृते रोदनादन्य उपायो न । तेन च तस्य शोकोऽल्पीभूत इत्याह । **शिथिलीभूतेति** । स्वशोकं दूरीकृत्य भण्डेः शोकं लघूचकारेत्याह । **प्रथमेति** । प्रथममादौ प्रक्षा-लितं प्रमृष्टं मुखं येन तस्मिन् । न्यूनीभूतशोकश्च जनो मूक एव तिष्ठति कंचि-त्कालमतः सोऽपि तथाकरोदित्याह । **समतिक्रान्त इति** । भ्रातू राज्यवर्धनस्य मरणस्य वृत्तान्तं वार्ताम् । राज्यश्रियः स्वभगिन्या व्यतिकरो व्यसनं कः कीदृक् । तस्याः संकटस्य किं वृत्तमित्यर्थः । 'व्यतिकरः पुंसि व्यसनव्यतिषंगयोः'

देवी राज्यश्रीः परिभ्रश्य बन्धनाद्विन्ध्याटवीं सपरिवारा प्रविष्टेति लोकतो वार्तामश्रृणवम्। अन्वेष्टारस्तु तां प्रति प्रभूताः प्रहिता जना नाद्यापि निवर्तन्ते' इति। तच्चाकर्ण्य भूपतिरब्रवीत्—'किमन्यैरनुपदिभिः यत्र सा तत्र परित्यक्तान्यकृत्यः स्वयमहं यास्यामि। भवानपि कटकमादाय प्रवर्ततां गौडाभिमुखम्' इत्युक्त्वा चोत्थाय स्नानभुवमगात्। कारितशोकश्मश्रुवपनकर्मणा च प्रतीहारभवनस्नातेन शारीरकवसनकुसुमाङ्गरागालंकारप्रेषणप्रकटितप्रसादेन भण्डिना सार्धमभुक्त निनाय च तेनैव सह वासरम्। 5

23 अथापरेद्युरुषस्येव भण्डिर्भूपालमुपसृत्य व्यज्ञापयत्—'पश्यतु देवः श्रीराज्यवर्धनभुजबलार्जितं साधनं सपरिबर्हं मालवराजस्य' इति। 10 नरपतिना स 'एवं क्रियताम्' इत्यभ्यनुज्ञातो दर्शयांबभूव। तद्यथा—अनवरतगलितमदमदिरामोदमुखरमधुकरजूटजटिलकरटपट्ट-

---

इति मेदिनी। देवभूयं देवत्वम्। 'भुवो भावे' इत्यनेन क्यप्। अनुपदिभिरन्वेष्टृभिः अनुपदशब्दादन्वेष्टर्थे इनिर्निपात्यते 'अनुपद्यन्वेष्टा' इत्यनेन। कटकं सैन्यम्। कारितं शोकश्मश्रोः शोकाद्रक्षितमुखकेशानां वपनकर्म छेदनं यस्य तेन। शारीरकाणां शरीरसंबंधिनां वसनानि वस्त्राणि कुसुमानि अंगरागोलंकारा भूषणानि च तेषां प्रेषणेन विसर्जनेन प्रकटितः प्रसादो यस्मिंस्तेन। शरीरशब्दात्तस्येदमित्यणि स्वार्थे के च निष्पन्नः शारीरकशब्दः। अभुक्त भुजेर्लुङः प्रथमस्यैकवचनम्। 'भुजोऽनवने' इत्यनेन तङ्।

अथेति। अपरेद्युरन्यास्मिन्नहनि। 'सद्यःपरुत्०' इत्यनेन अपरस्यैकारो द्युस्प्रत्ययश्च। श्रीराज्यवर्धनेन भुजबलेनार्जितं संपादितं परिबर्हं राजार्हवस्तुभिः सहितं मालवराजस्य भगनीपतिघातकस्य साधनं सैन्यम्। 'परिबर्हस्तु राजार्हवस्तुनि' इति विश्वः। अभ्युनुज्ञातोऽनुमतः। अनवरतं सततं गलितो मद एव दानोदकमेव मदिरा मद्यं तस्या आमोदेनातिनिर्हारिणा गन्धेन मुखराण गुंजतां मधुकराणां भ्रमराणां जूटेन समूहेन जटिलैर्जटायुक्तैः केशव्याप्तैरित्यर्थ करटपट्टैर्गण्डस्थलैः पंकिलाः कर्दमयुक्ता गण्डा गल्ला येषां तान्। दानोदकेन मिश्रिता भ्रमरा एव जटास्ताभिर्युक्तैर्गण्डैर्गल्लाः कर्दमयुक्ता इति कल्पना। 'करटो गजगण्डे स्याद्' 'गण्डःस्याद्० । चिन्हवीरकपोलेषु' इति मेदिनी। जटा संलग्नाः कचा विद्यन्ते येषां ते जटिलाः। 'प्राणिस्थादातो लजन्यतरस्याम्

पङ्किलगण्डान्, गण्डशैलानिव जङ्गमान्, गम्भीरगर्जितरवाञ्जलधरानिव महीमवतीर्णान्, उत्फुल्लसप्तच्छदवनामोदमुचः शरद्दिवसानिव पुञ्जीभूतान्, अनेकसहस्रसंख्यान्करिणः, चारुचामीकरचित्रचामरमण्डलमनोहरांश्च हरिणरंहसो हरीन्, बालातपविसरवर्षिणां च किरणैरनेकेन्द्रायुधीकृतदशदिशामलंकाराणां विशेषान्, विस्मयकृतः स्मरोन्मादितमालवीकुचपरिमलदुर्ललितांश्च निजज्योत्स्नाप्लावितदिगन्तानपि ताराहारान्, उडुपतिपादसंचयशुचीनि निजयशांसीव बालव्यजनानि, जातरूपमयनालं च निवासपुण्डरीकमिव श्रियः श्वेतातपत्रम्, अप्सरस इव बहुसमररससाहसानुरागावतीर्णा वारविलासिनीः, सिंहासनशयनासं- 5

इत्यनेन लच्। जंगमान् भृशं वक्रं वा गच्छतो गण्डशैलान् पर्वताच्च्युतान् स्थूलोपलानिव। जंगम इति 'नित्यं कौटिल्ये गतौ' इत्यनेन यङि पचादित्वादचि जातम्। तस्मिन्परे 'यङोऽचि च' इत्यनेन यङो लुक् च। 'गण्डशैलो ललाटे स्याच्च्युतस्थूलोपले गिरेः' इति मेदिनी। गंभीरो गर्जितरवो गर्जनाशब्दो येषां तान् महीं भूमिमवतीर्णानागतांञ्जलधरानिव मेघानिव। उत्फुल्लानां विकसितानां सप्तच्छदानां वृक्षविशेषाणां वनस्यारण्यस्यामोदं गन्धं मुञ्चन्ति तान् पुञ्जीभूतानेकीभूताञ्शरद्दिवसानिव। चारूणां सुन्दराणां चामीकरेण सुवर्णेन चित्राणां चामराणां मण्डलेन समूहेन मनोहरान् हरिणस्येव मृगस्येव रंहो वेगो येषां तान् हरीनश्वान्। अथवोपमानोपमेययोः समानविभक्तिकत्वनियमाद्धरिणशब्दो हरिणवेगे लाक्षणिकस्तथा च हरिण इव हरिणवेग इव रंहो येषामित्यर्थः। बालातपस्य कोमलातपस्य विसरं समूहं वर्षन्ति तेषां किरणैर्मयूखैरनेकेन्द्रायुधीकृता अनेकेंद्रधनुर्युक्ताः कृता दश दिश आशा यैस्तेषामलंकाराणां भूषणानां विशेषान्प्रकारान्। विस्मयकृत आश्चर्यकारिणः स्मरेण मदनेनोन्मादितानाम् उन्मत्तीकृतानां मालवीनां मालवदेशोद्भूतानां कुचपरिमलेन स्तनसुगन्धेन दुर्ललितान् निजज्योत्स्नया स्वकान्त्या प्लावितं व्याप्तं दिगन्तरं यैस्तानपि। अपिर्भिन्नक्रमः हारानपीत्यनेन संबध्यते ताराम्स्वच्छान्हारान् मौक्तिकमालाः। उडुपतिपादाश्चन्द्रकिरणानि तेषां संचय इव समूह इव शुचीनि स्वच्छानि निजयशांसीव बालव्यजनानि कोमलानि चामराणि। जातरूपमयं सौवर्णं नालं दण्डो यस्य तच्छ्रियो लक्ष्म्या निवासपुण्डरीकमिव वासकमलमिव श्वेतं शुभ्रमातपत्रं छत्रम्। बहु महत्समररसस्य वीररसस्य साहसं तस्यानुरागेण प्रेम्णाऽवतीर्णा अथ आगता अप्सरस इव स्वर्वेश्या इव वारविलासिनीर्वेश्याः। सिंहासनं नृपासनं शयनं

दीप्रभृतीनि राज्योपकरणानि, कालायसनिगडनिश्चलीकृतचरणयुगलं च सकलं मालवराजलोकमशेषांश्च ससंख्यालेख्यपत्रान् सालंकारापीडान् कोषकलशान् । अथालोच्य तत्सर्वमवनिपालः स्वीकर्तुं यथाधिकारमादिक्षदध्यक्षान् । अन्यस्मिंश्चाहनि हयैः स्वसारमन्वेष्टुमुच्चचाल विन्ध्याटवीमवाप च परिमितैरेव प्रयाणकैस्ताम् । 5

24 अथ प्रविशन्दूरादेव दह्यमानषष्ठिकबुसविसरविसारिविभावसूनां वन्यधान्यबीजधानीनां धूमेन धूसरिमाणमादधानैः, शुष्कशाखासंचयरचितगोवाटवेष्टितविकटवटैः, व्यापादितवत्सरूपकरोपरचितव्याघ्रयन्त्रैः, यन्त्रितवनपालहठह्रियमाणपरग्रामीणकाष्ठिककुठारैः,

---

शय्या आसन्दी लघ्वासनं ताः प्रमुखा येषां तानि राज्योपकरणानि राज्यस्य साधनानि । कालायसस्य लोहविशेषस्य निगडैः शृंखलाभिर्निश्चलीकृतं चरणयुगलं यस्य तं मालवराजलोकं मालवराजजनम् । अशेषान्सकलान् संख्यालेख्यपत्रैर्गणनालेख्यपत्रैः सहितान् अलंकारापीडानां भूषणगुच्छानां पीडया संमर्दनसहितान् अलंकारैः पूरितानित्यर्थः कोषकलशान् अर्थसंचयघटान् । अध्यक्षान्नियुक्तानधिकारिणः । अन्वेष्टुं मार्गयितुं । चचाल निर्जगाम । प्रयाणकैर्गमनैस्तां विन्ध्याटवीमाप प्रापत् ।

अथेति । प्रविशन्दूरादेव वनग्रामकं ददर्शेत्यन्वयः । अस्मिन्वर्णने द्वितीयान्तानि 'वनग्रामकम्' इत्यस्य विशेषणान्यन्यविभक्त्यन्तानां द्वितीयान्तेषु तत्तत्संबंधेनान्वयश्च । आदौ तृतीयान्तानां प्रकाशमानम्' इत्यत्र करणत्वेनान्वयः । दह्यमानानां ज्वल्यमानानां षष्ठिकानां षष्टिरात्रेण पच्यमानानां धान्यविशेषाणां बुसानां कडंगराणां विसरैः समूहैर्विसारिणः प्रसरन्तो विभावसवोऽग्नयो येषां तेषां वन्यानां वनोत्पन्नानां धान्यानां बीजधानीनां बीजगृहाणां धूमेन धूसरिमाणं मालिन्यमादधानैर्धारयद्भिः । 'षष्ठिकाः षष्टिरात्रेण पच्यन्ते' इत्यनेन षष्टिरात्रशब्दात्को रात्रलोपश्च । शुष्काणां शाखानां विटपानां संचयेन समूहेन रचितैः कृतैर्गोवाटैर्गोष्ठैर्वेष्टिता विकटा विशाला वटा वटवृक्षा येषु तैः । व्यापादितानां हतानां वत्सरूपकाणामल्पानां वत्सानां रोषाद्व्याघ्रोपरि क्रोधाद्रचितानि बद्धानि व्याघ्रयन्त्राणि व्याघ्रग्रहणार्थं पाशरूपाणि यन्त्राणि येषु तैः । यन्त्रितैर्मा गृह्णतेति कृतप्रतिरोधैः वनपालैर्वनरक्षकैर्हठेन बलात्कारेण ह्रियमाणाः परग्रामीणानां परग्रामस्थानां काष्ठिकानां काष्ठच्छेदकानां कुठाराः परशवो येषु तैः । गहनानां निबिडानां तरूणां षण्डे समूहे निर्मितः कृतः चामुण्डामंडपो देव्या मंदिरं येषां तैर्वनप्रदेशैर्वनप्रान्तैः प्रकाशमानं शोभमानम् । **अटवीति** ।

गहनतरुषण्डनिर्मितचामुण्डामण्डपैर्वनप्रदेशैः, प्रकाशमानम्, अटवीप्रा-
यप्रान्ततया कुटुम्बभरणाकुलैः कुद्दालप्रायकृषिभिः कृषीवलैरबलवद्भि-
रुच्चभागभाषितेन भज्यमानभूरिशालिखलक्षेत्रखण्डलकम्, अल्पावका-
शैश्च काशिलैः, कालायसैरिव कृष्णमृत्तिकाकठिनैः, स्थानस्थानस्थापित-
स्थाणूत्थितस्थूलपल्लवैः, दुरुपगमश्यामाकप्ररूढिभिरलम्बुसबहुलैः अवि- 5
रहितकोकिलाक्षक्षुपैर्विरलविरलैः केदारैः कृच्छ्रकृष्यमाणैर्नातिप्रभूतप्र-
वृत्तगतागतामहतभुवम्, उपक्षेत्रमुपरचितैरुच्चैर्मञ्चैश्च सूच्यमानश्वाप-
दोपद्रवं, दिशि दिशि च प्रतिमार्गद्रुमकृतानां पथिकपादप्रस्फोटन
धूलिधूसरैर्नवपल्लवैर्लाञ्छितच्छायानाम्, अटवसिलभसालकुसुमस्तबक-

---

अरण्यबहुलदेशतया तस्य प्रदेशस्येत्यर्थः। कुटुम्बभरणे कुटम्बपोषण आकुलै-
र्व्याकुलैः कुद्दालप्राया भूमिदारणमात्रखन्यमाना कृषिर्येषां तैः अबलवद्भिः
सामर्थ्यवर्जितैः कृषीवलैः क्षेत्राजीवैरुच्चभाषितेन उच्चैः शब्दं कृत्वा भज्यमानानि
भूरीणि प्रभूतानि शालीनां खलक्षेत्रखंडलकानि खलक्षेत्रभागाः यस्मिंस्तम्।
कर्मकरा अशक्ताः कर्मकरणवेलायामुच्चैर्घोषन्तीति प्रसिद्धमेव। अल्पः
अवकाशः स्थलं येषां तैः काशिलैः काशयुक्तैः 'कापिलैः'
इत्यपपाठः। काशादित्वादिलच्। कालायसैरिव लोहविशेषैरिव कृष्णया
मृत्तिकया कठिनैरमृदुभिः। लोहपक्षे कृष्णैः कृष्णवर्णैः मृत्तिकाकठिनैश्च।
स्थानस्थानेषु वीप्सायां द्विरुक्तिः। स्थापितेषु स्थाणुषु स्तंभेषूत्थिताः स्थूला
पल्लवाः पत्राणि येषु तैः। अधुनापि कृष्यर्थं स्थापिता वृक्षखंडाः सपल्लवा
जायन्त इति विदितं कृषीवलानाम्। दुरुपगमा गन्तुमशक्या श्यामाकप्ररूढिः
श्यामाकवृद्धिर्येषु तैः। अलंबुसैर्मंजिष्ठाभिर्बहुला व्याप्तास्तैः। अविरहिताः
प्रभूताः कोकिलाक्षक्षुपा इक्षुगन्धक्षुपा 'तालिमखाना' इति प्रथितवनस्पतेः
क्षुपा क्षुद्रा वृक्षा येषु तैः। 'इक्षुगन्धा कोकिलाक्ष' इति मेदिनी। कृच्छ्रेण
कष्टेन कृष्यमाणैर्विलिख्यमानैर्विरलविरलैरतिविरलैः केदारैः क्षेत्रैः करणैः न अति-
प्रभूतमत्यन्तं प्रवृत्तेन गतागतेन गमनागमनेन आप्रहता ताडिता भूर्यस्मिंस्तम्।
क्षेत्रभागस्य स्वल्पत्वाद्वनस्पतिव्याप्तत्वात्कठिनमृत्तिकावत्वाच्च जनानां तत्र विरलः
प्रचार आसीदित्यर्थः।'केदारोऽद्रौ शिवे क्षेत्र' इति मेदिनी'। उपक्षेत्रं क्षेत्र-
समीपे उपरचितैः स्थापितैरुच्चैरुन्नतैर्मञ्चैः सूच्यमानो ज्ञाप्यमानः श्वाप-
दानां पशूनामुपद्रवः पीडा यस्मिंस्तम्। **दिशिदिशीति**। इतोग्रे षष्ठ्यन्तानि
'अटवीप्रवेशप्रपाणाम्' इत्यस्य विशेषणानि। तथाहि। मार्गे मार्गे प्रतिमार्गं
द्रुमेषु वृक्षेषु तच्छायास्वित्यर्थः। कृतानां पथिकानां पान्थानां पादप्रस्फोट-

श्रितनवखातकूपिकोपकण्ठप्रतिष्ठितनागस्फुटानामच्छिद्रकटकल्पितकु-
टीरकाणाम्, कुटिलकीटवेणीवेष्ट्यमानशक्तुशारशरावश्रेणीश्रितानाम-
ध्वगजनजग्धजम्बूफलास्थिशबलसमीपभुवामुद्धूलितधूलीकदम्बस्तवक-
प्रकरपुलकिनीनाम्, कण्टकितकर्करीचक्राक्रान्तकाष्ठमञ्चिकामुषिततृ-
षाम्, तिम्यत्तलशीतलशिकतिलककलशीशमितश्रमाणामाश्यानशैवल- 5
श्यामलितालिञ्जरजायमानजलजडिम्नामुदकुम्भाकृष्टपाटलशर्कराशकल-

नानि पादसंमार्जनानि तेषां धूलिभिः रजोभिर्धूसरैर्मलिनैर्नवपल्लवैर्नूतनपर्णैर्ली-
ढिता चिन्हिता छाया यासां तासाम्। पान्थाः स्वचरणधूलिदूरीकरणाय वृक्षप-
ल्लवान् गृहीत्वा तैः चरणौ संमार्ज्य धूलिमलिनान् तान्पल्लवान् तत्र तत्यजुरित्यर्थः
अटव्यां वने सुलभानां सहजलभ्यानां सालसुकुमानां स्तवकैर्गुच्छैराश्रितानां
भूषितानां नवखातानां नूतनविदारितानां कूपिकानां लघूनां कूपानामुपकण्ठेऽ-
न्तिके प्रतिष्ठितैः स्थापितैर्नागैर्नागप्रतिमाभिः स्फुटा व्यक्ततया दृश्यमानास्तासा-
म्। अथवा अन्तिके प्रतिष्ठापिता नागस्फुटा वृक्षविशेषा यासां तासाम्। अच्छि-
द्रैर्दृढैः कटैः कल्पिता कुटीरका अल्पगृहाणि यासु तासां 'कुटीशमीशुण्डाभ्यो रः'
इत्यनेन न्हस्वत्वे रः स्वार्थे कश्च। कुटिलाभिर्वक्राभिः कीटानां कीटकैः कृतानां
वेणीभिर्जालकैर्वेष्ट्यमानानां शक्तुभिः सक्तुभि शाराणां चित्राणां शरावाणां मृण्म-
यपात्राणां श्रेणीः पंक्तीः श्रितानामाश्रितानाम्। अध्वगजनेन पान्थसमूहेन ज-
ग्धानां भक्षितानां जम्बूफलानामस्थिभिस्तदन्तर्गतबीजैः शबलाः कर्बुरा समी-
पभुवो यासां तासाम्। उद्धूलितानां धूलिव्याप्तानां धूलीकदम्बानां नीप-
वृक्षाणां 'कळंब' इति महाराष्ट्रभाषायां प्रथितानां स्तवकप्रकरैर्गुच्छसमूहैः
पुलकिनीनां रोमाञ्चवतीनाम्। कण्टकितानां तृणवेष्टितानाम् कर्करीणां पात्र-
विशेषाणां चक्रेण समूहेनाक्रान्ताभिः काष्ठमंचिकाभिः काष्ठपर्यंकिकाभिर्मुषिता
नाशिता तृट् तृषा याभिस्तासाम्। तिम्यतार्द्रेण तलेनाधोभागेन शीतलाभिः
शार्करिकाभिः कलशीभिर्घटैः शमिता दूरीकृताः श्रमा याभिस्तासाम्। आश्यानै-
र्घनैः शैवलैः श्यामलिताः कृष्णीकृता अलिंजरा मणिका 'माठ' इति भाषायां
प्रथितास्तेभ्यो जायमानो जलस्य जडिमा जाड्यं यासु तासाम्। जलस्य
शैत्याधिक्यं संपादयितुं महाघटा शैवालैर्वेष्टिता आसन्नित्यर्थः। 'अलिंजरः
स्यान्मणिकः' इत्यमरः। उदकुम्भेभ्यो उदकघटेभ्य आकृष्टैः पाटलैः श्वेतरक्तैः
शर्कराशकलैर्वालुकाखंडैः शिशिरीकृता दिशो यासां ताः। आसमन्तात्स्थलशैत्या-
योदकघटाकृष्टा वालुकाखण्डाः क्षिप्ता इत्यर्थः।

शिशिरीकृतदिशाम्, घटमुखघटितकटहारपाटलपुष्पपुटानाम्, शीकरपुलकितपल्लवपूलीपाल्यमानशोष्यसरसशिशुसहकारफलजूटीजटिलस्थाणूनाम्, विश्राम्यत्कार्पटिकपेटकपरिपाटीपीयमानपयसामटवीप्रवेशप्रपाणां शैत्येन त्याजयन्तमिव ग्रैष्ममुष्माणं, क्वचिदन्यत्र ग्राहयन्तमिवाङ्गारीयदारुसंग्रहदाहिभिः व्योकारैः, सर्वतश्च प्रातिवेश्यविषयवासिना समासन्नग्रामगृहस्थापितस्थविरपरिपाल्यमानपाथेयस्थगितेन कृतदारुणदारुव्यायामयोग्याङ्गाभ्यङ्गेन स्कन्धाध्यासितकठोरकुठारकण्ठलम्बमानप्रातराशपुटेन पाटच्चरप्रत्यवायप्रतिपन्नपटच्चरेण कालवेत्रकत्रिगुणव्रततिवलयपाशग्रथितग्रीवागृहीतैः पत्त्रीटावृतमुखैः, पीतकूटैरु- 5

घटमुखेषु कुंभाग्रेषु घटिता बद्धाः कटस्य तृणस्य हारेण रज्ज्वा युक्ता इति मध्यमपदलोपः पाटलपुष्पाणां लोध्रकुसुमानां पुटा द्रोणा यासु ताः। शीकरम्बुकणैः पुलकितानामंकुरितानां पल्लवानां पूलीभिः पाल्यमानानि शोष्याणि शुष्कीभवने योग्यानि सरसानि प्रत्यग्राणि शिशुसहकाराणामाम्रकाणां फलानि तेषां जूटीभिः संचयैर्जटिला व्याप्ताः स्थाणवो वृक्षमूलानि यासु ताः। विश्राम्यतां कार्पटिकानां यात्रिकाणां पेटकेन समूहेन परिपाट्या क्रमेण पीयमानं प्राश्यमानं पय उदकं यासां तासामटवीप्रवेशप्रपाणां वनारंभे स्थापितानां पानीयशालानां शैत्येन शिशिरतया ग्रैष्मं ग्रीष्मसंबंधिनमुष्माणं संतापं त्याजयन्तमिव। **क्वचिदिति**। कुत्रचिदन्यत्रान्यप्रदेशे ग्राहयन्तमिव स्वीकारयन्तमिव। ग्रैष्ममुष्माणमित्यत्रापि संबध्यते। अङ्गारेभ्य एतान्यङ्गारीयाणि दारूणि काष्ठानि तेषां संग्रहं संचयं दहन्ति तैर्व्योकारैर्लोहकारैः। 'तदर्थं विकृतेः प्रकृतौ' इत्यनेनाङ्गाराच्छः। 'व्योकारो लोहकारकः' इत्यमरः। लोहकारैर्ज्वलितानां दारूणांमूष्मणा ग्रैष्मोष्माधिक्यानुभव इत्यर्थः। **सर्वत इति**। इत आरभ्य तृतीयान्तानां व्याप्तदिगन्तरमित्यनेन संबंधः। प्रातिवेश्ये समीपस्थे विषये देशे वसति तेन। समासन्नेषु निकटवर्तिषु गृहेषु स्थापितैः स्थविरैर्वृद्धैः पाल्यमानेन पाथेयेन स्थगितो युक्तस्तेन। कृतो दारुणस्य कठिनस्य दारुव्यायामस्य काष्ठछेदनश्रमस्य योग्य उचित अङ्गाभ्यङ्गः शरीरमर्दनं येन तेन। स्कन्धमध्यासिते कठोरे कुठारे परशौ लम्बमानं प्रातराशपुटं प्रातर्भक्ष्यपुटं यस्य तेन। पाटच्चराणां चोराणां प्रत्यवायेन शंकया प्रतिपन्नं स्वीकृतं पटच्चरं जीर्णवस्त्रं येन तेन। कालवेत्रकेण कृष्णवेतसेन तस्य त्वचा युक्त इति यावत् यो त्रिगुणो व्रततिवलयस्य लतावलयस्य पाशस्तेन ग्रथितायां ग्रीवायां कण्ठे गृहीतैः। पाशदार्ढ्याय

१ 'ग्रथितैः'

ढवारिणा पुरःसरवलद्वलीवर्दयुगसरेण नैकटिककुटुम्बिकलोकेन काष्ठसं-
ग्रहार्थमटव्यां प्रविशता श्वापदव्यधनव्यवधानबहलीसमारोपितकुटीकृतकू-
टपाशैश्च गृहीतमृगतन्तुतन्त्रीजालवलयवागुरैः बहिर्व्याधैर्विचरद्भिः अं-
सावसक्तवीतंसव्यालम्बमानवालपाशिकैश्च संगृहीतग्राहककरकपिञ्ज-
लादिपञ्जरकैः शाकुनिकैः संचरद्भिः, च्युतलासकलेशलिप्तलतावधूल- 5
ट्वालम्पटानां च पेटकैः पाशिकशिशूनामटद्भिः, तृणस्तम्बान्तरिततित्ति-
रितरलायमानकौलेयककुलचाटुकारैश्च विहगमृगयां मृगयुयुवभिः क्री-

व्रततिवलययोर्मध्ये वेतसस्त्वक् स्थापितेत्यर्थः। ग्रथितैरिति पाठो न चारुः।
पत्राणां पर्णानां वीटाभिराच्छादनैः 'बुच' इति ग्रथितैरावृतानि वेष्टितानि
मुखानि येषां तैः। पीतकूटैः घटाकारैः पात्रविशेषैः ऊढं धृतं वारि जलं येन
तेन। पुरःसराणामग्रयायिनां बलीवर्दानां युगैर्द्वन्द्वैः सरो गच्छन्। सरतीति
सरः। 'ऋदोरप्' इत्यनेनाप्। काष्ठसंग्रहार्थं दारुसंचयायाटव्यां गहनं प्रविशता
नैकटिकलोकेन निकटवर्तिजनेन। 'निकटे वसति' इत्यनेन ठग्। **श्वापदेति**।
श्वापदानां वन्यपशूनां व्यधने नाशने तत्काल इत्यर्थः व्यवधानमात्मनिगूहनं
श्वापददृष्टितो रक्षणं तदर्थं बहलं (बहली) प्रभूतं समारोपिताः स्थापिताः
कुटीकृतास्तृणगृहा इव कृताः कूटपाशा जालकानि यैस्तैर्व्याप्तदिगम्बरमित्यन्वयः।
श्वापदा आत्मानं नावलोकयन्त्विति जालानां तृणगृहाकाराणि व्यवधानानि
निर्माय तन्मध्ये स्थिता इत्यर्थः। गृहीता मृगतन्तवो मृगबन्धनार्थं तन्तवः
तन्त्र्यो मृगमोहनार्थं वाद्यविशेषा जालवलयानि बन्धनवलयानि वागुराः सम-
न्ततो वेष्ट्यमानानि बंधनानि यैस्तैर्बहिर्ग्रामादिति शेषः विचरद्भिरितस्ततो-
ऽटद्भिर्व्याप्तदिगन्तरम्। अंसे स्कन्धे आसक्ता ये वीतंसा मृगबंधनोपकरणानि तेषु
व्यालम्बमाना बालपाशकाः सूक्ष्मपाशा येषां तैः संगृहीता ग्राहकाः पक्षिणां ग्रहणे प-
टवः अशिथिला इत्यर्थः ये क्रकराणां'करकोच' इति प्रसिद्धानां कपिंजलानां 'पिंगळा'
इति प्रसिद्धानां तदादीनामन्येषां च पक्षिणां पञ्जरका यैस्तैः। संचरद्भिरितस्ततो
गच्छद्भि शाकुनिकैः पक्षिग्राहकैर्व्याप्तदिगन्तरम्। च्युता गलिता ये लासकानां मयू-
राणां लेशा अवयवा पिच्छानीति यावत् तैर्लिप्ता उपदिग्धा लांछिता इत्यर्थः या
लता विरुधस्तासु अवधूताः (वधू) चंचला या लट्वा ग्रामचटकास्तासु लंप-
टानामासक्तानां पाशिकशिशूनां व्याधबालानाम् अटद्भिर्भ्रमद्भिः पेटकैश्च समू-
हैश्च व्याप्तदिगन्तरम्। तृणानां स्तंभैर्गुच्छैरन्तरिता आच्छादिता ये तित्तिरयः
पक्षिविशेषास्तेषु तरलायमानास्तदन्वेषणे चंचलाः कौलेयकाः श्वानस्तेषां कुले
समूहे चाटु प्रियभाषणं कुर्वन्ति तैर्विहगमृगयां पक्षिमृगयां क्रीडद्भिराचरद्भि-

डन्द्भिः, परिणतचक्रवाककण्ठकषायरुचां शीधव्यानां वल्कलानां कलापान्, नातिचिरोद्धृतानां च धातुत्विषां धातकीकुसुमानां गोणीरगणिताः पिचव्यानां चातसीशणपट्टपूलकानां पुष्कलान्संभारान्, भारांश्च मधुनो माक्षिकस्य मयूराङ्गजस्याक्लिष्टमधूच्छिष्टचक्रमालानां लम्बमानलामज्जकजूटजटानामपत्वचां खदिरकाष्ठानां कुष्ठस्य कठोरकेशरिसटाभारबभ्रुणश्च रोध्रस्य भूयसो भारकान् लोकेनादाय व्रजता, प्रविचितविविधवनफलपूरितपिटकमस्तकाभिश्चाभ्यर्णग्रामगत्वरीभिस्त्वरमाणाभिर्विक्रयचिन्ताव्यग्राभिर्ग्रामेयिकाभिर्व्याप्तदिगन्तरम्, इतस्ततश्च 5

मृगयुयुवभिस्तरुणव्याधैर्व्याप्तदिगन्तरम् । परिणतानां तरुणानां चक्रवाकाणां पक्षिविशेषाणां कंठा इव कषाया किंचिदारक्ता रुग्येषां तेषां शीधव्यानां मद्योपयोगिनां वल्कलानां वृक्षत्वचां कलापान् समूहान् । अस्यादायेत्यनेन संबंधः । नातिचिरं प्रत्यग्रमुद्धृतानां संगृहीतानां धातुरिव गैरिक इव त्विट् कान्तिर्येषां तेषां धातकीकुसुमानां ताम्रवर्णानामग्निज्वालापुष्पाणामगणिता असंख्येया गोणीः । ' अग्निज्वालासुभिक्षे तु धातकी ' इत्यमरः । पिचव्यानां तूलानाम् । अतसीनां क्षुमाणां शणानां ' ताग ' इति भाषायां प्रसिद्धानां पूलकानां समूहानां पुष्कलान् प्रभूतान्संभारान् । **भारानिति** । मधुनः क्षौद्रस्य । माक्षिकस्य मक्षिकानिर्मितस्य । मयूराङ्गजस्य बर्हिपिच्छस्य । अक्लिष्टं नवं मधूच्छिष्टं सिक्थकं ' मेण ' इति प्रसिद्धं तस्य चक्राणां वर्तुलानां मालास्तासाम् । ' मधूच्छिष्टं तु सिक्थकम् ' इत्यमरः । लम्बमाना लामज्जकस्योशीरस्य जूटः समूह एव जटा येषां तान् । ' लामज्जकं लघुलयम् ' इत्यमरः । अपत्वचां त्वग्रहितानाम् । कुष्ठस्य ' कोलंजन ' इति भाषायां प्रसिद्धस्य । कठोरस्य प्रौढस्य केसरिणो मृगराजस्य सटाभार इव बभ्रु कपिलं तस्य रोध्रस्य लोध्रपुष्पस्य भारकान् संचयान् लोकेन जनेनादाय गृहीत्वा व्रजता गच्छता । प्रविचितानि संचितानि विविधान्यनेकानि वनफलानि तैः पूरिताः पिटका मञ्जुषा मस्तकेषु यासां ताभिः ' पिटकः पेटकः पेटा मञ्जुषा ' इत्यमरः । अभ्यर्णग्रामं निकटस्थग्रामं गत्वरीभिः गच्छन्तीभिः । ' गत्वरश्च ' इत्यनेन निपात्यतेऽयं शब्दः । विक्रयस्य चिन्तायां व्यग्राभिरासक्ताभिर्ग्रामेयिकाभिर्ग्रामीणाभिर्युवतिभिर्व्याप्तं दिगन्तरं यस्य तम् ।

इतस्ततश्चेति । युक्ता धुरि नियुक्ताः शूराः बलयुक्ताः शकुरास्तरुणाः शाक्करा बलीवर्दा यासां तासां पुराणानां प्राचीनानां पांसूनामवकराणामुत्किरान्

युक्तशूरशकुरशाकराणां पुराणपांसुत्किरकरीषकूटवाहिनीनां धूर्गतधूलि-
धूसरसैरिकसरोषस्वरसार्यमाणानां संक्रीडच्चटुलचक्रचीत्कारिणीनां
शकटश्रेणीनां संपातैः संपाद्यमानदुर्बलोर्वीविरुक्षक्षेत्रसंस्कारम्, आर-
क्षक्षिप्तदान्तवाहकदण्डोड्डीयमानहरिणहेलालङ्घिततुङ्गवैणववृतिभिश्च नि
खातगौरकरङ्कशङ्कुशङ्कितशशकशकलिततुङ्गशृङ्गैः, प्रयत्नप्रभृतविशङ्कट- 5
विटपैर्वाटैरैक्षवैर्बहुभिः श्यामायमानोपकण्टम्, अतिविप्रकृष्टान्तरैर्म-
रकतस्निग्धस्नुहावाटवेष्टितैः, कार्मुककर्मण्यवंशविटपसंकटैः, कण्टकि-

---

समूहान् करीषस्य शुष्कगोमयस्य कूटान् संघान्वहन्ति तासां ‘ गोविड्गोमयमस्त्रि-
याम् । तत्तु शुष्कं करीषोऽस्त्री ’ इत्यमरः । धूर्गतेन धुरि स्थितेन धूल्या धूस-
रेण मलिनेन सैरिकेन हालिकेन सरोषस्वरेण क्रोधयुक्तस्वरेण सार्यमाणानां प्रेर्य-
माणानाम् । ‘ हलसीराट्ठक् ’ इत्यनेन ठक् । संक्रीडतां चटुलानां चंचलानां
चक्राणां चीत्कारो चीदिति शब्दो विद्यते यासां तासां शकटश्रेणीनामनःपंक्ती-
नां संपातैः संचारैः संपाद्यमानो दुर्बलयोर्व्या भुवा विशेषेण रुक्षाणां धान्योत्पा-
दनसामर्थ्यहीनानां क्षेत्राणां संस्कारो यस्मिंस्तम् । **आरक्षेति** । आरक्षै
रक्षकैः क्षिप्तेन ताडनार्थं त्यक्तेन दान्तानां वाहकानां बलीवर्दादीनां दण्डेनोड्डीय-
मानैर्हरिणैर्मृगैर्हेलया लीलया लंघिता आक्रान्ता तुंगा उन्नता वैणवी कीचकसं-
बन्धिनी वृतिर्वाटोपान्ते कृतः प्राकारः ‘ कुंपण ’ इति भाषायां येषां तैः ।
निखाता गौराः शुभ्राः करंकशंकवोऽस्थिमया आकारविशेषाः कीलका वा तेभ्यः
शंकितैः शशकैः शकलिताः तुङ्गाः उन्नता शृङ्गा वृतयोऽग्रभागा वा येषां तैः ।
प्रयत्नेन प्रभृता वर्धिता विशङ्कटा विशाला विटपाः शाखा येषां तैरैक्षवैरिक्षु-
संबंधिभिर्वाटैरुपवनैः । श्यामायमानमुपकण्ठमभ्यर्णभागो यस्य तम् । **अतिवि-
प्रकृष्टेति** । इत आरभ्य तृतीयान्तानि ‘ गृहैः ’ इत्यस्य विशेषणानि । अति-
विप्रकृष्टं दवीयोऽन्तरं व्यवधानं येषु तैः । मरकतैरिव गारुत्मतरत्नैरिव स्नुहा-
वाटैः सुधावृतिभिः वेष्टितैः । ‘ स्नुक् स्नुहा च सुधावृक्षः ’ भाषायां
‘ चौधरि निवडुंग ’ इति प्रथितः । कार्मुकस्य धनुषः कर्मण्या धनुः-
करणयोग्या वंशा वेणवस्तेषां विटपैः शाखाभिः संकटैः संकुलैः । ‘ तत्र साधुः ’
इत्यनेन कर्मशब्दाद्यत् । कण्टकितानां संजातकण्टकानां करञ्जानां नक्तमालानां
राजिभिः पंक्तिभिर्दुष्प्रवेश्यैः प्रवेष्टुमशक्यैः । ‘ करञ्जो नक्तमालः स्यात् ’
उरुबुक एरण्डो वचा उग्रगन्धा ‘ वेखंड ’ इति भाषायाम् वङ्गको हरितक-
विशेषः सुरसा रास्ना सूरणः कन्दविशेषः शिग्रुः सौभाञ्जनः ‘ शेवगा ’ इति
भाषायां ग्रन्थिपर्णं मुस्ताकारः सुगन्धिः कन्दविशेषः गवेधुका तृणधान्यविशेषः

तकरञ्जराजिदुष्प्रवेशैः, उरुबूकवचावङ्गकसुरससूरणशिग्रुग्रन्थिपर्णगवेधुकागर्मुद्गुल्मगहनगृहवाटिकैः, निखातोच्चकाष्ठारोपितकाष्ठालुकलताप्रतानविहितच्छायैः, परिमण्डलबदरीमण्डपकतलनिखातखादिरकीलबद्धवत्सरूपैः, कथमपि कुक्कुटरटितानुमीयमानसंनिवेशैरङ्गनागस्तिस्तम्भतलविरचितक्षिप्रपक्षिपूपिकावापिकैर्विकीर्णबदरपाटलपटलैः, वेणुपोटदलनलशरमयवृतिविहितभित्तिभिः, किंशुकरोचनारचितमण्डलमण्डपवल्वजबद्धाङ्गारराशिभिः, शाल्मलिफलतूलसंचयबहुलैः, संनिहितनलशालिशालूकखण्डकुमुदबीजवेणुतण्डुलैः, संगृहीततमालबीजैः, भस्ममलिनम्लानकाश्मर्यकूटव्याधूतकटैराश्यानराजादनमदनफल-

गर्मुद्गुल्मा लताविशेषः 'बोरु' इति भाषायां तैर्गहना निबिडा गृहवाटा गृहमार्गा येषां तैः । 'एरण्ड उरुबूकश्च' 'वचोग्रगन्धा षड्ग्रन्था' 'नाकुली सुरसा रास्ना' इत्यमरः 'शिग्रुर्ना शाकमात्रे स्याच्छोभाञ्जनमहीरुह' इति मेदिनी । निखाते समारोपित उच्चे काष्ठे आरोपिताः आरोहिता काष्ठालुकलता अलाबुवल्ल्यस्तासां प्रतानैर्विस्तारैर्विहिता कृता छाया येषां तैः परिमंडलानां वर्तुलानां बदरीमंडपकानां तलेष्वधस्तान्निखातेषु खादिरकीलेषु खादिरशङ्कुषु बद्धा वत्सरूपाः स्वल्पवत्सा येषु तैः । कथमपि वनराजिपिहितत्वान्महता कष्टेन कुक्कुटरटितेन ताम्रचूडशब्देनानुमीयमानो ज्ञायमानः संनिवेशो रचना येषां तैः । अंगनागस्तीनामंगनस्थसुनितरूणां स्तंभतलेषु क्षिप्रं विरचिताः विरचितक्षिप्राः पक्षिणां पूपिका भक्ष्यविशेषाः वापिका जलपानस्थानानि येषु तैः । राजदन्तादित्वात्परनिपातः । विकीर्णानि शोषयितुं क्षिप्तानि बदराणां पटलान्येव पाटलानि समूहाः स्वार्थेऽण् पटलेषु गृहाच्छादनेषु येषां तैः । वेणुपोटाः कीचकच्छेदा दलानि पर्णानि नला देवनलाः शरा वेतसा एतन्मयीभिर्वृतिभिः प्राकारैर्विहिता भित्तयो येषां तैः । किंशुकैः पलाशै रोचनाभिर्गोरोचनाभिः रचितं मंडलं येषां तेषु मंडपेषु वल्वजैर्वंधनकाष्ठैस्तृणविशेषैर्बद्धा अंगारराशयो ज्वलितकाष्ठावशेषपंक्तयो येषु तैः । शाल्मलीफलानि रक्तपुष्पाफलानि तूलः कार्पासश्च तेषां संचयेन बहुलैर्व्याप्तैः । सन्निहिताः समीपे स्थापिताः नलशालिः शालिभेदाः शालूकानां पद्ममूलानां खंडाः कुमुदबीजानि वेणवस्तण्डुलाश्च येषु तैः । संगृहीतानि तमालबीजानि येषु तैः । **भस्मेति** । भस्मना मलिना अतएव म्लाना काश्मर्या वनस्पतिविशेषाः 'शिवणी' इति महाराष्ट्रभाषायां प्रथितास्तेषां कूटैः संघैर्व्याधूता व्याप्ताः कटा येषु तैः । आश्यानानि

१ 'पटलनलकलितशरमय.' २ 'मण्डनैर्वल्वज०'

स्फीतैर्मधूकासवमद्यप्रायैः, कुसुम्भकुम्भगण्डकुसूलैरविरहितराजमाषत्रपुषकर्कटिकाकूष्माण्डालाबुबीजैः, पोष्यमाणवनविडालमालुधाननकुलशालिजातजातकादिभिरटवीकुटुम्बिनां गृहैरुपेतं वनग्रामकं ददर्श तत्रैव चावसदिति।

इति श्रीबाणभट्टकृतौ हर्षचरिते छत्रलब्धिर्नाम
सप्तम उच्छ्वासः।

राजादनस्य पियालवृक्षस्य 'खिरणी' इति ख्यातस्य मदनस्य शल्यकवृक्षस्य च फलानि तैः स्फीतैः पूर्णैः। 'राजादनः पियालद्रौ' इति हैमः। मधूकासवं गुडपुष्पोद्भवमासवं मद्यं च प्रायो बहुलं येषु तैः। कुसुम्भेति। कुसुम्भकुम्भाः कुसुंभेन रञ्जिता घटा गण्डाः सूचका येषां तथाभूताः कुसूला भूमिस्थधान्यसंग्रहस्थानानि 'पेंव' इति भाषायां प्रसिद्धानि येषां तैः। गृहाणामासमंताद्भूमौ विद्यमानानां धान्यसंग्रहाणां ज्ञानार्थं तदुपरि कुसुम्भरञ्जिता घटाः स्थापिता आसन्निति तात्पर्यार्थः। अविरहितानि सुस्थितानि। राजमाषो निष्पावः त्रपुषः कर्कटिकाभेदः 'तवस' इति प्रसिद्धः कर्कटिका कूष्माण्डमलाबुश्च तासां बीजानि येषु तैः। पोष्यमाणाः पाल्यमाना वनविडाला वनमार्जाराः मालुधाना मालुकावधाख्याः सर्पविशेषा नकुलाः शालिजातजातका मार्जारविशेषबालका आदयः प्रमुखा येषां ते तथाभूता येषु तैः। अटवीकुटुम्बिनामारण्यकानां गृहैरुपेतं युक्तं वनग्रामकमरण्यग्रामं ददर्श तत्रैव तस्मिन्ग्रामेऽवसत्।

॥ इति श्रीबाणभट्टकृतहर्षचरितव्याख्यायां बालबोधिन्यां
सप्तम उच्छ्वासः॥

अष्टम उच्छ्वासः ।

सहसा संपादयता मनोरथप्रार्थितानि वस्तूनि ।
दैवेनापि क्रियते भव्यानां पूर्वसेवेव ॥ १ ॥
विद्वज्जनसंपर्को नष्टेष्टज्ञातिदर्शनाभ्युदयः ।
कस्य न सुखाय भवने भवति महारत्नलाभश्च ॥ २ ॥

1 अथापरेद्युरुत्थाय पार्थिवस्तस्माद्ग्रामकान्निर्गत्य विवेश वि- 5
न्ध्याटवीम् । आट च तस्यामितश्चेतश्च सुबहून्दिवसान् । एकदा तु

श्रीवेंकटेशो विजयते ।

पतिव्रतासु प्रथमं गणेयां
श्रीशांघ्रिभक्तिप्रवणां दयार्द्राम् ।
नमामि लक्ष्मीं जननीं यदीयं
न यामि निर्वेशमहं शतायुः ॥ १ ॥

भाविनीं चरित्रनायकसमृद्धिं सुहृदो लाभं भगिन्या आप्तिं च सूचयितुमुपक्रमते । **सहसेति** । मनोरथेन प्रार्थितानि याचितानि वस्तूनि पदार्थान् सहसाऽतर्कितं संपादयता दैवेनापि भागधेयेनापि भव्यानां महतां पूर्वसेवेव क्रियते । प्रथमतः सेवा क्रियते । इष्टानर्थान् संपादयता दिष्टेन पुण्यवतां सेवा इव क्रियत इत्यर्थः । ॥ १ ॥

एवं दैवमुपवर्ण्य विद्वद्रत्नादिलाभं स्तौति । **विद्वदिति** । विद्वज्जनस्य बुधजनस्य संपर्कः संबंधो नष्टाया इष्टायाः प्रियाया ज्ञातेर्बान्धवस्य दर्शनस्याभ्युदयः प्राप्तिर्महारत्नस्य लाभश्च कस्य सुखाय नापि तु सर्वस्यापि सुखाय । सुखायेति तादर्थ्ये चतुर्थी । ॥ २ ॥

अथेति । अपरेद्युरन्यस्मिन्दिने तस्मात्पूर्वोक्ताद्ग्रामकात्क्षुद्रग्रामान्निर्गम्य विंध्याटवीं विंध्यारण्यं विवेश । आट बभ्राम । **एकदेति** । व्याघ्रकेतुर्नाम कुतोपि शबरयुवानमादाय भूपतेः समीपमित्यर्थे आजगामेत्यन्वयः । भूपतेरित्यस्य समीपमित्यध्याहृतेन संबंधः । आटविकसामन्तस्य अटव्यां चरति तस्य सामन्तस्य शरभकेतोस्तन्नाम्नोऽरण्याधिपस्य सूनुः । ‘ चरति ’ अनेनाटविशब्दाट्ठक् ।

भूपतेर्भ्रमत एवाटविकसामन्तशरभकेतोः सूनुर्व्याघ्रकेतुर्नाम कुतोऽपि कज्जलश्यामलश्यामलतावलयेनाधिललाटमुच्चैः कृतमौलिबन्धम्, अन्धकारिणीमकारणभुवा भ्रुकुटिबन्धेन त्रिशाखेन त्रियामामिव साहससहचारिणीं ललाटस्थलीं सदा समुद्वहन्तम्, अवतंसितैकशुकपक्षकप्रभाहरितायमानेन पिनद्धकाचरकाचमणिकर्णिकेन श्रवणेन शोभमानम्, 5 किंचिच्चुल्लस्य प्रविरलपक्ष्मणश्चक्षुषः सहजेन रागरोचिषा रसायनरसोपयुक्तं तारक्षवं क्षतजमिव क्षरन्तम्, अवनाटनासिकम्, चिपिटाधरम्, चिकिनचिबुकम्, अहीनहनूत्कटकपोलकूटास्थिपर्यन्तम्, ईषदवाग्रग्रीवाबन्धम्, स्कन्नस्कन्धार्धभागम्, अनवरतकोदण्ड-

---

अधिललाटं ललाटे विभक्त्यर्थेऽव्ययीभावः। कज्जलस्येव श्यामलायाः कृष्णायाः श्यामलतायाः प्रियंगुलताया वलयेन कृतो मौलिबंधः शिरोवेष्टनं येन तम्। अकारणं कारणेन विना भवति तेन तिस्रः शाखा यस्य तेन भ्रुकुटिभंगेन साहसे बलात्कारकृतकार्ये सहचारिणीं सह विद्यमानां त्रियामामिव रात्रिमिव ललाटस्थलीं कपालफलकमुद्वहन्तम्। 'साहसं तु बलात्कारकृतकार्ये दमेऽपि च' इति मेदिनी। रात्रेः कपालफलकेन साम्यं तु त्रिभागवत्वेन साहससाहचर्येण च। अवतंसितस्य कर्णे स्थापितस्य एकस्य शुकपक्षस्य प्रभया कान्त्या हरितायमानेन हरिद्वर्णवदवभासमानेन पिनद्धा स्थापिता काचरस्य कपिलस्य काचमणेः कर्णिका कर्णभूषणं यस्मिंस्तेन श्रवणेन कर्णेन शोभमानम्। चुल्लस्य क्लिन्नस्य 'पिचका' इति महाराष्ट्रभाषायां प्रथितस्य। 'क्लिन्नस्य चिल् पिल् लश्चास्य चक्षुषी' इत्यनेन पुरुषे निपातितोऽप्युपचारात्तदवयवे। अथवा वार्तिकेऽस्येति त्याज्यमवयव एव चिल्लचुल्लेतिप्रयोगः पुरुषे तु मत्वर्थीयेनाच्प्रत्ययेन संबंधः। अतएव 'स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः क्लिन्नेऽक्ष्णि चाप्यमी' इत्यमरोक्तिः संगच्छते। प्रविरलानि पक्ष्माणि लोमानि यस्य तस्य चक्षुषः सहजेन नैसर्गिकेण रागरोचिषा रक्तिमकान्त्या रसायनरसे औषधविशेष उपयुक्तं तारक्षवं तरक्षोर्मृगादनस्येदं क्षतजं रक्तमिव क्षरन्तम्। 'तरक्षुस्तु मृगादनः' इत्यमरः। तस्येदमित्यनेनाण्। अवनाटा निम्ना नासिका यस्य तम्। 'नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः' इत्यनेन अवान्नाटच्। चिपिटचिकिनशब्दौ 'इनच्पिटच्चिकचि च' 'कप्रत्ययचिकादेशौ च वक्तव्यौ' इति नियमाभ्यां नासिकानते वाच्ये एव जायेते परमन्यत्रप्रयोगबाहुल्यादनयोर्वार्तिकयोर्नासिकाया नते इत्यस्यासंबंधः। काशिकाकारस्तु ईदृशानामन्यत्र प्रयोग उपमानत्वेन निर्वाहमाह यथा निबिडं वस्त्रमित्यत्र। **अहीनेति**। अहीनः

कुण्डलीकरणकर्कशव्यायामविस्तारितेनांसलेनोरसा हसन्तमिव तटशि-
लाप्रथिमानं विन्ध्यगिरेः, अजगरगरीयसा च भुजयुगलेन लघयन्तं तुहि-
नशैलशालद्रुमाणां द्राघिमाणम्, वराहबालवलितबन्धनाभिर्नागदमन-
जूटिकावाटिकाभिर्जटिलीकृतपृष्ठे प्रकोष्ठे प्रतिष्ठां गतं गोदन्तमणिचित्रं
त्रापुषं वलयं बिभ्राणम्, अतुन्दिलमपि तुण्डिभम्, अहीरणीचर्मनि- 5
र्मितपट्टिकयोच्चित्रचित्रकत्वक्तारकितपरिवारया संकुब्जाजिनजालकि-
तया शृङ्गमयमसृणमुष्टिभागभास्वरया पारदरसलेशलिप्तसमस्तमस्तकया
कृपाण्या करालितविसंकटकटिप्रदेशम्, प्रथमयौवनोल्लिख्यमानमध्य-

स्थूला हनुर्यस्य स चासौ उत्कट उन्नतः कपोलकूटस्य कपोलाग्रस्यास्थिपर्यंतो यस्य सः। अवाग्रोऽवनतो ग्रीवाबन्धः कंधराबंधो यस्य तम्। स्कन्नः शुष्को लंबमानो वोन्नतो वा स्कंधस्यांसस्यार्धभागो यस्य तम्। अनवरतं सततं कोदण्डस्य धनुषः कुण्डलीकरणं नामनं तस्य कर्कशेन कठोरेण व्यायामेन विस्तारितं विपुलीकृतं तेन अंसलेन बलवता। मांसलेनेति पाठे पुष्टेनेत्यर्थः। 'वत्सांसाभ्यां कामबले' इत्यनेन लच् मत्वर्थीयः। उरसा वक्षसा विंध्यगिरेस्तटप्रथिमानं पृथुत्वं हसन्तमिव धिक्कुर्वन्तमिव। 'पृथ्वादिभ्य इमनिज्वा' इत्यनेन भाव इमनिच्। अजगर इव सर्पविशेष इव गरीयस्तेन दीर्घेण भुजयुगलेन तुहिनशैलस्य हिमाद्रेः शालद्रुमाणां वृक्षविशेषाणां द्राघिमाणं दैर्घ्यं लंघयन्तमतिक्राम्यन्तम्। वराहस्य सूकरस्य बालैः केशैर्वलितानि व्याप्तानि बंधनानि यासां ताभिर्नागदमनस्य विषहरौषधविशेषस्य जूटिकानां लघुमूलानां वाटिकाः पूल्यः संचया इत्यर्थस्ताभिर्जटिलीकृते व्याप्ते प्रकोष्ठे कूर्परादधःप्रदेशे प्रतिष्ठां गतं स्थितं गोदन्तानां सर्पविशेषाणां मणिभिश्चित्रं त्रापुषं त्रपुणो विकारस्तद्वलयं कटकं बिभ्राणं धारयन्तम्। अतुंदिलमपि कृशोदरमपि। 'तुंदादिभ्य इलच्' इत्यनेनेलच्। तुण्डिभं वृहन्नाभिकं व्यायामवशात्कृशोदरमत एव वृहन्नाभिकमित्यर्थः। अहीरणीचर्म द्विमुखसर्पाजिनं तेन निर्मिता पट्टिका यस्यास्तया उच्चित्रेन कर्बुरेण चित्रकस्य स्वगंधतोऽन्यसर्पत्रासकस्य सर्पविशेषस्य व्याघ्रस्य वा त्वचा चर्मणा तारकितः परिवारः अंतर्भागो यस्यास्तया अजिनेन जालकितया संजातजालया शृंगमयेन शृंगनिर्मितेन मसृणेन स्निग्धेन मुष्टिभागेन त्सरुणा भास्वरया कांतिमत्या पारदरसलेशेन लिप्तं दिग्धं समस्तं मस्तकमग्रभागो यस्यास्तया कृपाण्या लघुनाऽसिना करालितो विषमीकृतो विसंकटो भयंकरः विशालः कटिप्रदेशः यस्य तम्। प्रथमं यौवनं यौवनारंभस्तस्मिन्नुलिख्यमानात्कृषमाणान्मध्य-

१ 'मांसलेन' २ 'शारीकृत'

भागभ्रष्टमांसभरिताविव स्थवीयसावूरुदण्डौ दधतम् ,अच्छभल्लचर्ममयेन भल्लीप्रायप्रभूतशरभृता शबलशार्दूलचर्मपटपीडितेनालिकुलकालकम्बललोम्ना पृष्ठभागभाजा भस्त्राभरणेन पल्लवितमिव कार्ष्ण्यमुपदर्शयन्तम् , उत्तरत्रिभागोत्तंसितचाषपिच्छचारुशिखरे खदिरजटानिर्माणे खरप्राणे प्रचुरमयूरपित्तपत्रलताचित्रितत्वाचि त्वचिसारगुरुणि वामस्कन्धाध्यासितधनुषि दोषि लम्बमानेनावाक्शिरसा शितशरकृत्तैकनलकविवरप्रवेशितेतरजङ्घाजनितस्वस्तिकबन्धेन बन्धूकलोहितरुधिरराजिरञ्जितघ्राणवर्त्मना वपुर्विततिव्यक्तविभाव्यमानकोमलक्रोडरोमशुक्लिम्ना शशेन शिताटनीशिखाग्रग्रथितग्रीवेण चापावृतचञ्चूत्तानताम्रतालुना तित्ति- 5

भागाद् भ्रष्टेन गलितेन मांसेन भरितौ व्याप्ताविव स्थवीयसौ स्थूलतरावूरुदण्डौ सक्थिदण्डौ दधतम् । अच्छभल्लचर्ममयेन ऋक्षचर्मकृतेन भल्ली बाणविशेषः तत्प्रचुरशरान् धारयता भल्लचर्मण ऋक्षचर्मणो विकारेण शबलेन कर्बुरेण शार्दूलचर्मपटेन पटाकारेण व्याघ्रचर्मणा पीडितं बद्धं तेन अलिकुलमिव भ्रमरसमूह इव कालानि कृष्णवर्णानि कंबललोमानि यस्य तेन पृष्ठभागं भजति तेन पृष्ठस्थेन भस्त्राभरणेन चर्मप्रसेविकालंकारेण पल्लवितमिव संजातपल्लवमिव कार्ष्ण्यं शरीरस्य कृष्णतामुपदर्शयन्तम् । उत्तरत्रिभागे त्रिभागस्योत्तरे उत्तंसितेनालंकार इति स्थापितेन चाषपिच्छेन किकीदिविपक्षेण चारु मनोहरं शिखरं यस्य तस्मिन् । 'अथ चापः किकीदिविः' इत्यमरः । खदिरस्य खदिरवृक्षस्य जटेव मूलमिव निर्माणमाकारो यस्य तस्मिन् । खरः कठोरः प्राणो बलं यस्मिन् । प्रचुरं मयूरपित्तं बर्हिपित्तद्रवो यासु ताभिः पत्रयुक्ताभिर्लताभिश्चित्रिता त्वक् यस्य तस्मिन् त्वचिसारे वंश इव गुरुणि महति वामस्कंधमध्यासितं धनुः यस्य तस्मिन् दोषि भुजे । 'वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजाः' इत्यमरः । लंबमानेनावागधः शिरो यस्य तेन शितेन तीक्ष्णेन शरेण कृत्तस्य खंडितस्य एकस्य नलस्य पादस्थो विवरे बिले प्रवेशिताभिरितरजंघाभिर्जनितः स्वस्तिकबंधः चतुष्करचनाविशेषः सर्वतोभद्रः इति प्रसिद्धो येन तेन । बन्धूकमिव बन्धूजीवपुष्पमिव लोहितं रुधिरं तस्य राज्या पंक्त्या रंजितं घ्राणवर्त्म नासामार्गो यस्य तेन वपुर्विततत्या शरीरविस्तृत्या लंबमानशरीरतया इति यावत् व्यक्तं स्फुटं विभाव्यमानः कोमलानां क्रोडरोम्णामंककेशानां भुज-

---

'३ कार्श्यम्'

रिणा वर्णकमुष्टिमिव मृगयाया दर्शयन्तम्, विषमविषदूषितवदनेन च विकर्णेन कृष्णाहिनेव मूलगृहीतेन व्यग्रदक्षिणकराग्रम्, जङ्गममिव गिरितटतमालपादपम्, यन्त्रोल्लिखितमश्मसारस्तम्भमिव भ्रमन्तम्, अञ्जनशिलाच्छेदमिव चलन्तम्, अयःसारमिव गिरेर्विन्ध्यस्य गलन्तम्, पाकलं करिकुलानाम्, कालपाशं कुरङ्गयूथानाम्, धूमकेतुं 5
मृगराजचक्राणाम्, महानवमीमहं महिषमण्डलानाम्, हृदयमिव हिंसायाः, फलमिव पापस्य, कारणमिव कलिकालस्य, कामुकमिव कालरात्रेः; शबरयुवानमादायाजगाम। दूरे च स्थापयित्वा विज्ञापयांबभूव—'देव, सर्वस्यास्य विन्ध्यस्य स्वामी सर्वपल्लीपतीनां प्राग्रहरः शबरसेनापतिर्भूकम्पो नाम। तस्यायं निर्घातनामा स्वस्रीयः 10
सकलस्यास्य विन्ध्यकान्तारारण्यस्य पर्णानामप्यभिज्ञः किमुत प्रदेशानाम्। एनं पृच्छतु देवः योग्योऽयमाज्ञां कर्तुम्'। इति कथिते च निर्घातस्तु क्षितितलनिहितमौलिः प्रणाममकरोदुपनिन्ये च तित्तिरिणा सह शशोपायनम्। अवनिपतिस्तु संमानयन्स्वयमेव तमप्राक्षीत्—'अङ्ग, अभिज्ञा यूयमस्य सर्वस्योद्देशस्य। विहारशीलाश्च दिवसे- 15

द्वयमध्यकेशानां वा शुक्लिमा शौक्ल्यं यस्य तेन। पृथ्वादित्वादिमनच्। शशेन शशकेन। शितायास्तीक्ष्णाया अटन्या धनुष्यकोट्याः शिखाग्रे ग्रथिता स्यूता ग्रीवा कंधरा यस्य तेन चापेनावृतया चंच्वा उत्तानं ऊर्ध्वमुखं ताम्रं तालु यस्य तेन तित्तिरिणा पक्षिविशेषेण मृगयाया वर्णकमुष्टिमिव विलेपनमुष्टिमिव दर्शयन्तम्। इदं वर्णनं यथामति व्याख्यातमपि काठिन्यादस्य बहुदोषयुक्तं विद्वद्भिरेव संशोध्यम्। कृष्णाहिनेव कृष्णसर्पेणेव विषमेण उग्रेण विषेण दूषितं वदनं यस्य तेन मूलगृहीतेन विकर्णेन बाणविशेषेण व्यग्रं दक्षिणकाराग्रं यस्य तम्। बाणोपि विषदिग्धमुखो भवति यं कलंजमिति वदन्ति। गलन्तं बहिर्निर्गतमश्मसारस्तंभमिव लोहस्तंभमिव। पालकः हस्तिनाशको रोगविशेषः। महानवमी आश्विनशुक्लनवमी तस्य मह उत्सवस्तमिव यस्यां देव्याः पुरस्तान्महिषा बलिविधानाय हन्यन्ते अयमपि महिषहन्तेति तत्साम्यम्। सर्वेषां पल्लीपतीनामल्पग्रामाधिपानाम्। 'पल्यल्पग्रामकुट्योः' इति मेदिनी। प्राग्रहरो मुख्यः। स्वस्रीयः स्वसुः पुत्रः। 'स्वसुः छ' इत्यनेन छः। विन्ध्यस्य कांतारा दुर्गममार्गास्तेषामरण्यं तत्संबधि वनं तस्य पर्णानामाप्यभिज्ञः पत्रादीनां ज्ञाता। शश एवोपायनमुपहारम्। उद्देशस्य प्रदेशस्य उदारं प्रशस्तं रूपं यस्याः सा।

ष्वेतेषु भवन्तः । सेनापतेर्वान्यस्य वा तदनुजीविनः कस्यचिदुदाररूपा नार्यागता भवेद्दर्शनगोचरम्' इति ।

2 निर्घातस्तु भूपालालापनप्रसादेनात्मानं बहुमन्यमानः प्रणनाम दर्शितादरं च व्यज्ञापयत्--'देव, प्रायेणात्र हरिण्योऽपि नापरिगताः संचरन्ति सेनापतेः कुत एव नार्यो नाप्येवंरूपा काचिदबला । तथापि देवादेशादिदानीमन्वेषणं प्रति प्रतिदिनमनन्यकृत्यैः क्रियते यत्नः । इतश्चार्धगव्यूतिमात्र एव मुनिमहिते महति महीधरमालामूलरुहि महीरुहां षण्डे पिण्डपाती प्रभूतान्तेवासिपरिवृतः पाराशरी दिवाकरमित्रनामा गिरिनदीमाश्रित्य प्रतिवसति स यदि विन्देद्वार्ताम्' इति । तच्छ्रुत्वा नरपतिरचिन्तयत्--'श्रूयते हि तत्र भवतः सुगृहीतनाम्नः स्वर्गतस्य ग्रहवर्मणो बालमित्रं मैत्रायणीयस्त्रयीं विहाय ब्राह्मणायनो विद्वानुत्पन्नसमाधिः सौगते मते युवैव काषायाणि गृहीतवान्' इति । प्रायशश्च जनस्य जनयति सुहृदपि दृष्टो भृशमाश्वासम् । अभिगमनीयाश्च गुणाः सर्वस्य । कस्य न प्रतीक्ष्यो मुनिभावः । भगवती वैधेयेऽपि धर्मगृहिणी गरिमाणमापादयति प्रव्रज्या किं पुनः सकलजनमनोमुषि विदुषि जने । यतो नः कुतूहलि हृदमभूत्सततमस्य दर्शनं प्रति, प्रासङ्गिकमेवेदमापतितंमतिकल्याणं, पश्यामः प्रयत्नप्रार्थितदर्शनं जनम्' इति । प्रकाशं चाब्रवीत्–'अङ्ग, समुपदिश तमुद्देशं यत्रास्ते स पिण्डपाती' इति । एवमुक्त्वा च तेनैवोपदिश्यमानवर्त्मा प्रावर्तत गन्तुम् ।

निर्घातस्त्विति । मुनिभिः महिते पूज्ये महीधराणां पर्वतानां मालाया परंपराया मूले पर्वतोपत्यकायां रोहति वर्धते तस्मिन् । महीरुहां वृक्षाणां षण्डे समूहे । पिण्डपाती भिक्षोपजीवी । प्रभूतैर्बहुभिरन्तेवासिभिच्छात्रैः परिवृतो वेष्टितो पाराशरी भिक्षुः । 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' इत्यनेन णिनिः । सुगृहीतनाम्नः प्रातःस्मरणीयस्य । मैत्रायणीयः मैत्रायणीशाखाया अयमनुयायीत्यर्थः। 'वृद्धाच्छः' इत्यनेन छः । त्रयीं वेदत्रयीं विहाय त्यक्त्वा इत्यस्य सौगतमते काषायाणि गृहीतवान् इत्यत्रान्वयः । ब्राह्मणायनो द्विजश्रेष्ठः उत्पन्ना समाधिश्चित्तैकाग्र्यं यस्य सः काषायाणि कषायेण रक्तानि वस्त्राणि । प्रतीक्ष्यः पूज्यः । वैधेयेपि मूढेपि धर्मगृहिणी धार्मिकत्वं संपादयित्री प्रव्रज्या संन्यासः ।

3 अथ क्रमेण गच्छत एव तस्य अनवकेशिनः, कुड्मलितकर्णिकाराः, प्रचुरचम्पकाः, स्फीतफलेग्रहयः, फलभरभरितनमेरवः, नीलदलनलदनारिकेलनिकराः, हरिकेसरसरलपरिकराः, कोरकनिकुरम्बरोमाञ्चितकुरवकराजयः, रक्ताशोकपल्लवलावण्यलिप्यमानदशदिशः, प्रविकसितकेसररजोविसरबध्यमानचारुधूसरिमाणः, स्वरजःसिकतिलतिलकतलाः, प्रविचलितहिङ्गवः, प्रचुरपूगफलाः, प्रसवपूगपिङ्गप्रियङ्गवः, परागपिञ्जरितमञ्जरीपुञ्जमानमधुपमञ्जुशिञ्जाजनितजनमुदः, मदमलमेचकितमुचुकुन्दस्कन्धकाण्डकथ्यमाननिःशङ्ककरिकरटकण्डूतयः, उड्डीयमाननिःशङ्कचटुलकृष्णशारशाव- 5

अथेति। अथ क्रमेण गच्छत एवास्यैवंविधास्तरवो दर्शनपथमवतेरुरिति संबंधः। न अवकेशिनो निष्फला सफलाः इत्यर्थः। 'वंध्योऽफलोऽवकेशी च' इत्यमरः। कुड्मलिताः संजातकोरकाः कर्णिकाराः परिव्याधाः येषु। 'कर्णिकारो द्रुमोत्पलः परिव्याधः'। स्फीताः पुष्टाः फलेग्रहयोऽवन्ध्या येषु। 'स्यादवन्ध्यः फलेग्रहिः'। 'फलेग्रहिरात्मंभरिश्च' इत्यनेन निपातः।फलभरेण फलाधिक्येन नमिता नम्रा नमेरवः छायावृक्षा येषु। 'छायावृक्षो नमेरुः स्यात्' इति शाश्वतः। नीलानि कृष्णवर्णानि दलानि पर्णानि येषां ते नीलदलास्ते नलदा सल्लकीवृक्षा नारिकेलाश्च येषु। 'नलदः सल्लकी मांसा' इत्यमरः। हरिकेसराः कांचनवृक्षाः सरला देवदारवश्च तेषां परिकराः समूहाः येषु। 'चाम्पेयः केसरो नागकेसरः कांचनाव्हयः' इत्यमरः। कोरकाणां कुड्मलानां निकुरंबैः समूहैः रोमांचिताः कुरवकराजयः कुरवकपंक्तयः येषु। रक्ताशोकानां पल्लवानां लावण्येन कान्त्या लिप्यमाना दिह्यमाना दश दिशो यैस्ते। प्रविकसितानां प्रफुल्लानां केसराणां वकुलानां रजोविसरेण रजःसमूहेन बाध्यमानः पीड्यमानश्चारुः रुचिरः धूसरिमा मालिन्यं येषां ते। स्वरजोभिः सिकतिलानि सिकतासहितानि तिलकवृक्षाणां क्षुरकवृक्षाणां तलानि येषु ते। 'देशे लुविलचौ च' इत्यनेनेलच् मत्वर्थीयः। तिलकास्तु प्रसादितकामिनीदर्शनतः फुल्ला भवन्तीति कविसंप्रदायः। प्रचलितानि हिंगूनि रामठानि येषु ते। प्रचुराणि पूगानां क्रमुकाणां फलानि येषु ते। प्रसवपूगैः पूगसमूहैः पिंगाः पिशंगाः प्रियंगवः श्यामालता येषु ते। परागै रजोभिः पिंजरितासु पीतासु मंजरीषु पुञ्ज्यमानानामेकीभूतानां मधुपानां भ्रमराणां मंजुभिर्मनोहरैः शिंजाभिर्नादैर्जनिता जनानां मुत्प्रमोदो यैस्ते। मदमलेन मेचकितैः कृष्णीभूतैर्मुचुकुन्दानां सुगन्धिवृक्षविशेषाणां स्कंधकांडैः शाखामागैः कथ्यमाना

सकलशाद्वलसुभगभूमयः, तमःकालतमतमालमालामीलितातपाः, स्तब-कदन्तुरितदेवदारवः, तरलताम्बूलीस्तम्बजालकितजम्बूजम्बीरवी-थयः, कुसुमरजोधवलधूलीकदम्बचक्रचुम्बितव्योमानः, बहलमधुमो-क्षोक्षितक्षितयः, परिमलघटितघ्राणतृप्तयः, कतिपयदिवससूतकुक्कुटी-कुटीकृतकुटजकोटराः, चटकासंचार्यमाणवाचाटचाटकैरक्रियमाण-चाटवः, सहचरीचारणचञ्चुरचकोरचञ्चवः, निर्भयभूरिभुरुण्डभु-ज्यमानपाककपिलपीलवः, सदाफलकट्फलफलविशसननिःशूकशुकश-कुन्तशातितशलाटवः, शैलेयसुकुमारशिलातलसुखशयितशशशिशवः, 5

निर्वेद्यमाना निःशंकं करिकरटानां गजगंडस्थलानां गंडूतयो घर्षणानि येषु ते। उड्डीयमाना निःशंकाः चटुला मनोहराः कृष्णशारशावा हरिणबालका येषु तैः सकलैः शाद्वलैः कोमलतृणप्रदेशैः सुभगा मनोरमा भूभागा येषां ते। तम इवांधकार इव कालतमास्ताभिरतिकृष्णाभिस्तमालमालाभिस्तमालपंक्तिभिर्मीलितः संकुचित आतपो येषां ते। स्तबकैर्गुच्छैर्दन्तुरिता नीचोच्चीकृता देवदारवो येषु ते। तरलैस्तांबूलीस्तंभैर्जालकिता भूषिता जंबूनां जंबीराणां च वीथयः पंक्तयो येषु ते। कुसुमरजोभिः पुष्पपरागैर्धवला धूलीकदंबा ग्रैष्मिका वृक्षविशेषास्तेषां चक्रेण समूहेन चुम्बितं स्पृष्टं व्योमाकाशं येषु ते। बहलेन प्रभूतेन मधुमोक्षेण मधुत्यागेनोक्षिताः सिंचिता भूमयो यैस्ते। कतिपयदिवससूताभिः नूत्नप्रसूताभिः कुक्कुटीभिः कुटीकृता उटजीकृताः कुटजानां गिरिमल्लिकानां कोटरा येषु ते। चटकाभिः संचार्यमाणैर्वाचाटैः चाटकैश्चटकापत्यैः क्रियमाणाश्चाटवो येषु ते। 'चटकाया ऐरक्' इत्यनेनैरक्। सहचरीणां चारणे भोजने चंचुरैर्निपुणैश्चकोरैर्वित्ताः प्रसिद्धाः सहचरीचारणचंचुरचकोरचंचवः। 'तेन-वित्तश्चंचुप्चणपौ' इत्यनेन चंचुप्। निर्भयं भूरिभिर्बहुभिर्भूरुण्डैः पक्षिविशेषैर्भुज्यमानानि पाकेन पक्वतया कपिलानि ताम्राणि पीलूनि पीलुफलानि येषु ते। सदा सततं फलं येषां तेषां कट्फलानां श्रीपर्णानां 'कायफळ' इति भाषायां प्रसिद्धानां वृक्षाणां फलविशसनने फलानां नाशने निःशूकैर्निर्दयैः शुकशकुंतैः कीरैर्विहगैश्च शातितानि खण्डितानि शलाटून्यपक्वानि फलानि येषां ते। 'आमे फले शलाटुः स्याद्' इत्यमरः। शैलेयैस्तालपर्णीलताभिः शिलाजितैर्वा सुकुमारेषु शिलातलेषु सुखं शयिता निद्रिताः शशशिशवो येषु। 'शैलेयं तालपर्ण्यां च सैन्धवे शैलजे' इति मेदिनी। शेफालिकानां निर्गुंडीनां शिफाविवरेषु शाखामूलविव-

शेफालिकाशिफाविवरविस्रब्धविवर्तमानगौधेरराशयः, निरातङ्करङ्कवः, निराकुलनकुलकेलयः, कलकोकिलकुलकवलितकलिकोद्गमाः, सहकाराराम रोमन्थायमानचमरुयूथाः, यथासुखनिषण्णनीलाण्डजमण्डलाः, निर्विकारवृकविलोक्यमानपोतपीतगवयधेनवः, श्रवणहारिसनीडगिरिनितम्बनिर्झरनिनादनिद्रानन्दमन्दायमानकरिकुलकर्णतालदुन्दुभयः, समासन्नकिन्नरीगीतरवरममाणरुरवः, प्रमुदिततरतरक्षवः, क्षतहरितहरिद्राद्रवरज्यमाननववराहपोतपोत्रवलयाः, गुञ्जाकुञ्जगुञ्जज्जाहकाः, जातीफलकसुप्तशालिजातकजातयः, दशनकुपितकपिपोतपेटकपाटितपाटलकी- 5

रेषु विस्रब्धं निर्भयं विवर्तमाना गौधेरराशयः गोधापत्यसमूहाः येषु । 'गोधाया ढ्रक्' इत्यनेन ढ्रक् । गौधेराः कृष्णसर्पाद्गोधायां जाता 'वाघचवडा' इति महाराष्ट्रभाषायां प्रसिद्धाः । निरातंकाः पीडारहिता रंकवो हरिणा येषु । कलयुक्तेन मधुरध्वनियुक्तेन कोकिलकुलेन परभृत्समूहेन कवलिता ग्रस्ता कलिकोद्गमाः कोरकांकुरा येषु ते । सहकाराणामारामे उपवने रोमन्थायमाना चर्वितमपकृष्यपुनश्चर्वंतः चमरुयूथा मृगविशेषसमूहा येषु ते । 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इत्यनेन रोमन्थशब्दात्क्यङि शानच् । यथासुखं निषण्णानि नीलांडजानां मंडलानि समूहा येषु ते । नीलांडजा मृगविशेषा इति संकेतः । परमंडजशब्देन पक्षिविशेषवाचकेनानेनभवितव्यमिति भाति । निर्विकारेण विकाररहितेन वृकेणेहामृगेण विलोक्यमानाः पोतैर्वत्सैः पीता गवयधेनवो गोसदृशा धेनवो येषु ते । श्रवणहारिभिः सनीडानां कुलायसहितानां गिरिनितंबानां पर्वतकटकानां निर्झराणां निनादैः ध्वनिभिः जायमानाया निद्राया आनंदेन मन्दायमाना मन्दीभूता करिकुलानां गजसमूहानां कर्णतालदुंदुभयो येषु । समासन्नानां मिलितानां किन्नरीणां गीतरवेण गीतध्वनिना रममाणा रुरवो मृगा येषु । क्षतेन वेधनेन हरितः पीतो हरिद्राणां पीतद्रूणां 'दारुहळद' इति भाषायां प्रसिद्धानां वृक्षाणां द्रवो रसस्तेन रज्यमाना नववराहाणां वराहबालानां पोत्रवलयाः मुखमंडलानि येषु । वराहबालैः स्वपोत्रैर्हरिद्रा विद्धास्तेन ततो निर्गतद्रवेण तेषां पोत्राणि रञ्जितानीत्यर्थः । गुंजाकुंजेषु रक्तिकाकुंजेषु गुंजन्तो जाहका मार्जारविशेषा येषु ते । जातीफलकेषु जातीफलानामधस्तात्सुप्ताः शालिजातकानां प्राणिविशेषाणां जातयः कुलानि येषु ते । दशनेन दंशेन कुपितानां कपिपोतानां वानरबालानां पेटकेन समुदायेन पाटिता

१ 'रसमान'. २ 'वलय:'. ३ 'वलयः'.

टपुटकाः, लकुचलम्पटगोलाङ्गूललङ्घ्यमानलवलयः, बद्धवालुकालवालवलयाः, कुटिलकुल्यावलिवलितवेगगिरिनदिकास्रोतसः, निबिडशाखाकाण्डलम्बमानकमण्डलवः, सूत्रशिक्यासक्तरिक्तभिक्षाकपालपल्लवितलतामण्डपाः, निकटकुटीकृतपाटलमुद्राचैत्यकमूर्तयः, चीवराम्बररागकषायोदकदूषितोद्देशाः, मेघमया इव कृतशिखण्डिकुलकोलाहलाः, 5 वेदमया इवापरिमितशाखाभेदगहनाः, माणिक्यमया इव महानीलतनयः, तिमिरमया इव सकलजननयनमुषः, यामुना इवोर्ध्वीकृतमहाह्रदाः, मरकतमणिश्यामलाः क्रीडापर्वतका इव वसन्तस्य, अञ्जनाचला इव पल्लविताः, तनया इवाटवीजाता विन्ध्यस्य, पातालान्धकारराशय इव भित्त्वा भुवमुत्थिताः, प्रतिवेशिका इव वर्षावासरा- 10 णाम्, अंशावतारा इव कृष्णरात्रीणाम्, इन्द्रनीलमयाः प्रासादा इव वनदेवतानाम्, पुरस्ताद्दर्शनपथमवतेरुस्तरवः ।

विदारिताः पाटलानां ताम्राणां कीटानां पुटका आच्छादनानि कोशा इत्यर्थः येषु ते । लकुचेषु क्षुद्रपनसेषु लंपटैर्गोलांगूलैर्वानरविशेषैर्लंघ्यमाना लवलय आमलकीविशेषा येषु ते । कुटिलाभिर्वक्राभिः कुल्यावलिभिः कृत्रिमसरित्पंक्तिभिः वलितो वेगो येषां तथाभूतानि गिरिनदिकानां स्रोतांसि क्षुद्रनदिकाप्रवाहा येषु ते । निबिडानां शाखानां कांडेषु स्कंधेषु लंबमानाः कमंडलवो मुनिजलपात्राणि येषु ते । 'कांडं चावसरे बाणे नाले स्कंधे च शाखिनाम्' इति धरणिः । सूत्रशिक्येषु रज्जुकाचेषु आसक्तैर्भिक्षाकपालैर्भिक्षापात्रैः पल्लविता भरिताः लतामंडपा येषु ते । निकटकुटीषु समीपोटजेषु कृताः पाटलाभिः श्वेतरक्ताभिर्मुद्राभिराकृतिविशेषैश्चैत्यकमूर्तयो बुद्धप्रतिमा येषु ते । चीवराम्बराणां वल्कलवसनानां रागस्य कषायोदकेन दूषिताः उद्देशाः प्रदेशा येषां ते । कृतः शिखण्डिकुलैः कोलाहलो येषु । अपरिमितानामसंख्यानां शाखानां कठादिशाखानां विटपानां च भेदेन गहनाः कठिना अगमनीया इत्यर्थः । महानीलाः मणिभेदा इति शंकरः । सकलनयनमुषः सर्वेषां नेत्राणामाकर्षका रम्यत्वात् । उर्ध्वीकृता उपरि धृता महाह्रदा यैस्त इव । उपरितनच्छायाया महाह्रदसाम्यम् । प्रतिवेशका समीपवासिनः ।

---

१ 'कुटा.'

4 ततो नरपतेरभवन्मनस्यदूरवर्तिना खलु भवितव्यं भदन्तेनेति। अवतीर्य च गिरिसरिति समुपस्पृश्य युगपद्विश्रामसमयसमुन्मुक्तहेषाघोषबधिरीकृताटवीगहनामस्मिन्नेव प्रदेशे स्थापयित्वा वाजिसेनामवलम्ब्य च तपस्विजनदर्शनोचितं विनयं हृदयेन दक्षिणेन च हस्तेन माधवगुप्तमंसे विरलैरेव राजभिरनुगम्यमानश्चरणाभ्यामेव प्रावर्तत गन्तुम्। 5

5 अथ तेषां तरूणां मध्ये नानादेशीयैः स्थानस्थानेषु स्थाणूनाश्रितैः शिलातलेषूपविष्टैर्लताभवनान्यध्यावसद्भिररण्यानीनिकुञ्जेषु निलीनैर्विटपच्छायासु निषण्णैस्तरुमूलानि निषेवमाणैर्वीतरागैरार्हतैर्मस्करिभिः श्वेतपटैः पाण्डुरिभिक्षुभिर्भागवतैर्वर्णिभिः केशलुञ्चनैः 10 कापिलैर्जैनैर्लौकायतिकैः काणादैरौपनिषदैरैश्वरकारणिकैः कारन्धमिभिर्धर्मशास्त्रिभिः पौराणिकैः साप्ततन्तवैः शाब्दैः पाञ्चरात्रिकैरन्यैश्च

तत इति। भदंतेन। बुद्धानुयायिनां पूजावचनमिदम्। युगपद् एकदेव। विश्रामसमये विश्रान्तिकाले समुन्मुक्तेन कृतेन हेषाघोषेण शब्दगर्जनया बधिरीकृतमटवीगहनं यया ताम्। विश्राम इति विपूर्वकाच्छ्रमेर्घञि रूपम्। 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' इत्यनेन वृद्धेर्निषेधादपाणिनीयमिति बहवः। 'विश्रामो विश्रमश्चैव' इति द्विरूपकोशादनेकेषां मान्यकवीनां प्रयोगबाहुल्याच्च 'अनाचमिकमिवमीनाम्' इत्यस्मिन्वार्तिके तस्य परिगणनं कर्तव्यमित्यन्ये। तथैवोक्तं वृद्धप्रपितामहचरणैः त्रिपथगाकारैः विष्णुसहस्रनामभाष्ये 'विश्रामो विश्रमः' इत्यलम्।

अथेति। अथ तेषां तरूणां मध्ये दिवाकरमित्रमद्राक्षीदित्यन्वयः। नानादेशीयैर्नानादेशेभ्य आगतैः। तत आगत इत्यस्मिन्नर्थे वृद्धाच्छः। अरण्यानी महदरण्यं तस्य लतानिकुंजेषु निलीनैः स्थितैः। अरण्यशब्दाद् इन्द्रवरुणेत्यनेन महत्त्वार्थे ङीषानुक् च। वीतरागैरितीदमार्हतैरित्यारभ्य पांचरात्रिकैरन्यैश्चेत्यन्तानां सर्वेषां विशेषणम्। आर्हतैः अर्हन् देवता येषां तैः 'सास्य देवता' इत्यनेनाण्। मस्करिभिः परिव्राजकैः। श्वेतपटैः श्वेतवस्त्रधारिभिः क्षपणकभेदैः। पाण्डुरिभिक्षुभिस्त्यक्तकाषायैः। भागवतैर्वैष्णवैः। वर्णिभिर्ब्रह्मचारिभिः। केशलुंचनैर्जैनसंन्यासिभिः। कापिलैः सांख्यैः। लौकायतिकैः चार्वाकानुयायिभिः। काणादैर्वैशेषिकैः। औपनिषदैर्वेदान्तिभिः। ईश्वरकारणिकैर्नैय्यायिकैः। कारंधमिभिर्धातुवादिभिः पाखंडिभिर्वा। साप्ततन्तवैर्मीमांसकैः। शाब्दैर्वैय्याकरणैः। पांचरात्रिकैर्वैष्णवविशेषैः। विवदमानैर्वादं कुर्वद्भिः। वैमत्ये

स्वान्स्वान्सिद्धान्ताञ्शृण्वद्भिरभियुक्तैश्चिन्तयद्भिश्च प्रत्युच्चरद्भिश्च संशयानैश्च निश्चिन्वद्भिश्च व्युत्पादयद्भिश्च विवदमानैश्चाभ्यस्यद्भिश्च व्याचक्षाणैश्च शिष्यतां प्रतिपन्नैर्दूरादेवावेद्यमानम्, अतिविनीतैः कपिभिरपि चैत्यकर्म कुर्वाणैस्त्रिशरणपरैः परमोपासकैः, शुकैरपि शाक्यशासनकुशलैः कोशं समुपदिशद्भिः, शिक्षापदोपदेशोपशमशालिनीभिः 5
शारिकाभिरपि धर्मदेशनां दर्शयन्तीभिः, अनवरतश्रवणगृहीतालोकैः कौशिकैरपि बोधिसत्त्वजातकानि जपद्भिः, जातसौगतशीलशीतलस्वभावैः शार्दूलैरप्यमांसाशिभिरुपास्यमानम्, आसनोपान्तोपविष्टविस्रब्धानेककेसरिशावकतया मुनिपरमेश्वरमकृत्रिम इव सिंहासने निषण्णम्, उपशममिव पिबद्भिर्वनहरिणैर्जिह्वालताभिरुपलिह्यमानपादपल्लवम्, वामकरतलनिविष्टेन नीवारमश्नता पारावतपोतेन कर्णोत्पलेनेव 10
प्रियां मैत्रीं प्रसादयन्तम्, इतरकरकिसलयनखमयूखलेखाभिर्जनि-

भासनोपसंभाषाज्ञानेत्यनेन तङि शानच्। एतेषां तृतीयान्तानां दूरादेवावेद्यमानमित्यनेन संबंधः। त्रिसरणं बुद्धस्तद्धर्मो यतीनां संघाश्च तस्मिन्परैरासक्तैः परमोपासकैरतएववातिविनीतैरतिनम्रैः कपिभिरपि चैत्यकर्म चैत्यविधिं कुर्वद्भिः। पिप्पलवृक्षप्रदक्षिणा वा बुद्धमूर्तेः पूजनं वा चैत्यकर्म। शाक्यशासने बौद्धधर्मे कुशलैः प्रवीणैः कोशं वसुबन्धुकृतं बौद्धसिद्धांतग्रथं समुपादिशद्भिः। शिक्षापदानामुपदेशेनोपशम इन्द्रियदमनं तेन शालन्ते शोभन्ते ताभिः शारिकाभिरपि धर्मदेशनां धर्मोपदेशं दर्शयन्तीभिः। अनवरतं सततं श्रवणेन गृहीतः स्वीकृत आलोको ज्ञानं प्रकाशश्च यैस्तैः कौशिकैरुलूकैरपि बोधिसत्वस्य बुद्धस्य जातकानि कथाः जपद्भिः। कौशिकानां सूर्यप्रकाशेऽन्धत्वं परं तैरपि श्रवणेनालोकं गृहीत्वा जीमूतवाहनादयो बुद्धकथाः पठिता इत्यर्थः। जातः सौगतशील इव बौद्धशील इव शीतलः स्वभावो येषां तैः शार्दूलैरपि व्याघ्रैरप्यमांसभक्षिभिः। कपिभिरित्यारभ्य शार्दूलैरित्यन्तानां तृतीयान्तानामुपास्यमानमित्यनेन संबंधः। आसनोपान्ते आसनान्तिके उपविष्टा आसीना विश्रब्धा निर्भया अनेके केसरिशावकाः सिंहशावकास्तेषां भावस्तया अकृत्रिम एव नैसर्गिक एव सिंहासने सिंहमयासने उपविष्टं मुनिपरमेश्वरं बुद्धम्। **उपशममिति**। वनहरिणानां पादास्वादनं स्वाभाविकमप्युपशमप्राशनार्थतयोत्प्रेक्षितम्। प्रियामिष्टां मैत्रीमपकारिण्यभिप्रीतिम्। पारावतस्य कर्णोत्पतितकरतलगकर्णोत्पलसाम्यम्। इतरस्य दक्षिणस्य करकिसलयस्य किसलयमिवकरस्तस्य नखमयूखलेखाभिर्नखकिरणराजिभिः उद्भ्रान्तं

तजनव्यामोहमुद्ग्रीवं मयूरं मरकतमणिकरकमिव वारिधाराभिः पूरयन्तम्, इतस्ततः पिपीलकश्रेणीनां श्यामाकतण्डुलकणान्स्वयमेव किरन्तम्, अरुणेन चीवरपटलेन म्रदीयसा संवीतं बहलबालातपानुलिप्तमिव पौरंदरं दिग्भागम्, उल्लिखितपद्मरागप्रभाप्रतिमया रक्तावदातया देहप्रभया पाटलीकृतानां काषायग्रहणमिव दिशामप्युपदिशन्तम्, अनौद्धत्यादधोमुखेन मन्दमुकुलितकुमुदाकरेण स्निग्धधवलप्रसन्नेन चक्षुषा जनक्षुण्णक्षुद्रजन्तुजीवनार्थममृतमिव वर्षन्तम्, सर्वशास्त्राक्षरपरमाणुभिरिव निर्मितं, परमसौगतमप्यवलोकितेश्वरम्, अस्खलितमपि तपसि लग्नम्, आलोकमिव यथावस्थितसकलपदार्थप्रकाशकं दर्शनार्थिनां, सुगतस्याप्यभिगमनीयमिव, धर्मस्याप्याराधनीयमिव, प्रसादस्यापि प्रसादनीयमिव, मानस्यापि माननीयमिव, वन्द्यत्वस्यापि वन्दनीयमिव, जन्म जपस्य, नेमिं नियमस्य[1], तत्वं तपसः, शरीरं शौचस्य, कोशं कुशलस्य, वेश्म विश्वासस्य, सद्वृत्तं सद्वृत्ततायाः, सर्वस्वं सर्वज्ञताया, दाक्ष्यं दाक्षिण्यस्य, पारं परानुकम्पायाः, निर्वृतिं सुखस्य, मध्यमे वयसि वर्तमानं दिवाकरमित्रमद्राक्षीत्।

जनितो जनानां व्यामोहो मुग्धता येन तं मयूरं वारिधाराभिः मरकतमणीनां करकं पात्रमिव पूरयन्तम्। नखकिरणानां वारिधारासाम्यमुद्ग्रीवस्य मयूरस्य मरकतपात्रसाम्यं च। **अरुणेनेति**। अरुणचीवरपटस्य बालातपसाम्यम्। मुनेश्च पौरंदरादिग्भागत्वम्। उल्लिखितानां घर्षितानां पद्मरागाणां प्रभया कांत्या प्रतिमा तुल्या तया रक्तया ताम्रयावदातया सितया च देहप्रभया देहकान्त्या पाटलीकृतानां कषायीकृतानां दिशां काषायग्रहणमिव संन्यासस्वीकारमिवोपदिशन्तम्। अनौद्धत्यात् ऋजुतयाऽधोमुखेन मंदं शनैर्मुकुलितः कुड्मलितः संकोचित इत्यर्थः कुमुदाकरः कैरवसमूहो येन। अनेन चक्षुषः चन्द्रमसा साम्यमतएव ततोऽमृतोत्पत्तिवर्णनं युज्यते। जनैः क्षुण्णानां पिष्टानां क्षुद्रजन्तूनां जीवनार्थम्। परमसौगतमपि बुद्धश्रेष्ठमपि अवलोकितो दृष्ट ईश्वरो येन तम्। बुद्धमत ईश्वराभावाद्विरोधः परिहारस्तु तदाख्यबुद्धविशेषमिति करणीयः। **अस्खलितमपीति**। स्खलितोऽन्यस्याधारमपेक्षतेऽयं तु स्खलनाभावेऽपि तपस आधारं गृहीतवानित्यर्थः। आलोकमिव प्रकाशमिव दर्शनार्थिनां दिदृक्षूणां स्वदर्शनायागतानां च यथावस्थितं सकलानां पदार्थानां प्रकाशकम्। पदार्थानां सम्यग्ज्ञान-

---

[1] 'यमस्य'.

अतिप्रशान्तगम्भीराकारारोपितबहुमानश्च सादरं दूरादेव शिरसा मनसा वचसा च ववन्दे ।

6 दिवाकरमित्रस्तु मैत्रीमयः प्रकृत्या विशेषतस्तेनापरेणादृष्टपूर्वेणामानुषलोकोचितेन सर्वाभिभाविना महानुभावाभोगभाजा भ्राजिष्णुना भूपतेरप्राकृतेनाकारविशेषेण तेन चाभिजात्यप्रकाशकेन गरीयसा प्रश्रयेण चाह्लादितश्चक्षुषि च चेतसि च युगपदेव, धीरस्वभावोऽपि च संपादितससंभ्रमाभ्युत्थानः संकलय्य किंचिदुद्गमनकेन विलोलं विलम्बमानं वामांसाच्चीवरपटान्तमुत्क्षिप्यानेकाभयदानदीक्षादाक्षिणो दक्षिणं महापुरुषलक्षणलेखाप्रशस्तं हस्तं स्निग्धमधुरया वाचा सगौरवमारोग्यदानेन राजानमन्वग्रहीत् । अभ्यनन्दच्च स्वागतगिरा । गुरुमिवाभ्यागतं बहु मान्यमानः स्वेनासनेनाद्ध्वमत्रेति निमन्त्रयांचकार । पार्श्वे स्थितं च शिष्यमब्रवीत्—'आयुष्मन्, उपानय कमण्डलुना पादोदकम्' इति । राजा त्वचिन्तयत्—' अलोहः खलु संयमनपाशः सौजन्यमभिजातानाम् । स्थाने खलु तत्रभवान्गुणानुरागी

मुत्पादयन्तमित्यर्थः । नियमस्य योगद्वितीयांगस्य व्रतस्य वा नेमिं चक्रान्तम् । अतिप्रशांतगंभीरेणाकारेणारोपित उत्पादितो बहुमानो यस्य स हर्षः ।

दिवाकरमित्रस्त्विति । मैत्रीमयः स्नेहप्रचुरः स्नेहस्वरूपो वा प्राचुर्ये तादात्म्ये वा मयट् । सर्वाभिभाविना सर्वातिगेन महतोऽनुभावस्य प्रभावस्याभोगं पूर्णतां भजति सेवते तेन भ्राजिष्णुना तेजस्वता । 'भुवश्च' इति सूत्रस्थचकाराद् भ्राजधातोरिष्णुच् । आभिजात्यं कौलीन्यं तस्य प्रकाशकेन । प्रश्रयेण नम्रतया युगपदेव एकदैव चक्षुषि चेतसि चाल्हादितः । युगपदित्यस्याग्रेऽग्रहीदिति पाठो दृश्यते स न समीचीनः पुनरप्यग्रहीदित्यस्य विद्यमानत्वात्संकेतविरुद्धत्वाच्च । धीरस्वभावोऽपि धीराः किमपि संभ्रमेण न कुर्वन्तीति विरोधः । वीरस्वभाव इति पाठो न चारुः । उद्गमनकेनोत्थानेन किंचिद्विलोलं वामांसाल्लंबमानं चीवरपटान्तं संकलय्य यथास्थानं संस्थाप्य । अनेकेषामभयदानस्य दीक्षायां दक्षिण उदारः । महापुरुषस्य लक्षणानां चिन्हानां लेखाभिः प्रशस्तं दक्षिणं हस्तमुत्क्षिप्योन्नमय्य । आध्वम् इति आस उपवेशने इत्यस्य लोटो मध्यमबहुवचनम् । अभिजातानां कुलीनानां सौजन्यमलोहो लोहवर्जितः संयमनपाशः बंधनपाशः ।

---

१ 'युगपदग्रहीत्'. 'युगपदगृह्यत' २ 'वीर'

ग्रहवर्मा बहुशो वर्णितवानस्य गुणान्' इति । प्रकाशं चावभाषे—
'भगवन्, दर्शनपुण्यानुगृहीतस्य मम पुनरुक्त इवायमार्यप्रयुक्तः
प्रतिभात्यनुग्रहः । चक्षुष्प्रदानप्रसादस्वीकृतस्य च परकरणमिवासना-
दिदानोपचारचेष्टितम् । अतिभूमिर्भूमिरेवासनं भवादृशां पुरः । सं-
भाषणामृताभिषेकप्रक्षालितसकलवपुषश्च मे प्रदेशवृत्ति पाद्यमप्यपार्थ- 5
कम् । आसतां भवन्तो यथासुखम् । आसीनोऽहम्' इत्यभिधाय
क्षितावेवोपाविशत् ।

7 'अलंकारो हि परमार्थतः प्रभवतां प्रश्रयातिशयः, रत्ना-
दिकस्तु शिलाभारः' इत्याकलय्य पुनः पुनरभ्यर्थ्यमानोऽपि यदा न
प्रत्यपद्यत पार्थिवो वचनं तदा स्वमेवासनं पुनरपि भेजे भदन्तः । भू- 10
पतिमुखनलिननिहितनिभृतनयनयुगलनिगडनिश्चलीकृतहृदयश्च स्थि-
त्वा कांचित्कालकलां कलिकालकल्मषकालुष्यमिव क्षालयन्नमला-
भिर्दन्तमयूखमालाभिर्मूलफलाभ्यवहारसंभवमुद्वमन्निव च परिमलसु-

स्थाने युक्तम् । चक्षुष्प्रदानं दृष्ट्यावलोकनमेव प्रसादस्तेन स्वीकृतस्यासनादिदा-
नोपचारचेष्टितं परकरणमिवासनादिना परेषां संमाननं क्रियते । इदानीं भवद्भिः
स्वीयत्वेन स्वीकृतस्य तन्मास्तु इत्यर्थः । भवादृशां पुरः संभाषणमेवामृतं तेना-
भिषेकः स्नानं तेन प्रक्षालितं सकलं वपुर्यस्य तस्य मे । भूमिरेवातिभूमिर्भूम्या
अधिका उत्कृष्टमासनमित्यर्थः । अपार्थकं निरर्थकम् । पादरूपैकदेशे वर्तमानं
पाद्यं निरर्थकमित्यर्थः ।

अलंकार इति । प्रभवतां समर्थानां प्रश्रयातिशयो विनयाधि-
क्यमलंकारो भूषणमित्याकलय्य ज्ञात्वा । कलेर्घटादित्वान्मित्वम् ।
'ल्यपि लघुपूर्वात्' इत्यनेन णेरयादेशश्च । पुनः पुनर्वारंवारमभ्य-
र्थ्यमानोऽपि नृपतिर्यदा न प्रत्यपद्यत न स्वीचकार वचनं भदन्तभाषितं
तदा भदन्तः स्वमासनं पुनरपि भेजे । भूपतेर्मुखमेव नलिनं तस्मिन्निहितं
स्थापितं निभृतं निश्चलं नयनयुगलं नेत्रद्वन्द्वं तदेव निगडो बंधनशृंखला तेन
निश्चलीकृतं हृदयं यस्य स भदन्तः । कांचित्कालकलां स्थित्वा स्वल्पं तूष्णीं-
भूय । निश्चलहृदयो हि किंकर्तव्यतामूढः स्वल्पकालं तूष्णीं भवति ततः प्रकृति-
मापद्यते । अमलाभिः स्वच्छाभिर्दन्तमयूखमालाभिर्दन्तकिरणपंक्तिभिः कलिका-
लस्य कलियुगस्य कल्मषस्य पापस्य कालुष्यं मालिन्यं क्षालयन्निव । फलमूलाना-
मभ्यवहारसंभवं भक्षणोत्पन्नं परिमलेन सुगन्धेन सुभगं मनोहरं विकचानां

भगं विकचकुसुमपटलपाण्डुरं लतावनमवादीत्—'अद्यप्रभृति न केवलमयमनिन्द्यो वन्द्योऽपि प्रकाशितसत्सारः संसारः। किं नाम नालोक्यते जीवद्भिरद्भुतं येन रूपमचिन्तितोपनतमिदं दृक्पथमुपगतम्। एवंविधैरनुमीयन्ते जन्मान्तरावस्थितसुकृतानि हृदयोत्सवैः। इहापि जन्मनि दत्तमेवास्माकममुना तपःक्लेशेन फलमसुलभदर्शनं दर्शयता देवानां प्रियम्। आ तृप्तेः पीतममृतमीक्षणाभ्याम्। जातं निरुत्कण्ठं मानसं निर्वृत्तिसुखस्य। महद्भिः पुण्यैर्विना न विश्राम्यन्ति सज्जने त्वादृशि दृशः। सुदिवसः स यस्मिञ्जातोऽसि। सा सुजाता जननी या सकलजीवलोकजीवितजनकमजनयदायुष्मन्तम्। पुण्यवन्ति पुण्यान्यपि तानि येषामसि परिणामः। सुकृततपसस्ते

प्रफुल्लानां कुसुमानां पटलेन समूहेन पाण्डुरं लतावनं लतारण्यमुद्गमन्निवोद्गिरन्निव। अत्र च दन्तमयूखलेखाभिरित्यस्य संबन्धो ग्राह्यः। शुभ्रदन्तकिरणैः सुगन्धिपुष्पाणां लतानां वनमुद्गमन्निवेत्यर्थः। प्रकाशितः प्रकटितः सत्सारः सतां सज्जनानां बलं सौजन्यादि येन सः। अचिन्तितोपनतमतर्कितप्राप्तम्। एवंविधैरीदृग्भिर्हृदयोत्सवैर्हृदयानन्दैर्जन्मान्तरेऽन्यस्मिञ्जन्मन्यवस्थितानि सुकृतानि पुण्यान्यनुमीयन्ते तर्क्यन्ते। असुलभं दर्शनं यस्य तम्। देवानां प्रियमिति भिन्नं पदद्वयं न समासोऽन्यथार्थवैपरीत्यापत्तेः। 'देवानांप्रिय इति च मूर्खे' इतिवार्तिकेन मूर्खेऽभिधेय एव समासालुग्विधानात्। केचित्तु वार्तिके मूर्ख इतिपदाभावेन भाष्यादावपि तददर्शनेन तस्य मूर्ख इत्यर्थो न स्वरसः। त्यक्तज्ञानाः संसारिणो देवानां प्रियतमा देवोद्देशेन यज्ञादिप्रवर्तकत्वात्ते च वेदान्तिदृष्ट्या कर्मासक्तत्वान्मूढा इत्युपचारान्मूर्खेऽस्य प्रयोग इति मन्यन्ते। 'अजेर्व्यघञपोः' इत्यत्र भाष्ये तु सूतवैय्याकरणयोः संवादे 'प्राजितृ देवानां प्रियो न त्विष्टिज्ञ' इति सूतेनोक्ते वैय्याकरण आह 'अहो नु खलु अनेन दुरुतेन बाध्यामहे' इति। अस्माच्च भाष्याद्देवानांप्रियशब्दस्य निन्दात्वे न विवादः। कथमयंशब्दोऽशोकप्रभृतिभिश्चक्रवर्तिभिः स्वबिरुदावलौ निवेशित इति महागूढं बाणसदृशेन सर्वशास्त्रपारंगतेन च स्वकाव्ये उपयोजित इति न जानीमः। भाष्यार्थविदस्तु 'षष्ठ्या आक्रोशे' इत्यनेनैव सिद्धे वार्तिकारम्भेण देवप्रिय इत्यस्मिन्नर्थ एव समासालुग्विधानं। भाष्ये काक्वा निन्दार्थता। 'अन्यत्र देवप्रिय' इति भट्टोज्युक्तिश्चिन्त्येत्याहुः। आ तृप्तेस्तृप्तिपर्यन्तम्। 'पंचम्यपाङ्परिभिः' इत्यनेन पंचमी। निर्वृत्तिसुखस्य निर्वृत्तिसुखेऽधिकरणस्य शेषत्वविवक्षया षष्ठी निरुत्कण्ठमुत्कण्ठारहितं मानसं जातम्। मोक्षेपि त्वद्दर्शनादभ्यधिकः प्रमोदो

परमाणवो ये तव परिगृहीतसर्वावयवाः। तत्सुभगं सौभाग्यमाश्रितोऽ-
सि येन। भव्यः स पुरुषभावो भवत्यवस्थितो यः। यत्सत्यं मुमु-
क्षोरपि मे पुण्यभाजमालोक्य पुनः श्रद्धा जाता मनुजजन्मनि। ने-
च्छद्भिरप्यस्माभिर्दृष्टः कुसुमायुधः। कृतार्थमद्य चक्षुर्वनदेवतानाम्।
अद्य सफलं जन्म पादपानां येषामसि गतो गोचरम्। अमृतमयस्य 5
भवतो वचसां माधुर्यं कार्यमेव। अस्य त्वीदृशे शैशवे विनयस्यो-
पाध्यायं ध्यायन्नपि न संभावयामि भुवि। सर्वथा शून्य आसीदजाते
दीर्घायुषि गुणग्रामः। धन्यः स भूभृद्यस्य वंशे मणिरिव मुक्तामयः
संभूतोऽसि। एवंविधस्य च पुण्यवतः कथंचित्प्राप्तस्य केन प्रियं
समाचराम इति पारिप्लवं चेतो नः। सकलवनचरसार्थसाधारणस्य 10
कन्दमूलफलस्य गिरिसरिदम्भसो वा के वयम्। अपरोपकरणीकृतस्तु
कायकलिरयमस्माकम्। सर्वस्वमवशिष्टमिद्मातिथ्याय। स्वायत्ताश्च
विद्यन्ते विद्याबिन्दवः कतिचित्। उपयोगं तु न प्रीतिर्विचारयति।
यदि च नोपरुणद्धि कश्चित्कार्यलवमरक्षणीयाक्षरं वा कथनीयं तत्क-
थयतु भवाञ्श्रोतुमभिलषति हृदयं सर्वमिदं नः। केन कृत्यातिभारेण 15
भव्यो भूषितवान्भूमिमेतामभ्रमणयोग्याम्। कियदवधिर्वा शून्याटवी-

---

नेत्यर्थः। तवेत्यस्य परिगृहीतपदार्थेऽन्वयः। भव्यः शुभः। यत्सत्यमसंशयम्
'असंशये तु यत्सत्यम्' इति विश्वनाथः। अमृतमयस्यामृतस्वरूपस्य भवतो
वचसां माधुर्यं कार्यमेवामृतरूपाद्भवतः कारणाज्जातमित्यर्थः। कार्यस्य च
कारणधर्मवत्त्वनियमात्। **अस्येति**। भुवि जगतीदृशे शैशवे बाल्येऽस्य ते
विनयस्य नम्रत्वस्योपाध्यायमुपदेशकं ध्यायन्नपि ध्यानेन निखिलं जगत्पश्यन्नपि
न संभावयामि न लक्षये। **धन्य इति**। भूभृन्नृपः पर्वतश्च। यस्य वंशेऽन्वये
वेणौ च मुक्तामयो मुक्तः त्यक्तः आमयो दोषो येन स मणिरिव। कीचकतो
मौक्तिकोत्पत्त्येयमुपमा। पारिप्लवं चंचलम्। **सकलेति**। वनचरैः सर्वैरपि
लभ्यस्येत्यर्थः। अपरोपकरणीकृतोऽन्येषां कार्ये नियुक्तोयं कायकलिः दुःशरी-
रमिदम्। अनेकदुःखहेतुत्वात्काय एव कलिरित्यर्थः। अवशिष्टं शरीरादन्यत्सर्व-
मित्यर्थः सर्वस्वमातिथ्यायातिथेरुपयोगाय। अरक्षणीयाक्षरम्। अस्मासु विश्वासः
स्याच्चेदित्यर्थः।

---

१ 'किञ्चित्'.

पर्यटनक्लेशः कल्याणराशेः । कस्माच्च संतप्तरूपेव ते तनुरियमसंतापार्हा विभाव्यत' इति ।

8 राजा तु सादरतरमब्रवीत्—'आर्य, दर्शितसंभ्रमेणानेन मधुरसविसरममृतमिव हृदयधृतिकरमनवरतं वर्षता वचसैव ते सर्वमनुष्ठितम् । धन्योऽस्मि यदेवमभ्यर्हितमनुपचरणीयमपि मान्यो मन्यते 5
माम् । अस्य च महावनभ्रमणपरिक्लेशस्य कारणमवधारयतु मतिमान् । मम हि विनष्टनिखिलेष्टबन्धोर्जीवितानुबन्धस्य निबन्धनमेकैव यवीयसी स्वसावशेषा । सापि भर्तुर्वियोगाद्वैरिपरिभवभयाद् भ्रमन्ती कथमपि विन्ध्यवनमिदम्, अशुभशबरबलबहुलम्, अगणितगजकुलकलिलम्, अपरिमितमृगपतिशरभभयम्, उरुमहिषमुषितपथिकागमनम्, अतिनिशितशरकुशपरुषम्, अवटशतविषममाविशत् । 10
अतस्तामन्वेष्टुं वयमनिशं निशिनिशि च सततमिमामटवीमटामः । न चैनामासादयामः । कथयतु च गुरुरपि यदि कदाचित्कुतश्चिद्वनचरतः श्रुतिपथमुपगता तद्वार्ता' इति ।

राजेति। दर्शितः संभ्रमो येनामृतमिव हृदयस्य धृतिकरं धैर्योत्पादकं मधुरसस्य विसरं समूहं वर्षता ते वचसैव वाण्यैव । अनुपचरणीयमप्युपचारानर्हमपि मामभ्यर्थितं पूज्यं मन्यते । विनष्टा मृता निखिलाः सर्वे इष्टाः प्रिया बान्धवा यस्य तस्य मे जीवितानुबन्धस्य प्राणधारणस्य निबन्धनं कारणमित्यर्थः यवीयसी मत्तो न्यूनवयस्का। 'द्विवचनविभज्योपपदे तरबीयसुनौ' इत्यनेन युवन् शब्दादीयसुनि स्थूलदूरेत्यादिना युवन्शब्दस्य वस्य लोपे गुणे च रूपमिदम् । स्वसा भगिनी ।**सापीति** । सापि कथमपि इदं विन्ध्यवनमाविशदिति योजना । विन्ध्यवनं विशिनष्टि । अशुभेनामंगलेन शबरबलेन भिल्लसैन्येन बहुलं व्याप्तम् । अगणितैरसंख्यैर्गजकुलैः करियूथैः कलिलं गहनं दुष्प्रवेशमित्यर्थः । 'कलिलं गहने समे' इत्यमरः । अपरिमितमगण्यं मृगपतीनां सिंहानां शरभाणां सिंहवैरिणां च भयं यस्मिन् तत् । उरुभिर्महद्भिर्महिषैर्मुषितं प्रतिबद्धं पथिकानां पान्थानामागमनं यस्मिन् । अतिनिशितैरतितीक्ष्णैः शरैः कुशैश्च दर्भविशेषैः परुषं कठोरमवटशतैर्गर्तशतैर्विषमं नीचोच्चम् । अनिशं निशाव्यापाररहितं यथा स्यात्तथा । नेहानिशमित्यस्य सततमित्यर्थः सततपदसत्त्वेन पुनरुक्तप्रसंगात् ।

9 अथ तच्छ्रुत्वा जातोद्वेग इव भदन्तः पुनरभ्यधात्—'धीमन्, न खलु कश्चिदेवंरूपो वृत्तान्तोऽस्मानभ्युपगतवान्। अभाजनं हि वयमीदृशानां प्रियाख्यानोपायनानां भवताम्।' इत्येवं भाषमाण एव तस्मिन्नकस्मादागत्यापरः शमिनि वयसि वर्तमानः संभ्रान्तरूप इव पुरस्तादुपरचिताञ्जलिर्जातकरुणः प्रक्षरितचक्षुर्भिक्षुरभाषत—'भगवन्भदन्त, महत्करुणं वर्तते। बालैव बलवद्व्यसनाभिभूता भूतपूर्वापि कल्याणरूपा स्त्री शोकावेशविवशा वैश्वानरं विशति। संभावयतु तामप्रोषितप्राणां भगवान्। अभ्युपपद्यतां समुचितैः समाश्वासनैः। अनुपरतपूर्वं कृमिकीटमपि दुःखितं दयाराशेरार्यस्य गोचरगतम्' इति। 5 10

10 राजा तु जातानुजाशङ्कः सोदर्यस्नेहाचान्तर्द्रुत इव दुःखेन दोदूयमानहृदयः कथमपि गद्गदिकागृहीतकण्ठो विकलवाग्बाष्पायमाणदृष्टिः पप्रच्छ—'पाराशरिन्, कियद्दूरे सा योषिदेवंजातीया जीवेद्वा कालमेतावन्तमिति। पृष्टा वा त्वया कासि, कस्यासि, कुतोऽसि, किमर्थं वनमिदमभ्युपगतासि, विशसि च किंनिमित्तमनलमित्यादितः प्रभृति कार्त्स्न्येन कथ्यमानमिच्छामि श्रोतुं कथमार्यस्य गता गोचरमाकारतो वा कीदृशी' इति। 15

अथेति। प्रियस्याख्यानानि कथनानि तान्येवोपायनान्युपहारास्तेषाम्। शमिनि शमयुक्ते वयसि वर्तमानः। उपरचिता कृता अंजलिर्नमस्कारो येन सः प्रक्षरिते गलिते चक्षुषी यस्य सः। बलवता महता व्यसनेन संकटेनाभिभूता पराजिता। **भूतपूर्वापीति**। पूर्वं सुरूपाऽधुना दुःखादिनोद्विग्नवर्णेत्यर्थः। शोकावेशेन दुःखावेगेन विवशाऽस्वतंत्रा। वैश्वानरमग्निम्। अप्रोषितप्राणामगतजीवितां जीवन्तीमित्यर्थः। अभ्युपपद्यतां योज्यताम्। पूर्वमनुपरतममृतं सजीवमित्यर्थः दुःखितं कृमिकीटकमपि क्षुद्राः प्राणिनोऽपि। 'क्षुद्रजन्तवः' इत्यनेन समाहारः। दयाराशेर्दयासमुद्रस्यार्यस्य गोचरगतमार्येण दयार्द्रया दृष्टया वीक्षितं किमु सा मानुषीत्यर्थः।

राजेति। जातोत्पन्नाऽनुजायाः कनीयस्याः शंका यस्य सः। सोदर्यास्नेहाद्भगिनीप्रेम्णा। 'सोदराद्यः' इत्यनेन यः। दोदूयमानमतिशयं पीड्यमानं हृदयं यस्य सः।दुनोतेर्यङन्ताद्भृशार्थाच्छानच्।गद्गदिकयाऽस्पष्टभाषितेन गृह्यमाणः कंठो यस्य सः। विकलया पीडितया वाचा बाष्पायमाणा बाष्पमुद्वमन्ती दृष्टिर्यस्य सः। पाराशरिन् भिक्षो। कार्त्स्न्येन साकल्येन गोचरं दृष्टिपथमित्यर्थः।

11 तथाभिहितस्तु भूभुजा भिक्षुराचचक्षे— 'महाभाग, श्रूयताम्। अहं हि प्रत्यूषस्येवाद्य वन्दित्वा भगवन्तमनेनैव नदीरोधसा सैकतसुकुमारेण यदृच्छया विहृतवानतिदूरम्। एकस्मिंश्च वनलतागहने गिरिनदीसमीपभाजि भ्रमरीणामिव हिमहतकमलाकरकातरणां रसितं सार्यमाणानामतितारतानवर्तिनीनां वीणातन्त्रीणामिव झांकारमेकतानं नारीणां रुदितमधृतिकरमतिकरुणमाकर्णितवानस्मि। 5 समुपजातकृपश्च गतोऽस्मि तं प्रदेशम्। दृष्टवानस्मि च दृषत्खण्डखण्डिताङ्गुलिगलल्लोहितेन च पार्ष्णिप्रविष्टशरशलाकाशल्यशूलसंकोचितचक्षुषा चाध्वनीनश्रमश्वयथुनिश्चलचरणेन च स्थाणवव्रणव्यथितगुल्फबद्धभूर्जत्वचा च वातखुडखेदखञ्जजङ्घाजातज्वरेण च पांसुपा- 10

तथेति। सैकतेन वालुकाप्रदेशेन सुकुमारं कोमलं तेन नदीरोधसा नदीतीरेण। यदृच्छया स्वेच्छया। गिरिनद्याः समीपभाजि समीपस्थे वनलतानां गहनेऽरण्ये। हिमैस्तुषारैर्हताः कमलाकराः कमलिन्यस्तैः करणैः कातराणां भीरूणां भ्रमरीणामिव रसितं नादम्। सार्यमाणानां श्रुतिरीत्या स्थाप्यमानानामतितारेष्वतिदीर्घेषु तानेषु मूर्छनासु वर्तन्ते तासां वीणातन्त्रीणां वीणागुणानामिवैकतानमेकस्वरं झांकारं तथा शब्दमिव। वीणातन्त्रीणामित्यत्र वर्णतन्त्रीणामिति शंकरधृतः पाठः। तत्र वर्णाः स्थायिसञ्चार्यारोह्यवरोहिणश्चत्वारस्तदुपलक्षितास्तंत्र्यः वर्णतंत्र्य इति स व्याख्यातवान्। अधृतिकरमधैर्योत्पादकम्। दृष्टवानिति। एवंविधानामबलानां चक्रवालेन परिवृतामित्यस्य योषितं दृष्टवानित्यत्र योषितमित्यनेनातिदूरेण संबंधः। दृषत्खंडैः पाषाणभागैः खंडिताभ्यः अंगुलिभ्यो गलत्स्रवल्लोहितं रक्तं यस्य तेन। पार्ष्णौ पादाधोभागे प्रविष्टेनांतर्गतेन शरस्य तृणविशेषस्य शलाकाशल्येन इषीकाग्रेण यः शूलः तोदः तेन संकोचितं मीलितं चक्षुः नेत्रं यस्य तेन। अध्वनीनस्य मार्गे भवस्य श्रमस्य श्वयथुना शोथेन निश्चलाः चरणा यस्य तेन। 'अध्वनो यत्खौ' इत्यनेन खः। स्थाणोरुद्भूताः स्थाणवो वृक्षसंबंधिनो व्रणाः क्षतानि तैर्व्यथितेषु पीडितेषु गुल्फेषु घुटिकासु बद्धा भूर्जत्वचो येन तेन। स्थाणुशब्दाच्छेष इति लक्षणसूत्रेणाण्। वातखुडो गतिप्रतिघातलक्षणो व्याधिस्तस्य खेदेन दुःखेन खञ्जाभ्योऽसम्यग्गतिभ्यः जंघाभ्यः प्रसृताभ्यः जातो ज्वरो यस्य तेन। पांसुभिर्धूलिभिः पांडुराः पिंडिका जानोरधोभागा यस्य तेन। खर्जु-

---

१ 'वर्णतन्त्रीणाम्'

पाण्डुरपिण्डिकेन च खर्जूरजूटजटाजर्जरितजानुना च शतावरीविदा-
रितोरुणा च विदारीदारिततनुदुकूलपल्लवेन चोत्कटवंशविटपकण्टक-
कोटिपाटितकञ्चुककर्पटेन च फललोभालम्बितानम्रबदरीलताजालकै-
रुत्कण्टकैरुल्लिखितसुकुमारकरोदरेण च कुरङ्गशृङ्गोत्खातैः कन्दमूल-
फलैः कदर्थितबाहुना च ताम्बूलविरहविरसमुखखण्डितकोमला- 5
मलकीफलेन च कुशकुसुमाहतिलोहितानां श्वयतामक्ष्णां लेपीकृतमनः-
शिलेन च कण्टकिलताळूनालककलेशेन च केनचित्किसलयोपपादितात-
पत्रकृत्येन केनचित्कदलीदलव्यजनवाहिना केनचित्कमलिनीपलाश-
पुटगृहीताम्भसा केनचित्पाथेयीकृतमृणालपूलिकेन केनचिच्चीनांशुकद-
शाशिक्यनिहितनालिकेरकोशकलशीकलितसरलतैलेन कतिपयावशे- 10

राणां तृणद्रुमविशेषाणां जटानामग्राणां जूटैः समूहैः जर्जरिता जानव ऊरवो यस्य तेन । शतावरीभिः शतमूलोभिर्विदारिता ऊरवो यस्य तेन । विदारीभिः क्षीरशुक्लीभिर्दारितास्तनुदुकूलपल्लवाः सूक्ष्मवस्त्राणि यस्य तेन । उत्कटो महान् वंशो विस्तारो यस्य तस्य विटपस्य शाखायाः कंटककोटिभिः कंटकाग्रैः पाटिताः खंडिताः कञ्चुककर्पटा चोलकस्य जीर्णवस्त्राणि यस्य तेन । उत्कटा कंटका येषु तैः फललोभेन फलेच्छया आलंबितैरतएवानम्रैर्बदरीलतानां जालकैः समूहैः उल्लिखितानि सुकुमाराणां कोमलानां कराणामुदराणि गर्भा यस्य तेन । कुरंगाणां मृगाणां शृङ्गैरुत्खातैर्विदारितैः कंदमूलफलैः कदर्थिताः पीडिता बाहवो येन तेन । कंदमूलफलानां धारणादित्यर्थः । ताम्बूलविरहेण ताम्बूलाभावेन विरसं रसहीनैर्मुखैः खण्डितानि कोमलानि सुकुमाराण्यामलकीफलानि धात्रीफलानि येन तेन । कुशकुसुमानां दर्भपुष्पाणामाहत्या ताडनेन लोहितानां रक्तानां श्वयतां श्वयथुयुक्तानामक्ष्णां नेत्राणां लेपीकृतो मनः शिलालेप औषधविशेषलेपो येन तेन । कंटकिनीभिः सकंटकाभिर्लताभिर्लूनाः छिन्ना अलककलेशाः केशाग्राणि यस्य तेन । किसलयेन पर्णेनोपपादितं संपादितमातपत्रस्य छत्रस्य कृत्यं येन तेन । कदलीदलस्य व्यजनं तालवृन्तस्तद्वहति तेन कमलिन्याः पलाशस्य पत्रस्य पुटे द्रोणे गृहीतमम्भ उदकं येन । पाथेयीकृता मार्गोपयोगितया गृहीता मृणालानां बिसानां पूलिका समूहो येन तेन । चीनांशुकस्य चीनदेशोत्पन्नस्य वस्त्रस्य दशानामंतानां शिक्ये तन्निर्मिते शिक्य इत्यर्थः निहितः स्थापितो नालिकेरकोश एव कलशी घटस्तस्यां कलितं गृहीतं सरलानां देवदारूणां तैलं येन तेन । कतिपयेऽवशेषा अवशिष्टाः शोकेन विकलाः पीडिताः कलमूखा

मशोकविकलमूकलककुब्जवामनबधिरवर्बराविरलेनाबलानां चक्रवालेन परिवृताम्, आपत्कालेऽपि कुलोद्गतेनेवामुच्यमानाम् प्रभालेपिना लावण्येन, प्रतिबिम्बितैरासन्नवनलताकिसलयैः सरसैर्दुःखक्षतैरिवान्तः पाटलीकृतकायाम्, कठोरदर्भाङ्कुरक्षतक्षारिणा क्षतजेनानुसरणालक्तकेनेव रक्तचरणाम्, उन्नालेनान्यतरनारीधृतेनारविन्दिनीदलेन कृतच्छायमपि विच्छायं मुखमुद्वहन्तीम्, आकाशमपि शून्यतयातिशयानाम्, मृण्मयीमिव निश्चेतनतया, मरुन्मयीमिव निश्वाससंपदा, पावकमयीमिव संतापसंतानेन, सलिलमयीमिवास्रप्रस्रवणेन, वियन्मयीमिव निरवलम्बनतया, तडिन्मयीमिव पारिप्लवतया, शब्दमयीमिव परिदेवितवाणीबाहुल्येन, मुक्तमुक्तांशुकरत्नकुसुमकनकपत्राभरणां कल्पलतामिव महावने पतिताम्, परमेश्वरोत्तमाङ्गपातदुर्ललिता-

---

वाक्श्रुतिविहीनाः कुब्जा गडुला वामना ह्रस्वा बधिराः श्रोत्रविहीना वर्बरा म्लेच्छविशेषाश्च तैरविरलः परिपूर्णस्तेनाइमेऽविरला यस्मिन्निति समासे पूर्वनिपातव्यत्यासोंगीकरणीय आहिताग्न्यादित्वं वा कल्प्यम् । कुलोद्गतेन कुलौन्नत्येनेव । संकटकालेपि कुलीनतेव लावण्यमपि तस्यां स्थितमित्यर्थः । प्रतिबिंबितैः संजातप्रतिबिंबैरासन्नानां समीपस्थानां वनलतानां किसलयैः पर्णैः सरसैरार्द्रैः दुःखक्षतैरिव दुःखव्रणैरिवान्तः पाटलीकृतो रक्तीकृतः कायो देहो यस्यास्ताम् । लावण्यवति देहे प्रतिबिंबितानां वनलतापर्णानां सरसव्रणसाम्यम् । कठोराणां दर्भाङ्कुराणां क्षतैः क्षरति स्रवति तेन क्षतजेन रुधिरेण अनुसरति इच्छाया अर्थाद्राज्यश्रियोऽभावेपि अनुगच्छति यः आलक्तको यावकः तेन इव रक्तौ चरणौ यस्यास्ताम् । अरविंदिन्याः कमलिन्या दलेन पत्रेण कृतच्छायमपि निवारितोष्णमपि विच्छायं कान्तिहीनम् । शून्यतयेन्द्रियराहित्येन । 'छाया स्यादातपाभावे प्रतिबिंबार्कयोषितोः । पालनोत्कोचयोः कान्तिसच्छोभापंक्तिषु स्त्रियाम्' इति मेदिनी । पारिप्लवतया चांचल्येन । परिदेवितं शोकस्तेन यत् वाण्याः वचनस्य बाहुल्यमाधिक्यं तेन मुक्तानि त्यक्तानि मुक्तांशुकं मालवदेशजं मुक्ताख्यं वस्त्रं रत्नानि कुसुमानि कनकपत्राभरणानि सौवर्णालंकाराश्च यया ताम् । पक्षे मुक्तानि सृष्टानि मुक्ताः मौक्तिकाः अंशुकानि वस्त्राणि कुसुमादीनि यया तां कल्पलतामिव । महावने महारण्ये महति जले च 'वनं नपुंसकं नीरे निवासालयकानन' इति मेदिनी । परमेश्वरस्य नृपश्रेष्ठस्य स्वपतेरुत्तमांगस्य मूर्ध्नः पातेन दुर्ललितानि दुर्बलानि कृशानीत्यर्थः अंगानि यस्याः । पक्षे परमेश्वरोत्त-

ङ्गाम् गङ्गामिव गां गताम्, वनकुसुमधूलिधूसरितपाद-
पल्लवाम् प्रभातचन्द्रमूर्तिमिव लोकान्तरमभिलषन्तीम्, निज-
जलमोक्षकदर्थितदर्शितधवलायतनेत्रशोभाम्, मन्दाकिनीमृणालिनी-
मिव परिम्लायमानाम्, दुःसहरविकिरणसंस्पर्शखेदनिमीलितां कुमु-
दिनीमिव दुःखेन दिवसं नयन्तीम्, दग्धदशाविसंवादितां प्रत्यूषप्र- 5
दीपशिखामिव क्षामक्षामां पाण्डुवपुषम्, पार्श्ववर्तिवारणाभियोगरक्ष्य-
माणां वनकरिणीमिव महाह्रदे निमग्नाम्, प्रविष्टां वनगहनं ध्यानं
च, स्थितां तरुतले मरणे च, पतितां धात्र्युत्सङ्गे महानर्थे च,
दूरीकृतां भर्त्रा सुखेन च, विरेचितां भ्रमणेनायुषा च, आकुलां
केशकलापेन मरणोपायेन च, विवर्णितामध्वधूलिभिरङ्गवेदनाभिश्च, 10
दग्धां चण्डातपेन वैधव्येन च, धृतमुखीं पाणिना मौनेन च,
गृहीतां प्रियसखीजनेन मन्युना च, तथा च भ्रष्टैर्बन्धुभि-
र्विलासैश्च, मुक्तेन श्रवणयुगलेनात्मना च, परित्यक्तैर्भूषणैः सर्वार-

---

मांगात् हरमूर्ध्नः सकाशात् पातेन गां गतां वाहनाद्यभावेन भूमिगतां भूलोकम-
वतीर्णां च। वनकुसुमानां धूलिभिः परागैर्धूसरितौ पादपल्लवौ पल्लवसदृशौ पादौ
यस्यास्ताम्। वनकुसुमानि जलजातानि कुमुदानि तेषां धूलिभिर्धूसरिताः पाद-
पल्लवाः किरणा यस्याः सा। लोकान्तरं स्वर्गं भूतलवर्तिनमन्यं देशं मेरु द्वितीय-
पार्श्वम्। निजजलस्य मोक्षस्य कदर्थितं कदर्थनं पीडनं भावे क्तः तेन दर्शिता
धवलयोर्जलेन कज्जलनाशाच्छुभ्रयोरायतयोर्विस्तृतयोर्नेत्रयोः शोभा यस्याः
सा। दुःसहानां रविकिरणानां संस्पर्शस्य सम्यक् स्पर्शस्य खेदेन दुःखेन निमी-
लितां संकुचितां कुमुदिनीं कैरविणीमिव दुःखेन कष्टेन दिवसं नय-
न्तीम्। दग्धदशया दुरवस्थया ज्वलितया दशया वर्तिकया च विसंवादितां
वंचितां प्रभातदीपस्य प्रातःप्रदीपस्य शिखां ज्वालामिव क्षामक्षामामतिकृशां
पांडु पांडुरं वपुः शरीरं यस्यास्ताम्। पार्श्ववर्तिनां समीपस्थानां वारणाया
निरोधनस्याभियोगेनोद्यमेन रक्ष्यमाणां पक्षे पार्श्ववर्तिनो वारणस्य गजस्या-
भियोगेन रक्ष्यमाणाम्। महाह्रदे निमग्नामनुमरणार्थं ह्रदे कृतस्नानां पक्षे
महति जलाशये पतिताम्। वनगहनं वनस्य दुर्गमस्थानं ध्यानं चिंतनं च। धात्र्यु-
त्संगे उपमातुरंके। विरेचितां खेदितां भ्रमणेन चायुषा दुर्बलीकृतां पाणिना
करेण धृतं छादितं मुखं यया ताम्। मौनेन मूकतया धृतं गृहीतं मुखं यस्याः।
तथा चेति। भ्रष्टैरित्यारभ्य जीवितेनेत्यन्तेषु तृतीयान्तेषु इत्थंभूतलक्षणे

म्भैश्च, भग्नैर्वलयैर्मनोरथैश्च, चरणलग्नाभिः परिचारिकाभिर्दर्भाङ्कुरसूचीभिश्च, हृदयविनिहितेन चक्षुषा प्रियेण च, दीर्घैः शोकश्वसितैः केशैश्च, क्षीणेन वपुषा पुण्येन च, पादयोः पतन्तीभिर्वृद्धाभिरश्रुधाराभिश्च, स्वल्पावशेषेण परिजनेन जीवितेन च, अलसामुन्मेषे, दक्षामश्रुमोक्षे, संततां चिन्तासु, विच्छिन्नामाशासु, कृशां काये, स्थूलां श्वसिते, पूरितां दुःखेन, रिक्तां सत्त्वेन, अध्यासितामायासेन, शून्यां हृदयेन, निश्चलां निश्चयेन, चलितां धैर्यात्, अपि च वसतिं व्यसनानाम्, आधानमाधीनाम्, अवस्थानमनवस्थानाम्, आधारमधृतीनाम्, आवासमवसादानाम्, आस्पदमापदाम्, अभियोगमभाग्यानाम्, उद्वेगमुद्वेगानाम्, कारणं करुणायाः, पारं परायत्तताया योषितम् । चिन्तितवानस्मि च चित्रमीदृशीमप्याकृतिमुपतापाः स्पृशन्तीति । सा तु समीपगते मयि तदवस्थापि सबहुमानमानतमौलिः प्रणतवती । अहं तु प्रबलकरुणाप्रेर्यमाणस्तामालपितुकामः पुनः कृतवान्मनसि---कथमिव महानुभावामेनामामन्त्रये । ' वत्से ' इत्यतिप्रणयः, ' मातः ' इति चाटु, ' भगिनि ' इत्यात्मसंभावना, ' देवि ' इति परिजनालापः, ' राजपुत्रि ' इत्यस्फुटम्, ' उपासिके ' इति मनोरथः, ' स्वामिनि ' इति भृत्यभावाभ्युपगमः, 'भद्रे' इतीतरस्त्रीसमुचितम्, ' आयुष्मति ' इत्यवस्थायामप्रियम्, ' कल्याणिनि ' इति दशायां विरुद्धम्, ' चन्द्रमुखि ' इत्यमुनि-

---

तृतीया । तैर्नैतैरुपलक्षितामित्यर्थो ग्राह्यः । उन्मेषे नेत्रविकसनेऽलसां जडाम् । आधीनां मानसव्यथानाम् । अवसादानां नाशानामावासं गृहम् । आपदां विपत्तीनामास्पदं प्रतिष्ठाम् । उपतापाः पीडाः । महानुभागां मनस्विनीम् अतिप्रणयः महती प्रीतिः । परिचयाभावात्तथा प्रणयो न युज्यत इत्यर्थः । मातः इति चाटु व्याजस्तुतिः । आत्मसंभावना स्वसंबंधप्रदर्शनम् । परिजनालापः सेवकभाषितम् । तस्य च भिक्षोस्तथोक्तिर्न युक्ता । राजपुत्रि इत्यस्फुटमव्यक्तम् । अज्ञातत्वात्तत्कुलस्येत्यर्थः । उपासिक इति मनोरथस्तया स्वमतं स्वीकर्तव्यमित्यात्मेच्छाप्रदर्शनमित्यर्थः । **आयुष्मतीति** । मरणोद्यमं उद्युक्तायै न रोचेतेत्यर्थः । **कल्याणिनीति** । दुःखनिमग्नायां तस्यामिदमनुचितम् । **चंद्रमुखीति** । भिक्षोरित्थं स्वरूपवर्णनं न युक्तमित्यर्थः । **बाल इति** ।

मतम्, 'बाले' इत्यगौरवोपेतम्, 'आर्ये' इति जरारोपणम्, 'पुण्यवति' इति फलविपरीतम्, 'भवति' इति सर्वसाधारणम्। अपि च 'कासि' इत्यनभिजातम्, 'किमर्थं रोदिषि' इति दुःखकारणस्मरणकारि, 'मा रोदीः' इति शोकहेतुमनपनीय न शोभते, 'समाश्वसिहि' इति किमाश्रित्य, 'स्वागतम्' इति यातयामम्, 'सुखमास्यते' 5
इति मिथ्या। इत्येवं चिन्तयत्येव मयि तस्मात्स्त्रैणादुत्थायान्यतरा योषिदार्यरूपेव शोकविक्लवा समुपसृत्य कतिपयपलितशारं शिरो नीत्वा महीतलमतुलहृदयसंतापसूचकैरश्रुबिन्दुभिश्चरणयुगलं दहन्ती ममातिकृपणैरक्षरैश्च हृदयमभिहितवती—'भगवन्, सर्वसत्त्वानुकम्पिनी प्रायः प्रव्रज्या। प्रतिपन्नदुःखक्षपणदीक्षादक्षाश्च भवन्ति 10
सौगताः। करुणाकुलगृहं च भगवतः शाक्यमुनेः शासनम्। सकलजनोपकारसज्जा सज्जनता जैनी। परलोकसाधनं च धर्मो मुनीनाम्। प्राणरक्षणाच्च न परं पुण्यजातं जगति गीयते जनेन। अनुकम्पाभूमयः प्रकृत्यैव युवतयः किं पुनर्विपदभिभूताः। साधुजनश्च सिद्धक्षेत्रमार्तवचसाम्। यत इयं नः स्वामिनी मरणेन 15
पितुरभावेन भर्तुः प्रवासेन च भ्रातुः भ्रंशेन च शेषस्य बान्धववर्गस्यातिमृदुहृदयतयानपत्यतया च निरवलम्बना, परिभवेन च नीचारातिकृतेन प्रकृतिमनस्विनी, अमुना च महाटवीपर्यटनक्लेशेन कदर्थितसौकुमार्या, दग्धदैवदत्तैरेवंविधैर्बहुभिरुपर्युपरि दुःख-

---

अगौरवेण लघुतयोपेतं युक्तम्। **आर्ये इति**। जरारोपणं वृद्धैव तथाभिधेया न तरुणीत्यर्थः। अनभिजातमनुचितम्। यातयामं जीर्णप्रायम्। **सुखमास्यत इतीति**। दुःखपीडितां तां दृष्ट्वेदभाषितमलीकमित्यर्थः। स्त्रैणात् स्त्रीसमूहात्। कतिपयैः पलितैः शुक्लैः केशैः शारं चित्रं शिरः। यद्यपि पलितशब्दो जरसा शौक्ल्यवाचकस्तथाप्यत्र तद्विशिष्टकेशपरो ग्राह्यः। अश्रुबिन्दुभिश्चरणयुगलमक्षरैश्च हृदयं दहन्तीत्यन्वयः। प्रव्रज्या संन्यासः सर्वान् सत्वाननुकंपते दययावलोकयति सा। करुणया आकुलानां व्याप्तानां गृहं शाक्यमुनेर्बुद्धस्य शासनं शास्त्रम्। जैनी जिनसंबंधिनी। सिद्धक्षेत्रं सिद्धायतनम्। **यत इतीति**। यत इयं नः स्वामिन्यग्निं प्रविशति तदार्योऽपि तावदस्यां वाणीं व्यापारयत्विति संबंधः। निरवलंबा निराश्रया कस्याप्यवशिष्टस्याभावादन्याश्रयाभावः स्वस्य मृदुहृदयत्वात्स्वस्याप्याश्रयत्वाभाव इत्यर्थः। प्रकृतिमनस्विनी

सनैर्विक्लवीकृतहृदया, दारुणं दुःखमपारयन्ती सोढुं, निवारयन्तम-
नतिक्रान्तपूर्वं स्वप्नेऽप्यवगणय्य गुरुजनमनुनयन्तीरखण्डितप्रणया न-
र्मस्वपि समवधीर्य प्रियसखीर्विज्ञापयन्तमशरणमश्रुव्याकुलनयनमपरि-
भूतपूर्वं मनसापि परिभूय भृत्यवर्गमग्निं प्रविशति । परित्रायताम् ।
आर्योऽपि तावदसह्यशोकापनयनोपायोपदेशनिपुणां व्यापारयतु वाणी- 5
मस्याम् ' इति चातिकृपणं व्याहरन्तीमहमुत्थाप्योद्विग्नतरः शनैरभि-
हितवान्—' आर्ये, यथा कथयसि तथा । अस्मद्गिरामगोचरोऽयम-
स्याः पुण्याशयायाः शोकः । शक्यते चेन्मुहूर्तमात्रमपि त्रातुमुपरिष्टान्न
व्यर्थेयमभ्यर्थना भविष्यति । मम हि गुरुरपर इव भगवान्सुगतः
समीपगत एव । कथिते मयास्मिन्नुदन्ते नियतमागमिष्यति परमद- 10
यालुः । दुःखान्धकारपटलभिदुरैश्च सौगतैः सुभाषितैः स्वकैश्च दर्शि-
तनिदर्शनैर्नानागमगुरुभिर्गिरां कौशलैः कुशलशीलामेनां प्रबोधपद-
वीमारोपयिष्यति ' इति । तच्च श्रुत्वा ' त्वरतामार्यः ' इत्यभिदधाना
सा पुनरपि पादयोः पतितवती । सोऽहमुपगत्य त्वरमाणो व्यति-
करमिममधृतिकरमशरणकृपणबहुयुवतिमरणमतिकरुणमत्रभवते गुरवे 15
निवेदितवान् ' इति ।

स्वभावतो मानिनी अस्य कदर्थितसौकुमार्या इत्यत्र संबंधः । नीचेन दुष्टेनारातिना शत्रुना कृतेन परिभवेन पराभवेन महाटव्यां महत्यरण्ये पर्यटन-माहिण्डनं तस्य क्लेशेन त्रासेन च कदर्थितं पीडितं सौकुमार्यं लावण्यं यस्याः सा । उपर्युपरि 'उपर्यध्यधसः सामीप्ये ' इत्यनेन द्वित्वम् । पुनः पुनर्दग्धेन हतेन दैवेन भागधेयेन दत्तैर्व्यसनैर्विक्लवीकृतं पीडितं हृदयं यस्याः सा । स्वप्ने-प्यनतिक्रान्तपूर्वं स्वप्नेपि पूर्वमनपमानितं गुरुजनं वृद्धजनमवगणय्य नर्मस्वपि क्रीडायामपि क्रीडायां प्रणयस्य भंगोः न दोषाय तथापि तत्रापि अखंडितो न तिरस्कृतः प्रणयो यया अर्थात्सखीनां सा इदानीमनुनयंतीः याचमानाः प्रणय-सखीः समवधीर्य धिक्कृत्य तिरस्कृत्य । मनसाप्यपरिभूतपूर्वं मनसाप्यतिरस्कृतं भृत्यवर्गं परिभूय । असह्यस्य शोकस्यापनयनं दूरीकरणं तस्योपदेशे निपुणां प्रवीणां वाणीं वाचं व्यापारयतु प्रयुनक्तु । अतिकृपणं व्याहरन्तीमतिदीनं भाषमाणाम् । दुःखान्धकाराणां शोकतमसां पटलस्य समूहस्य भिदुरैर्नाशकैः सौगतैर्बुद्धसंबंधिभिः । दर्शितानि निदर्शनानि दृष्टान्ता येषु तैः । नानागमैर्भिन्नैः शास्त्रैर्गुरुभिर्महद्भिः । व्यतिकरं वार्ताम् । अशरणानां सहायवर्जितानां कृपणानां दीनानां बहूनां युवतीनां मरणं यस्मिस्तम् ।

12 अथ भूभृद्भैक्षवं समवधार्य तद्भाषितमश्रुमिश्रितमश्रुतेऽपि स्वसुर्नाम्नि निम्नीकृतमना मन्युना सर्वाकारसंवादिन्या दशयैव दूरीकृतसंदेहो दग्ध इव सोदर्यावस्थाश्रवणेन श्रवणयोः श्रमणाचार्यमुवाच—'आर्य, नियतं सैवेयमनार्यस्यास्य जनस्यातिकाठिनहृदयस्यातिनृशंसस्य मन्दभाग्यस्य भगिनी भागधेयैरेतामवस्थां नीता निष्कारणवैरिभिर्वराकी विदीर्यमाणं मे हृदयमेवं निवेदयति' इत्युक्त्वा तमपि श्रमणमभ्यधात्—'आर्य, उत्तिष्ठ। दर्शय क्वासौ। यतः सुप्रभूतप्राणपरित्राणपुण्योपार्जनाय यामः, यदि कथंचिज्जीवन्तीं संभावयामः' इति भाषमाण एवोत्तस्थौ। 5

13 अथ समग्रशिष्यवर्गानुगतेनाचार्येण तुरगेभ्यश्चावतीर्य समस्तेन सामन्तलोकेन पश्चादाकृष्यमाणाश्वीयेनानुगम्यमानः पुरस्ताच्च तेन शाक्यपुत्रीयेण प्रदिश्यमानवर्त्मा पद्भ्यामेव तं प्रदेशमविरलैः पदैः पिबन्निव प्रावर्तत। क्रमेण च समुपगतः शुश्राव लतावनान्तरितस्य मुमूर्षोर्महतः स्त्रैणस्य तत्कालोचितानेनकप्रकारानालापान्—'भगवन्धर्म, धाव शीघ्रम्। क्वासि कुलदेवते। देवि धरणि, धीरयसि न दुःखितां दुहितरम्। क्व नु खलु प्रोषिता पुष्पभूतिकुटुम्बिनी लक्ष्मीः। अनाथां नाथ मुखरवंश्य, विविधाधिविधुरां वधूं विधवां निरोधयसि किमिति नेमाम्। भगवन्, भक्तजने संज्वरिणि सुगत सुप्तोऽसि। राजधर्म पुष्पभूतिभवनपक्षपातिन्, उदासीनीभूतोऽसि 10 15

अथेति। भैक्षवं भिक्षुसंबंधि अश्रुभिर्मिश्रितं युक्तम्। निम्नीकृतं स्वल्पसामर्थीकृतं मनो यस्य सः। सर्वमाकारं स्थितिविशेषं संवदति तया दशयैव स्थित्यैव दूरीकृतो नाशितः संदेहः संशयो यस्य। वराकी दीना सुप्रभूतानां भूयिष्ठानां प्राणानां परित्राणं रक्षणं तस्य पुण्यस्योपार्जनाय लब्धये।

अथेति। समग्रेण सकलेन शिष्यवर्गेणानुगतोऽनुसृतस्तेनाचार्येण दिवाकरमित्रेण। आकृष्यमाणेन अश्वीयेन अश्वसमूहेन। शाक्यपुत्रीयेण दिवाकरमित्रशिष्येण। 'पुत्राच्छ च' इत्यनेन छः। लतावनेन लतारण्येनान्तरितस्याच्छन्नस्य। मुमुर्षोर्मरणोन्मुखस्य स्त्रैणस्य स्त्रीसमूहस्य विविधैरनेकैराधिभिर्मानसपीडाभिर्विधुरां दीनाम्। भगवन् सुगत बुद्ध भक्तजने संज्वरिणि तापयुक्ते सति सुप्तोसि। नायं तवाचारः परपीडनदूरीकरणे बद्धपरिकरस्य त इदमनुचितमित्यर्थः। राजधर्म युद्ध। लक्षणस्य विधमानैः शुभचिह्नैः किमवधृतं किं फलं

कथम्। त्वय्यपि विपद्बान्धव विन्ध्य, वन्ध्योऽयमञ्जलिबन्धः। मातर्महाटवि, रटन्तीं न शृणोषीमामापत्पतिताम्। पतङ्ग, प्रसीद पाहि पतिव्रतामशरणाम्। प्रयत्नरक्षित कृतघ्न चारित्रचण्डाल, न रक्षसि राजपुत्रीम्। किमवधूतं लक्षणैः। हा देवि दुहितृस्नेहमयि यशोवति, मुषितासि दग्धदैवदस्युना। देव, दुहितरि दह्यमानायां नापतसि 5 प्रतापशील, शिथिलीभूतमपत्यप्रेम। महाराज राज्यवर्धन, न धावसि मन्दीभूता भगिनीप्रीतिः। अहो निष्ठुरः प्रेतभावः। व्यपेहि पाप पावक स्त्रीघातनिर्घृण ज्वलन्न लज्जसे। भ्रातर्वात दासी तवास्मि, संवादय द्रुतं देवीदाहं देवाय दुःखितजनार्तिहराय हर्षाय। नितान्तनिःशूक शोकश्वपाक, सकामोऽसि। दुःखदायिन्वियोगराक्षस, तुष्टोसि। विजने वने कमाक्रन्दामि, कस्मै कथयामि, कमुपयामि शरणम्, कां दिशं 10 प्रतिपद्ये, करोमि किमभागधेया। गान्धारि, गृहीतोऽयं लतापाशः। पिशाचि मोचनिके, मुञ्च शाखाग्रहणकलहम्। कलहंसि, हंसि किमतः परमुत्तमाङ्गम्, मङ्गलिके, मुक्तगलं किमद्यापि रुद्यते। सुन्दरि, दूरीभवति सखीसार्थः। स्थास्यसि कथमिवाशिवे शवशिबिरे शबरिके। सुतनु, 15 तनूनपाति पतिष्यसि त्वमपि। मृणालकोमले मालवति, म्लानासि। मातर्मातङ्गिके, अङ्गीकृतस्त्वयापि मृत्युः। वत्से वत्सिके, वत्स्यसि कथमनभिप्रेते प्रेतनगरे। नागरिके, गरिमाणमागतास्यनया स्वामिभक्त्या। विराजिके, विराजितासि राजपुत्रीविपदि जीवितव्ययव्यवसायेन। भृगुपतनाभ्युद्यमभागाभिज्ञे भृङ्गारधारिणि, धन्यासि। केतकि, कुतः पुनरी- 20 दृशी स्वप्नेऽपि सुस्वामिनी। मेनके, जन्मनि जन्मनि देवीदास्यमेव ददातु

दत्तं न किमपीत्यर्थः। दग्धं हतं दैवमेव दस्युश्चोरस्तेन। प्रेतभावः प्रेतत्वम्। येन एतौ नागच्छतः। संवादय कथय। देव्याः आसन्नमग्निना नाशं दाहं। दुःखिजनस्यार्तेः पीडाया हराय नाशकाय। नितान्तमत्यन्तं निःशूक निर्दय शोकश्वपाक शोकचांडाल। अभागधेया दैवरहिता। गान्धारि मोचनिके इत्यादीनि सहागतसखीनां संबोधनानि। उत्तमांगं मूर्धानं हंसि छिनत्सि किम्। अशिवेऽमंगले। तनूनपाति वन्हौ अनभिप्रेतेऽसंमते प्रेतनगरे यमलोके। जीवितस्य प्राणानां व्ययो नाशस्तस्य व्यवसायेनोद्यमेन। भृगोः प्रपातात्पतनं तस्योद्यमभागो व्यवसायभागस्तमभिजानाति तादृशि भृंगारं पात्रविशेषं धरति सा कुसुम-

देवो देहं दहन्दहनः । विजये वीजय कृशानुम् । सानुमति, नमतीन्दीवरिका दिवं गन्तुकामा । कामदासि, देहि दहनप्रदक्षिणावकाशम् । विचरिके, विरचय वह्निम् । विकिर किरातिके, कुसुमप्रकरम् । कुररिके, कुरु कुरुबककोरकाचितां चिताम् । चामरं चामरग्राहिणि, गृहाण पुनरपि कण्ठे । मर्षयितव्यानि नर्मदे, नर्मनिर्मितानि निर्मर्यादहसितानि । भद्रे सुभद्रे, भद्रमस्तु ते परलोकगमनम् । अग्रामीणगुणानुरागिणि ग्रामेयिके, गच्छ सुगतिम् । वसन्तिके, अन्तरं प्रयच्छ । आपृच्छते छत्रधारी देवि, देहि दृष्टिम् । इष्टा तव जहाति जीवितं विजयसेना । सेयं मुक्तिका मुक्तकण्ठमारटति निकटे नाटकसूत्रधारी । पादयोः पतति ते ताम्बूलवाहिनी बहुमता राजपुत्रि पत्रलता । कलिङ्गसेने, अयं पश्चिमः परिष्वङ्गः । पीडय निर्भरमुरसा माम् । असवः प्रवसन्ति वसन्तसेने । मञ्जुलिके, मार्जयसि कतिकृत्वः सुदुःसहदुःखसहस्रास्रादिग्धं चक्षुरिदं रोदिषि कियदाश्लिष्य च माम् । निर्वाणमीदृशं प्रायशो यशोभने । धीरयस्यद्यापि किं मां माधविके । क्वेयमवस्था संस्थापनानाम् । गतः कालः कालिन्दि, सखीजनानुनयाञ्जलीनाम् । उन्मत्तिके मत्तपालिके, कृताः पृष्ठतः प्रणयिनीप्रणिपातानुरोधाः । शिथिलय चकोरवति, चरणग्रहणं ग्रहिणि । कमलिनि, किमनेन पुनः पुनर्दैवोपालम्भेन । न प्राप्तं चिरं सखीजनसंगमसुखम् । आर्ये महत्तरिके तरङ्गसेने, नमस्कारः । सखि सौदामिनि, दृष्टासि । सम्रुपनय हव्यवाहनार्चनकुसुमानि कुमुदिके । देहि चितारोहणाय रोहिणि, हस्तावलम्बनम् । अम्ब धात्रि, धीरा भव ।

प्रकरं पुष्पसमूहं विकिर क्षिप नर्मणा परिहासेन निर्मितानि कृतानि निर्मर्यादानि मर्यादारहितानि हसितानि हास्यानि । अग्रामीणेषु अश्लीलवर्जितेषु गुणेष्वनुरागः प्रेम यस्यास्तत्संबुद्धौ । ग्रामेयिका ग्रामोत्पन्ना ग्रामशब्दात् ' कत्त्र्यादिभ्यो ढकञ् ' इत्यनेन ढकञ् । तस्मिन्सूत्रे ' ग्रामाद्यखञौ ' इत्यस्मात्सूत्रात् ग्रामादित्यनुवृत्तेः । आपृच्छते ' आङि नुप्रच्छ्योरुपसंख्यानम् ' इत्यनेन तङ् । पश्चिमः अन्त्यः । निर्भरं दृढम् । असवः प्राणाः प्रवसन्ति निर्गच्छन्ति । सुदुःसहानां सोढुमशक्यानां दुःखसहस्राणामस्रेण नेत्रोदकेन दिग्धमुपलिप्तम् । ग्रहिणि आग्रहवति हव्यवाहनस्याग्नेरर्चनस्य पूजनस्य कुसुमानि । हलहलक उत्कण्ठा आनन्दमयः हर्षप्रचुरः । किमंगीकृत्य कस्माद्धेतोः उद्यान महतो रोमांचान्

भवन्त्येवंविधा एव कर्मणां विपाकाः पापकारिणीनाम् । आर्यचरणा-
नामयमञ्जलिः । परः परलोकप्रयाणप्रणामोऽयं मातः । मरणसमये
कस्माल्लवलिके, हल्हलको बलीयानानन्दमयो हृदयस्य मे । हृष्य-
न्त्युच्चरोमाञ्चमुञ्चि किमङ्गीकृत्याङ्गानि । वामनिके, वामेन मे स्फुरि- 5
तमक्ष्णा । वृथा विरमसि वयस्य वायस, वृक्षे क्षीरिणि क्षणे क्षणे
क्षीणपुण्यायाः पुरः । हरिणि, हेषितमिव हयानामुत्तरतः । कस्येदमा-
तपत्रमुच्चमत्र पादपान्तरेण प्रभावति विभाव्यते । कुरङ्गिके, केन
सुगृहीतनाम्नो नाम गृहीतममृतमयमार्यस्य । देवि, दिष्ट्या वर्धसे
देवस्य हर्षस्यागमनमहोत्सवेन ' । इत्येतच्च श्रुत्वा सत्वरनुपससर्प । 10
ददर्श च मुह्यन्तीमग्निप्रवेशायोद्यतां राजा राज्यश्रियम् । आललम्बे च
मुर्च्छामीलितलोचनाया ललाटं हस्तेन तस्याः ससंभ्रमम् ।

14 अथ तेन भ्रातुः प्रेयसः प्रकोष्ठबद्धानामोषधीनां रसवि-
सरमिव प्रत्युज्जीवनक्षमं क्षरता, वमतेव पारिहार्यमणीनामचिन्त्यं
प्रभावम्, अमृतमिव नखचन्द्ररश्मिभिरुद्गिरता, बध्नतेव चन्द्रोदयच्यु- 15
तशिशिरशीकरं चन्द्रकान्तचूडामणिं मूर्धनि, मृणालमयाङ्गुलिनेवाति-
शीतलेन निर्वापयता दह्यमानं हृदयं, प्रत्यानयतेव कुतोऽपि जीवित-
माह्लादकेन हस्तसंस्पर्शेन सहसैव समुन्मिमील राज्यश्रीः । तथा चासं-
भावितागमनस्याचिन्तितदर्शनस्य सहसा प्राप्तस्य भ्रातुः स्वप्नदृष्टदर्श-
नस्येव कण्ठे समाश्लिष्य तत्कालाविर्भावनिर्भरेणाभिभूतसर्वात्मना दुःख- 20

रोमोद्गमान् मुञ्चन्ति तान्यंगान्यवयवा हृष्यन्ति संतुष्यन्ति । क्षीरिणि वृक्षे विर-
मसि निःशङ्कस्य काकस्यास्थितिः। विरससीति इति पाठे वायसशब्दः शुभसूचकः ।
मूर्छया मीलिते संश्लिष्टे लोचने नेत्रे यस्यास्ताम् ।

अथेति । भ्रातुर्हस्तस्पर्शेन सहसैव राज्यश्रीः समुन्मिमीलेति संबंधः ।
प्रत्युज्जीवने पुनर्जीवने क्षमं समर्थमोषधीनां रसविसरं रससमूहं क्षरता । पारि-
हार्यस्य वलयस्य मणीनां रत्नानामचिन्त्यं प्रभावं सामर्थ्यम् । ' पारिहार्यः
कटको वलयोऽस्त्रियाम् ' इत्यमरः । चन्द्रोदयेन च्युता गलिताः शिशिरा हिमाः
शीकरा अंबुकणा यस्मात्तं चन्द्रकान्तचूडामणिं चन्द्रकान्तमयं शिरोलंकारम् ।
समुन्मिमील प्रकृतिमापन्ना । तत्काले तदानीमाविर्भावः उत्पत्तिस्तेन निर्भरोऽ-

---

१ ' विरससि. '

संभारेण निर्दयं नदीमुखप्रणालाभ्यामिव मुक्ताभ्यां स्थूलप्रवाहमुत्सृजन्ती बाष्पवारि विलोचनाभ्याम् 'हा तात, हा अम्ब, हा सख्यः' इति व्याहरन्ती, मुहुर्मुहुरुच्चैस्तरां च समुद्भूतभगिनीस्नेहसद्भावभारभावित-मन्युना मुक्तकण्ठमतिचिरं विक्रुश्य 'वत्से, स्थिरा भव त्वम्' इति भ्रात्रा करस्थगितमुखी समाश्वास्यमानापि, 'कल्याणिनि, कुरु वच- 5
नमग्रजस्य गुरोः' इत्याचार्येण याच्यमानापि, 'देवि, न पश्यसि देवस्यावस्थाम् अलमतिरुदितेन' इति राजलोकेनाभ्यर्थ्यमानापि, 'स्वामिनि, भ्रातरमवेक्षस्व' इति परिजनेन विज्ञाप्यमानापि, 'दुहि-तर्, विश्रम्य पुनरारटितव्यम्' इति निवार्यमाणापि बान्धववृद्धाभिः, प्रियसखि, कियद्रोदिषि। तूष्णीमास्स्व। दृढं दूयते देवः' इति 10
सखीभिरनुनीयमानापि, चिरसंभावितानेकदुःसहदुःखनिवहनिर्वहण-बाष्पोत्पीडपीड्यमानकण्ठभागा, प्रभूतमन्युभारभरितान्तःकरणा क-रुणकाहलेन स्वरेण कतिचित्कालमतिचिरं रुरोद। विगते च मन्युवेगे वह्नेः समीपादाक्षिप्य भ्रात्रा नीता निकटवर्तिनि तरुतले निषसाद। 15

15 शनैराचार्यस्तु तथा हर्ष इति विज्ञाय विवर्धितादरः सुतरां मुहूर्तमिवातिवाह्य निभृतसंज्ञाज्ञापितेन शिष्येणोपनीतं नलि-

---

धिकस्तेन दुःखसंभारेण उपलक्षिता निर्दयं मुक्ताभ्यां विवृतद्वाराभ्यां नदीमुख-प्रणालाभ्यां नदीमुखस्य प्रणालाभ्यां कुल्याभ्यामिव विलोचनाभ्यां नेत्राभ्याम्। निर्दयं बहुलं नदीमुखेत्यनेन जलस्य पूर्णत्वं व्यज्यते। संगमकाले नद्याः परि-पूर्णजलत्वात्। समुद्भूत उत्पन्नो भगिनीस्नेहः स्वसृप्रेम तस्य सद्भावः स्थिति-स्तस्य भारेण भावितो जातो मन्युः शोको यस्य तेन। करेण स्थगितमाच्छा-दितं मुखं यस्याः सा। आचार्येण दिवाकरमित्रेण। चिरं संभावितानां बहुकाल-मनुभूतानामनेकेषां दुःसहानां दुःखानां निवहस्य समूहस्य निर्वहणं नितरामनु-भवः यस्मात्स चासौ बाष्पोत्पीडो नयनजलसमूहस्तेन पीड्यमानः कंठो गलो यस्याः सा। प्रभूतेन महता मन्युभारेण शोकभारेण भरितं व्याप्तमन्तःकरणं यस्याः सा। करुणेन हृदयविदारकेण काहलेन महता। 'काहलश्चरणायुधे। श-ब्दमात्रेऽपि पुंल्लिङ्गस्त्रिषु शुष्के भृशे खले' इति मेदिनी।

शनैरिति। सुतरामत्यन्तं विवर्धित आदरो येन सः। निभृतया गूढया संज्ञया संकेतेन ज्ञापितस्तेन। आज्ञप्तं सततं रोदनं तेन तान्म्रम्। चिरं प्रवृत्तं

नीदलैः स्वयमादाय नम्रो मुखप्रक्षालनायोदकमुपनिन्ये । नरेन्द्रोऽपि सादरं गृहीत्वा प्रथममनवरतरोदनाताम्रं चिरप्रवृत्ताश्रुजलजालं रक्तपङ्कजमिव स्वसुश्वश्रुरक्षालयत्पश्चादात्मनः । प्रक्षालितमुखशशिनि च महीपाले सर्वतो निःशब्दः संबभूव सकलो लिखित इव लोकः । ततो नरेन्द्रो मन्दमन्दमब्रवीत्स्वसारम्-'वत्से, वन्दस्वात्रभवन्तं भदन्तम्। 5 एष ते भर्तुर्हृदयं द्वितीयमस्माकं च गुरुः' इति । राजवचनात्तु राजदुहितरि पतिपरिचयश्रवणोद्धातेन पुनरानीतनेत्राम्भसि नमन्त्यामाचार्यः प्रयत्नरक्षितागतबाष्पाम्भःसंभारभज्यमानधैर्यार्द्रलोचनः किंचित्परावृत्तनयनो दीर्घं निशश्वास । स्थित्वा च क्षणमेकं प्रदर्शितप्रश्रयो मृदुवादी मधुरया वाचा व्याजहार—'कल्याणराशे, अलं रुदित्वातिचि- 10 रम् । राजलोको नाद्यापि रोदनान्निवर्तते । क्रियतामवश्यकरणीयः स्नानविधिः । स्नात्वा च गम्यतां तामेव भूयो भुवम्' ।

16 अथ भूपतिरनुवर्तमानो लौकिकमाचारमाचार्यवचनं चोत्थाय स्नात्वा गिरिसरिति सह स्वस्रा तामेव भूमिमयासीत् । तस्यां च सपरिजनां प्रथममाहितावधानः पार्श्ववर्ती परवतीं शुचा प्रतिपि- 15 ण्डप्रदर्शितप्रयत्नप्रतिपन्नाभ्यवहारकरणां भगिनीमभोजयत् । अनन्तरं च स्वयमाहारस्थितिमकरोत् । भुक्तवांश्च बन्धनात्प्रभृति विस्तरतः

प्रचलितमश्रुजलस्य बाष्पोदकस्य जालं समूहो यस्मात्तत्स्वसुश्वश्रुर्भगिन्या नयनम् पतिपरिचयस्य भर्तृसंस्तवस्योद्धातेनोपक्रमेणानीतं प्रवर्तितं नेत्राम्भो बाष्पांभः यया । प्रयत्नेन रक्षितमागतं बाष्पाम्भो नेत्रोदकं तस्य संभारेण समूहेन भज्यमानं धैर्यं यस्य स चासौ च आर्द्रलोचनश्चेति कर्मधारयः । अलं रुदित्वा 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा' इत्यनेन निषेधे क्त्वा ।

अथेति । आहितं स्थापितमवधानं दक्षता येन सः । शुचा परवतीं शोकेन परतन्त्राम् । पिण्डे पिण्डे इति प्रतिपिण्डं प्रतिग्रासमित्यर्थः प्रदर्शितेन कृतेन प्रयत्नेन श्रमेण प्रतिपन्नः स्वीकृतः अभ्यवहार आहारो भोजनं तस्य करणं कृतिः यया ताम् । पतिपिण्डप्रदर्शितेतिपाठे पत्युः श्राद्धकर्मणि कृते पिण्डे प्रदर्शितेनेत्यर्थो ग्राह्यः । श्राद्धोत्तरं श्राद्धशेषोऽवश्यं ग्राह्य इति निर्बंधेन स्वीकृतभोजनामिति तात्पर्यम् । भुक्तवान् कृतभोजनः । गौडसंभ्रमे सति गौडस्य गौडाधि-

---

१ 'पति'

स्वसुः कान्यकुब्जाद्गौडसंभ्रमं गुप्तितो गुप्तनाम्ना कुलपुत्रेण निष्कासनं निर्गतायाश्च राज्यवर्धनमरणश्रवणं श्रुत्वा चाहारनिराकरणमनाहार-पराहतायाश्च विन्ध्याटवीपर्यटनखेदं जातनिर्वेदायाः पावकप्रवेशोपक्र-मणं यावत्सर्वमशृणोद्व्यतिकरं परिजनतः । ततः सुखासीनमेकत्र तरुतले विविक्तभुवि भगिनीद्वितीयं दूरस्थितानुजीविजनं राजानमा- 5
चार्यः समुपसृत्य शनैरासांचक्रे । स्थित्वा च कंचित्कालांशं ले-शतो वक्तुमुपचक्रमे—'श्रीमन्, आकर्ण्यताम् । आख्येयमस्ति नः किंचित्—

17 अयं हि यौवनोन्मादात्परिभूय भूयसीर्भार्या यौवनावता-रतरलतरास्ताराराजो रजनीकर्णपूरः पुरुहूतपुरोधसो धिषणस्य पुरंध्रीं 10
धर्मपत्नीं पत्नीयन्नतितरलस्तारां नामापजहार । नाकतश्च पलायांचक्रे । चकितचकोरलोचनया तया सहातिकामया सर्वाकाराभिरामया रम-माणो रमणीयेषु देशेषु चचार । चिराच्च कथंचित्सर्वगीर्वाणवाणीगौ-रवाद्गिरां पत्युः पुनरपि प्रत्यर्पयामास ताम् । हृदये त्वनिन्धनमदह्यत विरहाद्वरारोहायास्तस्याः सततम् । 15

धिपस्य संकटादिना संभ्रमे सति त्वरायां जातायां कान्यकुब्जात् तन्नामकान्नग-रात् । गुप्तितः कारागृहात् । गुप्तेन तन्नामकेन गौडाधिकारिणा निष्कासनं मो-चनम् । अनाहारेणोपवासेन पराहतायाः पीडितायाः विंध्याटव्यां विन्ध्यारण्ये पर्यटनस्य भ्रमणस्य खेदम् । जात उत्पन्नो निर्वेदो निर्विण्णता यस्यास्तस्याः । पावकप्रवेशस्याग्निप्रवेशस्योपक्रमणं यावत् अग्निप्रवेशप्रारंभणपर्यन्तम् ।

अयं हीति । यौवनस्य तारुण्यस्योन्मादाच्चित्तविभ्रमात् । यौवनस्याव-तारेणागमनेन तरलतराश्चंचलतरा भूयसी अनेका भार्याः परिभूय तिरस्कृत्य । तारां तन्नामिकां पत्नीयन् आत्मनः पत्नीमिच्छन् ताराराजश्चंद्रोपजहार । 'सुप आत्मनः क्यच्' इत्यनेन क्यचि शतृप्रत्ययः । चकितस्य भीतस्य चकोरस्य लोचने इव लोचने यस्यास्तया अत्यन्तं कामो मदनो यस्यास्तया सर्वाकारेणा-भिरामया मनोहरया । सर्वेषां गीर्वाणानां देवानां वाण्या वचनस्य गौर-वात् गिरां पत्युः बृहस्पतेः । अनिन्धनमिन्धनरहितं यथा स्यात्तथा । वरः श्रेष्ठ आरोहो नितंबो यस्यास्तस्याः ।

18 एकदा तु शैलादुदयादुदयमानो विमले वारिणि वरुणालयस्य संक्रान्तमात्मनः प्रतिबिम्बं विलोकितवान् । दृष्ट्वा च तदा सस्मार सस्मरः स्मेरगण्डस्थलस्य ताराया मुखस्य । मुमोच च मन्मथोन्मादमथ्यमानमानसः स्वःस्थोऽप्यस्वस्थः स्थवीयसः पीतसकलकुमुदवनप्रभाप्रवाहधवलताराभ्यामिव लोचनाभ्यां बाष्पवारिबिन्दून् । 5
अथ पततस्तानुदन्वति समस्तानेवाचेमुर्मुक्ताशुक्तयः । तासां च कुक्षिकोषेषु मुक्ताफलीभूतानवाप तान्कथमपि रसातलनिवासी वासुकिर्नाम विषमुचामीशः । स च तैर्मुक्ताफलैः पातालतलेऽपि तारागणमिव दर्शयद्भिरेकावलीमकल्पयत् । चकार च मन्दाकिनीति नाम तस्याः । सा च भगवतः सोमस्य सर्वासामोषधीनामधिपतेः प्रभावादत्यन्तविषघ्नी हिमामृतसंभवत्वाच्च स्पर्शेन सर्वसत्त्वसंतापहारिणी बभूव । यतः स तां सर्वदा विषोष्मशान्तये वासुकिः पर्यधत्त । 10

19 समतिक्रामति च कियत्यपि काले कदाचित्तामेकावलीं तस्मान्नागराजान्नागार्जुनो नाम नागैरेवानीतः पातालतलं भिक्षुरभिक्षत लेभे च । निर्गत्य रसातलात्त्रिसमुद्राधिपतये सातवाहननाम्ने नरेन्द्राय सुहृदे स ददौ ताम् । सा चास्माकं कालेन शिष्यपरम्परया 15

एकदेति । विमल इत्यनेन बिंबग्रहणसामर्थ्यं व्यज्यते । वरुणालयस्य सागरस्य । स्मेरं हास्ययुतं गण्डस्थलं यस्य तस्य मुखस्य । 'अधीगर्थदयेशां कर्मणि' इत्यनेन षष्ठी । मन्मथोन्मादेन मदनोन्मादेन विलोड्यमानं मानसं मनो यस्य सः । स्वःस्थोपि स्वर्गमधिरूढोपि । अस्वस्थो मनःस्वास्थ्यरहितः पीतेन ग्राशितेन सकलस्य कुमुदवर्गस्य सितकमलवनस्य प्रभायाः कांत्याः प्रवाहेण परंपरया धवले शुभ्रे तारे कनीनिके ययोस्ताभ्यामिव । स्थवीयसःस्थूलतरान् वारिबिन्दून् बाष्पकणान् । स्थूलदूरेत्यादिना यणादिभागस्य लोपे पूर्वस्य गुणे ईयसुनि स्थवीय इति रूपम् । विषमुचां सर्पाणाम् । एकावलीमेकयष्टिकां मालाम् । सर्वासामोषधीनामधिपतेरिति हेतुगर्भं विशेषणं तेन तस्या विषहरणसामर्थ्ये कारणं प्रदर्शितम् । हिमामृतसंभवादित्यनेनापि संतापनाशस्य हेतुः प्रदर्शितः ।

समतिक्राम्यतीति । दत्रिमो दानेन निर्वृत्त उपचारः । 'ड्वितः क्त्रिः' । अनेन क्त्रौ 'क्त्रेर्मम्नित्यम्' इत्यनेन मप् । सर्वेषां सत्वानां प्राणिनां रक्षायै रक्ष

कथमपि हस्तमुपगता। यद्यपि च परिभव इव भवति भवादृशां दास्रिम उपचारस्तथाप्योपधिबुध्या बुद्धिमता सर्वसत्त्वराशिरक्षाप्रवृत्तेन रक्षणीयशरीरेणायुष्मता विषरक्षापेक्षया गृह्यताम्'। इत्यभिधाय भिक्षोरभ्याशवर्तिनश्चीवरपटान्तसंयतां मुमोच तामेकावलीं मन्दाकिनीम्। 5

२० उन्मुच्यमानाया एव यस्याः प्रभालेपिनि लब्धावकाशे विशदमहसि महीयसि विसर्पति रश्मिमण्डले युगपद्धवलायमानेषु दिङ्मुखेषु मुकुलितलतावधूत्कण्ठितैरामूलाद्विकाशितामिव तरुभिः, अभिनवमृणाललुब्धैर्धावितमिव धुतपक्षपुटपटलधवलितगगनं वनसरसीहंसयूथैः, स्फुटितमिव भरवशविशीर्यमाणधूलिधवलैर्गर्भभेदसूचितसूचीसंचयशुचिभिः केतकीवाटैः, उद्दलितदलदन्तुराभिः प्रबुद्धमिव कुमुदिनीभिः, विधुतसितसटाभारभरितदिक्चक्रैश्चलितामिव केसरिकुलैः, प्रह- 10

णाय प्रवृत्तेनात एव सर्वेषां कल्याणार्थं रक्षणीयं शरीरं देहो येन तेन। विषेभ्यो रक्षा रक्षणं तस्यापेक्षया तदर्थमित्यर्थः। अभ्याशवर्तिनो निकटवर्तिनः। चीवरपटान्ते वल्कलपटप्रान्ते संयतां बद्धाम्।

उन्मुच्यमानाया इति। प्रभया कान्त्या लिंपत्युपचिनोति तस्मिन्। लब्धोऽवकाशः स्थलं येन तस्मिन्। विषदं स्वच्छं महस्तेजो यस्य तस्मिन्। रश्मिमंडले विसर्पति सति व्याप्नुवति सति युगपदेकदैव धवलायमानेषु धवलेष्विवाचरत्सु दिङ्मुखेषु। मुकुलितासु संजातकोरकासु लज्जया कृतनिमीलनासु च लतावधूषूत्कण्ठितैर्जाताभिलाषैस्तरुभिर्वृक्षैरामूलान्मूलादारभ्य विकाशितमिव मात्रेक्षः। अभिनवमृणालेषु नूतनबिसेषु लुब्धैर्वनसरसीनामरण्यकासाराणां हंसयूथैर्हंससमूहैः धुतैः कंपितैः पक्षपुटैर्धवलितं शुभ्रीकृतं गगनमाकाशं यथा तथा धावितमिव। एकावल्यां बिसभ्रान्तिः। तत्किरणेषु हंसैः स्वपक्षैः शुभ्रीकृतगगनस्येत्प्रेक्षा। भरवशेन भारवशेन विशीर्यमाणया गलन्त्या धूल्या रजसा धवलैः शुभ्रैः। गर्भस्य मध्यस्य भेदेन सूचितो दर्शितः सूचीसंचयोऽग्रसमूहस्तेनशुचयः स्वच्छास्तैः। केतकीवाटैः केतकीवृतिभिः स्फुटितमिव विकासितमिव। उद्दलितैर्विस्तारितैर्दलैः पर्णैर्दन्तुराभिर्नतोन्नताभिः कुमुदिनीभिः कैरविणीभिः प्रबुद्धमिव जागरितमिव। विधूतेन कम्पितेन सितेन सटाभारेण जटासमूहेन भरितं व्याप्तं दिक्चक्रं दिशां समूहो यैस्तैः केसरिकुलैः सिंहगणैश्चलितमिव। दशनानां रदानामंशूनां किरणानां मालाया समू-

सितमिव दशनांशुमालालोकलिप्यमानवनं वनदेवताभिः, विकसित-
मिव शिथिलितकुसुमकोशकेसराट्टहासनिरङ्कुशं काशकाननैः, भ्रान्तमिव
संभ्रमभ्रमितबालपल्लवपरिवेशश्वेतायमानैश्चमरीकदम्बकैः, प्रसृतमिव
स्फायमानफेनिलतरलतरतरङ्गोद्गारिणा गिरिनदीपूरेण, अपरतारागण-
लाभमुदितेनोदितमिव विकचमरीचिचक्राक्रान्तककुभा पूर्णचन्द्रेण, 5
प्रक्षालित इव दावानलधूलिधूसरितदिगन्तो दिवसः, पुनरिव धौता-
न्यश्रुजलक्लिष्टानि नारीणां मुखानि।

21 राजा तु मांसलैस्तस्याः संमुखैर्मयूखैराकुलीक्रियमाणां मुहु-
र्मुहुरुन्मीलयन्निमीलयंश्च चक्षुः कथमपि प्रयत्नेन ददर्श सर्वाशापूर्णां
पङ्क्तीकृतामिव दिङ्नागकरशीकरसंहतिम्, घनमुक्तां शारदीमिव लेखी- 10
कृतां ज्योत्स्नाम्, प्रकटपदकचिह्नां संचारणवीथीमिव बालेन्दोः, निश्च-
लीभूतां सप्तर्षिमालामिव हस्तमुक्ताम्, अभिभूतसकलभुवनभूषणभूति-

हस्यालोकेन प्रकाशेन लिप्यमानं वनं याभिस्ताभिर्वनदेवताभिः। काशकाननै-
स्तृणारण्यैः शिथिलितानां प्रफुल्लानां कुसुमकोशानां पुष्पकुड्मलानां केसराण्येव
परागा एवाट्टहास उच्चैर्हास्यं तेन निरंकुशं निराबाधं यथा तथा विकसितमिव।
संभ्रमेण त्वरया भ्रमितेन चलितेन बालपल्लवानां पल्लवाकारकेशानां परिवेशेन
परिवलनेन श्वेतायमानैः शुभ्रायमाणैः चमरीकदंबकैः वन्यैर्गोसमूहैः।
स्फायमाना वर्धमानाः फेनिलाः फेनयुक्तास्तरलतरास्तरंगा लहर्यस्तान् उद्गि-
रति तेन। अपरस्यान्यस्य तारागणस्य तारकासमूहस्य लाभेन मुदितस्तुष्टस्तेन
विकचेन मरीचिचक्रेण किरणसमूहेनाक्रान्ताः ककुभो दिशो येन तेन पूर्णचन्द्रेण
पूर्णिमाचन्द्रेण। दावानलो वनाग्निस्तस्य धूल्या धूसरितो मलिनीकृतः।

राजेति। मांसलैः पुष्टैः मयूखैः किरणैः। सर्वा आशा दिशो वाञ्छाश्च
तासां पूर्णां पूरिकां दिङ्नागा दिग्गजास्तेषां कराणां शुण्डादण्डानां शीकरसंहतिं
जललवपरंपराम्। घना दृढा मुक्ता मौक्तिकानि यस्यां पक्षे घनैर्मेघैर्मुक्तामुत्सृ-
ष्टाम्। शारदीं शरत्संबंधिनीम्। 'संधिवेलाद्यृतुनक्षत्रेभ्योऽण्' इत्यनेनाण्। प्रकटं
व्यक्तं पदकस्य मध्यमणेश्चिन्हं यस्यां पक्षे प्रकटानि पदकानि पादप्रतिमानां चिन्हा-
नि यस्याम्। हस्तेन मुक्तां त्यक्तां परिवर्तुलत्वाद्धस्तेऽतिष्ठन्तीं पक्षे हस्तेन तत्संज्ञ-
कनक्षत्रेण मुक्ताम्। अभिभूतः पराजितः सकलभुवनभूषणस्य कौस्तुभादेर्हारस्य

प्रभावामैशानीमिव शशिकलाम्, धवलतागुणगृहीतां कान्तिमिव निर्गतां क्षीरराशेः, अनेकमहामहीभृत्परम्परागतां गङ्गामिव दुर्गतिहराम्, अनवरतस्फुरिततरलांशुकां पुरःसरपताकामिव महेश्वरभावागमस्य, घनसारशुक्लां दन्तपङ्क्तिमिवाभिमुखस्येश्वरस्य, वरमनोरथपूरणसमर्थां स्वयंवरस्रजमिव भुवनश्रियः, निजकरपल्लवावरणदुर्लक्ष्यां 5 चक्षूरागविहसतिकामिव वसुधायाः, मन्त्रकोपसाधनप्रवृत्तस्याक्षमालामिव राजधर्मस्य, समुद्रालंकारभूतां संख्यालेख्यपट्टिकामिव कुबेरकोशस्य। पश्यंश्चैतां विस्मयमाजगाम मनसा सुचिरम्। आचार्यस्तु तामुद्धृत्य बबन्ध बन्धुरे स्कन्धभागे भूपतेः। अथ नरपतिरपि प्रीतिमुपदर्शयन्प्रत्यवादीत्— 'आर्य, रत्नानामीदृशानामनर्हाः प्रायेण 10 पुरुषाः। तपःसिद्धिरियमार्यस्य देवताप्रसादो वा। के च वयमिदानीमात्मनोऽपि किमुत ग्रहणस्य प्रत्याख्यानस्य वा। दर्शनात्प्रभृति प्रभूतगुरुगुणगणहृतेन हृदयेन परवन्तो वयम्। संकल्पितमिदमाम-

---

वा भूतेः समृद्धेर्भस्मनो वा प्रभावः पराक्रमो यया ताम्। क्षीरराशेरित्यस्य गृहीतामित्यत्रान्वयः। धवलतागुणेन शुभ्रतारूपधर्मेण रज्वा वा गृहीतां स्वीकृताम्। अनेकेषां महामहीभृतां राजश्रेष्ठानां पर्वतश्रेष्ठानां परंपराया आगतां प्राप्तां दुर्गतेः दुस्थितेः पातकस्य हरां नाशयित्रीम्। अनवरतं स्फुरिताः तरलस्य हारमध्यमणेरंशुकाः किरणानि यस्यास्तां पक्षेऽनवरतस्फुरितेन तरलं चंचलमंशुकं वस्त्रं यस्यास्तां पताकाम्। महेश्वरभावः साम्राज्यं तस्यागमस्य प्राप्तेः पुरःसरपताकामग्रध्वजामिव। महैश्वर्यप्राप्तिसूचिकामित्यर्थः। घनसारवत्कर्पूरवच्छुक्लां धवलां पक्षे निरंतरदृढधवलाम्। अभिमुखस्य संमुखागतस्येश्वरस्य शिवस्य वरमनोरथा श्रेष्ठा मनोरथा जामातृमनोरथा वा तेषां पूरणे समर्थां स्वयंवरस्रजमिव स्वयंवरमालामिव। निजकरा एव सहजाः किरणा एव पल्लवास्तेषामावरणेनाच्छादनेन दुर्लक्ष्यामदर्शनीयां पक्षे स्वहस्तावरणदुर्लक्ष्यामित्यर्थः। चक्षूरागः प्रीतिस्तया विहसतिकां नर्मवाक्यमिव। मन्त्रः गुह्यभाषणं कोपो राज्यसाधनं हस्त्यश्वादि तेषु प्रवृत्तस्तल्लाभे प्रयत्नवांस्तस्य। पक्षे मन्त्रकोषो मंत्रसमूहस्तस्य साधने प्रवृत्तस्य तदाराधनपरस्य। मन्त्रजपे मालावर्दियका। समुद्रस्य सागरस्यालंकारभूतां भूषणभूतां पक्षे मुद्रया राजचिन्हेन सहिता अलंकारभूता भूषणभूता च। संख्यालेखस्य संख्यालेखनस्य पट्टिकां पत्रम्। बंधुरे मनोहरे। अनर्हा अयोग्याः।

रणादार्योपयोगाय शरीरम्। अत्र कामचारो वः कर्तव्यानाम्'
इति।

22 समतिक्रान्ते च कियत्यपि काले गते चैकावलीव्रणनालापे
लोकस्यानन्तरं लब्धविश्रम्भा राज्यश्रीस्ताम्बूलवाहिनीं पत्रलतामाहूयोपां-
शु किमपि कर्णमूले शनैरादिदेश। दर्शितविनया च पत्रलता पार्थिवं
व्यज्ञापयत्—देव, देवी विज्ञापयति 'न स्मराम्यार्यस्य पुरः कदाचिद्दु- 5
श्चैर्वचनमपि। कुतो विज्ञापनम्। इयं हि शुचामसह्यता व्यापारयन्ती
हतदैवदत्तादेशा शिथिलयति विनयम्। अबलानां हि पतिरपत्यं वा-
वलम्बनम्। उभयविकलानां तु दुःखानलेन्धनायमानं प्राणितमशा-
लीनत्वमेव केवलम्। आर्यागमनेन च कुतोऽपि प्रतिहतो मरणप्रयत्नः।
अतः काषायग्रहणाभ्यनुज्ञयानुगृह्यतामयमपुण्यभाजनं जनः' इति। 10
जनाधिपस्तु तदाकर्ण्य तूष्णीमेवावातिष्ठत।

23 अथाचार्यः सुधीरमभ्यधात्— 'आयुष्मति, शोको हि
नाम पर्यायः पिशाचस्य, रूपान्तरमाक्षेपस्य, तारुण्यं तमसो, विशेषणं
विषस्यानन्तकः प्रेतनगरनायकः। अयमनिर्वृतिधर्मा दहनः। अयम-
क्षयो राजयक्ष्मा। अयमलक्ष्मीनिवासो जनार्दनः। अयमपुण्यप्रवृत्तः 15
क्षपणकः। अयमप्रतिबोधो निद्राप्रकारः। अयमनलसधर्मा संनिपातः।

प्रभूतानामनेकेषां गुरूणां महतां गुणानां गणेन समूहेन हृतं हृदयं यस्य तेन।
परवन्तः परतंत्राः। कामचारः स्वेच्छाचारः।

समतिक्रान्त इति। उपांशु एकान्ते। हतेन दैवेन दत्त आदेश आज्ञा
यस्याः सा। शिथिलयति शिथिलं करोति दुःखानले दुःखाग्नौ इन्धनायमानमिन्धनमि-
वाचरत्प्राणितं जीवितमशालीनत्वमधृष्टत्वमेव। कुतोपि मरणप्रयत्नो जीवनाशोद्यमः
प्रतिहतो नष्टः।

अथेति। सुधीरं धीरतया। आक्षेपस्यापस्मारस्य रूपान्तरं भिन्नं रूपम्।
तमसोऽज्ञानस्य तारुण्यं वृद्धिकालः। अनन्तान् कायति रावयति सोऽनन्तकः
यमभिन्नः प्रेतनगरस्य प्रेतपुर्या नायकः। निर्वृत्तिः चित्तस्वास्थ्यं निर्वाणं च धर्मो
यस्य स निर्वृत्तिधर्मा तद्भिन्नोऽनिर्वृत्तिधर्मा दहनोऽग्निः। अक्षयश्चिरस्थायी क्षय-
रहितो राजयक्ष्मा क्षयप्रकारः। अलक्ष्म्या दारिद्रस्य निवासः। जनार्दनो
जनपीडको विष्णुश्च। अपुण्यप्रवृत्तः पापप्रवृत्तः क्षपणको यः क्षपयति नाशयति
स नग्नाटकश्च। न प्रतिबोधो विवेको जागर्या वा यस्मिन् स निद्राप्रकारः स्वाप-

अयमशिवसहचरो विनायकः। अयमबुधसेवितो ग्रहवर्गः। अयमयोगसमुत्थो ज्योतिःप्रकारः। अयं स्नेहाद्वायुप्रकोपः, मानसादग्निसंभवः, आर्द्रभावाद्रजःक्षोभः, रसादभिशोषः, रागात्कालपरिणामः। तदस्याजस्रस्राविणो हृदयमहाव्रणस्य बहुलदोषान्धकारलब्धप्रवेशप्रसरस्य पाणतस्करस्य शून्यताहेतोर्महाभूतग्रामघातकस्य सकलविग्रहक्षपणदक्षस्य 5

विशेषः। अनलेनाग्निना सधर्मा सदृशः। अलस आलस्यं धर्मो लक्षणं यस्य सोऽलसधर्मा न तथा अनलसधर्मा। 'धर्मादनिच् केवलात्' इत्यनेन समासान्तोऽनिच्। संनिपातः सम्यङ्निपातयति स रोगविशेषश्च। अशिवस्याकल्याणस्य सहचरः मित्रं शिवस्य सहचरो न भवति तथा वा। विनायको विशेषेण दुर्गतिं नयति स गणराजो वा। अबुधैरपंडितैः सेवितः। बुधेन तन्नामकग्रहेण सेवितो बुधसेवितो न तथाऽबुधसेवितो ग्रहवर्गः संकटप्रकारः सूर्यादिग्रहसमूहश्च। अयोगाद्विपरीतादैवात्समुत्थ उत्पन्नः चित्तनिरोधाभावादुत्पन्नश्च ज्योतिःप्रकारः अग्निभेदः परज्ञानं च। स्नेहात्प्रेम्णः घृतादिकाच्च। वायुप्रकोपः उन्मादः। 'वातं स्नेहेन मित्रवत्' इति वचनात्स्नेहाद्वातविकारो नश्यत्यत्र तु प्रकोप इति विरोधः परिहारस्तूक्त एव। मानसं मनस्तदाख्यसरश्च तस्मादग्निसंभवः। सरसोऽग्नेरुत्पत्तित्वेन विरोधः। मानसस्यान्तःकरणार्थत्वेन परिहारश्च। आर्द्रभावाद्वत्सलत्वाज्जलादिसेचनाद्वा रजःक्षोभः रजोगुणस्य धूलेर्वा क्षोभः। जलेन धूलिः शाम्यत्यत्र तु क्षोभ इति विरोधः। रसात्प्रीते रसायनाद्वा अभिशोषः शुष्कता। रसायनाद्वृध्या भाव्यमत्र शुष्कतेति विरोधः। प्रीत्यर्थेन परिहारश्च। रागादत्यन्तासक्त्या लौहित्याद्वा कालपरिणामः कालस्यान्तकस्य कृष्णवर्णस्य वा परिणामः। ताम्रवर्णात्कृष्णोत्पत्तित्वेन विरोधः परिहारस्तूक्तएव। तदस्येति। ततस्मादस्य शोकस्य पारं विदुषामपि हृदयानि सोढुं नालं किं पुनरबलानां हृदयमिति संबंधः। अजस्रं सततं स्रवति गलति तस्य हृदयस्य महाव्रणो महाक्षतं तस्य। बहुलानां प्रभूतानां दोषाणामंधकारेण लब्धः प्रवेशप्रसरः प्रवेशगतिर्येन पक्षे बहुलदोषायां कृष्णपक्षरात्र्यां लब्धः प्रवेशप्रसरो येन। प्राणतस्करस्य जीवहारकस्तेनस्य शून्यताहेतोः किंकर्तव्यतामूढतायै सर्वनाशार्थं वा। 'षष्ठी हेतुप्रयोगे' इत्यनेन षष्ठी। महान् भूतग्रामः प्राणिसमूहस्तस्य घातकः पक्षे महान् भूतग्रामो जनसमूहो यस्मिंस्तस्य जनपदस्य घातको नाशकः। सकलविग्रहाणां सर्वेषां देहानां कलहानां च क्षपणे नाशने दक्षस्य दोषचक्रे दोषसमूहे वर्तते तस्य दोषमहाराजस्य च। कार्श्यं कृशता श्वासः

दोषचक्रवर्तिनः कार्श्यश्वासप्रलापोपद्रवबहलस्य दीर्घरोगस्यासद्ग्रहस्य सकललोकक्षयधूमकेतोर्जीवितापहारदक्षस्याक्षणरुचेरनभ्रवज्रपातस्य स्फुरदनवद्यविद्याविद्युद्द्योतमानानि गहनग्रन्थग्रन्थिगूढगर्भग्रहणगम्भीराणि भूरिकाव्यकथाकठोराणि बहुशास्त्रोद्वहनबृहन्ति विदुषामपि हृदयानि नालं सोढुमापातं किमुत नवनवमालिकाकुसुमकोमलानां सरसबिसतन्तुदुर्बलकमबलानां हृदयम्। 5

२. एवं सति सत्यव्रते, वद किमत्र क्रियते, कतम उपालभ्यते, कस्य पुर उच्चैराक्रन्द्यते, हृदयदाहि दुःखं वा ख्याप्यते। सर्वमक्षिणी निमील्य सोढव्यममूढेन मर्त्यधर्मणा। पुण्यव्रति, पुरातन्यः स्थितयः एताः केन शक्यन्तेऽन्यथाकर्तुम्। संसरन्त्यो नक्तंदिवं द्राघीयस्यो जन्मजरामरणघटनघटीयन्त्रराजिरज्जवः पञ्चजनानाम्। 10 पञ्चमहाभूतपञ्चकुलाधिष्ठितान्तःकरणव्यवहारदर्शननिपुणाः सर्वंकषा

प्रलापो वावदूकता च तेषामुपद्रवेण पीडया बहलस्य व्याप्तस्य। पक्षे कार्श्यश्वासप्रलापानामुपद्रवेण रोगोपरि रोगोत्पत्त्या बहलस्य। दीर्घरोगस्य चिरस्थायी क्षयादिरोगः तस्य। उक्तं च शंकरेण 'व्याधेरुपरि यो व्याधिर्भवत्युत्तरकालजः। उपक्रमविरोधित्वात्स ह्युपद्रव उच्यते'। असद्ग्रहस्यानर्थासक्तस्य। सकललोकानां क्षयस्य धूमकेतुस्तस्य। जीवितस्यापहारे हरणे दक्षस्य कुशलस्य। न विद्यते क्षणं रुचिर्भोजनाद्यभिलाषो यस्य तस्य पक्षे न क्षणरुचिस्तडिद्यस्मिन्। अनभ्रवज्रपातस्य मेघरहितवज्रपातस्य। आपातं पतनं सोढुं विदुषां पंडितानां। स्फुरन्त्याः प्रकाशमानाया अनवद्यायाः स्तुत्याया विद्याया विद्युता किंचिन्मात्रज्ञानेनोद्योतमानानि प्रकाशमानानि। गहनानां कठिनानां ग्रंथानां ग्रंथीनां गूढस्य गुप्तस्य गर्भस्य ग्रहणेन स्वीकारेण गंभीराणि। भूरीणां प्रभूतानां काव्यानां कथाभिः कठोराणि। बहूनां शास्त्राणामुद्वहनेन धारणेन बृहन्ति महान्ति हृदयानि नालं न समर्थानि किमुत नवाया नवमालिकायाः कुसुमानीव कोमला मृदवस्तासामबलानां सरस आर्द्रो बिसतन्तुरिव दुर्बलं हृदयम्।

एवमिति। मर्त्यधर्मणा मनुजेन पुरातन्यो बहुकालभवाः। सायंचिरमित्यनेनटयुः। द्राघीयस्यो दीर्घतरा जन्म उत्पत्तिर्जरा वार्द्धक्यं मरणं नाश एतेषां घटनान्येव घटीयन्त्रराजेः उदंचनयंत्रपंक्ते रज्जवो नक्तं दिवं रात्रिंदिवं संसरन्त्यश्चलन्त्यः सन्तीत्यध्याहार्यम्। पंचजनानां पुंसां 'स्युः पुमांसः पंचजना' इत्यमरः। संसरन्तीतिपाठः स्याच्चेत्समीचीनं परं नोपलभ्यते। पंचमहाभूतानि पृथिव्यादीनि तेषां पंचकुलेनाधिष्ठात्रा अधिष्ठितस्यान्तःकरणस्य

विषमा धर्मराजस्थितयः । क्षणमप्यक्षममाणा गलन्त्यायुष्कलाकलन-कुशला निलये निलये कालनालिकाः । जगति सर्वजन्तुजीवितोपहा-रपातिनी संचरति झटिति चण्डिका यमाज्ञा । रटन्त्यनवरतमखिल-प्राणिप्रयाणप्रकटनपटवः प्रेतपतिपटहाः । प्रतिदिशं पर्यटन्ति पेटकैः प्रतिपुरं प्रतप्तलोहलोहिताक्षाः कालकूटकान्तिकालकायाः कालपाश- 5 पाणयः कालपुरुषाः । प्रतिभवनं भ्रमन्ति भीषणाकिंकरकरघट्टितयम-घण्टापुटपटुटांकारभयंकराः सर्वसत्त्वसंघसंहरणाय घोराघातघोषणाः । दिशि दिशि वहन्ति बहुचिताधूमधूसरितप्रेतपतिपताकापटुपातितगृध्र-दृष्टयः शोककृतकोलाहलाकुलकुटुम्बिनीविकीर्णकेशकलापशबलशव-

---

व्यवहारदर्शने व्यवहारावलोकने निपुणाः कुशलाः सर्वंकषाः सर्वान् कषंति घर्षंति ताः । 'सर्वकूलाभ्रकरीषेषु कषः' इत्यनेन खच् । धर्मराजस्थितयो यमस्थितयो विषमाः कठिनाः । क्षणमप्यक्षममाणा असहन्त्यः आयुषः कलानां कालभागविशेषाणां कलने संख्याने कुशला निलये निलये प्रतिगृहं वीप्सायां द्विरुक्तिः कालनालिका कालघटिकाः गलन्ति क्षरन्ति । सर्वेषां जन्तूनां प्राणिनां जीवितानां प्राणानामुपहारे पतति सा । चण्डिका प्रखरा तन्नाम्नी देवी वा । यमाज्ञा धर्मराजादेशो झटिति द्राक् संचरति । अखिलानां सर्वेषां प्राणिनां जीवानां प्रयाणं परलोकगमनं तस्य प्रकटने व्यक्तीकरणे पटवः कुशलाः प्रेत-पतेर्यमस्य पटहा भेर्यः । नृपाः स्वाज्ञादि पटहाघोषणेन ख्यापयन्ति । पेटकैः मंजूषाभिः कालपाशस्थापनार्थं गृहीतैरिति भावः । प्रतप्तं प्रज्वलितं लोह-मिव लोहिते ताम्रे अक्षिणी येषां ते । कालकूटस्य महाविषस्य कान्तिरिव कालः कृष्णः कायः शरीरं येषां ते कालपाशो यमपाशो पाणौ हस्ते येषां ते कालपुरुषा यमसेवकाः प्रतिदिशं दिशि दिशि प्रतिपुरं नगरे नगरे पर्यटन्ति । प्रतिभवनं गृहे गृहे भीषणैर्भयंकरैः किंकरैः करैर्घट्टितानां चालितानां यमघण्टापुटानां पुट-शब्दोऽलंकारार्थः । यमघंटानां पटुभिः समीचीनैष्टांकारैर्ध्वनिभिर्भयंकराः । घोराणां प्रचंडानामाघातानां प्रहाराणां घोषणा उच्चैर्घुष्टानि । सर्वसत्वानां सर्वप्राणिनां संघस्य समूहस्याहरणाय भ्रमन्ति । बहूनां चितानां चित्यानां धूमा एव धूसरिता मलिना प्रेतपतेर्यमस्य पताका ध्वजाः तेपु अथवा धूमैर्धूसरिता इत्यर्थः । पटु सम्यक् पतिता गृध्रदृष्टयो यासु ताः । शोकेन दुःखेन कृतः कोलाहलः कलकल-स्तेनाकुलानां पीडितानां कुटुम्बिनीनां गृहिणीनां विकीर्णैः केशकलापैः शिरोरुह-समूहैः शबलानां कर्बुराणां शवशिबिकानां प्रेतयानानां सहस्रेण संकुला व्याप्ताः

शिबिकासहस्रसंकुलाः किलकिलायमानश्मशानशिबिराशिवाशावकाः परलोकावसथपथिकसार्थप्रस्थानविशिखावीथयः । सकललोककवलावलेहलम्पटा बहला बहुलिहा लेढि लोहिताचिता चिताङ्गारकाली कालरात्रिजिह्वा जीवितानि जीविनाम् । तृप्तिमशिक्षिता च भगवतः सर्वभूतभुजो बुभुक्षा मृत्योः । अतिद्रुतवाहिनी चानित्यतानदी । क्षणिकाश्च महाभूतग्रामगोष्ठ्यः । रात्रिषु भङ्गुराणि गात्रयन्त्रपञ्जरदारूणि देहिनाम् । अशुभशुभावेशविवशा विशरारवः शरीरनिर्माणपरमाणव । छिद्दुरा जीवबन्धनपाशतन्त्रीतन्तवः । सर्वमात्मनोऽनीश्वरं विश्वं नश्वरम् । एवमवधृत्य नात्यर्थमेवार्हसि मेधाविनि मृदुनि मनसि तमसः प्रसरं दातुम् । एको हि प्रतिसंख्यानक्षणआधारीभवति धृतेः । अपि च दूरगतेऽपि हि शोके नन्विदानीमपेक्षणीय एवायं ज्येष्ठः पितृकल्पो भ्राता भवत्या गुरुः । इतरथा को

5

10

किलकिलायमानाः किलकिलशब्दं कुर्वाणाः श्मशानमेव शिबिरं वसतिस्थानं येषां ते शिवाशावकाः शृगालीपुत्राः यासु ताः । परलोकावसथस्य स्वर्लोकगृहस्य पथिकानां पान्थानां सार्थस्य समूहस्य प्रस्थानं गमनं तस्य विशिखानां मार्गाणां वीथयः पंक्तयो दिशि दिशि प्रतिदिशं वहन्ति । सकललोकानां कवला ग्रासास्तेषामवलेह आस्वादने लम्पटा बहला दीर्घा गौश्च । बहुलिहा छिद्रान्वेषिणी लोहितेन लौहित्येनाचिता खचिता चितांगारैः काली कृष्णा कालरात्रेर्यमरात्रेर्जिह्वा जीविनां प्राणिनां जीवितानि लेढ्यास्वादयति । गौरपि वत्सस्य पृष्ठं लीढ्वा कवलान् भक्षति । सर्वान् भूतान् प्राणिनो भुंक्ते तस्य मृत्योः बुभुक्षा खादनेच्छा तृप्तिमशिक्षिता तृप्तिमजानत्यासीत् । अनित्यता अस्थिरतैव नदी अतिद्रुतमतितूर्णं वहति तथाभूता । रात्रिषु भंगुराणि स्वल्पदिनस्थायीनि गात्रयन्त्रपंजरो देहयष्टिस्तस्य दारूणि काष्ठानि । अशुभं च शुभं चाशुभशुभे पूर्वनिपातानित्यत्वादशुभप्रकरणाद्वा अशुभशब्दस्य पूर्वनिपातः । अथवा अशुभेन सहितं शुभं अशुभशुभं मर्यादाभिविधौ इति वत् मध्यमपदलोपी समासः स्पष्टाचैवं रीतिस्तत्रैव शब्दरत्ने । तयोरावेशेनासक्त्या विवशाः पराधीना विशरारवो विशेषेण घातकाः शरीरनिर्माणस्य देहोत्पत्तेः परमाणवः । जीवानां प्राणिनां बंधनपाशस्य तन्त्रीणां रज्जूणां तन्तवोऽवयवाः । सर्वं नश्वरं विश्वमात्मनोऽनीश्वरमनायत्तम् आत्मास्वामिकमित्यर्थः । प्रतिसंख्यानक्षणो विवेककुशला मतिः । पितृकल्प ईषन्न्यूनः पिता पितृकल्पः । 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इत्यनेन कल्पप् । काषायग्र-

न बहु मन्येत कल्याणरूपमीदृशं संकल्पमत्रभवत्याः काषायग्रह-
णकृतम् । अखिलमनोज्वरप्रशमनकारणं हि भगवती प्रव्रज्या ।
ज्यायः खल्विदं पदमात्मवताम् । महाभागस्तु भिनत्ति मनो-
रथमधुना । यदयमादिशति तदेवानुष्ठेयम् । यदि भ्रातेति यदि
ज्येष्ठ इति यदि वत्सल इति यदि गुणवानिति यदि राजेति सर्वथा 5
स्थातव्यमस्य नियोगे ।' इत्युक्त्वा व्यरंसीत् ।

25 उपरतवचसि च तस्मिन्निजगाद नरपतिः—'आर्यमप-
हाय कोऽन्य एवमभिदध्यात् । अनभ्यर्थितदैवनिर्मिता हि विषमवि-
पदवलम्बनस्तम्भा भवन्तो लोकस्य । स्नेहार्द्रमूर्तयो मोहान्धकारध्वं-
सिनश्च धर्मप्रदीपाः । किंतु प्रणयप्रदानदुर्ललिता दुर्लभमपि मनोरथ- 10
मतिप्रीतिरभिलषति । धीरस्यापि धाष्टर्यमारोपयति हृदयलघिमलङ्घि-
तमतिवल्लभत्वम् । युक्तायुक्तविचारशून्यत्वाच्च शालीनमपि शिक्ष-

---

हणे ताम्रवस्त्रस्वीकारे कृतं संकल्पं विचारम् । अखिलस्य मनोज्वरस्य मानसताप-
स्य प्रशमनकारणं दूरीकरणहेतुः प्रव्रज्या संन्यासः । यदि भ्रातेति सहोदरत्वा-
त्तस्य वचनमनुष्ठेयम् । ननु कनीयसो वचः कथं कर्तव्यमिति चेत्तदाह । **यदि
ज्येष्ठ इति** । मयि प्रेमाभावात्तस्य कुतस्तद्वचनस्वीकार इत्यत आह । **यदि
वत्सल इति** । वत्सलेपि मूढे कथं गौरवमिति शंकार्थमाह । **गुणवानिति** ।
सर्वेषामप्यधिकं कारणं वक्ति । **यदि राजेति** । सर्वथाऽस्य वचने त्वया
स्थातव्यमित्यर्थः । व्यरंसीद्विरराम 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् ।

25. **उपरतेति** । उपरतवचसि समाप्तभाषणे तस्मिन्नाचार्ये सति । आर्यमपहा-
यार्थं विना कोऽन्यः को भिन्न एवमभिदध्याद्ब्रूयात् । अनभ्यर्थितेनायाचितेन
दैवेन निर्मिताः कृता विषमायां कठिनायां विपदि विपत्तावलंबनस्याधारस्य
स्तंभाः । स्नेहेन प्रेम्णा तैलेन चार्द्रा मूर्तयो येषां ते । मोह एवांधकारस्तं ध्वंसन्ति
नाशयन्ति ते धर्मस्य प्रदीपाः । एवं महतां माहात्म्यमुपवर्ण्य स्वकर्मणि तन्नियोजने
स्वीयलाघवप्रदर्शनपूर्वकं वक्ति । **किं त्विति** । प्रणयप्रदानेन प्रेमदानेन दुर्ल-
लिता लालनं कृत्वा वर्धिता इति यावत् । अतिप्रीतिरतिप्रेम दुर्लभमप्यप्राप्यमपि
मनोरथं स्वापेक्षितमभिलषतीच्छति । हृदयस्य मनसो लघिम्ना लघुत्वेन लंघित-
मतिक्रान्तम् । स्वार्थतृष्णाः स्वार्थेच्छाः युक्तायुक्तयोर्योग्यायोग्ययोर्विचारेण
शून्यत्वात् शालीनं भीरुमपि प्रागल्भ्यं धाष्टर्यं शिक्षयत्यध्यापयति । आर्याः श्रेष्ठाः

यन्ति स्वार्थतृष्णाः प्रागल्भ्यम् । अभ्यर्थनाया रक्षन्ति च जलनिधय इव मर्यादामार्याः । दत्तमेव च शरीरमिदमनभ्यर्थितेन प्रथममेवातिथ्याय माननीयेन भवता मह्यम् । अतः किंचिदर्थये भदन्तमियं नः स्वसा बाला च बहुदुःखखेदिता च सर्वकार्यावधीरणोपरोधेनापि यावल्लालनीया नित्यम् । अस्माभिश्च भ्रातृवधापकारिरिपुकुलप्रलयक- 5 रणोद्यतस्य बाहोर्विधेयैर्भूत्वा सकललोकप्रत्यक्षं प्रतिज्ञा कृता । पूर्वावमाननाभिभवमसहमानैरर्पित आत्मा कोपस्य । अतो नियुङ्क्तां कियन्तमपि कालमात्मानमार्योऽपि कार्ये मदीये । दीयतामातिथ्ये शरीरमिदम् । अद्य प्रभृति यावदयं जनो लघयति प्रतिज्ञाभारमाश्वासयति च तातविनाशदुःखविक्लवाः प्रजाः, तावदिमामत्रभवतः क- 10 थाभिश्च धर्म्याभिः, कुशलप्रतिबोधविधायिभिरुपदेशैश्चारजोभिः, शीलोपशमदायिनीभिश्च देशनाभिः, क्लेशप्रहाणहेतुभूतैश्च तथागतैर्दर्शनैः, अस्मत्पार्श्वोपयायिनीमेव प्रतिबोध्यमानामिच्छामि । इयं तु ग्रहीष्यति मयैव समं समाप्तकृत्येन काषायाणि । अर्थिजने च किमिव नातिसृजन्ति महान्तः । सुरनाथमात्मास्थिभिरपि यावत्कृतार्थमकरोद्धैर्योदधि- 15

जलनिधय इव समुद्रा इव अभ्यर्थनाया याचनाया मर्यादां स्थितिं सीमानं च रक्षन्ति पालयन्ति । आतिथ्यायातिथ्यर्थं 'स्यादातिथ्यमातिथ्यर्थे' इति मेदिनी । सर्वेषां कार्याणामवधीरणमुपेक्षयणम् तस्योपरोधः स्वीकारः तेन । लालनीया संतोषणीया । भ्रातृवधेन भ्रातुर्हननेनापकारिणोऽपराधिनो रिपुकुलस्य शत्रुकुलस्य प्रलयकरणं नाशस्तस्मिन्नुद्यतस्य प्रयत्नवतो बाहोर्भुजस्य विधेयैः सेवकैः । पूर्वं प्रथमं यत् अवमाननमपमानस्तेन कृतः अभिभवः पराजयस्तम् । लघयति लघूकरोति तत्करोतीति णिच् । तातस्य पितुर्विनाशस्य दुःखेन विक्लवाः पीडिताः । धर्म्याभिः धर्मादनपेताभिः । 'धर्मपथ्यर्थन्यायादनपेते' इत्यनेन यत् । कुशलं योग्यं प्रतिबोधं ज्ञानं विदधति कुर्वन्ति तैःअरजोभिःसात्त्विकैरुपदेशैः । शीलस्य स्वभावस्योपशमं शान्तिं ददाति तैर्देशनाभिर्निरूपणैः । क्लेशस्य दुःखस्य प्रहाणं नाशस्तस्य हेतुभिः कारणैस्तथागतैर्बौद्धैर्दर्शनैः शास्त्रैः । अस्माकं पार्श्वे समीपे उपयायिनी तिष्ठन्तीं तामेव । **सुरनाथमिति** । वृत्रं जिघांसुर्देवेन्द्रो वज्रं निर्मिमित्सुर्दधीचं तदस्थीन्ययाचत । स च धैर्यसागरस्तानि समर्पयामास तैश्च वज्रं निर्माय हतवान् वृत्रमिति कथा भागवते । मुनिनाथो बुद्धः । अनपेक्षिता अनवलोकिता आत्मस्थितिः स्वशरीरस्थितिर्येन तथाभूतः । वठरस-

दधीचः । मुनिनाथोऽप्यनपेक्षितात्मस्थितिरनुकम्पेति कृत्वा कृपावानात्मानं वठरसत्त्वेभ्यः कतिकृत्वो न दत्तवान् । अतः परं भवन्त एव बहुतरं जानन्ति ।' इत्युक्त्वा तूष्णींबभूव भूपतिः ।

26 भूयस्तु बभाषे भदन्तः—'भव्या न द्विरुच्चारयन्ति वाचम् । चेतसा प्रथममेव प्रतिग्राहिता गुणास्तावका अमुना जनेन । 5
उपयोगस्तु निरुपयोगस्यास्य लघुनि गुरुणि वा कृत्ये गुणवदायत्तः' इति । अथ तथा तस्मिन्नभिनन्दितप्रणये प्रीयमाणः पार्थिवस्तत्र तामुषित्वा विभावरीमुपसि वसनालंकारादिप्रदानपरितोषितं विसर्ज्य निर्घातमाचार्येण सह स्वसारमादाय प्रयाणकैः कतिपयैरेव कटकमनुजाह्नवि निविष्टं प्रत्याजगाम । 10

27 तत्र च राज्यश्रीप्राप्तिव्यतिकरकथां कथयत एव प्रणयिभ्यो रविरपि ततार गगनतलम् । बहलमधुपङ्कपिङ्गलः पङ्कजाकर इव संचुकोच चक्रवाकवल्लभो वासरः । प्रकीर्णानि नवरुधिररसारुणवर्णानि

त्त्वेभ्यः सिंहादिश्वापदेभ्यः । अत्र कथा पुरा किल बुद्धः प्रसूतां स्वसुतभक्षणे प्रवृत्तां सिंहीं-स्वमांसप्रदानेन तस्मान्न्यवारयत्सिंहशावकप्राणानरक्षच्च ।

भूय इति । भव्याः श्रेष्ठाः । तावकास्त्वदीयाः । 'तस्येदम्' इत्यनेनाणि 'तवकममकावेकवचने' इत्यनेन तवकादेशः । अमुना मल्लक्षणेन जनेन प्रतिग्राहिता बोधिताः । अत्र तु प्रतिग्रहेर्बोधनार्थमेवयुक्तमन्यथाचेतः गुणान् प्रतिग्राहितमिति प्रयोगः स्यात् बुध्यर्थत्वे तु 'बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया' इति वचनाद्युज्यतेऽयं प्रयोगः।अत एव मनोरमायां 'अजिग्रहत्तं जनको धनुस्तत्' इत्यस्य ग्राह्यत्वेन बोधितवानिति व्याख्यानमेव युक्तम् । प्राचीनमतेन द्विकर्मकत्वस्वीकारेप्यत्र न निर्वाहः । 'ण्यन्ते कर्तुश्च कर्मणः' इति वचनेन चेतस एव कर्मणि लकारस्यौचित्यादिति दिक् । एतेन प्रयोगसौकर्यार्थं 'मनसा गुणाः कायबलिं ग्राहिताः' इति पाठं स्वीकृत्य कायबलेरर्थं क्लिष्टं कथयन्तः परास्ताः । अनुजान्हवि जान्हव्या अन्वायतं निविष्टं स्थितं कटकं सैन्यं प्रत्याजगाम ।

तत्रेति । राज्यश्रियः स्वस्वसुः प्राप्तेर्लाभस्य व्यतिकरस्य संबंधस्य कथां वृत्तान्तं कथयतो निवेदयतो तताराचक्राम । बहलस्य प्रभूतस्य मधुनः पुष्परसस्य पंकेन कर्दमेन पिंगलः कपिलः पंकजाकरः कमलानामाकरः उत्पत्तिस्थानम् पक्षे पंक इव पिंगलस्तद्वर्णो दिवसः । चक्रवाकवल्लभत्वं तत्र तेषां

---

1 'तावकाः कायबलिमिमाममुना.'

लोकालोकजुंषि यजूंषीव कुपितयाज्ञवल्क्यवक्त्रवान्तानि निजवपुषि पूषा
पापमुषि पुनरपि संजहार जालकानि रोचिषाम् । क्रमेण च समुपोह्यमा-
नमांसलरागरोचिष्णुरुष्णांशुरुष्णीषबन्धसहजचूडामणिरिव वृकोदरकर-
मुत्पाटितः प्रत्यग्रशोणितशोणाङ्गरागरौद्रो द्रौणायनस्य, रुद्रभिक्षादा-
नशौण्डपुरमथनमुक्तमुण्डशिरानाडिरुधिरपूरणकपिलः कपालकर्पर इव च 5

वसतेः पंकजानां भार्यासंयोगकारित्वाद्दिवसस्य च बांधवम् । प्रकीर्णानीति ।
नवो रुधिररस इव रक्तद्रव इवारुणो वर्णो येषां तानि लोकालोकं तदाख्यं पर्वतं
जुषंते सेवन्ते तानि तत्पर्वतस्पर्शीनि रोचिषां तेजसां जालकानि समूहान् ।
कथमिव नवेन नूतनेन रुधिररसेनारुणास्ताम्रा वर्णा अक्षराणि येषां तानि
कुपितस्य क्रुद्धस्य याज्ञवल्क्यस्य तदाख्यस्य मुनेर्वक्त्रेण मुखेन वान्तानि तेन
मुखत उद्वान्तानीत्यर्थः । यजूंषीव यजुर्वेदानिव । पापमुषि पापहारके निजवपुषि
स्वशरीरे पुनरपि संजहार संचिकाय । पुरा वैशंपायनात्स्वमातुलादधीतविद्यो
याज्ञवल्क्यः कृतब्राह्मणापराधो वेदान्वमेति गुरुणा शप्तः । ततश्च तेन रक्तवर्णा
वेदा उद्वान्तास्ते च तित्तिरिरूपधारिभिर्मुनिभिर्गृहीताः सा च वेदशाखा तैत्तिरीयेति
प्रसिद्धा । याज्ञवल्क्यस्तु सूर्यं समाराध्य तस्माद्वाजसनेयेति प्रसिद्धां शाखां
जग्राह महातत्वज्ञ इति प्रथां लेभ इत्यादिकथा महाभारते शांतिपर्वणि ।
उष्णांशुर्मुहूर्तमेवंविधोऽदृश्यतेति संबंधः । समुपोह्यमानेन मांसलेन स्निग्धेन
रागेण रक्तिम्ना रोचिष्णुः शोभमानः उष्णांशुः सूर्यः द्रौणायनस्याश्वत्थाम्नः ।
द्रोणशब्दात् 'द्रोणपर्वतजीवन्तादन्यतरस्याम्' इत्यनेन फक् । अयं च प्रत्ययो
गोत्रापत्ये परमनन्तरापत्येऽश्वत्थाम्न्यस्य प्रयोग उपचारादित्यवधेयम् । वृ-
कोदरस्य भीमस्य करेण हस्तेनोत्पाटितो निष्कासितः प्रत्यग्रं नवं शोणितं रक्तं
तदेव शोणस्ताम्रोऽङ्गरागस्तेन रौद्रो भयानकः उष्णीषं शिरोवेष्टनं
बध्यते यस्मिंस्तस्य मूर्ध्नः सहजः सहजातो जन्मनः प्रभृति विद्य-
मानश्चूडामणिः शिखालंकार इव । 'उष्णीषं तु शिरोवेष्टे किरीटे' इति विश्वः ।
अश्वत्थाम्ना सुप्ताः स्वीया पुत्रभ्रात्रादयो हता इत्युपश्रुत्य दुःखस्य परां काष्ठा-
मारूढया याज्ञसेन्या 'यद्यश्वत्थाम्नः शिरश्छित्त्वा नानीयते ततः परित्यक्ष्यन्ते
मया प्राणाः' इत्यभिहितो भीमसेनः प्रतिज्ञाय तद्वधार्थं प्रस्थितः । भ्रातृ
रक्षणार्थं धनंजयो भगवता सह तमनुगतः । तत्र च व्यासप्रार्थनया तमहत्वा
तन्मूर्धस्थो मणिर्भीमेनोत्पाटित इति कथा महाभारते सौप्तिकपर्वणि । रुद्रभिक्षा
भिक्षाविशेषस्तस्या दानशौण्डो बहुप्रदः पुरमथनः शंकरस्तेन मुक्तस्य त्यक्तस्य मु-
ण्डस्य शिरसः शिरानाडीनां रुधिरवाहिनीनां रुधिरपूरणेन रक्तपूरणेन कपिलस्ताम्रः

पैतामहः,पितृवधरुषितरामरागरचितः पृथुविकटकार्तवीर्यांसकुट्टाक-कुठारतुण्डतष्टदुष्टक्षात्रियकण्ठकुहररुधिरकुल्याप्रणालसहस्रपूरितो ह्रद इव दूररोधी रौधिरो, भयनिगूढकरचरणमुण्डमण्डलाकृतिर्गुरुगरुडनखप-ञ्जराक्षेपक्षपणक्षिप्तक्षतजोक्षितो व्यसुर्विभावसुः कमठ इव च लोठ्यमा-नो नभसि, अरुणगर्भमांसपिण्डाण्ड इव च खण्डिमानमानीतो नियतकालातिपातदूयमानदाक्षायणीक्षिप्तो धातुतट इव च सुमेरोः, असुर- 5

पैतामहो ब्रह्मणः कपालकर्परो मस्तकास्थिभाग इव। ब्रह्मणः खंडितस्य पंचमशिरसः कपालं शिवेन करे धृतं तदनुरोधेनेयमुत्प्रेक्षा पितुर्जमदग्नेर्वधेन हननेन रुषितः क्रुद्धो रामो जामदग्न्यस्तेन रागेण क्रोधेन रचितः कृतः। पृथू महान्तौ विकटौ विशालौ कार्तवीर्यांसौ सहस्रार्जुनस्कंधौ तयोः कूल्योरग्रयोः कुट्टाकः छेदनशीलः कुठारः परशुस्तस्य तुण्डं धारा तया तष्टाः तनूकृताः छिन्ना इत्यर्थः ये क्षत्रियास्तेषां कण्ठकुहराणां कण्ठविवराणां रुधिरस्य कुल्याप्रणालानां कृत्रिमाल्पसरित्परंपराणां सहस्रैः पूरितः। रौधिरो रुधिरमयो दूररोधी विस्तीर्णो ह्रदोऽगाधो जलसंचयः इव। भयेन भीत्या निगूढम् एकीकृतं करचरणमुंडं हस्तपादमस्तकं येन सोतएव मंडलाकृतिर्वर्तुलाकारः। गुरुभिर्महद्भिः गरुडनखपंजरैः पंजराकारैर्गरुडनखैः आक्षेपक्षपणमुत्क्षिप्य परित्यागस्तेन क्षिप्तं निसृतं क्षतजं रुधिरं-तेनोक्षितो लिप्तः। गरुडेन पंजराकारैः स्वनखैरूर्ध्वं नीत्वा क्षिप्तोतएव रुधि-रव्याप्तकाय इत्यर्थः। व्यसुर्गतप्राणो नभस्याकाशे लोठ्यमानः परिभ्रमन् व्यसु-र्विगतप्राणो विभावसुस्तन्नामकः कमठः कूर्म इव। सुप्रतीकविभावसुसंज्ञकौ क्रुद्धौ भ्रातरौ परस्परं शप्तवन्तो गजकूर्मयोनिमापन्नौ गरुडेन भक्षणार्थमुत्क्षिप्य सुभद्रसंज्ञके वृक्षे आनीताविति रामायणे वाल्मीकीये अरण्यकांडे पंचत्रिंशे सर्गे। सुमेरोस्तत्संज्ञकपर्वतस्य धातुतटे गैरिकतटे। नियतकालो गर्भस्य नियतावधि-स्तस्यातिपातेनातिक्रमणेन दूयमानया पीड्यमानया दाक्षायण्या मात्रा विनतया क्षिप्तः त्यक्तः। खंडिमानं छेदमानीतः छिन्न इत्यर्थः। अरुणः सूर्यसारथिर्गर्भे मध्ये यस्य सः मांसपिण्डाण्ड इव। शंकरस्तु दाक्षायणीशब्दं कालीवाचकं स्वीकृत्य तया जगतः स्थितिमसहमानया सुमेरोः क्षिप्तस्तटो नु सूर्य इत्यर्थकं व्याख्यात-वांस्तन्न सम्यक्। महाभारते दाक्षायणीशब्दस्य विनतायां रूढत्वात् तया नव-मासावधावतिक्रान्ते सपत्न्या अपत्यान्यसहमानया स्वगर्भः खण्डित इति वृत्ता-न्तानुरोधेन मदीयव्याख्यानस्यौचित्येन सुमेरौ विनतया क्षिप्तस्यारुणस्यैवोत्प्रेक्षण-स्य युक्तत्वमिति दिक्। कथा चेयं महाभारते आदिपर्वणि। असुराणां वधस्या-भिचारो मारणक्रिया तस्याश्चरोरोदनस्य पचनं पाकस्तस्य पिशुनः सूचकः

वधाभिचारचरुपचनपिशुनः शोणितक्वाथकषायितकुक्षिरतिविसंकटः कटाह इव च बार्हस्पत्यः, सद्योगलितगजदानवदेहलोहितोपलेपभीषणः मुखमण्डलाभोग इव महाभैरवस्य मुहूर्तमदृश्यत। जलनिधिजलप्रतिबिम्बितरविबिम्बराजिभास्वराभ्रावलम्बिनी गृहीतार्द्रमांसभारेव चाबभासे वासरावसानवेला वेतालनिभा। ज्वलत्संध्यारागरज्यमानजलप्रवाहः पुनरिव पुराणपुरुषपीवरोरुसंपुटपिष्टमधुकैटभरुधिरपटलपाटलवपुरभवदधिपतिरर्णसाम्। अवसिते संध्यासमये समनन्तरमपरिमितयशःपानतृषिताय मुक्ताशैलशिलाचषक इव निजकुलकीर्त्यां, कृतयुगकरणोद्यतायादिराजराजतशासनमुद्रानिवेश इव राज्यश्रिया, सकलद्वीपजिगी- 5

शोणितस्य रक्तस्य क्वाथेन क्वथनेन कषायिता ताम्रा कुक्षिः पार्श्वभागः मध्यो वा यस्य सः। अतिविसंकटोऽतिविशालः बार्हस्पत्यो देवगुरुकृतः कटाहः पात्रविशेष इव। सद्यो गलितं प्रत्यग्रं गजदानवस्य गजासुरस्य देहस्य लोहितं शोणितं तस्योपलेपेन भीषणो भयंकरः महाभैरवस्य मुखमंडलाभोगो मुखमंडलविस्तार इव। **जलेति**। जलनिधेः समुद्रस्य जले प्रतिबिंबितानां संक्रान्तानां रविबिम्बानां राज्या पंक्त्या भास्वरान् दीप्तिमतोऽभ्रान् मेघानवलंबते सा। वासरावसानं दिनगमनं तस्य वेला कालः गृहीत आर्द्रः प्रत्यग्रो मांससंभारो यया तथैव वेतालनिभा वेतालसदृशी आबभासे शुशुभे। सूर्यप्रतिबिम्बै रक्तानां मेघानां मांससादृश्यम्। **ज्वलदिति**। ज्वलता दीप्तिमता संध्यारागेण रज्यमानोऽरुणितो जलप्रवाहो यस्य सोऽर्णसां पयसामाधिपतिः समुद्रः पुनरिव पुराणपुरुषस्य नारायणस्य पीवरयोः पुष्टयोरूर्वोः सक्थ्नोः संपुटेन पिष्टयोश्चूर्णीकृतयोः मधुकैटभयोस्तदाख्यदानवयो रुधिरपटलेन रक्तसमूहेन पाटलं ताम्रं वपुः शरीरं यस्य सः। **अवसित इति**। संध्यासमये संध्याकालेऽवसितेऽतिक्रान्ते सति। अपरिमितस्यासंख्यस्य यशसः कीर्तेः पाने प्राशने तृषिताय निजकुलकीर्त्या स्ववंशयशसा मुक्ताशैलस्य मौक्तिकपर्वतस्य शिलाया चषकः पात्रविशेष इव। कृतयुगकरणं दुर्जनादिनाशेन सत्ययुगसंस्थापनं तस्मिन्नुद्यते उद्युक्तस्तस्मै राज्यश्रिया राज्यलक्ष्म्या आदिराजस्य मनोर्वैन्यस्य वा राजतशासनमुद्रायाः रौप्यमय्याः शासनमुद्राया निवेशः स्थापनमिव। कार्यप्रवृत्ताय यथा नृपतिः स्वमुद्रालांछितं शासनं यच्छति तद्वत्कृतयुगकरणोद्यतायास्मै दत्तस्य शासनलेखस्य मुद्रेयं नु चन्द्र इति कल्पना। सकलानां द्वीपानां जिगीषायै जयेच्छायै चलिताय निर्गताय आयत्या आगामिशुभेन दैवेन श्वेतद्वीपस्य दूत इव। निशया रात्र्या श्वेतभानुरुपानीयतोपा-

पाचलिताय श्वेतद्वीपदूत इव चायत्या, श्वेतभानुरुपानीयत निशया नरेन्द्रायेति ॥

इति श्रीबाणभट्टकृतौ हर्षचरितेऽष्टम उच्छ्वासः ।

न्हियत । अनेन सूर्यास्तचंद्रोदयवर्णनेन भाविनौ शत्रुनाशस्वोत्कर्षौ हर्षस्य सूचितावित्ति शिवम् ।

धीरेन्द्रदत्रिमसुतो **लक्ष्मी**गर्भसमुद्भवः ।
व्याकरोद्धर्षचरितं **माधवो** विदुषां मुदे ॥ १ ॥
नाधीतं सकलं पतंजलिवचो नो मम्मटः सेवित-
स्तर्काद्दुस्तरकर्कशोक्तिभयतो दूरेण येन स्थितम् ।
आलंब्यैव गुरोः कृपां सुफलदां वाणोक्तिवैशद्यकृत्
सोहं मंदमतिः प्रगल्भधिषणान्क्षन्तुं समभ्यर्थये ॥ २ ॥
वसुलोककुभूमिमिते (१८३८) वर्षे नलाभिधे ।
भीष्माष्टम्यां कृता टीका हरये संनिवेदिता ॥ ३ ॥
सद्रक्षकः स्वकृतिभिः सदलौकिकीभिः
शास्ता खलान् विबुधकार्यकृतावतारः ।
श्रीपांडवावनपरः कमलानिवासः
प्रीतोऽमुया भवतु मे वनमालयेव ॥ ४ ॥

इत्यात्रेय**गजेंद्रगडकर**कुलोत्पन्नसर्वशास्त्रपारंगतविद्वत्समितिसंस्तुत**बालाचार्या**परनामक**श्रीराघवेन्द्राचार्य**चरणपद्माराधकेन तत्तनूजेन सुमंगली-**लक्ष्मी**गर्भसमुद्भवेन बटोदरनराधिशितोलब्ध**व्याकरणनिष्णात**पदवीकेन स्वान्वयालंकारश्री**धीरेन्द्राचार्य**पुत्रीकृतेन **सेतुमाधवेन** कृतायां **हर्षचरित**-व्याख्यायां **बालबोधिन्या**मष्टम उच्छ्वासः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

श्रीवेंकटेशो विजयते ।

हर्षचरितस्थसुभाषितानां संग्रहः ।

[The numbers in the brackets refer to pages of this edition.]

अखिलमनोज्वरप्रशमनकारणं हि भगवती प्रव्रज्या । [252]
अतत्वदर्शिन्यो हि भवन्त्यविदग्धानां धियः । [153]
अतिद्रुतवाहिनी चानित्यतानदी । [251]
अर्थिजने च किमिव नातिसृजन्ति महान्तः । [253]
अदृश्यमानप्रतिप्रहारे पारियात्रे यात्रैव शिथिला । [176]
अनुकम्पाभूमयः प्रकृत्यैव युवतयः किं पुनर्विपदभिभूताः ।[234]
अबलानां हि पतिरपत्यं वाऽवलम्बनम् । [247]
अभिगमनीयाश्च गुणाः सर्वस्य । [215]
अभिनन्दति हि स्नेहकातरापि कुलीनता देशकालानुरूपम् । [92]
अलोहः खलु संयमनपाशः सौजन्यमभिजातानाम् । [223]
अलंकारो हि परमार्थतः प्रभवतां प्रश्रयातिशयः । [224]
आत्मार्पणं हि महताममूलमन्त्रं वशीकरणम् । [196]
उद्वेगमहावर्ते पातयति पयोधरोन्नमनकाले ।
सरिदिव तटमनुवर्षं विवर्धमाना सुता पितरम् । [45]
उपयोगं तु प्रीतिर्न विचारयति । [226]
एतानि खल्वङ्गनस्थानानि संसारस्य । [45]
औरसदर्शनं हि यौवनं शोकस्य । [109]
करिण इव करीरं कोमलमपि कवलयतः कृतान्तस्य कः परिपन्थी । [120]
कस्य न प्रतीक्ष्यो मुनिभावः । [215]
काकोदराभिधानाः कृपणाः कृमयोपि न मृष्यन्ति विकारं किमुत भवादृ-

शास्तेजसां राशयः । [142]
कामं स्वयं न भवति न तु श्रावयत्यप्रियं वचनमरतिकरमितर स्वाभि-
जातो जनः । [78]
किं नाम नालोक्यते जगति जीवद्भिरद्भुतम् । [225]
केवलं कृपाकृतविशेषः सुदूरेण तनयस्नेहादतिरिच्यते दुहितृस्नेहः । [46]
को हि नाम सहते विरहमपत्यानाम् । [45]
गृहगतैरनुगन्तव्या एव लोकवृत्तयः । [45]
छत्रच्छायान्तरितरवयो विस्मरन्त्यन्यं तेजस्विनं जडधियः । [128]
जलेपि ज्वलन्ति ताडितास्तेजस्विनः । [128]
तृणानामुपरि कति कवचयन्त्याशुशुक्षणयः । [119]
दर्पणमिवानुप्रविश्यात्मीयां प्रकृतिं संक्रामयन्ति पल्लविकाः । [40]
दुःखदग्धानां च भूतिरमङ्गला चाप्रशस्ता च निरुपयोगा च भवति [91]
दैवेनापि क्रियते भव्यानां पूर्वसेवेव [210]
द्वयमेव च चतुःसागरसंभूतस्य भूतिसंभारस्य भाजनं प्रतिपक्षदाहि वडवामुखं
वा महापुरुषहृदयं वा । [129]
धीरस्यापि धाष्टर्यमारोपयति हृदयलघिमलङ्घितमतिवल्लभत्वम् । [252]
न च स्वप्नदृष्टनष्टेष्विव क्षणिकेषु शरीरेषु निबध्नन्ति बन्धुबुद्धिं प्रबुद्धाः ।
[131]
न हि कुलशैलनिवहवाहिनो वायवः संनह्यन्त्यातितरले तूलराशौ । [119]
नियतिर्विधाय पुंसां प्रथमं सुखमुपरि दारुणं दुःखम् ।
कृत्वालोकं तरला तडिदिव वज्रं निपातयति । [60]
परलोकसाधनं च धर्मो मुनीनाम् । [234]
पर्यायान्तरितं दास्यमनुतिष्ठन्ति सुहृदः । [188]
पातयति महापुरुषान्सममेव बहूननादरेणैव ।
परिवर्तमान एकः कालः शैलानिवानन्तः ॥ [60]
पिशाचानामिव नीचात्मनां चरितानि छिद्रप्रहारीणि प्रायशो भवन्ति ।
[116]
पुरातन्यः स्थितय एताः केन शक्यन्तेऽन्यथा कर्तुम् । [249]
प्रजाभिस्तु बन्धुमन्तो राजानो न ज्ञातिभिः । [75]

प्रतापसहाया हि सत्ववन्तः। [114]
प्रथमं राज्याङ्गं दुर्लभाः सद्भृत्याः। [40]
प्रबलपङ्क इव सर्वमधस्तान्नयति दासशब्दः। [194]
प्राणरक्षणाच्च न परं पुण्यजातं जगति गीयते जनेन। [234]
प्रायशश्च जनस्य जनयति सुहृदपि दृष्टो भृशमाश्वासम्। [215]
प्रायेण च सत्स्वन्येषु वर गुणेष्वभिजनमेवानुरुध्यन्ते धीमन्तः। [45]
बालविद्याः खलु महतामुपकृतयः। [183]
भक्तजनानुरोधविधेयानि तु भवन्ति देवतानां मनांसि। [12]
भगवती वैधेयेपि धर्मगृहिणी गरिमाणमारोपयति प्रव्रज्या। [215]
भव्या न द्विरुच्चायरन्ति वाचम्। [254]
महासत्वता हि प्रथममवलंबनं लोकस्य पश्चाद्राजबीजिता। [13]
मैत्री च प्रायः कार्यव्यपेक्षिणी क्षोणिभृताम्। [187]
यथा यावज्जीवमावयोरार्तिता प्रतिपद्यते तथार्यपुत्र एव जानाति। [46]
यौवनारम्भ एव कन्यकानामिन्धनीभवन्ति पितरः सन्तापानलस्य। [45]
यं च किल शोकः समभिभवति तं कापुरुषमाचक्षते शास्त्रविदः। [111]
रिपुरुधिरशीकरासारेण श्रीरिव भूरप्यनुरज्यते। [130]
लोके हि लोहेभ्यः कठिनतराः स्नेहमया बन्धनपाशाः। [62]
वरं क्षणमपि कृता मानवता मानवता नमतो नमतस्त्रैलोक्याधिराज्योपभो-
गोपि मनस्विनः। [195]
विधुरयति धीमतोपि धियमतिदुर्धरो बान्धवस्नेहः सर्वप्रमाथी। [75]
विभुरनभिमानः, द्विजातिरनेषणः, मुनिररोषणः, कपिरचपलः, कविरमत्सरः,
वणिगतस्करः, प्रियजानिरकूहनः, साधुरदरिद्रः, द्रविणवानखलः,
कीनाशोऽक्षिगतः, मृगयुरहिंस्रः, पाराशरी ब्राह्मण्यः, सेवकः सुखी,
पारिव्राडबुभुक्षुः, नृशंसःप्रियवाक्, अमात्यः सत्यवादी, राजसूनुर्दु-
र्विनीतश्च जगति दुर्लभः। [113]
शुभमशुभमथापि वा नृणां कथयति पूर्वनिदर्शनोदयः। [16]
शुभागमो निमित्तेन स्पष्टमाख्यायते लोके। [16]
शोको हि नाम पर्यायः पिशाचस्य। [247]
श्रियो हि दोषान्धतादयः कामला विकाराः। [128]

श्रीवेंकटेशो विजयते ।

NOTES.

CHAPTER IV.

हर्षचरितम्—Explain this as हर्षस्य चरितानि हर्षचरितानि. हर्षचरितानि वर्ण्यन्ते यस्मिन् तत् काव्यं हर्षचरितम्. "A poetical composition having for its subject the deeds of Harsha." Cf. "अधिकृत्य कृते ग्रन्थे" पाणिनि 4. 3. 87. and the वार्तिक "लुबाख्यायिकाभ्यो बहुलम्" for the elimination of the taddhita affix अण्. उच्छ्वासः- a division or chapter of a book. The word is derived from उद् + श्वस् to breathe. It comes to have the meaning of "a chapter of a book" probably from the fact that a reader after going to the end of a chapter breathes freely before he enters upon another. उच्छ्वास, however, is a name peculiar to the chapter of a class of poetical composition known as आख्यायिका, such as हर्षचरितम्. Vide our introduction "Âkhyâyikâ and Kathâ," and compare "उच्छ्वासान्तेऽप्यखिन्नास्ते येषां वक्त्रे सरस्वती । कथमाख्यायिकाकारा न ते वन्द्याः कवीश्वराः" stanza 10, ch. 1, हर्ष. In Sanskrit more words than one are used to signify the chapters or divisions of literary works. The following verses give some of these: 'सर्गो वर्गः परिच्छेदोद्घाताध्यायाङ्कसंग्रहाः । उच्छ्वासः परिवर्तश्च पटलः काण्डमाननम् । स्थानं प्रकरणं चैव पर्वोल्लासाह्निकानि च । स्कन्धांशौ तु पुराणादौ प्रायशः परिकीर्तितौ ।'

It has been the practice of Bâṇa in this work to use two stanzas as the heading of each of the chapters. The stanzas contain general propositions and serve a useful purpose, viz., they give us a general idea of what is being described in the chapter following. This reminds us of the custom of Sir Walter Scott who gives an apt quotation at the beginning of each of the chapters of his novels, which serves exactly the same purpose. But the difference between Sir Walter and Bâṇa appears to be that while the great Scottish novelist quotes from the

works of other people, Bâṇa has composed the stanzas himself. This practice of Bâṇa may be compared with the well-known custom of Sanskrit dramatists who give a general idea of the plot of their dramas in their opening stanza or stanzas which contain the necessary benediction.

STANZA 1. Bâṇa is going to describe in the opening passage of the chapter a line of famous kings from which Harsha sprang. He, therefore, tells us in this stanza in a general way that the great become lords of the earth through the force of their intrinsic merit and do not depend for their position on any external things. महान्तो नाममात्रेण भुवः पतयो भवन्ति the great become lords of the earth by (the power of) their name alone. The first line distinguishes the great liege lords of the earth who become so by their very name from other people who attain to the position of Kings through external help and who have to tax their subjects in order to keep themselves in the position they have gained. स्वप्नेऽपि योगं नेच्छन्ति even in a dream they wish (to form) no alliance. There is no wonder if one succeeds in becoming King when one has powerful allies. But without the help of any allies the great become lords of earth. Their very name is sufficient to procure for them the position they deserve. योगः combination, coalition or alliance. योग : may also be taken in the sense of stratagy or any skilful means of bringing about a desired object (युक्ति), such as deceit, treachery, retreat etc. which are resorted to by ordinary persons to raise them to high positions. The great do not stoop to such things. For the latter meaning of योग compare " योगः कर्मसु कौशलम् " भ० गी० II. 50; "तत्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम्। उपायज्ञो मनुष्याणां नरः पण्डित उच्यते॥" म.भ. उद्योगपर्व अ. 33. 34. करग्रहं न कुर्वते: they accept or grasp no taxes. This means that the great are not required to tax their subjects exorbitantly in order to maintain their position. In this stanza Bâṇa also suggests another meaning by the clever use of श्लिष्ट or paronomastic words, the meaning appearing more charming on account of the apparent incongruity involved in the

senses of the words, which has to be removed by understanding the words in a different manner. Thus the words in the stanza mean that the great become भुवः पतयः (husbands of the earth) but they would have nothing of योग (alliance matrimonial) and करग्रहण (acceptance of the hand). But we know that in an ordinary marriage an alliance has to be formed between the two families and the hand of the bride has to be caught hold of by the bridegroom. Without doing these things the great become "husbands of the earth". This sounds like a paradox which is reconciled by understanding the words पति, योग and करग्रहण in the senses explained above. The figure in the stanza is विरोध or विरोधाभास which is thus defined: "विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः" K. P. X. 24. The metre is अनुष्टुभ् or श्लोक proper, the most frequent variety of which is thus defined: "श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्। द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः"

STANZA 2. Having given us in the first stanza a general idea of the greatness of the family in which Harsha was born the poet now proceeds to shadow forth the birth of Harsha himself by telling us that in a royal family though possessing many members there arises but one who is capable of making himself a terror to all the princes. This clearly refers to Harsha, for we know he had vanquished all the princes of Hindusthân. विपुलेऽपि नृपवंशे पृथुप्रतिमः एक एव उत्पद्यते in a royal house, though populous, there arises but one who is like Prithu. पृथु॰—पृथोः प्रतिमा (likeness or resemblance) यस्य, or पृथोः प्रतिमेव प्रतिमा (form) यस्य. This fact is further exemplified by a simile which in its expanded form stands thus: विपुलेऽपि गणाधिपस्य मुखे पृथुप्रतिमः एक एव दन्तः इव like an only tusk of a big form in the mouth of God Gaṇapati though capacious. It will be noticed that the words विपुल and पृथुप्रतिम have a double meaning. पृथुप्रतिमः—पृथ्वी प्रतिमा (form or figure) यस्य. The word would also mean " set at a wide interval", taking प्रतिमा='the space between the tusks in an elephant's mouth', on the authority of मेदिनी 'प्रतिमा गजदन्तस्य बन्धे चानुकृतावपि.' This latter meaning which is accepted by C and T does not appear to us to

be satisfactory in view of the fact that there are no *tusks* in the mouth of Gaṇapati but there is only *a tusk*, so that it will not be proper to speak of the interval *between the tusks* in the case of that deity. Note that एकःएव, the one scion of the royal house, is compared in this stanza to गणाधिपस्य दन्तः and to king पृथु. The common property between these three is सकलमहीभृत्कम्पकृत् *i. e.* causing all Mahîbhrits to shake. The word महीभृत् is paronomastic. With एकः the compound means "causing all monarchs or kings to tremble" in fear, All the princes are afraid of this powerful king and hence the king is said to make them tremble. With दन्तःand पृथुः the expression means "making all the mountains shake." The elephant-headed god makes the mountains shake when he dashes against their sides in what is known as वप्रक्रीडा referred to in Megh. 2 and Raghu. V. 44. In order to understand how king पृथु can be said to shake the mountains we must go to mythology. पृथु was the son of वेन, the son of अङ्ग. He was called the first king and from him the earth received her name, पृथ्वी. His account occurs in more than one Purâṇas. The Vishṇu Purâṇa relates how वेन, who was wicked by nature and prohibited worship and sacrifice, was beaten to death by the pious sages and how the Munies rubbed the right arm of the dead king to produce a son when they saw robbery and anarchism prevailing in the country in the absence of a king and how the majestic form of पृथु, glowing like fire, sprang from that arm. पृथु was immediately declared king and the subject waited upon and informed the new monarch that they were suffering from famine on account of the earth having withheld all plants and vegetables from them. पृथु demanded from the earth all fruits, plants etc. and the earth at last agreed to give them up through fear of his mighty bow and requested him to render her even and plain by removing all the mountains which had made her uneven and unfertile. पृथु thereupon cast aside all the mountains and levelled the earth by the end of his bow, thus bringing into existence such distinctions as towns and

villages on the face of the earth, which had not existed before and rendering the earth fit for cultivation. It is this story of the mountains being dislodged from their positions by पृथु that is referred to in सकलमहीभृत् when applied to पृथु. Vide विष्णुपुराण I. 13. " 'समां च कुरु सर्वत्र क्षीरं येन समन्ततः। वरौषधीबीजभूतं क्षीर सर्वत्र भावयेः' ॥ 81 तत उत्सारयामास शैलान् शतसहस्रशः। धनुष्कोट्या तदा वैन्यस्तेन शैला विवर्धिताः॥ 82 न हि पूर्वविसर्गे वै विषमे पृथिवीतले। प्रविभागः पुराणां वा ग्रामाणां वा पुराभवत्॥ 83 न सस्यानि न गोरक्षा न कृषिर्न वाणिक्पथः। वैन्यात्प्रभृति मैत्रेय सर्वस्यैतस्य संभवः॥ 84" The Mahâbhârata refers to Prithu in the following stanzas which tell us why he was called Prithu, Kshatriya and Râjâ: "प्रथयिष्यति वै लोकान् पृथुरित्येव शब्दितः। क्षताद्यो वै त्रायतीति स तस्मात् क्षत्रियः स्मृतः॥ 138 पृथुं वैन्यं प्रजा दृष्ट्वा रक्तास्मेति यदब्रुवन्। ततो राजेति नामास्यानुरागादजायत॥ 139 महाभा. शान्तिपर्व 28. Bâṇa himself has made a reference to this story in more places than one. Compare "वैन्य इव चापकोटिसमुत्सारितसकलारातिकुलाचलः" K. p. 5; "पृथिवीमिव समुत्सारितमहाकुलभूभृद्व्यतिकराम्" ibid p. 189; "पृथुरिव पृथिवीपरिशोधनावसानसंकलितसकलमहीभृत्समुत्सारणः" Harsha-Charita. VII. For the only tusk of Ganapati cf "विदग्धलीलोचितदन्तपत्रिकाचिकीर्षयेव नूनमनेन मानिना। न जातु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहति" S'i 1. 60. The metre of the stanza is आर्या which is thus defined "यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये चतुर्थके पंचदश सार्या."

PAR. 1. अथ marks the beginning of the new chapter. It is used by Sanskrit writers in the beginning of their works as a sign of auspiciousness Cf. "ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेन मांगलिकावुभौ." The principal sentence is तस्मात्पुष्पभूतेः निर्जगाम राजवंशः from that Pushpabhûti there issued a line of kings. तस्मात्: this refers to the Pushpabhûti who has been talked of in detail in the last chapter and who was the progenitor of a mighty line of kings in which Harsha was born. तत् when used in the sense of either अनुभूत (experienced) प्रक्रान्त (previously mentioned) or प्रसिद्ध (well known) does not require the association of यत्. Cf. "प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते" काव्यप्रकाश VII. Now follows a passage which contains a series of similes for the line of kings issuing from Pushpabhûti. Expand the first simile as fallows:—
पुण्डरीकेक्षणात् द्विजवर...कोषः नाभिपद्म इव पुष्पभूतेः द्विजवर...कोषः राजवंशः

निर्जगाम a line of kings issued from Pushpabhûti like the naval-lotus from Vishnu (of lotus-like eyes). The adjective द्विजवर॰ goes both with नाभिपद्मः and राजवंशः and represents the common property between the two. It means (1) 'the naval lotus' whose calix or bud is voluntarily occupied by the best of the twice-born *i. e.* Brahmâ. (2) 'the line of kings' whose treasures were grasped at will by the best of the twice-born *i. e.* excellent Brâhmaṇas. ब्रह्मा who is here spoken of as the best of the twice-born is the first deity of the sacred Hindu Trinity to whom is entrusted the work of creating the world. Mythology represents him to have been born from, and to be always residing in, a lotus which has sprung from the naval of Vishṇu. Hence he is here said to have voluntarily occupied the lotus-bud coming out from the naval of that lotus-eyed deity. Vide M. Bh. Vanaparva 273 'प्रध्यानसमकालं तु प्रजाहेतोः सनातनः। ध्यानमात्रे तु भगवन्नाभ्यां पद्मः समुत्थितः ॥ 44 ततश्चतुर्मुखो ब्रह्मा नाभिपद्माद्विनिःसृतः। तत्रोपविष्टः सहसा ब्रह्मा लोकपितामहः ॥ 45 '; also Shântiparva 357. 22; and 'संज्ञाप्य नः स्वध्वजभृत्यवर्गान् दैत्यारिरत्यब्जनलास्यनुत्यै। तत्संकुचन्नाभिसरोजपीताद्धातुर्विलज्जं रमते रमायाम्' N. 3. 34. With राजवंशः द्विजवर॰ comes to mean that the treasures of these kings were always at the service of excellant Brâhmaṇas. They could at any time go and demand money from the royal exchequer. In this way each of the following similes should be understood and the adjective explained in two ways. रत्नाकरात् लक्ष्मीपुरःसरः रत्नसंचय इव as from the ocean a collection of jewels with Lakshmî as the principal. रत्नाकरः mine of jewels, the ocean. Cf. "गृह्णन्तु सर्वे यदि वा यथेष्टं नास्ति क्षतिः क्वापि कवीश्वराणाम्। रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः" विक्रमांकदेवचरित 1. 12. The reference is to the mythological churning of the milk-ocean by the gods and the demons for the acquisition of *amrita* or nectar. At this time from the ocean came out a collection of jewels, fourteen in number, and Lakshmî is said to be the principal jewel from among these. पुरःसर must be understood in the sense only, viz., " moving in the front *i.e.* principal or chief" and not in the sense of "the first" in the order of their coming out of the ocean. For we know

from Vishṇupurâṇa that the first jewel that came out of the ocean when it was being churned was the Kâmadhenu. Vide Vishṇupurâṇa 1. 9. 90 "मथ्यमाने ततस्तस्मिन् क्षीराब्धौ दैत्यदानवैः। हविर्धामाभवत्पूर्वं सुरभिः सुरपूजिता." The names of the fourteen jewels are enumerated in the following popular Mangalâshtaka: लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमा गावः कामदुघाः सुरेश्वरगजो रंभादिदेवांगनाः। अश्वः सप्तमुखो विषं हरिधनुः शंखोऽमृतं चाम्बुधेः रत्नानीह चतुर्दश प्रतिदिनं कुर्युः सदा मंगलम्." लक्ष्मीपुरःसरः as going with राजवंशः means having wealth or splendour in its front ' *i. e.* always attended by wealth or splendour. उदयस्थानात् गुरुबुध...प्रायः ग्रहगण इव as from the orient mount a collection of planets mostly consisting of Jupiter (गुरु), Mercury (बुध), Venus (कवि) the Moon (कलावत्), the Sun (तेजस्वि) and Mars (भूनंदन). उदयस्थानम् the place where the sun, the moon etc take their rise, i. e. the eastern mountain. कलावान् the moon who is possessed of digits (कला) sixteen in number. Cf " कला च सा कांतिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी " Ku. 5. 71. तेजस्वी the lustrous i. e. the sun *par excellence.* भूनंदनः the delighter of the earth i. e. Mars who is supposed to be the Son, and hence the delighter, of the earth. गुरुबुध...प्रायः going with राजवंशः means 'mostly consisting of princes-(भूनंदन) who were teachers, wise men, poets, artists (कलावत्) and men of lustre. सगरप्रभावात् महाभारवाहनयोग्यः सागर इव as from the might of Sagara an ocean capable of supporting the great weight (of commerce i. e. of ships carrying on the commerce).This shows that in the time of Bâna sea-trade carried on in ships was quite common. महाभार in the case of राजवंशः means 'the great responsibility' of governing the earth. We have another reading. viz. महीभारवाहनयोग्यः 'capable of supporting the weight of the earth', referring in the case of the ocean to the idea of the earth having been set afloat on the ocean and in the case of the line of kings to the idea of the king being capable of bearing the responsibility of the earth. In the latter case though the idea is the same we get it from the words महीभार more directly. In the case of सागर too, महीभार gives us the idea more directly, though different, than महाभार. We therefore prefer महीभार. For the earth

having been placed on the water, vide Vishṇupurâṇa 1. 4. 'एवं संस्तूयमानास्तु परमात्मा महीधरः । उज्जहार महीं क्षिप्रं न्यस्तवांश्च महाम्भसि ॥ 45 तस्योपरि जलौघस्य महती नौरिव स्थिता । विततत्वात्तु देहस्य न मही याति संप्लवम् ॥ 46'. सगरप्रभावात् The reference here is to the story of Sagarā, a king of the Solar race, who had 60,000 sons by his wife, Sumati. Sagara successfully performed 99 horse sacrifices but when he commenced the hundredth his sacrificial horse was stolen by Indra and carried down to the Pâtâla. Sagara thereupon commanded his 60,000 sons to search it out. Finding no trace of the animal on earth they began to dig down towards the Pâtâla and in doing this thay naturally increased the boundaries of the ocean which therefore came to be called Sâgara. It is thus that the ocean in its present form owes its existence to the might of Sagara who had caused the earth to be dug up through his numerous sons. If we understand सगरप्रभावात् in this way, the difficulty, which the commentator has found, viz., it is the sons of Sagara rather than Sagara himself, whose might has given rise to the *Sâgara* and hence the *Sâgara* cannot be said to have sprung from the might of Sagara, does not arise. The commentator somehow understands Sagara in the sense of "the sons of Sagara" and tries to remove the difficulty. We do not think this is necessary. For though the immediate cause of the digging up the earth was the sons of Sagara yet we have to remember that had there been no such driving force as the mighty will and command of Sagara behind the sons who had merely supplied the physical labour, they would not have achieved what they did. Vide M. Bh. Shântiparva 28. 135 which, with reference to Sagara, says "खानयामास यः कोपात्पृथिवीं सागराङ्किताम् । यस्य नाम्ना समुद्रश्च सागरत्वमुपागतः" and Raghu. 13. 3. "गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरंगे । तदर्थमुर्वीमवदारयद्भिः पूर्वैः किलायं (समुद्रः) परिवर्धितो नः" We have another reading, viz., सगरप्रभवात् which should be explained as सगरः प्रभवः उत्पत्तिकारणं यस्य तस्मात् from him who was born of Sagara *i. e.* sagara's son. The word in this case must be understoood to have been used collectively and hence the singular. This reading we do

not like for three reasons (1) सगरप्रभावात् presents no difficulty as shown above. (2) सगरप्रभव, being a Bahuvrihi compound, is an adjective and has somehow to be understood as a noun. (3) It has to be understood to have been used collectively in order to account for the singular as the sons of Sagara were 60,000 in number. शूरात् दुर्जयबलसनाथो हरिवंश इव as from Shûra the Hari race possessed of Durjaya and Bala· हरिवंशः is that branch of the Yadu race wherein Vishṇu was born as Krishna. दुर्जयः (invincible) means Vishnu in the form of Krishna who was invincible *par excellence.* बलः Balarâma the elder brother of Krishna. शूरः (also written as शूरसेनः or सूरसेन) was the son of देवमीढ born in the Yadu family and the father of वसुदेव, the father of Krishna, and of पृथा, the mother of the Pândavas. Vide M. Bh. Ádiparva 68. 129. " शूरो नाम यदुश्रेष्ठो वसुदेवपिताभवत्। तस्य कन्या पृथा नाम रूपेणासदृशी भुवि" दुर्जयबलसनाथः as going with राजवंशः means 'possessed of invincible might or an unconquerable army.' It should be noticed by the student that पुण्डरीकेक्षणात्, रत्नाकरात् etc with which पुष्पभूति is compared in the foregoing similes appear to have been meant by the poet to be taken as adjectives to पुष्पभूति and hence those words must also be explained in such a way as to qualify पुष्पभूति. So the fully expanded simile in the first case would be पुण्डरीकेक्षणात् द्विज...कोषः नाभिपद्मः इव पुण्डरीकेक्षणात् पुष्पभूतेः द्विज...कोषः राजवंशः निर्जगाम. Explain the other similes in the same way. पुण्डरीकेक्षणात etc. are to be explained in the following way when taken as adjectives to पुष्पभूति. पुण्डरीकेक्षणात् of lotus-like eyes. रत्नाकरात् who was a mine of excellent kings. रत्नम् the best of its class. Cf "जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते." उदयस्थानात् who was the place of prosperity (to his friends). सगरप्रभावात् or सगरप्रभवात् of Sagara-like prowess प्रभावः or प्रभवः might or prowess. शूरात् brave. Construe the next sentence यस्माद्राजवंशात् राजानः अजायन्त in which line were born kings. The rest of the sentence is formed by a series of similes, the construction being exactly similar to that of the last sentence. Expand the first simile as कृतमुखात् अविनष्टधर्मधवलाः प्रजासर्गाः इव कृतमुखात् यस्मात् राजवंशात् अविनष्ट ...धवलाः राजानः अजायन्त and so on with the rest of the similes. We shall

now proceed to explain the double-meaning words in the sentence, taking care to give first the meaning applicable to राजवंशः and राजानः and secondly the other alternative meaning. कृतमुखात् (1) skilful (2) from the commencement of the krita (yuga, supposed to be the golden age). अविनष्ट. (1) those who patronise men who have not lost their Dharma *i.e.* who are following it. अविनष्टः धर्मः येषां तादृशान् धवान् नरान् लान्ति ते (2) lustrous on account of their religion which is not destroyed i. e. is full. कृत is the first of the four Yugas of the world, the other three being त्रेता, द्वापर and कलि. The कृतयुग is the greatest and the best of them all and extends over 17,28,000 years of men. Vide Manu. 1. 69 and Kullukabhatta thereon. These four yugas represent a descending order of moral greatness and धर्म or religion, who is supposed to have four feet, loses one of his feet as it passes through the succeeding Yugas. In the कृतयुग it is in full swing, there being no अधर्म then and has thus four of his feet intact. In त्रेता it loses one of his feet and has only three, thus giving us $\frac{3}{4}$ of धर्म and $\frac{1}{4}$ of अधर्म and so on. In our Kaliyuga Dharma has only one foot. i. e. we have three fourths of Adharma and one fourth of Dharma. It is this special characteristic of having Dharma undiminished which belongs to Kritayuga that is referred to above in the adjective अविनष्ट etc. Vide M. Bh. Vanaparva 151: 'कृतं नाम युगं श्रेष्ठं यत्र धर्मः सनातनः। कृतमेव न कर्तव्यं तस्मिन् काले युगोत्तमे॥12 न तत्र धर्माः सीदन्ति क्षीयन्ते नच वै प्रजाः। ततः कृतयुगं नाम कालेन गुणतां गतम्॥13 आत्मयोगसमायुक्तो धर्मोयं कृतलक्षणः। कृते युगे चतुष्पादश्चातुर्वर्ण्यस्य शाश्वतः॥ 23 त्रेतामपि निबोध त्वं यस्मिन् सत्रं प्रवर्तते। पादेन ह्रसते धर्मो रक्ततां याति चाच्युतः॥ 25 द्वापरे च युगे धर्मो द्विभागो नः प्रवर्तते॥ 28 पादेनैकेन कौन्तेय धर्मः कलियुगे स्थितः॥' 34 and N. 1. 7. प्रजासर्गाः creations of living beings i. e. the created living beings. The alternative meaning given in (2) above to अविनष्ट would also do in the case of 'kings' who then would be famous on account of their religion which they never fail to observe. The colour of fame in Sankrit is by poetical convention supposed to be white. तेजोनिधेः (1) राजवंशः which was the reservoir of splendour *i. e.* which boasted of many brilliant kings. (2)

the sun. प्रतापाक्रांतभुवना: (1) राजान: who dominated the world by their valour (2) किरणा: which occupied the world by their heat or lustre. The kings dominated the world by their valour like the rays of the sun which do so by their heat. भूभृत्प्रभवात् (1) राजवंश: which was the source of kings (2) from Brahmâ who was the creator of mountains as of all other things in the world. 'भूभृत्प्रभवो ब्रह्मा' इति सं. विग्रह...दिङ्मुखा: (1) राजान: who had occupied the quarters by their wars *i. e* who had carried war in all the regions of the earth. (2) गिरय: mountains which occupied the regions by their bodies. The other reading भूभृत्प्रवरात् should be explained as (1) प्रवरा: भूभृन: यस्मिन्. The inversion of the words in the compound being explained away according to 'वाहिताग्न्यादिषु' पा॰ 2. 2. 37. 'From the line of kings which could boast of excellent princes.' (2) From the best of the mountains. We have to suppose in this case that the mountains which now occupy the quarters have ultimately come from that excellent mountains, whichever it may be, whose offshoots the present monutains are. This reading, however, is not good. ब्रह्मकरात् (1) राजवंश:—the royal line which used to contemplate on Brahman. ब्रह्मण: करात् चिन्तकात्- धातुनामनेकार्थत्वात्. It means the royal line produced kings who possessed ब्रह्मज्ञान. (2) From the hand of Brahma. This refers to the belief that the elephants were born from the hand of Brahmâ while he was chanting Sâma hymns. 'सामानि गायत: ब्रह्मण: करात् करिण उत्पन्नेति वार्ता' इति सं॰. Vide Raghu. 16. 3. and Mallinatha thereon. धरणीधारणक्षमा: capable of supporting the earth. The kings support the earth by ruling over it and the quarter elephants (दिग्गजा:) support it by their weight and thus they do not let it be drowned in the sea on which it is set afloat. It is a belief that there are eight elephants placed in each of the eight cardinal quarters to preside over and protect that particular quarter. Their names as given by अमरकोष are as follows: "ऐरावत: पुण्डरीको वामन: कुमुदोऽञ्जन: । पुष्पदंत: सार्वभौम: सुप्रतीकश्च दिग्गजा: ". घनागमात् (1) the royal line, whose learning was deep. (2) the Rainy-season घनानामागम यस्मिन् तस्मात्. Cf. " समागतो राजवदुद्धतध्वनिर्घनागम: कामिजनप्रिय: प्रिये "

Ritu. 2. 1. उदधीन् पातुं उद्यताः (1) ready to guard the oceans. Bâṇa seems to hint that the ancestors of Harsha held sway as far as the ocean and even on it. Whether this was true in the case of Harsha's ancestors or not, this certainly was true in the case of the Emperor Harsha. (2) जलधराः clouds which were ready to drink the ocean. It is one of child-like ideas of Sanskrit poets that the clouds when they get diminished in size by the outpour of water in the rainy season, replenish themselves by drinking water from the rivers or the ocean. Vide "दुष्पूरोदरपूरणाय पिबति स्रोतः-पतिं वाडवो । जीमूतस्तु निदाघसंभृतजगत्संतापविच्छित्तये" Bh. II. and Megh. 48, 51. The adjective is used with reference to this idea. नन्दनात् (1) that gladdens all people (2) the garden of Indra. इच्छाफलदायिनः yielding the fruit of desires. The meaning is the same in both cases. कल्पतरवः the desire-yielding trees of Indra's garden. श्रीधरात् (1) that is the support of wealth (2) from Vishnu. सर्व-भूताश्रयाः (1) who were the supports of all beings. (2) the supports of all elements. विश्वरूपप्रकाराः the variations of the world-form. Vishṇu pervades the whole world and it is hence said to be his body. This body *i. e.* the world is not of course of one kind, but it has many variations. These variations together support the five elements of which the world is composed. When the student comes to the end of this first paragraph he will have observed one of the characteristics of Bâṇa's literary style, which he should expect to meet everywhere. It is the author's over-fondness for puns. In this paragraph almost every word has a double meaning. Though puns sometimes no doubt give us pleasure Bâṇa indulges in them so often and sometimes so artificially that we get quite impatient with him.

PAR. 2. तेषु च एवं उत्पद्यमानेषु क्रमेण प्रभाकरवर्धनो नाम राजाधिराजः उदपादि while those (kings) were being born in this way there was born प्रभा०, the sovereign lord of kings. प्रभाकरवर्धन is the father of Harsha and in the opening of the seventh century of the Christian era he was by far the most powerful king in Hindusthân. He had assumed the title of परमभट्टारकमहाराजा-

धिराज in contrast with the simple महाराज which his father and grandfather bore, as is shown us by the seal of Harsha found at Sonpat. Vide Gupta Inscriptions No 52. Corpus. Ins. Ind. Vol III. p. 231. As the adjectives that follow show us प्रभाकरवर्धन vanquished many people before he became the overlord in Northern India. हूण...केसरी lion to the deer in the form of the Huns. In the sixth century the Huns had received a signal defeat from the combined forces of India, which were led by Yashodharmá of Malva and Balâditya of Magadha. It appears that they still were a powerful people and had their kingdoms at Gândhâra or Peshâwar and at Sakala or Sialkot प्रतापवर्धन seems to have destroyed them, but as seen in the sequel, their destruction was only temporary. सिन्धुराजज्वर: a fever to the king of the Sindu-country. सिन्धु is the portion of the country lying between the Indus and the Jhelum. The kingdom of the Sindhurâja in those days was as extensive as the modern province of Sind. Its king though powerful had been defeated by both प्रभाकरवर्धन and हर्ष. According to Huion Tsang this Sindhurâja was a Shûdra by caste and a Buddhist. Vaidya conjectures that the name of this king was Sahasi II and he is called Shûdra by the Chinese traveller because he belonged to the Maurya dynasty founded by Chandragupta. The Mauryas were looked upon as Shûdras. गुर्जरप्रजागर: who allowed no sleep to the king of Gujarât. The country which was occupied by the Gurjaras in those days is not the modern Gujarât but Rajputânâ. Its capital was Bhinmal. According to Huien Tsang "the king was a Kshatriya by caste, a young man celebrated for his wisdom and courage and a firm believier in Buddhism." Hiuen Tsang had visited the country about 641 A. D. The Gurjara king, therefore, about whom he talks, must have been a son of king Vyagramukha in whose time the noted astronomer Brahmagupta composed his treatise on astronomy in 628 A. D. Though the Gurjara king is here mentioned as having been vanquished by प्रतापवर्धन, his name does not occur in the Digvijaya of Harsha. His conquest by Harsha may, however, be easily presumed.

गान्धारा...पाटलः a bilious fever to the scent-elephant in the form of the lord of Gândhâra. कूटपाकलः a bilious plague to which elephants are subject. Cf 'अभिहन्ति हन्त कथमेष माधवं सुकुमारकायमनवग्रहः स्मरः। अचिरेण वैकृतविवर्तदारुणः कलभं कठोर इव कूटपाकलः' Mal. I. 39, on which Jagaddhara says "कूटपाकलः हस्तिवातज्वरः। 'गजं वातज्वरो हन्ति यथा वै कूटपाकलः' इति वैद्यके." गन्धद्विपः an elephant of the best kind the fragrance of whose ichor other elephants cannot stand. Its characteristics are as follows: ' यस्य गन्धं समाघ्राय न तिष्ठन्ति प्रतिद्विपाः। स वै गन्धगजो नाम नृपतेर्विजयावहः' or 'स्वेदं मूत्रं पुरीषं च मज्जां चैव मतंगजाः। यस्याघ्राय विमाद्यन्ति तं विद्याद्गन्धहास्तिनम्.' Cf. 'शमयति गजानन्यान् गन्धद्विपः कलभोऽपि सन्' V. 5. 18 and Raghu. 17. 70. गान्धार is 'the name of the country commonly called Kandâhâr and lying between the north of India and Persia' (Monier Williams). ' The country of Gândhâra lies along the Kâbul river between the Kunar and the Indus. Its capital was Pushpapura now called Peshawar' (T. R. Krishnacharya. *An Alphabetical Index of Shriman Mahâbhâratam).* Huien Tsang tells us that at his time the ruling family in Gândhâra had been destroyed and the country and the capital were in ruins. Probably there were Huns in this country whom प्रतापवर्धन defeated. लाट... पाटच्चरः a looter of the skill of the Lâtas. पाटच्चरः a robber. Lâta is the southern portion of modern Gujarât. It appears that प्रतापवर्धन after having conquered their country forcibly made the Lâtas work for him as the Germans are now making the Belgians work for them. He is therefore said to be a robber of their skill. मालव...परशु an axe to the creeper of the glory of the Mâlava king. The Mâlava country is the present Mâlwâ. " The people were intelligent, of refined speech and of liberal education. Mâlwâ in the south-west and the Magadha in the north-west were the two countries where learning was prized. In this country virtue was esteemed and humanity respected "(Hiuen Tsang). प्रताप...नामा famed far and wide under a second name Prtâpashila (habituated to displaying valour). The foregoing description of the conquests of Pratâpavardhana would make it clear that he richly deserved the second title Pratâpashila. Now follows a description of प्रतापवर्धन right up

to the end of the paragraph. यः अभिषिच्यमानः...धनानि who at the time of his coronation distributed wealth as if it were the filth (of his body). Just as a person who is being bathed in water (अभिषिच्यमानः) loses all the filth on his body, so प्रभाकरवर्धन when being crowned king (अभिः) lost riches. राज्यांगसंगीनि sticking to the body of royalty or kingdom. Wealth sticks to राज्यांग in the sense that it is very necessary for carrying on the work of government. In this adjective too we recognise the continuance of the simile. Just as filth attaches to the body of a man, so riches which correspond with it attaches to the body (अंग) of royalty. यः परकीयेण...जीवितेन the life of even an enemy, like a straw held (in the mouth) in the van of the battle, dear only to the coward, put him to shame. He was so valiant that he could not stand the sight of even an enemy of his trying to save his life in a mean manner. But such a sight filled him with shame. The force of इव in तृणेनेव is this. Just as the straw in the mouth of an enemy made him feel ashamed, so the very life of the enemy thus saved put him to shame. कातरवल्लभेन goes both with तृणेन and जीवितेन. The straw is dear to the coward because it saves his life which also is dear to him, no matter how it is saved. To carry straw in the mouth is a sign of surrender. Compare our Marâthi proverb ' दातीं तृण धरून शरण जाणें !'. C and T compare Acworth's *Maratha Ballads* p. 43; 'And' twixt the teeth a straw is fit, For curs who arm but to submit. ' यः करभृत...सहायेन who was pained to have in battles for his companion his own image reflected in the brillant (धौत) sword-blade which his hand bore. When he carried his brilliant sword in his hand in his battles, his image was reflected therein. He thereupon become conscious of a companion who would share his military glory. He therefore was pained at heart. रिपुणां ...नमता (supply अदूयत) even his bow which bent in battles (प्रधनेषु) before his foes gave him tortures. He had such high notions of manly pride that he did not like his bow bending before his foes in battle. This means he was a very valiant and proud king. यो मानी...आविद्यत. This may be explained in

two ways: (1) मानसे न अखिद्यत who, a proud man, was never fatigued in mind. Though the exertions that he underwent gave him physical fatigue, he never felt himself mentally exhausted. Inspite of all his physical exhaustion and fatigue he kept his mental energy always in tact. (2) मानसेन अखिद्यत he was vexed only in the mind. मानस here stands for the proud ambitions that he cherished in his mind and that only troubled him. For a third interpretation vide com. यश्चान्तर्गत...लक्ष्मीम् who kept his royal majesty steadfast, as if pinned (कीलिताम्) by the implanted (अन्तर्गत) arrow-points of numberless foes (who were also अन्तर्गत dead). When in battles his foes discharged arrows at his body, they really did him no harm. On the contrary they conferred a benefit upon him by keeping with their arrow-heads the royal splendour steadfast on his body. The metaphor is of a person who is crucified with nails in a certain place so that he cannot leave it. The ultimate meaning is that the more he fought with his enemies the more stable his position as king became. यः सर्वासु दिक्षु पृथुभिः दण्डयात्रापथैः भृत्योपभोगाय... बहुधा who, as it were, portioned out the earth in many ways in all directions for the use of his attendants by the broad paths (prepared) for the march of his armies. प्रतापवर्धन appears to have constructed many broad metal roads, running all over his empire with a view to facilitate the movements of his armies. The poet imagines that he is by these roads, as it were, parcelling out the earth in so many portions for his attendants to use and enjoy. The construction of roads of this kind has attracted the attention of Kings in India from very ancient times. Not only were such roads constructed in the time of the Emperor Harsha *i. e.* in the first half of the seventh century A. D. but as early as third century B. C. the Great Maurya Emperor, Chandragupta, also had caused a long road to be constructed right up from the frontier of his empire in the north-west of India down to his capital, Pâtaliputra,—the Royal Road which struck Magasthenes so much when he arrived in Pâtiliputra as

